
श्रीं नमो गणेशाय ।

# धर्मरत्ने

# कालविवेकः ।



## प्रथमोऽध्यायः ।

त्रिभुवनभवनस्थाप्रलयविधानेषु मूर्त्तिभेदेन ।
विधिविष्णुरुद्रनामपुरुषः कालो नमस्तस्मै ॥*

---

* उमापदाम्भोजयुगे मनो मुहु-
र्मधुव्रतं सद्विदुतिर्वितन्यते ।
प्रयुञ्जता श्रीमधुसूदनेन सत्-
समाहृते कालविवेकसंग्रहे ॥

ग्रन्थसमाप्तिप्रतिबन्धकविघ्नविघाताय समुचितमङ्गलरूपपरमेश्वरप्रणामरूपमङ्गलमाचरन् शिष्यप्रवृत्त्यर्थं ग्रन्थस्याभिधेयप्रयोजनसम्बन्धांश्च प्रदर्शयन् ग्रन्थकृत् समुद्दिशति त्रिभुवन इत्यादि । अत्राभिधेयः कालविवेकः प्रयोजनन्तु कालनिर्णयाधीनयथाविहित-कालकृतकर्म्मसम्पत्त्या स्वर्गापवर्गादि । अतएव—

गणिताज्ज्ञायते कालो यत्र तिष्ठन्ति देवताः ।
वरमेकाहुतिः काले नाकाले लक्षकोटय इति स्मरन्ति ॥

सम्बन्धश्च ग्रन्थेन सह ज्ञाप्यज्ञापकभावः ।

श्लोकार्थस्तु त्रिभुवनेत्यादि । त्रिभुवनानां त्रिजगतां भवनं सृष्टिः स्था स्थितिः पालन-

**कालः कैश्चिदबुद्धः कैश्चित् सङ्क्षिप्तश्च वचननिबद्धः ।**
**इति मन्दमतीनामपि सुबोधकरणी मया क्रियते ॥***

---

मिति यावत् प्रलयो ध्वंसः तेषां विधानेषु तद्रूपकार्य्यविधानेषु यो मूर्त्तिभेदः मूर्त्तिः शरीरं तस्य भेदः विभिन्नत्वं तेन मूर्त्तिभेदेन विधिर्ब्रह्मा हिरण्यगर्भाख्यः, विष्णुः प्रसिद्धः, रुद्रः संहारकः शिव इति नाम यस्य तादृशः यः पुरुषः परमपुरुषः कालः महाकालस्वरूपः ।

ब्रह्मादीनां कालस्वरूपत्वमाह ब्रह्माण्डपुराणं ३२ अध्याये ।

ब्रह्मा विष्णुश्च यज्ञश्च कालस्यैव कलात्रयः ।
सर्व्वस्यैव हि कालेषु चतुर्मूर्त्तिर्महेश्वरः ॥ इत्यादि ।
कालः सृजति भूतानि पुनः संहरति क्रमात् । इत्यादि ।
एवं स कालो भगवान् देवर्षिपितृदानवान् ।
पुनः पुनः संहरते सृजते च पुनः पुनः ॥

विष्णुपुराणञ्च—अनादिर्भगवान् कालो नान्तोऽस्य द्विज विद्यते ।

अविच्छिन्नास्ततस्ते ते स्वर्गस्थित्यन्तसंयमाः ॥
गुणसाम्ये ततस्तस्मिन् पृथक् पुंसि व्यवस्थिते ।
कालस्वरूपं रूपं तद्विष्णोर्नैव वर्ण्यते ॥

इत्याद्यभिधाय ब्रह्मा भूत्वास्य जगतो विसृष्टौ संप्रवर्त्तते ।

सृष्ट्वा पात्यनुयुगं यावत्कल्पविकल्पना ॥
सत्त्वभुग्भगवान् विष्णुरप्रमेयपराक्रमः ।
तमोद्रेकी च कल्पान्ते रुद्ररूपी जनार्द्दनः ॥ तृतीयाध्याये ।

तस्मै कालस्वरूपाय नमः नमस्कारोऽस्तु ।

* कालः कैश्चिदिति । कैश्चिदिति निबन्धकारैः कालः कर्म्मणां कालः अबुद्धः स्वनिबन्धे नोक्तः कैश्चिन्निबन्धकारैश्च सङ्क्षिप्तः सङ्क्षेपेणोक्तः उभयथापि सम्यक्कर्म्मोपपत्तिर्न भवतीति ध्वनितम् । वचननिबद्धः वचनेन मनुवाक्याद्यनुसारेण निबद्धः विस्तारक्रमेणोक्तः सन्दर्भरूपः मन्दमतीनां मूर्खानामपि मया सुबोधनी असुबोधनः सुबोधनः क्रियते सुखबोध्यः क्रियत इत्यर्थः ।

अथ विवेचनम् । कालाधीनत्वात् विधिनिषेधानाम् ।

तदाह व्यासः ।

तिथिनक्षत्रवारादिकालभागेषु यः सदा ।
विहितं वा निषिद्धं वा पालयंस्त्रिदिवं व्रजेत् ॥*

ननु विवित्त एव ज्योतिःशास्त्रेण, प्रतिपदादिदर्शान्तकालो नक्षत्रादिकश्च निर्णयार्थत्वादेव तस्य ।† अतएव पठन्ति ।‡

वेदा हि यज्ञार्थमभिप्रवृत्ताः
कालानुपूर्व्वा विहिताश्च यज्ञाः ।
तस्मादिदं कालविधानशास्त्रं
यो ज्योतिषं वेद स वेद वेदम् ॥§

यथा शिखा मयूराणां नागानां मणयो यथा ।
तद्वेदाङ्गशास्त्राणां गणितं मूर्द्धनि संस्थितम् ॥¶

---

* तिथिनक्षत्रवारादीति । कालविभागेषु कालविशेषेषु विहितं निषिद्धं वा तिथिनक्षत्रवारादि यो जनः सदा पालयन् पालयति विहितं करोति निषिद्धं नाचरति स त्रिदिवं स्वर्गं व्रजेत् गच्छेत् । वारादि इत्यत्र आदिपदेन योगादीनां ग्रहणम् ।

† नन्वित्यादि । तस्य दर्शान्तकस्य तिथिस्वरूपस्य नक्षत्रादिकस्य च निर्णयार्थत्वादेव प्रतिपदादिदर्शान्तकालस्वरूपतिथिनक्षत्रादिकश्च ज्योतिःशास्त्रेण इत्यर्थः । विविक्तो निर्णीत एव । विविक्तः विचधातो रूपम् ।

‡ अतएवेति । यत एव ज्योतिःशास्त्रेण तिथ्यादयो निर्णीता अतएवेत्यर्थः ।

§ वेदा हीति । हि यतो यज्ञार्थं वेदा अभितः सर्व्वतोभावेन प्रवृत्ताः यज्ञाश्च कालानुपूर्व्वा कालाधीना विहिताः तस्मात् यो जनः इदं कालाभिधानं कालविधायकं ज्योतिषं ज्योतिःशास्त्रं वेद जानाति स जनो वेदं वेदशास्त्रं वेद जानाति इत्यर्थः ।

¶ यथा शिखेति । शिखा यथा मयूराणां मूर्द्धनि संस्थिता एवं मणयश्च सर्पाणां

अप्रदीपा यथा रात्रिरनादित्यं यथा नभः ।
तथासांवत्सरो राजा भ्रमत्यन्ध इवाध्वनि ॥*
मुहूर्त्ततिथिनक्षत्रयुतवश्वायनानि च ।
सर्व्वाणि व्याकुलानि स्युर्न स्यात् सांवत्सरे यदि ॥†
वैशाखादिमासाश्च लोकप्रसिद्धाः‡, तत् किं विवेचनेन§, सत्यम् अहोरात्रव्यापिनि तिथ्यादौ तत्कार्य्यासंशयः ।¶ दृष्टिक्षासादिना

मूर्द्धि संस्थिता: तथा वेदाङ्गानां शास्त्राणां शिक्षाकल्पादिकाङ्गशास्त्राणां मूर्द्धि अग्रे गणितं ज्योतिःशास्त्रं स्थितं परिगणितम् ।

* अप्रदीपा इति । प्रदीपरहिता रात्रिर्यथा यथा वा आदित्यरहितं सूर्य्यशून्यं नभ आकाशं तथा असांवत्सरो ज्योतिर्ज्ञरहितो राजा अध्वनि पथि अन्ध इव भ्रमति । तथा चामरः—सांवत्सरो ज्योतिषिकः दैवज्ञगणकावपि ।

† मुहूर्त्त इति । मुहूर्त्ततिथिनक्षत्राणि ऋतवः अयनानि च सर्व्वाणि व्याकुलानि विफलानि च स्युः यदि सांवत्सरो ज्योतिर्वित् न स्यात् न वर्त्तते ।

‡ वैशाखादिमासा इति । आदिपदेन ज्यैष्ठादिग्रहणं लोकप्रसिद्धाः अमरादिप्राचीन-लोकसिद्धाः विशाखानक्षत्रयुक्ता पौर्णमासी वैशाखी, सा चास्मिन् मासे स वैशाखः । तथाच पुष्ययुक्ता पौर्णमासी पौषी, मासे तु यत्र सा नास्ति स पौषः माघाद्याश्चैवमेकादशा-परे । चकारात् तदूनकादिनतिथ्यादयः समुच्चीयन्ते ।

§ तत् किमिति । तत् तस्मात् वैशाखादिमासादेर्लोकप्रसिद्धत्वात् विवेचनेन मासादिविवेचनेन किं प्रयोजनं स्वीकृत्य समाधत्ते ।

¶ सत्यमित्यादि । अहोरात्रव्यापिनि तिथ्यादौ यदा तिथिरहोरात्रव्यापिनी तदा तत्कार्य्यासंशयः । तत्तिथिनिमित्तकोपवासादिकार्य्ये असंशयः संशयो नास्ति दिनद्वयास्पर्शात् उपवासादेरहोरात्रसाध्यत्वाच्च ।

तु दिनद्वयेऽपि तत्कार्य्यस्य सम्भवात्,* कुत्र तत्क्रियेति।† वैशाखादिपदार्थश्चान्द्रः सौरो वेति सन्देहादस्ति विवेचनप्रयोजनम्। द्वयोरपि शास्त्रे निर्देशात्।

तथाच पितामहः।‡

दर्शाद्दर्शश्चान्द्रः त्रिंशद्दिवसस्तु सावनो मासः।
रविसंक्रान्तिः क्वचित् चिह्नं सौरोऽपि निगद्यते तज्ज्ञैः॥§

तथाच ब्रह्मसिद्धान्तः।

चान्द्रः शुक्लादिदर्शान्तः सावनस्त्रिंशता दिनैः।
एकराशौ रवेर्यावत् कालं मासः स भास्करः॥

ननु तथाषाढ़ादिपदवाच्यनिरूपणं वृथा मासविशेषाणां जातिभेदेनैव व्यवस्थितत्वात्।

---

* द्वद्विक्रासादिना तु इति। यदा तु तिथिर्द्वद्विक्रासवशात् दिनद्वयव्यापिनी तदा तत्तिथिनिमित्तकर्मणो दिनद्वयेऽपि सम्भवात्।

† कुत्र तत्क्रियेति। किं पूर्व्वदिने किं वा परदिने तत्क्रिया तत्तत्तिथिनिमित्तकर्म्मणः कर्त्तव्यता, सम्भवादित्युपलक्षणं खण्डतिथौ अष्टीरात्रसाध्योपवासादेरसम्भवोऽपि द्रष्टव्यः।

‡ तथाचेति। वैशाखादिमासादेश्चान्द्रत्वे सौरत्वे प्रमाणं दर्शयति।

§ दर्शाद्दर्श इति। दर्शादनन्तरं शुक्लप्रतिपदमारभ्य दर्शपर्य्यन्तं मासश्चान्द्रः मुख्यचान्द्रः। तथाच—

चान्द्रः शुक्लादिदर्शान्तः सावनस्त्रिंशता दिनैः।
एकराशौ रवेर्यावत्कालं मासः स भास्करः॥ इति।

त्रिंशद्दिवसः सावनः सौरसावनः रविसंक्रान्तिचिह्नं रविसंक्रान्तिचिह्नितं राशिभोगावच्छिन्नं तथाच एकराशिरविभोगावच्छिन्नः कालः सौरमासः।

यथा पारस्करः ।

अमावस्यापरिच्छिन्नो मासः स्याद्ब्राह्मणस्य तु ।
संक्रान्तिपौर्णमासीभ्यां तथैव नृपवैश्ययोः ॥*

अमावस्यान्तादुपक्रान्तस्तदन्तेनैव समाप्तश्चान्द्रो ब्राह्मणस्यैव ।† संक्रान्त्युपक्रमः संक्रान्त्यन्तरं यावत् सौरः क्षत्रियस्यैव ।‡ पौर्णमास्युपक्रान्तस्तदन्तेनैव समाप्यश्चान्द्रो वैश्यस्यैवेत्युक्तत्वात् ।§ तथा कर्ममेदेनैव मासभेदव्यवस्था श्रूयते ।¶

* ननु तथाषाढ़ादिपदवाच्यनिरूपणमिति । आषाढ़ादिपदवाच्यस्य आषाढ़ादिपदशक्यस्य चान्द्राषाढ़ादौ आषाढ़ादिपदानां शक्तेर्निरूपणं वृथा व्यर्थं मासविशेषाणां जातिभेदेनैव ब्राह्मणादिवर्णविशेषेण व्यवस्थितत्वान्नियमितत्वात् । तथाच यदि जातिभेदेन व्यवस्था स्यात् तदा ब्राह्मणस्यैव चान्द्रमासः न क्षत्रियादेः, क्षत्रियस्यैव सौरमासः न ब्राह्मणादेः, वैश्यस्यैव गौणचान्द्रो मासः नान्यस्य एवं नियमः स्यात्, अपरश्च चान्द्र एव ब्राह्मणस्य न सौरादिः, सौर एव क्षत्रियस्य न चान्द्रादिः, गौणचान्द्र एव वैश्यस्य न मुख्यचान्द्रसौरादिः, एवमपि नियमः स्यात् विनिगमनाविरहात् । तथा सति आषाढ़ादिपदानां साधारण्येन चान्द्राषाढ़ादौ सौरादौ वा शक्तिस्वीकारो न घटते चान्द्रसौरादिमासानां ब्राह्मणादिवर्णविशेषनियन्त्रितत्वेन साधारण्ये शक्तिग्रहासम्भवादित्यर्थः ।

† अमावस्यान्तात् उपक्रान्त इति । शुक्लप्रतिपदमारभ्य तदन्तेन अमावस्यान्तेनैव समाप्तः शुक्लप्रतिपदादिदर्शान्त एव चान्द्रः मुख्यचान्द्रः, ब्राह्मणस्यैव एतत् ।

‡ संक्रान्त्युपक्रम इति । एकसंक्रान्तेरुत्तरकालमारभ्य अपरसंक्रान्तिकालं यावत् रश्मिकराशिभोगावच्छिन्नकालः सौरः, एतत् क्षत्रियस्यैव ।

§ पौर्णमास्युपक्रान्त इति । पौर्णमास्या ऊर्ध्वं कृष्णप्रतिपदमारभ्य तदन्तेनैव समाप्तः अपरपौर्णमासीपर्यन्तकालश्चान्द्रः गौणचान्द्रः, एतत् वैश्यस्य ।

¶ तथा कर्ममेदेनैव इति । मासभेदेन मुख्यचान्द्र-गौणचान्द्र सौरमासभेदेन ।

यथा पितामहः।

आब्दिके* पिटकार्य्ये(१)† च मासश्चान्द्रमसः स्मृतः।
विवाहादौ‡ स्मृतः सौरो यज्ञादौ सावनः स्मृतः (२) ॥§

तथा पारस्करः।

विवाहोत्सवयज्ञेषु सौरं मानं प्रशस्यते।
पार्व्वणे त्वष्टकाश्राद्धे चान्द्रमिष्टन्तथाब्दिके ॥¶

नैतत् अनयोरेव परस्परव्याहतत्वात्,‖ ब्राह्मणस्य सकलकर्म्मस्वेवा-

---

(१) पिटक्रत्ये इति पाठान्तरम्। (२) मतः इति पाठान्तरम्।

---

* आब्दिके इति। अब्दे भवम् आब्दिकं सपिण्डीकरणरूपम्।

† पिटकार्य्य इति। एतत् आब्दिकविशेषणम् आब्दिकरूपे सपिण्डीकरणरूपे पिटकार्य्ये मासश्चान्द्रः मुख्यचान्द्ररूपः अथवा आब्दिके सपिण्डीकरणे पिटकार्य्ये च कृष्णपक्षविहितपार्व्वणादौ चकारः समुच्चये चान्द्रमसौ मासः मुख्यगौणरूपेण द्विविधोऽत्र ग्राह्यः। तथाच आब्दिकरूपे सपिण्डीकरणे मुख्यचान्द्रमासः पिटकार्य्ये च कृष्णपक्षविहितपार्व्वणे गौणचान्द्रमासः कृष्णपक्षविहितपार्व्वणस्य ब्रह्मपुराणीयत्वात्।

‡ विवाहादाविति। आदिना अयनविहितचूड़ादेः राश्युल्लेखेन विहितयागानवयज्ञादेश्च ग्रहणम्।

§ यज्ञादौ सावनः स्मृत इति। मन्त्राख्युपास्यान्यथ सावनेन इत्यादिविशेषोक्तिरत्र मानुकूलम् अन्यत्र तु अयनविहितपशुयागाभिप्रायेण समाधेयम्।

¶ विवाहोत्सवयज्ञेषु इति। विवाहरूपोत्सवकर्म्म। यज्ञोऽत्र अयनादिविहितपशुयागादिपरः। विवाहे सौरमानग्रहणन्तु आषाढ़े धनधान्यभोगरहिता इत्यादिना सौराषाढ़ादिगणनायां ज्ञेयम्।

‖ नैतदिति। अनयोः जातिभेदकर्म्मभेदयोः परस्परव्याहतत्वात् परस्परविरुद्धत्वात् विरुद्धतां दर्शयति।

मावास्यापरिच्छिन्नमासविधानात्। विवाहादिषु यज्ञादिषु च तस्यैव प्राप्तेः। विवाहादौ सौरमासस्य यज्ञादौ सावनस्य च विधिर्न स्यात्।* तथा च क्षत्रियस्य सौरमासनियमात् कर्म्मभेदेन चान्द्रसावनविधानं व्याहन्येत।† एवं वैश्यस्यापि बोद्धव्यम्। कर्म्मभेदेनैव तत्तन्मासप्रतिनियमात्,‡ जातिभेदे मासभेदविधिर्व्याहन्येत।§ मासि मासि वोऽशनमिति श्रुत्या सर्व्ववर्णानामेवामावास्यान्ते चान्द्रे मासि श्राद्धविधानात्।¶

---

* ब्राह्मणस्येति। सकलकर्म्मस्वेव अमावस्यापरिच्छिन्नमासविधानात् श्राद्धयज्ञविवाहादिसकलकर्म्मस्वेव मुख्यचान्द्रमासविधानात् अमावास्यापरिच्छिन्नकालः स्यात् ब्राह्मणस्य च इति विशेषवचनादिति शेषः तस्यैव चान्द्रमासस्यैव प्राप्तेः। विधिर्न स्यात् ब्राह्मणस्येति शेषः।

† क्षत्रियस्य सौरमासनियमादिति। संक्रान्तिपौर्णमासीभ्यां तथैव नृपवैश्ययोरिति वचनादिति शेषः कर्म्मभेदेन आब्दिकपिण्डक्रियायज्ञादिकर्म्मभेदेन चान्द्रसावनविधानम् आब्दिके पिण्डकार्य्ये चान्द्रविधानं यज्ञादौ सावनविधानं व्याहन्येत विरुद्धेत।

‡ एवं वैश्यस्यापि बोद्धव्यमिति। वैश्यस्य गौणचान्द्रे सकलकर्म्मविधानादिति भावः। कर्म्मभेदेन सपिण्डीकरणपार्व्वणविवाहादिकर्म्मभेदेन तत्तन्मासप्रतिपादनात् मुख्यचान्द्रगौणचान्द्रसौरादिमासविधानात्।

§ जातिभेदे इति। ब्राह्मणादिजातिभेदे मासविधिः मुख्यचान्द्रमासविधिर्ब्राह्मणस्य सौरमासविधिः क्षत्रियस्य गौणचान्द्रमासविधिर्वैश्यस्य इत्येवं मासविधिर्व्याहन्येत विरुद्धेत।

¶ अत्र हेतुमाह मासि मासि वोऽशनमिति श्रुत्या इति। मासि मासि प्रतिमासि वो युष्माकं पितृणाम् अशनं श्राद्धमिति श्रुत्या सर्व्ववर्णानां ब्राह्मणादिवर्णचतुष्टयानाम् अमावास्यान्ते चान्द्रे मासि शुक्लप्रतिपदादि-अमावास्यान्तमुख्यचान्द्रमासि इति ग्रन्थकर्त्तुरभिप्रायः वस्तुतस्तु अमावास्यान्ते अमावास्या अन्ते यस्य तस्मिन् कृष्णपक्षे इत्यर्थः चान्द्रे मासि गौणचान्द्रे मासि पार्व्वणस्य ब्रह्मपुराणीयत्वात्। ननु मासपदस्य मासविशेषशक्तेः प्राग-

यात्राजसिंहतुरगोपगते वरिष्ठा (१)
मध्या शनैश्चरबुधोशनसां गृहेषु।
भानौ कुलीरभृषवृश्चिकगेति दीर्घा
शस्ता तु देवलमतेऽध्वनि पृष्ठतोऽर्के ॥*

इत्यादिभिश्च सर्वेषामेव सौरवैशाखभाद्रपौषाणां यात्रार्थं विधा-

(१) वरिष्ठा इत्यत्र कनिष्ठेति राजमार्त्तण्डे पाठः।

नुपदिष्टत्वात् मासि मासि वीऽशनमित्युक्तेः कथम् अभावस्यान्ते चान्द्रे मासि इत्युक्तं सङ्गच्छते इति चेन्न मासि मासपरपक्षस्यापराह्णः श्रेयानिति शातातपवचनेन प्रौष्ठपद्याः परः पक्षः तत्रापि च विशेषत इति वचनेन अथ श्राद्धममावस्यायां पितृभ्यो दद्यात् पञ्चमीप्रभृति वापरपक्षस्य इत्यादिवचनेन च पक्षग्रहणाच्चान्द्रावगतेस्तदेकवाक्यतया चान्द्रमासलाभात्।

* यात्राज इति। भानौ सूर्ये मेषसिंहधनुषि उपगते सति यात्रा वरिष्ठा श्रेष्ठा, मकरकन्याकुम्भमिथुनतुलाराशिषु भानौ उपगते मध्या यात्रा मध्यमा, कर्कटमीनवृश्चिकराशौ भानौ गते अतिदीर्घा चिरप्रवासयात्रा शस्ता, तथा देवलमुनिमते पृष्ठे रवौ अध्वनि पथि यात्रा शस्ता पृष्ठे रविस्तु चक्रभ्रमणवशेन यस्यां दिशि सूर्यस्तां दिशं पृष्ठतः कृत्वा गच्छेत्। यथा लग्नेऽर्के पश्चिमदिशं गच्छेत् रवेः पूर्वस्थितत्वात्, चतुर्थस्थरवौ दक्षिणां दिशं रवेरुत्तरावस्थितत्वात्, सप्तमस्थे पूर्वां दिशं गच्छेत् रवेः पश्चिमावस्थितत्वात्, दशमस्थे उत्तरां गच्छेत् रवेर्दक्षिणावस्थितत्वात्, एवं विदिक्ष्वपि आग्नेयादिकोणेषु। तथाच द्वितीयतृतीयलग्नस्थे सूर्ये नैर्ऋत्यां गच्छेत् रवेरैशान्यामवस्थानात्। पञ्चमषष्ठलग्नस्थे सूर्ये आग्नेय्यां गच्छेत् रवेर्वायुकोणावस्थानात्। अष्टमनवमलग्नस्थे सूर्ये ऐशान्यां गच्छेत् रवेर्नैर्ऋतकोणावस्थानात्। एकादशद्वादशलग्नस्थे सूर्ये वायव्यां गच्छेत् रवेराग्नेयकोणावस्थानादिति बोध्यम्। तथाच देवलः। लग्नस्थे वरुणाशां द्विवृकस्थे दक्षिणां रवौ यायात्। सप्तमगे पूर्वाशां दशमस्थे सूरि सौम्याम्॥ द्विविस्थे नैर्ऋत्यां पञ्चषष्ठ आग्नेय्याम्। नवाष्टम ऐशान्याम् अन्तीपान्ते च वायव्यामिति॥ वरुणाशां पश्चिमदिशं, द्विवृकस्थे चतुर्थस्थे, सौम्यासुत्तराम्।

नात्। अजो मेषः। तुरगो धनुः,* अनैश्चरस्य गृहं मकरकुम्भौ। बुधगृहं मिथुनकन्ये। उशनसः वृषतुले। † मासोपवासषाण्मासिकादिकृच्छ्राणां ‡ प्रायश्चित्ततया सावनेनैव मासेन सर्व्वार्थं विधानान्न जातितो व्यवस्था। तथा यज्ञादौ सावनः स्मृतः विवाहोत्सवयज्ञेषु सौरं मानमित्यनयोरपि विरोधात्। किञ्च ब्राह्मणस्यामावास्यान्त इति नियमविधिरयं न वा यदि नियमविधिस्तदा किं ब्राह्मणस्यैव दर्शान्तो नान्यस्येति नियम्यते। यद्वा दर्शान्त एव तस्य नान्य इति यदि प्रथमः कल्पः तदा मासि मासि वोऽग्नमिति क्षत्रियादीनां न स्यात्। एवञ्च क्षत्रियस्यैव सौरो वैश्यस्यैव सावन§ इति। तत्र सौरसावनयोरपि नियतसम्बन्धा-

---

* तुरगो धनुरिति। तथाच दीपिका—अश्विनीमघमूलादौ मेषसिंहहयादय इत्यादि। अश्विन्यादौ मेषादयः मघादौ सिंहादयः मूलादौ हयादय इत्यर्थः।

† उशनसः शुक्रस्य वृषतुले इति। तथाच—

कुजशुक्रबुधेन्दर्कसौम्यशुक्रावनीभुवाम्।
जीवार्किभानुजेज्यानां क्षेत्राणि सुरजादयः॥

‡ मासोपवासेत्यादि। उपवासस्त्रिरात्रं वा मासः पक्षस्तदर्द्धकम्। षड्द्वादशाष्टादि कार्य्यं शुद्धिफलार्थिभिरिति विश्वामित्रवचनेन मासोपवासादिकृच्छ्राणां प्रायश्चित्ततया सावनेनैव मासेन विधानात् गणनाविधानादित्यर्थः। तथाच गार्ग्यः। आयुर्दायविभागश्च प्रायश्चित्तक्रियासधा। सावनेन तु कर्त्तव्या मन्त्राणामप्युपासना इति॥

§ वैश्यस्यैव सावन इति। चान्द्रसावनः गौणचान्द्र इत्यर्थः न तु सौरसावनः संक्रान्तिपौर्णमास्योर्मध्ये तयैव नृपवैश्ययोरिति वचनेन पौर्णमासी उपक्रान्तस्तदन्तेनैव समाप्यश्चान्द्रो वैश्यस्यैवेति श्लोकव्याख्यानेन च वैश्यस्य गौणचान्द्रमासावगमात्। तथाच सावनस्त्रिविधः सौरसावनः चान्द्रसावनः नाक्षत्रसावनश्च। सौरसावनस्त्रिंशदहोरात्रात्मकः चान्द्रसावनः क्षयप्रतिपदादिपौर्णमास्यन्तः त्रिंशत्तिथ्यात्मकः नक्षत्रसावनश्च आयुर्दाये स्मृतं प्राज्ञैर्नाक्षत्रं

उभयनियम एव स्यात् ब्राह्मणस्यैव* दर्शान्तो दर्शान्त एव ब्राह्मणस्य इति। सौरसावनमासविहितेषु कर्म्मसु नाधिकारो† ब्राह्मणस्य स्यात्। एवं क्षत्रियस्यैव सौरः सौर एव क्षत्रियस्य। वैश्यस्यैव सावनः सावन एव वैश्यस्येति जात्यन्तरसम्बन्धिमासगृहीतेषु कर्म्मस्वनधिकारः स्यात् ‡। शूद्रस्य त्रिविधमासविहितकर्म्मस्वनधिकार आपद्येत।§ अथ दर्शान्त एव ब्राह्मणस्य नान्य इति। तदपि जातित्रयसम्बन्धिवचनत्रयपर्य्यालोचनया पुनरप्युभयनियमापत्तेः¶ प्राक्तनमेव दूषणं स्यात्। अथ नायं नियमविधिः। तदा विधेयाभावादविधित्वमेवास्य नास्तीति यथाकथञ्चिदेवास्य

---

षष्टिनाड़िकम् इति वचनात् त्रिंशत्षष्टिदण्डदिनात्मकः। अतएव रामप्रकाशे यद्यपि कृष्णादिमासे सावनात्मके च इत्युक्तम्। मलमासटीकायां गोस्वामिभट्टाचार्येणापि सावनः सौरसावनः त्रिंशतिथ्यात्मकश्चान्द्रसावन इत्यपि बीध्यमित्युक्तम्। तत्र तयोः क्षत्रियवैश्ययोरित्यर्थः।

* नियमाकारं दर्शयति ब्राह्मणस्यैवेत्यादि।

† सौरसावनविहितेषु कर्म्मसु नाधिकार इति। सौरसावनविहितकर्म्मसु क्षत्रियवैश्ययोरेव नियमावगमात्।

‡ जात्यन्तरसम्बन्धिमासगृहीतेषु कर्म्मसु अनधिकारः स्यादिति। तत्तज्जातीयनियमितकर्म्मसु जात्यन्तरस्य अधिकाराभावस्य स्वतःसिद्धत्वात्। शूद्रस्य त्रिविधमासविहितकर्म्मसु ब्राह्मणनियमितमुख्यचान्द्र-क्षत्रियनियमितसौर-वैश्यनियमितगौणचान्द्रमासेषु इत्यर्थः।

§ शूद्रस्य अधिकारसम्पादनाय आह अथेति। तथाच दर्शान्त एव ब्राह्मणस्य नान्य इत्येवं नियमे ब्राह्मणस्य मुख्यचान्द्रमासनियमात्। क्षत्रियस्य सौरमासनियमात्। वैश्यस्य गौणचान्द्रमासनियमाच्च। तादृग्विविधकर्म्मसु शूद्राधिकारे बाधकाभाव इति भावः।

¶ उभयनियमापत्तेरिति। विनिगमनाविरहेण तादृशोभयनियमस्यावश्यकत्वादिति भावः।

वर्णना कार्या। * अथ प्रायशो धर्मकार्येषु अमावास्यान्तमास-सम्बन्धात्तत्प्रधानत्वात् ब्राह्मणानाममावास्यान्तो मासो दर्शितः। युद्धार्थश्च यात्राप्रधानत्वात्† क्षत्रियाणां यात्रादेश सौरेणैव विधानात्‡ क्षत्रियाणां संक्रान्तिपरिच्छिन्नः प्रदर्शितः। वैश्यस्यैव कुशीदप्रधानत्वात्§ पौर्णमास्याश्च सायं चन्द्रोदयेन सुव्यक्तज्ञान-त्वात्तदन्तेनैव मासेन कुशीदव्यवहारः¶ सुकर इति वैश्यस्य साधूक्तो

---

* यथाकथञ्चित् वर्णनां दर्शयति अथ प्रायशो धर्मकार्येष्वित्यादि। धर्मकार्येषु चान्द्रायणव्रतादिषु अमावास्यान्तमाससम्बन्धात् मुख्यचान्द्रमाससम्बन्धात्।

† तत्प्रधानत्वादिति। तत् चान्द्रायणादिव्रतं प्रधानं यस्य तस्य भावः तस्मात्। तथाच प्रधानत्वेन ब्राह्मणस्य चान्द्रायणादिव्रतविधानादित्यर्थः। तथाच तिथिकृत्ये च क्षणादीन् व्रते युक्तादिमेव चेत्यादिवचनादिति शेषः युद्धार्थश्च यात्राप्रधानत्वात् यात्रां विना युद्धकरणासम्भवेन युद्धसुद्दिश्य गमनस्यैव सुतरां प्रधानत्वात्।

‡ यात्रादेश सौरेणैव विधानादिति। तथाच विष्णुधर्मोत्तरे। अध्वायनञ्च ग्रहचार-कर्म सौरेण मासेन सदाध्यवस्येदिति। अध्वायनं अध्वगमनं यात्रामिति यावत्। संक्रान्ति-परिच्छिन्न आदित्यराश्येकभोगावच्छिन्नः कालः सौर इति यावत्। एकराशौ रवेर्यावत् कालं मासः स भास्कर इति ब्रह्मसिद्धान्तात्।

§ कुशीदप्रधानत्वादिति। कुशीदेति वाणिज्योपलक्षणं तदेव प्रधानं यस्य तस्य भावः तस्मात् सुव्यक्तज्ञानत्वात् चन्द्रोदयेन प्रकाशत्वेन रात्रावपि वाणिज्यादिकर्मणः सुख-साध्यत्वात् तदन्तेनैव मासेन क्षणप्रतिपदादिपौर्णमास्यन्तमासेन गौणचान्द्रेणैवेति यावत् सुकरः अनायाससाध्यः।

¶ साधूक्त इति। ब्राह्मणस्य मुख्यचान्द्रव्यवहारः क्षत्रियस्य सौरव्यवहारः वैश्यस्य गौणचान्द्रमासेन कुशीदव्यवहारश्च यथाकथञ्चित् सम्भवपरत्वेन उपपादित इत्यर्थः न तु व्यवस्थार्थः न तु नियमार्थः। इति हेतौ नियमाद्यसम्भवादित्यर्थः। वाच्यनिरूपणं मासपदस्य प्रवृत्तिविवेचनं युक्तं कर्तुं युक्तमित्यर्थः तथाच जातिभेदेन यदि मासभेदः स्यात् तदा मास-

न तु व्यवस्थार्थ इति वाच्यनिरूपणं युक्तम्। तत्र प्रयोगमात्रेण तावन्न वाच्यत्वाध्यवसानं सम्भवति। देशभेदेन चान्द्रे सौरे च प्रयोगदर्शनात् विशेषानवधारणात्* न च यववराहवत् प्रयोगान्निर्णयः† उभयोरपि तदविशेषात्‡।

---

पदस्य वाचनिरूपणमनावश्यकमिति भावः। तत्र कर्म्मभेदस्थले वाच्यत्वाध्यवसानं पदनिष्ठ-वाचकतानिरूपितवाच्यतानिश्चयो न सम्भवति।

* देशभेदेन कर्म्मभेदेन चान्द्रे सौरे च प्रयोगदर्शनात् मासपदप्रयोगदर्शनात् नाना-शक्तिकल्पनागौरवमित्यभिप्रेत्याह विशेषानवधारणादिति। तथाच उभयत्र प्रयोगदर्शनेन विनिगमनाभावेन विशेषे मासविशेषे अनवधारणात् वाच्यत्वावधारणाभावादित्यर्थः।

† न च यववराहवच्छास्त्रप्रयोगान्निर्णय इति। तथाच दीर्घशूके आर्य्याणां यवव्यव-हारात् म्लेच्छानान्तु प्रियङ्गुषु यवव्यवहाराच्च एवं शूकरे आर्य्याणां वराहव्यवहारात् म्लेच्छानान्तु कृष्णशकुनौ वराहव्यवहाराच्च यववराहपदयोर्वाच्यसन्देहे अधीते मोदमानाः ह्वीत्तिष्ठन्तीति वराहं गावोऽनुधावन्तीति शास्त्रप्रयोगात् यथा दीर्घशूके यवपदस्य शूकरे च वराहपदस्य वाच्यत्वनिर्णयः तद्वदत्रापि शास्त्रप्रयोगात् मासपदस्य वाच्यत्वनिर्णयः स्यादिति। न च नहीत्यर्थः।

‡ अत्र हेतुमाह उभयोरपि तदविशेषात् उभयोरपि सौरचान्द्रोभयत्रापि तदविशे-षात् शास्त्रीयप्रयोगाविशेषादित्यर्थः। यववराहयोर्वाच्यत्वनिर्णयमाह अधिकरणमालायां माधवाचार्यः। यथा—यवादिशब्दाः किंस्विदर्थाः नो वार्य्यम्लेच्छसाम्यतः।

दीर्घशूकप्रियङ्ग्वाद्या इत्येऽप्यर्था विकल्पिताः॥
यवान्या इति शास्त्रस्यप्रसिद्धिस्तु बलीयसी।
शास्त्रीयधर्म्मे तेनात्र प्रियङ्ग्वादिर्न गृह्यते॥

यवमयस्वरूपं भवति। वाराही उपानहावुपमुच्यत इति श्रूयते। तत्र यवशब्दमार्य्या दीर्घशूके प्रयुञ्जते। वाराहशब्दञ्च शूकरे। म्लेच्छास्तु यवशब्दं प्रियङ्गुषु वाराहशब्दं कृष्णशकुनौ। तथा सति लोकव्यवहारेण निश्चितेषु शब्दार्थेषु आर्य्यम्लेच्छप्रसिद्धयोः समानबलत्वादुभयविधा अप्यर्थाः विकल्पेन स्वीकार्य्या इति प्राप्ते ब्रूमः। शास्त्रीयधर्म्मावे-

तथाहि सौरो वैशाखादि*रित्याह भागुरिः ।

वसन्तश्चैत्रवैशाखौ ज्ञेयौ तौ मधुमाधवौ ।
ज्यैष्ठाषाढ़ावृतुर्ग्रीष्मः शुक्रशुचौ च तौ स्मृतौ ॥
प्रावृट् श्रावणभाद्राख्यौ नभोनभस्यसंज्ञितौ ।
मासौ शरदिषोर्ज्जौ च तावाश्वयुजकार्त्तिकौ ॥
सहःसहस्यौ हेमन्तो मार्गपौषौ च तौ स्मृतौ ।
तपस्तपस्यौ शिशिरो मासौ तौ माघफाल्गुनौ ॥

तथा विष्णुपुराणे ।

त्रिंशन्मुहूर्त्तं कथितमहोरात्रन्तु यन्मया ।
तानि पञ्चदश ब्रह्मन् पक्ष इत्यभिधीयते ॥
मासः पक्षद्वयेनोक्तो द्वौ मासावर्कजावृतुः ।
ऋतुत्रयञ्चाप्ययनं द्वे अयने वर्षसंज्ञिते† ॥

बोधे शास्त्रप्रसिद्धिर्बलीयसी । प्रत्यासन्नत्वात् अविच्छिन्नपारम्पर्य्यागतत्वाच्च शास्त्रे च यवविध्यर्थवाद एवं श्रूयते । यत्रान्न ओषधयः म्लायन्ते अधैते मोदमाना इवोत्तिष्ठन्तीति । इतरौषधिविनाशकालेऽतिवृद्धिर्दीर्घशूकेषु दृश्यते न तु प्रियङ्गुषु तेषामितरौषधिपाकात् पूर्व्वं पच्यमानत्वात् । उपानद्विध्यर्थवादस्यैवं भवति । वराहं गावोऽनुधावन्तीति गवामनुधावनं शूकरे भवति न तु कृष्णशकुनौ । तस्माद्दीर्घशूकादिर्यवादिशब्दार्थः ;

* सौरो वैशाखादिः निरुपपदं वैशाखादिपदं सौरवैशाखादिपरमिति भागुरिराह तदेवोपपादयति वसन्तश्चैत्रवैशाखाविति ।

† त्रिंशन्मुहूर्त्त षष्टिदण्डात्मकं तानि पञ्चदश पञ्चदश मुहूर्त्तानि पक्षः मासाइमित्यर्थः । मासः सौरमासः पक्षद्वयेन पञ्चदशाहोरात्रात्मकार्द्धमासद्वयेन त्रिंशदहोरात्रेणेति यावत् एतत्तु सारसिकनियमादुक्तं रविगतेर्मन्दत्वामन्दत्वाभ्यां त्रिंशदहोरात्राधिकन्यूनकालेनापि सौरमासः भवितुमर्हति ।

तदेवं वसन्तादिपदैर्मीनमेषादि*राशिद्विकद्विकमासभोगावच्छिन्न-भेदेन च षड़तवोऽभिधीयन्ते। तद्वाचकानान्तेषां चैत्रवैशा-खादिपदद्विकद्विकसामानाधिकरण्यात् सौरवाचकत्वं निर्णीयते।

अतएव भारते† ।

कार्त्तिकस्य तु मासस्य प्रवृत्ते प्रथमेऽहनि।
त्रयोदश्यान्तु तद्वृत्तं चतुर्दश्यां हतो नृपः‡ ॥

न हि चान्द्रकार्त्तिकस्य त्रयोदशी§ प्रथमदिवसो भवति।

तथा श्रुतिरपि¶ ।

* सौरमासं स्पष्टयति मीनमेषादीत्यादि। सौरचैत्रवैशाखादीनां द्वितयेन द्वितये-नेत्यर्थः। तथाहि सौरचैत्रवैशाखौ वसन्तऋतुः एवं सौरज्यैष्ठादयः ग्रीष्मादयः ऋतवो ज्ञेयाः। यत एव निरूपपदमासपदस्य सौरपरत्वम् अतएवेत्यर्थः।

† भारते इति। भारतस्य सभापर्व्वणि इत्यर्थः।

‡ चतुर्दश्यां हतो नृप इति। नृपो मगधाधिपतिः जरासन्ध इत्यर्थः। मुद्रितमहा-भारतीयसभापर्व्वणि तु अविकलतद्वचनं नास्ति परन्तु पूर्व्वार्द्धमात्रं किन्तु तत्रापि प्रवृत्ते इत्यत्र प्रवृत्तमिति विशेषः। यथा—

कार्त्तिकस्य तु मासस्य प्रवृत्तं प्रथमेऽहनि।
अनाहारं दिवारात्रमविश्रान्तमवर्त्तत ॥
तद्वृत्तन्तु त्रयोदश्यां समवेतमहात्मनोः।
चतुर्दश्यां निशायान्तु निवृत्तो मागधः क्रमात् ॥

§ नहि चान्द्रकार्त्तिकस्य त्रयोदशीति। तथाच कार्त्तिकस्य मासस्य प्रथमेऽहनि प्रवृत्ते सति त्रयोदश्यां तिथौ तदयुद्धं वृत्तमित्यर्थः। भीमजरासन्धयोरिति शेषः।

¶ श्रुत्यापि ऋतुष्व सौरमासघटित इति साधयति तथा श्रुतिरपीति। तपसस्पत्नौ माघफाल्गुनौ शिशिरौ शिशिरसंज्ञकौ ऋतुरिति अत्र मासद्वयस्यैककर्त्तृतया वेदः प्रमाणमितिवदेकवचनं साधु अतएव प्रथमा व्युत्पत्तिवादे भट्टाचार्य्येण नियम उक्तः।

तपस्तपस्यौ शिशिरावृतु(१)र्मधुश्च माधवश्च वासन्तिकावृतुः। शुक्रश्च शुचिश्च ग्रैष्मावृतुः। अथैतदुदगयनं देवानान्दिनम्। नभो नभस्यश्च(२) वार्षिकावृतुः। इषश्च ऊर्ज्जश्च शारदावृतुः। सहश्च सहस्यश्च हैमन्तिकावृतुः। अथैतद्दक्षिणायनन्देवानां रात्रिरित्यादि।

ऋतुत्रयसम्बन्धिनां मासानां तपस्तपस्यादिपदैरभिधानम्। वार्षिकादिऋतुत्रयसम्बन्धिनां नभोनभस्यादिपदैरभिधानम्।

तेषामेव* च गाथाः श्रूयन्ते।

उपयामगृहीतोऽसि मधवे त्वा गृह्णामि। उपयामगृहीतोऽसि माधवाय त्वा गृह्णामीत्यादि।

---

(१) ग्रैशिरावृतुरिति हैमाद्रौ पाठः।

(२) नभश्च नभस्यश्च इति हैमाद्रौ पाठः। एवं सहश्च सहस्यश्च इत्यपि पाठः।

---

यथा यत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्य्यविषयसङ्ख्याविरुद्धसङ्ख्याया अविवक्षितत्वं तत्र विशेष्यविशेषणपदयोः समानवचनत्वमिति नियमः। अतएव पुरूरवौ मात्रवसौ विश्वेदेवा इत्यादौ द्वित्वविशिष्टयोः पुरूरवमात्रव:प्रकृत्योर्विशेषणतया विवक्षितत्वात् तद्वाचकपदस्य द्विवचनान्तता। वेदाः प्रमाणमित्यत्र विशेषणपदोत्तरविभक्त्या बहुत्वविरुद्धमेकत्वं विवक्षितमित्यादि।

* तेषामेव चेति। तेषां मधुमाधवादीनां गाथा तत्तत्पदघटितयजुर्व्वेदोक्तमन्त्रः तदेव दर्शयति उपयामगृहीतोऽसीत्यादि। अत्र भाष्यं ऋतुग्रहश्चरती द्वीणकलशादुपयामगृहीतोऽसि मधवे त्वेति द्वादश प्रतिमन्त्रमध्वर्य्योः पूर्व्वः पूर्व्वो मन्त्र उत्तरः उत्तरः प्रतिस्थातुरिति। अध्वर्य्युप्रतिस्थातारावृतुग्रहे द्वादशभिरनुतिष्ठतः उपयामेत्यादयो द्वादश मन्त्राः तत्र षट्सु मन्त्रयुग्मेषु पूर्व्वः पूर्व्वो मन्त्रोऽध्वर्य्योः उत्तर उत्तरः प्रतिस्थातुः। द्वादश लिङ्गोक्तानि हे ऋतुग्रह त्वं उपयामेन गृहीतोऽसि मधवे मधुनाम्ने चैत्रमासाय त्वा त्वां गृह्णामि माधवाय

एवं शुक्राय शुचये नभसे नभस्यायेत्यादिनामभिरपरेषां मासानामत्रापि मधुमाधवादिपदानां वासन्तादिवाचसौरचैत्रवैशाखादिपर्य्यायत्वमेव। तपस्तपस्यादिपदैर्हि उत्तरायणसम्बन्धिनः षण्मासाश्च सौरा उच्यन्ते। नभोनभस्यादिपदैश्च षण्मासा दक्षिणायनसम्बन्धिनोऽभिधीयन्ते।

तथाहि विष्णुपुराणवचनम्।

अयनस्योत्तरस्यादौ मकरं याति भास्करः*।
ततः कुम्भञ्च मीनञ्च राशिं राश्यन्तरं द्विज॥
त्रिष्वेतेष्वथ भुक्तेषु ततो वैषुवतीं गतिम्।
प्रयाति सविता कुर्व्वन्नहोरात्रं ततः समम्॥
ततो रात्रिः क्षयं याति वर्द्धतेऽनुदिनं दिनम्।
ततश्च मिथुनस्यान्ते परां काष्ठामुपागतः।
राशिं कर्कटकं प्राप्य कुरुते दक्षिणायनम्†॥

---

वैशाखाय त्वां गृह्णामि मधुमाधवौ वासन्तौ मधुप्रमुखमन्नं वसन्ते प्रपद्यते। एवं शुक्राय ज्यैष्ठाय त्वां गृह्णामि इत्यादि यजुर्वेदसंहिता-सप्तमाध्याये चिंशन्मन्त्रं द्रष्टव्यम्। उपयामः पात्रविशेषः।

* विष्णुपुराणवचनेनापि ऋतुघटकमासानां सौरत्वं प्रतिपादयति तथाहि विष्णुपुराणम्। अयनस्योत्तरस्यादौ उत्तरायणस्यादौ भास्करः सूर्य्यः मकरं मकरराशिं याति गच्छति ततश्च मकरसंक्रान्तिमारभ्य उत्तरायणं प्रवृत्तमित्यर्थः। एतदुत्तरायणनिरूपणं श्रौतस्मार्त्तादिकर्म्मार्थं न तु सूर्य्यस्य प्रथमोत्तरदिग्गमनारम्भकालज्ञापनार्थं सौरपौषस्य एकादशदिवसे तद्दिग्गमनस्य नियमितत्वात्।

† तत इत्यादि। ततो राशेः तस्मात् मकरराशितः कुम्भं मीनञ्च राश्यन्तरं भास्करो याति इत्यनुषङ्गेनान्वयः। एतेषु त्रिषु राशिषु मकरकुम्भमीनराशिषु भुक्तेषु सत्सु ततस्तदन-

तेन तपस्तपस्यादिपदानां सौरमासादिवचनत्वावधारणात् तप-

---

न्तरम् अहोरात्रं समं समरात्रिन्दिवं कुर्वन् वैषुवतीं गतिं मेषराशौ गमनं प्रयाति करोती-त्यर्थः। परन्त्विदानीं चैत्रस्य दशमदिवसे समरात्रिन्दिवं दृश्यते। विषुवारम्भकालो यथा—

मृगसंक्रान्तितः पूर्वं पश्चात्तारादिनान्तरे।
एकवर्षे चतुःपञ्चपलमानक्रमेण तु॥
षट्षष्टिवत्सरानेकदिनं स्यादयनं रवेः।
एवं चतुःपञ्चदिनमयनारम्भणं क्रमात्॥
व्युत्क्रमेण च तद्वत् स्यादुदग्यानं रवेर्ध्रुवम्।
कर्किसंक्रमणे तद्वदभितो दक्षिणायनम्॥
अयनांशक्रमेणैव विषुवारम्भणं तथा।
रविसंक्रान्तितो मेषतुलयोरभितः पुनः॥
विषुवं मीनकन्यार्द्धे त्वेकाद्यैन्द्रशकाब्दके।
दिनमानाद्य मीनार्द्धान्मेषार्द्धे पालिकं शतम्॥
ततो वृषार्द्धपर्य्यन्तमशीतिपलभाजिनी।
मिथुनार्द्धे चतुस्त्रिंशत् पलानां वर्द्धते क्रमात्॥
कर्कटार्द्धन्तु षट्त्रिंशत् सिंहार्द्धन्तु द्व्यशीतिकम्।
कन्यार्द्धन्तु द्विनवतिः क्रमाच्छुध्यति वासरे॥
कन्यार्द्धाद्रजनीमानं बोध्यं पूर्वक्रमेण हि।
दिने दिने भागहारान्मानं बोध्यं दिवानिशोः॥
एकमानं दण्डषष्ट्या त्यक्त्वान्यमाननिर्णयः।
षट्षष्टिवत्सरानेवं ततः स्यात् षोड़शांशके।
पुनस्तद्वत्सरांस्तद्वत् एवं सप्तदशादिके॥ इति ज्योतिस्तत्त्वम्।

अन्यच्च।

मेषसंक्रमतः पूर्वं पश्चात्तारादिनान्तरे।
प्रातिलोम्यानुलोम्येन विषुवारम्भणं भवेत्॥

स्तपस्यादिपदैरवधृतपर्य्यायभावानां* माघादिशब्दानामपि सौरनामत्वं श्रुतित एवावधार्य्यते । यथा य एवं विद्वानमावास्यायां यजेत इत्यादिवाक्येऽमावास्यादिशब्दस्याग्नेयादिनामत्वे†ऽवधृते प्रसिद्धतत्पर्य्यायभावस्य‡ दर्शपदस्याप्यवधृतमिति दर्शपौर्णमासवाक्ये प्रवृत्तं नाम तदुच्यते§। पर्य्यायत्वञ्च लोकस्य प्रसिद्धं(१) कोषे

(१) लोके सुप्रसिद्धमिति क्वचित् पाठः । लोकस्याप्रसिद्धमिति क्वचिदादर्शे पठितम् ।

चयोदशदिने सौरे चैत्रे नक्षतिथौ शुके ।
विषुवारम्भणं तत्र समं साम्नं दिवानिशोः ॥

इत्यादि सत्तत्त्वमुक्तावलीधृते अनुसन्धेयम् । ततो रात्रिः क्षयं याति क्षसति। काष्ठां दिशम्।

* अवधृतपर्य्यायभावानामिति । अवधृतः पर्य्यायभावः एकार्थकत्वेन सङ्गीचरितत्वं येषामिति विग्रहवाक्यम् ।

† अमावास्यायां यजेत इत्यादिवाक्ये अमावास्यायाम् अमावास्यया यजेत इत्यादिवाक्ये इत्यर्थः । अमावास्यायामित्यत्र अमावास्यापदं कर्म्मणः कालपरम् अमावास्ययेति अमावास्यापदं कर्म्मणो नामधेयपरं तृतीयाभेदे अमावास्यादिशब्दस्य आदिना पौर्णमासीशब्दो गृह्यते । तथाच श्रुतिः । अमावास्यायाम् अमावास्यया यजेत पौर्णमास्यां पौर्णमास्या यजेत इति । तथाहि अमावास्याशब्दस्य अमावास्याख्ययागस्य आग्नेयादिनामत्वे आदिना ऐन्द्रदध्नैन्द्रपयसोः ग्रहणं तथाच आग्नेयाष्टाकपालो अमावास्यां पौर्णमासामनुयाजमन्तरा यजति ताभ्याम् अग्नीषोमीयमेकादशकपालं पौर्णमास्यां प्रायच्छत् ऐन्द्रं दधि अमावास्यायाम् ऐन्द्रं पयो अमावास्यायाम् तथाहि अमावास्याशब्दस्य अमावास्याख्ययागशब्दस्य आग्नेयादिनामत्वे आग्नेयाष्टाकपालैन्द्रदध्नैन्द्रपयोनामत्वे अमावास्यायागस्य निरूक्तयागत्रयात्मकत्वादिति भावः ।

‡ अवधृते निश्चिते प्रसिद्धतत्पर्य्यायभावस्य अमावस्या त्वमावास्या दर्शः सूर्य्येन्दुसङ्गम इति कोषात् ।

§ एकार्थबोधकत्वेन सङ्गीचरितस्य दर्शपदस्यापि अवधृतमिति आग्नेयादिनाम इति शेषः इति हेतौ इति हेतोः दर्शपौर्णमासवाक्ये प्रवृत्तं तन्नाम उच्यते इत्यर्थः ।

दर्शितम्। तथा माघेऽथ फाल्गुने स्यात्तपस्य: फाल्गुनिक इत्यादिना। भागुरिणापि निबद्धम्। तपस्तपस्यौ शिशिरौ तौ मासौ माघफाल्गुनौ इत्यादिना*। एवं चान्द्रोऽपि श्रौत: स्मार्त्तश्च†।

तथाच विष्णुपुराणम्।

माघासिते पञ्चदशी कदाचि-
दुपैति योगं यदि वारुणेन।
ऋक्षेण काल: स परः पितॄणां
न ह्यल्पपुण्यैर्नृप लभ्यतेऽसौ‡॥

वारुणं शतभिषा तदा कुम्भे चन्द्र: तेन मकरस्थादित्येन एकराशिस्थितत्वाभावाद्वारुणयुक्तामावास्या मकरे न लभ्यते। कुम्भादित्ये तु तदा भवति। न चासौ सौरो माघ: चान्द्रश्च स:।

तथा श्रुति:।

सा वैशाखस्यामावास्या या रोहिण्या सम्पद्यते तस्यामादधीत।

---

* इत्यादिना आदिना—स्याच्चैत्रे चैचकौ मधु:। वैशाखे माधवौ राधौ ज्यैष्ठे शुक्र: शुचिस्त्वयम्॥ आषाढ़े श्रावणे तु स्यात् नभा: श्रावणिकश्च स:। सुर्नभस्यप्रौष्ठपद-भाद्रभाद्रपदा: समा:॥ स्यादाश्विन इषोऽप्याश्वयुजोऽपि स्यात्तु कार्त्तिके। बाहुलोर्ज्जौ कार्त्तिकिक इति ग्रहणम्।

† सौरे मासपदप्रयोगं दर्शयित्वा चान्द्रेऽपि तद्दर्शयति चान्द्रोऽपि श्रौत: स्मार्त्तश्चेत्यादि।

‡ माघासिते माघकृष्णपक्षे पञ्चदशी अमावास्या तदा कुम्भे चन्द्र: इति सौरफाल्गुन एव शतभिषानक्षत्रयुक्तामावास्या सम्भवति। चन्द्रसूर्य्ययोरेकराशिस्थलनियमात्। स: माघ: इत्यर्थ:।

वृषस्थ एव हि सूर्ये रोहिण्यामावास्या भवति। वृषभोग्यत्वाद्रोहिण्याः न तु मेषस्थे*। चन्द्रसूर्ययोर्भिन्नराशिस्थितापत्तेर्न परः सन्निकर्षः स्यात् यः परःसन्निकर्षः सामावास्या इति तल्लक्षणकरणात्†। ननु सूर्याचन्द्रमसोर्भिन्नराशिस्थत्वेऽप्यमावास्या दृश्यते। तथा च चतुर्दशोत्तरसहस्रशकवत्सरे सिंहस्थे रवौ द्विचिदण्डान् चतुर्दशी परतोमावास्याऽश्लेषानक्षत्रसप्तदण्डान् परतो मघा तेनाश्लेषासमयेऽमावास्यायां कर्कटे चन्द्रः सिंहे चादित्यः। तद्वत्सर एव धनुस्थे भास्करे ज्येष्ठामूलाभ्याममावास्या तेन प्रथमं ज्येष्ठासमये‡ वृश्चिके चन्द्रः सूर्यो धनुषि तेनामावास्यायामपि चन्द्रसूर्ययोर्भिन्नराशिस्थत्वदर्शनात् कथं मेषस्थसूर्ये चन्द्रस्य वृषावस्थित्यनुपपत्तिः§। मावास्यान्ते नियतमनयोः सहावस्थान-

---

* न तु मेषस्थे न तु सौरवैशाखे रोहिणीयुक्ता वैशाखी अमावस्या सम्भवतीति शेषः।

† यः परः सन्निकर्ष इति। उपर्यधोभावापन्नयोः सूर्याचन्द्रमसोः समसूत्रपातन्यायेन राश्येकांशावच्छेदेन सहावस्थानं यत्र तिथौ य इत्यस्य सुपां सुपा यत्र इत्यर्थः।

‡ सूर्याचन्द्रमसौ राश्येकांशावच्छेदेन सहावस्थाने व्यभिचारं दर्शयति नन्वित्यादि। चतुर्दशोत्तरसहस्रशकवत्सरे चतुर्दशाधिकसहस्रशकाब्दे सिंहस्थरवौ सौरभाद्रे द्विचिदण्डान् व्याप्य चतुर्दशी वर्त्तते इत्यर्थः। तदनन्तरम् अमावास्या सप्तदण्डमितम् अश्लेषानक्षत्रं व्याप्य स्थिता अश्लेषासमये अश्लेषानक्षत्रस्य कर्कटराशिघटकत्वात्। तद्वत्सर एव चतुर्दशोत्तरसहस्रवत्सर एव धनुस्थे भास्करे सौरपौषे ज्येष्ठासमये ज्येष्ठानक्षत्रस्य वृश्चिकराशिघटकत्वात्।

§ कथं मेषस्थसूर्ये इत्यादि। तथाच सा वैशाखसामावास्या या रोहिण्या सम्पद्यते इति श्रुतौ वैशाखपदस्य सौरवैशाखपरत्वेऽपि न क्षतिः विभिन्नराशिस्थयोरमावास्यादर्शनादपि तद्वत् मेषस्थे सूर्ये वृषस्थे चन्द्रमस्यपि अमावास्या भविष्यतीति भावः।

मिति चेन्न तथाप्यादावसम्भवात् मूर्खः खल्वसि नहि सूर्याक्रान्त-राशेः परराशिस्थत्वं चन्द्रस्य भवतीति तस्यार्थः। अमावास्यान्ते सहावस्याननियमात्। न च प्रथमं परराशिस्थस्य चन्द्रस्य व्यावृत्त्य पुनः पूर्वराशिगमनं सम्भवति। व्यभिचारोदाहरणे तु सूर्याक्रान्तराशेः पूर्वराश्यवस्थानच्चन्द्रस्य प्रथमं पश्चात् दर्शान्ते समानराशिस्थत्वमिति कानुपपत्तिः। तदेवम् उभयोरपि चान्द्र-सौरयोः श्रुतिस्मृतिपरिगृहीतत्वात्। उभयत्र शक्तिकल्पना-गौरवात् विनिगमनाप्रमाणस्याभावाच्चवति माघादिपदेषु सः सन्देहः*। ननु माघादिशब्दा यौगिकाः। तथाहि नक्षत्रेण युक्तः काल इति विहिताणप्रत्ययेन मघायुक्ता माघीति व्युत्पाद्य साऽस्मिन् पौर्णमासीति† संज्ञायामिति विहिताणन्तरेण‡ माघी

---

* अमावास्यान्ते इत्यादि। अनयोः सूर्याचन्द्रमसोः अमावास्यान्ते सहावस्यानं वाच्यम्। सूर्याचन्द्रमसोर्यत्र तिथ्यन्ते सहावस्थानं सामावास्या इति लक्षणं प्रकृते च सप्तदण्डात् परं मघा भवति तदा च मघानक्षत्रस्य सिंहघटकतया अमावास्यान्ते चन्द्रोऽपि सिंहे तिष्ठति अतो नानुपपत्तिरिति। व्यावृत्त्य परावृत्त्य। उभयत्र चान्द्रे सौरे च। एकत्र पक्षपातिनी युक्तिर्विनिगमना सा एव प्रमाणम्। स एव सन्देहः किं सौरपरत्वं किं वा चान्द्रपरत्वमिति सन्देहाकारः।

† नक्षत्रेण युक्तः काल इति पाणिनिसूत्रम् अत्र इत्तिकारः जयादित्यः। योऽसौ युक्तः कालश्चेत् स भवति अर्थं पुनः नक्षत्रेण पुष्यादिना कालो युज्यते पुष्यादिसमीपस्थेन चन्द्रमसा युक्त इत्यर्थः। पौषी रात्रिः पौषमहः माघी रात्रिः माघमहः। अनेन सूत्रेण मघायुक्ता पौर्णमासीति वाक्यादणप्रत्ययेन माघीति सिध्यति। साऽस्मिन् पौर्णमासीति द्वितीयसूत्रम्।

‡ संज्ञायामिति। समुदायोपाधिः प्रत्ययार्थेन चेत् संज्ञा गम्यते मासार्धमास-

पौर्णमास्यस्मिन्निति माघो मासश्चान्द्र एव सौरे तदसम्भवात्। नहि सौराश्विनपौषमाघे*श्वश्विनीपुष्यामघायुक्ताः पौर्णमास्यः कदाचिदपि सम्भवन्ति। तथाहि यः परो विप्रकर्षः सा पौर्णमासीति। सूर्य्याचन्द्रमसोः परो व्यवधिरन्योन्यं† सप्तमराश्यवस्थानेन भवति। तेन कन्यास्थे सूर्य्ये मीनस्थेन चन्द्रेणैव पूर्णिमा भवति न मेषस्थेन एवं धनुःस्थे सूर्य्ये मिथुनस्थेन चन्द्रेणैव न कर्कटचन्द्रेण‡। मकरस्थे च सूर्य्ये कर्कटस्थचन्द्रेणैव न सिंहस्थेन। मेषकर्कटसिंहभोग्यत्वादश्विनीपुष्यामघानां तदा हि सूर्य्यादष्टमराशौ चन्द्रः स्यात्§। सौरे चायमपरो विशेषः। कार्त्तिकादिमासानां द्विभत्रिभत्वमुक्तम्¶।

---

संवत्सराणामेषा संज्ञा पौषी पौर्णमासी अस्मिन् पौषी मासः पौषीऽहर्मासः पौषः संवत्सरः। माघीति व्युत्पाद्य माघीति पदं साधयित्वा अणन्तरेण द्वितीयसूत्रविक्षिप्तापराण्प्रत्ययेन।

* सौरे तदसम्भवादिति यदुक्तं तदेवोपपादयति न हि सौराश्विनपौषमाघेष्वित्यादि।

† यः परो विप्रकर्षः इति। य इति सुपां सुपा यत्र तिथौ परः विप्रकर्षः चरमवियोगः सप्तमराश्यवस्थानरूपः। परो व्यवधिः चरमसीमा। अन्योन्यं परस्परम्।

‡ तदेवोपसंहरति तेनेत्यादि। कन्यास्थसूर्य्यात् मीनस्थचन्द्रस्यैव सप्तमराशिस्थत्वं सम्भवति न मेषस्थेन चन्द्रेणेति शेषः। कन्यास्थसूर्य्यात् मेषस्थचन्द्रस्याष्टमराशिस्थत्वात् एवं न कर्कटचन्द्रेणेत्युत्तरोत्तरं बोध्यम्।

§ मेषकर्कटेत्यादि। अश्विन्यादिनक्षत्रघटितत्वेन मेषादिराशेः अश्विन्या मेषभोग्यत्वम् एवं पुष्याया कर्कटभोग्यत्वम् एवं मघानां सिंहभोग्यत्वं यथाक्रमेण बोध्यम्।

¶ सौरे चायमिति। अयं वक्ष्यमाणो विशेषः न सम्भवतीति शेषः। तदेव दर्शयति कार्त्तिकादिमासानामित्यादि।

अन्त्योपान्त्यौ त्रिभौ ज्ञेयौ फाल्गुनश्च त्रिभो मतः।
शेषा मासा द्विभा ज्ञेयाः कृत्तिकादिव्यवस्थयेत्यनेन
न च वृषभोग्यरोहिणीयुक्ता पौर्णमासी कदाचनापि तुलादित्वे भवति। एवं वृश्चिकस्थे रवौ न मिथुनभोग्यार्द्रायुक्ता। धनुस्थे च रवौ न कर्कटभोग्येन पुष्येण। मकरस्थे रवौ न सिंहभोग्यमघया। कुम्भस्थे च रवौ न कन्याभोग्येन हस्तेन। मीनस्थे च न तुलाभोग्यस्वात्या। मेषस्थे च न वृश्चिकभोग्यानुराधेन। वृषे च न धनुर्भोग्येन मूलेन। सिंहे च न मीनभोग्येनोत्तरभाद्रपदेन। कन्यायाश्च न मेषभोग्याश्विनीभरणीभ्याम् सर्व्वत्र सूर्य्यावस्थितराशेरष्टमराशौ चन्द्रस्यावस्थानात् परविप्रकर्षस्य पौर्णमासीलक्षणस्यानुपपत्तेः। अन्योन्यमुभयोः सप्तमराशिस्थत्वेनैव तत्सम्पत्तेः। तस्माच्चान्द्र एव योगसम्भवात् तद्वाचकत्वमेव माघादिपदानाम्*। न च रूढ़िर्योगमपहरतीति न्यायस्यायं विषयः कृत्रिमरूढ़िविषयत्वात्तस्य।

---

* अन्त्योपान्त्य इत्यादि। अन्त्यः आश्विनः उपान्त्यः भाद्रश्च त्रिभः रैवत्यश्विनीभरण्यन्यतमनक्षत्रविशिष्टपौर्णमासीयुक्तो भवति एवं भाद्रश्च शतभिषादित्रितयान्यतमनक्षत्रविशिष्टपौर्णमासीयुक्तो भवति। तुलादित्वे सौरकार्त्तिके न च इत्यस्य भवति इत्यनेन सम्बन्धः। तथाच रोहिण्या वृषराशिघटकतया तत्स्थचन्द्रस्य तुलादित्यापेक्षया अष्टमराशिस्थतया सप्तमराश्यवस्थानाभावात् रोहिणीनक्षत्रयुक्ता पौर्णमासी तुलादित्वे सौरकार्त्तिके कदापि न भवितुमर्हतीति भावः। एवं वृश्चिकस्थे रवौ सौरमार्गे, धनुस्थे रवौ सौरपौषे, मकरस्थे रवौ सौरमाघे च यथाक्रमम् आर्द्रापुष्यामघायुक्ताः पौर्णमास्यः कदापि न भवितुमर्हन्ति सूर्य्याचन्द्रमसोः षड़ष्टकेनावस्थानात्। एवं कुम्भस्थरव्यादि-सौर-फाल्गुनादि-कन्यास्थरविपर्य्यन्तेषु सौराश्विनपर्य्यन्तेषु यथाक्रमं हस्तस्वात्यनुराधामूलोत्तर-

तदुक्तम्।

लक्ष्यात्मिका सती रूढिर्भवेद्योगापहारिणी।
कल्पनीया तु लभते नात्मानं योगबाधतः* ॥

अतएव प्रीचणीशब्दस्य यौगिकत्वमङ्गीकृतं न रूढिः†। अत्रोच्यते।

---

भाद्रपदभरणीनक्षत्रयुक्ताः पौर्णमास्यः कदापि न भवितुमर्हन्तीत्यर्थः। अन्योन्यं परस्परम् उभयोः सूर्याचन्द्रमसोः तत्सम्पन्नेः पौर्णमासीसम्पन्नेः। तस्मात् नक्षत्रेण युक्तः काल इत्यादि-पाणिनिसूत्रानुसारात् चान्द्र एव शुक्लप्रतिपदादिदर्शान्तरूपसुख्यचान्द्र एव न सौरादौ योगसम्भवात् मघादिनक्षत्रयुक्तपौर्णमासीयोगसम्भवात् तदाचकत्वमेव मुख्यचान्द्रवाचकत्वमेव माघादिपदानां माघादिशब्दानामित्यर्थः।

* रूढिः रूढिशक्तिः योगं योगार्थम् अपहरति अस्य न्यायस्यायं योगरूढिविषयो नचेत्यर्थः कुत इदमत आह कृत्रिमरूढिविषयत्वात् शुद्धरूढिविषयत्वादित्यर्थः लक्ष्यात्मिका सती रूढिरिति रूढिशक्तिः लक्ष्यात्मिका सती लौकिकालौकिकप्रयोगबाहुल्येन सुप्रसिद्धा सती योगापहारिणी भवेदित्यर्थः यथा लौकिकालौकिकप्रयोगबाहुल्येन तृणादिनिर्म्मित-गृहशक्तस्य मण्डपपदस्य रूढिशक्त्या मण्डपानकर्तृकत्वरूपयोगार्थस्यापहारकत्वम्। कल्प-नीया शक्तिस्तु योगं बाधित्वा आत्मानं स्वरूपं न लभते। तथाच योगार्थसहकारिणैव शक्त्या योगरूढ्यर्थमाविष्करोति। यथा पङ्कजपदं कुमुदादौ पङ्कयोनिकर्तृत्वरूपयोगार्थ-सत्त्वेऽपि न तत्र शक्तिं बोधयति।

† परन्तु तादृशयोगार्थसहकारिणैव पद्मत्वावच्छिन्न एव शक्तिं बोधयति अतएवेति। यत एव न्यायस्कृत्रिमरूढिविषयत्वम् अतएवेत्यर्थः। प्रीचणीशब्दस्य यौगिकत्वं योगार्थमाच-मङ्गीकृतं न रूढिः न रूढ्यर्थः तदेव प्रकटीकरोति अधिकरणमालायां नवमाधिकरण-मारचयति। प्रीचणीः संस्कृतिर्जातिर्योगो वा सर्व्वभूमिषु। तथोक्तेः संस्कृतिर्जातिः स्याद्रूढेः प्रबलत्वतः। अन्योन्याश्रयतो नाद्यो न जातिः कल्पशक्तितः। योगः स्यात् कृत्रिमशक्तित्वात् कृत्रिमर्य्याकरणाङ्गवेत्। दर्शपौर्णमासयोः श्रूयते। प्रीचणीरासादयेति। तत्र प्रीचणीशब्दस्याभिमन्त्रणासादनादिसंस्कृतिः प्रवृत्तिनिमित्तं कुतः सर्व्वेषु वैदिकप्रयोग-

प्रष्टव्योऽत्रभवान् योगवादी किममी* पाठकादिवद्योगानुसारि-प्रयोगा माघादिशब्दाः। यत्र यत्र योगस्तत्र तत्र प्रवर्त्तन्ते†। पङ्कजादिवद्वा योगानुसारियोगव्यवस्थिते प्रयोगे तत्र योगसद्भावाद्यौगिकाः‡। अत्र न तावदाद्यः कल्पः§ त्रिरात्रपञ्चरात्रदशरात्राद्यवच्छिन्नेषु कालेषु सत्यपि तत्तच्चान्वितपौर्णमासीयोगे

---

प्रदेशेषु संस्कृतानामेवापां प्रौक्षणीशब्देनोच्यमानत्वादित्येकः पक्षः लौके जलक्रीडायां प्रौक्षणीभिरुद्वेजिता: स्म इत्यसंस्कृताम्भसु प्रयोगाद्धिरादिशब्दवज्जातौ रूढत्वात् उदकत्वजातिः प्रवृत्तिनिमित्तं। न च प्रकर्षेणोक्षत्यनाभिरिति यौगीऽत्र शङ्कनीयः। रूढेः प्रबलत्वादिति पक्षान्तरं तच्च न तावत् संस्कारी युक्तः अन्योन्याश्रयत्वात् विहितेष्वभिमन्त्रणादिषु संस्कारेष्वनुष्ठितेषु पश्चात् संस्कृताम्भसु प्रौक्षणीशब्दप्रवृत्तिः तत्प्रवृत्तौ सत्यां प्रौक्षणीशब्देनापीऽनुज्ञाभिमन्त्रणादिविधिरिति नापि जातिपक्षो युक्तः उदकजातौ प्रौक्षणीशब्दस्य रूढ्यवहारे पूर्वसंस्कृतत्वेन दूरः परं शक्तेः कल्पनीयत्वात् ततो गोशब्दवदश्वकर्णादिशब्दवच्च रूढो न भवति यौगस्तु व्याकरणेन क्लृप्तः सोपसर्गाद्धातोः करणे ल्युट्प्रत्ययेन व्युत्पादनात् तस्मात् प्रौक्षणीशब्दो यौगिकः घृतादेः प्रौक्षणं प्रयोजनम्।

* अत्र प्रकारद्वयेन पृच्छति किममी इत्यादि। अमी माघादिशब्दाः।

† अत्र दृष्टान्तमाह पाठकादिशब्दवदिति। पठति पाठकः पचति पाचक इत्यादिशब्दो यथा यौगिकः तद्वत् किम् अमी माघादिशब्दाः प्रयोगानुसारेण प्रयुज्यन्ते यौगानुसारिप्रयोगः केवलयौगिक एवस्वेत् यत्र यत्र योगः सम्भवति तत्र तत्र वर्त्तन्ते यौगिकशब्दा इति शेषः।

‡ पङ्कजादिवदिति। वाकारोऽयं पक्षान्तरद्योतनार्थम्। तथाच यथा पङ्कजादिशब्दाः यौगानुसारियौगव्यवस्थिते प्रयोगे योगानुसारेण योगार्थसहायेन रूढ्यर्थान्विते योगसद्भावात् योगार्थसहकृते रूढ्यर्थसद्भावात् यौगिका योगरूढिका इत्यर्थः। यौगिकत्वेन योगरूढिकत्वेन च कल्पद्वये व्यवस्थिते।

§ प्रथमकल्पं दूषयति अत्र न तावदाद्यः कल्पः इति माघशब्दो न यौगिक इत्यर्थः।

माघादिपदप्रयोगादर्शनात्*। अतएव साक्षिन्निति सूत्रे जयादित्येन मासार्द्धमाससंवत्सराणामेषा संज्ञेत्यभिधायोदाहृतम्। पौषो मासः पौषोऽर्द्धमासः पौषः संवत्सर इति इह न भवति। पौषी पौर्णमासी अस्मिन् दशरात्र इति। भृतकमासे च न भवतीत्युक्तम्। भृतकमासः सावनं भृतिगणनार्थत्वात्। सावननिषेधाच्चान्द्रसौरयोः प्रयोगोऽभ्यनुज्ञातः†। अथ द्वितीयः सञ्ज्ञायामिति प्रसिद्ध्युपसंग्रहात् यत्रास्य प्रयोगस्तत्र योगो निमित्तं

---

* अत्र हेतुं दर्शयति चिराचपञ्चराचदशराचाद्यवच्छिन्नेष्वित्यादि। कालेषु खण्डकालेषु तत्तन्नक्षत्रान्वितपौर्णमासीयोगे माघादिनक्षत्रान्वितपौर्णमासीयोगे सत्यपि माघादिपदप्रयोगादर्शनादिति। तथाहि यत्र यत्र योगः तत्र तत्र यौगिका इत्युक्तेः चिराचादिरूपखण्डकालेषु माघादियुक्तपौर्णमासीयोगसत्त्वेऽपि माघः चिराचः माघः पञ्चराच इत्यादि प्रयोगदर्शनाभावात्। न माघादिपदानां यौगिकत्वं। अत एव चिराचादिखण्डकालेषु मासंज्ञकनक्षत्रयोगसत्त्वेऽपि न माघादिसंज्ञा।

† अतएवेत्यर्थः जयादित्येन पाणिनिविहितिकारेण साक्षिन्निति सूत्रे। इह न भवति इत्यनेनोदाहरणद्वयं स्पष्टयति पौषोत्यादि। पुष्ययुक्ता पौर्णमासी पौषी अस्मिन् दशरात्रे इत्यत्र पौषादिसंज्ञा न भवति एवं भृतकमासे च सावनमासे च पौषादिसंज्ञा न भवति इत्युक्तम् इति जयादित्येनेति पूर्वेण सम्बन्धः। भृतिगणनार्थत्वादिति। भृतिः कर्म्मवेतनं तस्य गणना संख्यया स्थिरीकरणं एकमासकर्म्मकरणे इयत्संख्यकमुद्रा प्राप्या एवंरूपा सा एव अर्थः प्रयोजनं यस्य तद्भूयत्वात् मासेन यास्यति मासेनायास्यति इति नियमेन सावनमासस्य वेतनप्रयोजकत्वादित्यर्थः। सावननिषेधात् सावनमासस्य पौषमाघादिसंज्ञानिषेधात्। प्रयोगः पौषमाघादिरूपेण प्रयोगः अभ्यनुज्ञातः स्वीकृतः।

मासादिषु चास्य प्रयोगो* न दशरात्रिष्विति†। नैतत् सावने मासे सत्यपि योगे प्रयोगादर्शनाच्चान्द्र एव चेन्न‡ द्वितीयातृतीयाद्यारब्धेषु पूर्वतिथिसमापनीयेषु चान्द्रेष्व§ प्रयोगात्। प्रतिपदादिदर्शान्त एव मासीति चेत् नैतत्। मघादिनक्षत्रयोगा-

---

* अथ द्वितीयः संज्ञायामिति। द्वितीयसूत्रमित्यर्थः। इति इत्यनेन संज्ञायामिति पाणिनिद्वितीयसूत्रेण प्रसिद्धयुपसंग्रहात् प्रसिद्धेरमरादिकोषप्रसिद्धेरुपसंग्रहात् ग्रहणात् यत्र चान्द्रे मासि अस्य पौषमाघादेः प्रयोगः तत्र तत्रैव योगः पुष्यादियुक्तपौर्णमासीयोगः निमित्तं मासादिषु च मासार्द्धमासवत्सरेष्वेव चोऽवधारणे अस्य पौषमाघादेः प्रयोगः पौषमाघादिपदप्रयोग इत्यर्थः।

† अत्र चकारस्यावधारणार्थत्वात् स्वयं व्याहृत्तिं दर्शयति न दशरात्रादिष्विति। आदिना चिरात्रपञ्चरात्रादिपरिग्रहः।

‡ पुष्यमघादियुक्तपौर्णमासीयोगे यौगिकं पौषमाघादिपदमिति आद्यकल्पं दूषयित्वा तादृशपौर्णमासीयोगे योगरूढिकं पौषमाघादिपदमिति द्वितीयकल्पं दूषयितुं विचारमवतारयति नैतदिति। सत्यपि योगे पुष्यादियुक्तपौर्णमासीयोगे प्रयोगादर्शनात् सावने पौषमाघादिरूपसंज्ञाया अभावात् चान्द्र एव चान्द्रमासेष्वेव तत् पौषमाघादिसंज्ञा इति चेन्नेति चान्द्रमासो त्रिविधः पूर्वतिथिसमाप्यत्रिंशत्तिथिसाधारणतिथिचान्द्रः एकः अपरश्च शुक्लप्रतिपदादिदर्शान्तो मुख्यचान्द्रः कृष्णप्रतिपदादिपौर्णमास्यन्तगौणचान्द्रश्च। तत्र तिथिचान्द्रपक्षं दूषयति चेन्नेति।

§ तिथिचान्द्रः कः तदेव स्पष्टयति द्वितीयातृतीयाद्यारब्धेषु इत्यादि। तथाहि शुक्लप्रतिपत्समापनीयः त्रिंशत्तिथ्यात्मकस्तिथिचान्द्रः एवं शुक्लतृतीयाद्यारब्धः शुक्लद्वितीयादिसमापनीयत्रिंशत्तिथ्यात्मकतिथिचान्द्रः। तथाच ज्योतिर्वचनम्—

एका तिथिः कापि तदादिभूता तिथिस्तृतीयेऽपि तिथिप्रबन्धः।
मासः स चान्द्रस्तिथिनाम्नि यस्माच्चान्द्रीं कलां प्राप्य सदा प्रवृत्तः॥

अस्यार्थः। कापि एका शुक्लद्वितीया तदादिभूता या तिथिः सा यदि तृतीयाद्यारब्धं गणनप्रतियोगिनी भवेत् तथाहि एका शुक्लद्वितीया तदादिभूतत्वेन प्रथमं गणनायां

भावे अश्लेषादिनक्षत्रयुक्तपौर्णमासीसम्बन्धेऽपि दर्शान्ते मासि माघादिपदप्रयोगदर्शनात् यौगिकत्वानुपपत्तेः*।

अथ।

अन्त्योपान्त्यौ त्रिभौ ज्ञेयौ फाल्गुनश्च त्रिभो मतः।
शेषा मासा द्विभा ज्ञेयाः कार्त्तिकादिव्यवस्थया।

अत्र कृत्तिकादिव्यवस्थयेत्यभिधानात्। कृत्तिकाद्या द्विभा मासा इति† सम्भमपाठात् कार्त्तिकोपक्रमगणनेनान्त्य आश्विनः

---

प्राप्ता प्रतिपत् ततो द्वितीया तृतीयाचतुर्थ्यादिक्रमेण गणनया कृष्णपक्षीयप्रतिपदपि पञ्चदशत्वेन प्राप्ता भवति ततः कृष्णद्वितीयादिक्रमेण गणनया शुक्लप्रतिपदपि त्रिंशत्तिथित्वेन पुनः प्राप्ता। ततश्च शुक्लद्वितीयादिक्रमेण गणनायां प्रतिपत् आदिभूततिथित्वेन एकवारं प्राप्ता पुनर्द्वितीयातृतीयादिक्रमेण गणनया पञ्चदशतिथिपूरणीभूतत्वेन कृष्णपक्षीयत्वेन च प्रतिपदपि पुनः प्राप्ता अतो वारद्वयं प्राप्ता भवति पुनरपि कृष्णद्वितीयादिक्रमेण त्रिंशत्तिथिपूरणीभूतत्वेन मासान्तत्वेन च गणनप्रतियोगितया शुक्लप्रतिपदपि प्राप्ता एवंरीत्या वारत्रयगणनप्रतियोगितया शुक्लद्वितीयादिशुक्लप्रतिपदन्तस्त्रिंशत्तिथ्यात्मक एकतिथिचान्द्रमासो भवति इति वर्त्तुलार्थः।

* तादृशतिथिचान्द्रमासोऽत्र न गृह्यते तत्र हेतुमाह अप्रयोगादिति। द्वितीयाद्यारब्धप्रतिपदादिसमापनीयेषु त्रिंशत्तिथ्यात्मकतिथिचान्द्रेषु पौषमाघाद्यप्रयोगात् प्रतिपदादिदर्शान्त एव मासि चेत् शुक्लप्रतिपदादिदर्शान्तरूपमुख्यचान्द्रमासि माघादिपदप्रयोगसम्भवात् योगरूढित्वसम्भवमिति चेन्न मघादिनक्षत्रयोगाभावे इत्यादि यौगिकत्वानुपपत्तेः। योगरूढित्वानुपपत्तेरित्यर्थः।

† कृत्तिकादिव्यवस्थया इत्यभिधानादिति। शेषा मासाः अन्त्योपान्तफाल्गुनभिन्नाः मासाः द्विभा इत्यन्वयः कृत्तिकादिव्यवस्थया ततश्च कार्त्तिकाद्या कार्त्तिकादिमाघान्ताः चैत्रादिश्रावणान्ताश्च मासा द्विभा इत्याद्यभिधानात् कृत्तिकारोहिण्यन्यतरनक्षत्र-

त्रिभो रेवत्यश्विनीभरणीनामन्यतमयुक्तपौर्णमासीयोगात् उपान्त्यो भाद्रः* शतभिषापूर्व्वोत्तरभाद्रपदाभिः फाल्गुनश्च त्रिभः पूर्व्वोत्तरफाल्गुनीहस्तैः। इतरे तु कार्त्तिकादयः कृत्तिकादिनक्षत्रद्विकयोगेन† प्रत्येतव्याः तेन‡ कृत्तिकारोहिणीभ्यां कार्त्तिकः। मृगशीर्षार्द्राभ्यां मार्गशीर्षः। पुनर्वसुपुष्याभ्यां पौषः। अश्लेषामघाभ्यां माघः। चित्रास्वातीभ्यां चैत्रः। विशाखानुराधाभ्यां वैशाखः। ज्येष्ठामूलाभ्यां ज्यैष्ठः। पूर्व्वोत्तराषाढ़ाभ्याम् आषाढ़ः।

---

युक्तपौर्णमासीयोगे कार्त्तिकी मासी भवति। एवं मृगशिरआर्द्रान्यतरनक्षत्रयुक्तपौर्णमासीयोगे मार्गशीर्षो मासो भवति एवं पुनर्व्वसुपुष्यान्यतरनक्षत्रयुक्तपौर्णमासीयोगे पौषादयो मासाः त्रिभा भवन्ति।

* सम्भ्रमपाठइति। सम्भ्रमेण घूर्णनेन प्रतिलोमक्रमेण इति यावत् पाठात् पठितत्वात् तदेव व्याकरोति कार्त्तिकीपक्रमगणनेति। कृत्तिकादिव्यवस्थया इत्युपक्रमेणोक्तत्वात् कृत्तिकादिनक्षत्रयुक्तपौर्णमासीयोगघटितत्वेन कार्त्तिकीपक्रमगणनासिद्धिः ततश्च कार्त्तिकीत्तरः मार्गशीर्षः तदुत्तरः पौषः। तदुत्तरो माघ इत्याद्युपक्रमेण गणनया आश्विनोऽन्त्यो भवति भाद्रश्च उपान्त्यो भवति अन्त्यसमीपस्थितत्वात् एष एव सम्भ्रमपाठः। आश्विनोत्तरकार्त्तिकस्तु साहजिकः पाठः न तु सम्भ्रमपाठः। अन्त्य आश्विनः त्रिभो रेवत्यश्विनीभरणीनामन्यतमयुक्तपौर्णमासीयोगात् भवतीत्यर्थः। उपान्त्यो भाद्रश्च।

† शतभिषापूर्व्वोत्तरभाद्रपदाभिरिति। शतभिषापूर्व्वोत्तरभाद्रपदाभिर्नक्षत्रैर्युक्तपौर्णमासीयोगात् त्रिभो भवतीत्यर्थः। फाल्गुनश्च त्रिभः पूर्व्वोत्तरफाल्गुनीहस्तैरिति पूर्व्वफाल्गुन्युत्तरफाल्गुनीहस्तनक्षत्रयुक्तपौर्णमासीयोगात् फाल्गुनीऽपि त्रिभो भवतीत्यर्थः। कृत्तिकादिनक्षत्रद्विकयोगेनेति। कृत्तिकादिद्विकद्विकनक्षत्रयुक्तपौर्णमासीयोगेनेत्यर्थः।

‡ उपसंहरति तेनेति। तेन त्रिभत्रिभान्यतरान्यतमनक्षत्रयुक्तपौर्णमासीयोगेन कार्त्तिकादिमासविधानेन।

श्रवणाधनिष्ठाभ्यां श्रावणः। तेन रोहिणीयुक्तापि* पौर्णमासी कार्त्तिकी भवति। तद्योगान्मासः कार्त्तिकः। एवम् आर्द्रायोगान्मार्गशीर्षः। पुनर्वसुना पौषः। श्लेषेण माघः। हस्तेन फाल्गुनः। स्वात्या चैत्रः। अनुराधेन वैशाखः। मूलेन ज्यैष्ठः। धनिष्ठया श्रावणः। शतभिषेण भाद्रः। रेवतीभरणीभ्याञ्चाश्विन इति कथं न यौगिकः†। नैतत् विद्विषामस्य वादस्य हास्यास्पदत्वात्। रोहिणीपदाद्वि नक्षत्रेण युक्तः काल इति विहितेनाण्प्रत्ययेन रोहिणी पौर्णमासी भवति रोहिणीपदाच्च सास्मिन् पौर्णमासीति संज्ञायामित्यणन्तरेण रौहिणपदनिष्पत्तेः रौहिणः मासः स्यान्नतु कार्त्तिकः‡। एवमार्द्रायोगादार्द्रो मासः। इत्यादयः भवेयुः। अतो रोहिण्यादियोगात् कार्त्तिकादिपदानि यौगिकानीति वदतां महार्घं

---

* रोहिणीयुक्तापीति। अपिः भिन्नक्रमेण तेन न केवलं कृत्तिकानक्षत्रयुक्तपौर्णमासी कार्त्तिकी रोहिणीयुक्तापीत्यर्थः।

† कथं न यौगिक इति। कृत्तिकादिव्यवस्थया शेषा मासाः कार्त्तिकादिमासा हिभा इति वचनोपदिष्टत्वात् इति शेषः।

‡ दूषयति नैतदिति। विद्विषां विवादिनाम् अस्य वादस्य वदै व्यक्तायां वाचि इति धात्वनुसारेण निष्पन्नत्वात् कृत्तिकानक्षत्राभावे रोहिणीनक्षत्रयुक्तपौर्णमासीयोगे रौहिणोऽयमिति वक्तव्ये कार्त्तिकोऽयमिति कथनस्य हास्यास्पदत्वात् अयोग्यत्वेन उपहसनीयत्वादित्यर्थः। रोहिणीपदात् रोहिणीपदोत्तरं नक्षत्रेण युक्तः काल इति सूत्रेणाण्प्रत्ययात् रोहिणीनक्षत्रयुक्तपौर्णमासी रौहिणी भवति। संज्ञायामिति द्वितीयसूत्रेण रोहिणीपदोत्तरम् अपराण्प्रत्ययेन मासो रौहिणी भवेदित्यर्थः। न तु कार्त्तिकः अनेनास्य यौगरूढिलं व्याहन्यते इति भावः।

लोकान् संवर्द्धयति। (१) कलम्बीत्यन्वयोच्यूहः कृतः पुरस्कृत एव स्यात्*। अथोच्यते। मासानां द्विभक्तित्वप्रतिपादनं तावदुच्यते तस्य चैतदेव प्रयोजनम्। यत् कृत्तिकारोहिण्यन्यतरयुक्तपौर्णमासीति योगात् कार्त्तिकपदं यौगिकं भवतु। एवमितरेष्वपि। कथं चैतत् स्यात्† यदि कृत्तिकादयो रोहिण्यादिकमपि लक्षयन्ति तेन कृत्तिकारोहिण्योरन्यतरयोगेन कार्त्तिकपदं यौगिकं एवमन्यान्यपीति तदयुक्तं नहि द्विभक्तित्ववचनं रोहिण्यादियोगेऽपि कार्त्तिकादयो यौगिका इत्याह न च पौर्णमास्या द्विभत्वादिकं किन्तु मासानामेव न च पाणिनिरपि रोहिण्यादियोगेऽपि कार्त्तिकादिपदानि पौर्णमासीषु अयोगाच्च कार्त्तिकादिमासेषु कार्त्तिकादिपदानि यौगिकानीति आहः‡।

---

(१) कलम्बीत्यन्वयो हि ऊढीकृत्य पुरस्कृत एव स्यादिति क्वचिदादर्शपुस्तके पाठः।

---

* अस्य हास्यास्पदत्वं व्याकरोति यौगिकानीति वदतामित्यादि। महार्घे इति तृतीयार्थे सप्तमी महामूल्यत्वेनेत्यर्थः। कलम्बी शाकविशेषः तथाच कृत्तिकायोगाभावे रोहिणीनक्षत्रयोगे रौहिणोऽयं मास इति वक्तव्ये कार्त्तिकोऽयं मास इति वदतां निरुक्तापि कलम्बी महामूल्यत्वेन यथा लोकान् संवर्द्धयति इत्यन्वयो हि ऊढीकृत्य पुरस्कृतः स्यात् इति क्वचिदादर्शे पाठः। ऊहः कृतः पुरस्कृतः स्यात् ऊह वितर्के वितर्कीकृतः सन् पुरस्कृतः स्यात्।

† तस्य द्विभक्तित्वभक्तित्वप्रतिपादनस्य प्रयोजनं दर्शयति यत् कृत्तिकारोहिण्यन्यतरेत्यादि। यौगिकं भवतु योगरूढिकं भवतु। एवमितरेष्वपि मार्गशीर्षादिष्वपि कथञ्च एतत् स्यात् केन प्रकारेण एतत् रोहिण्यादियोगे कार्त्तिकादिपदं योगरूढिकं स्यात्।

‡ प्रकारं दर्शयति यदीत्यादि। लक्षयन्ति कृत्तिकानक्षत्रयुक्तपौर्णमासी इत्यत्र कृत्तिकापदं लक्षणया यदि कृत्तिकारोहिण्योरन्यतरार्थं भवति इत्यर्थः। तेन लक्षणया

न चाभिधीयमानमपि प्रमाणान्तरविरोधेन ग्रहणार्हं न च प्रकृतिपदस्य मुख्यलाक्षणिकवृत्त्याश्रयणेन यौगिकत्वं क्वचिदपि व्युत्पन्नं यदि चैवं स्याद्रथकारपदस्यापि रथमकुर्व्वत्यपि सौधन्वनजातीये रथकरणार्हतालक्षणया तदन्यलक्षणया वा यौगिकत्वात् चैवर्णिकेऽपि तत्सम्भवाद्दर्षासु रथकार आदधीतेत्यत्र चैवर्णिकाधिकारो दुर्वारः स्यात्*। एवं गच्छतीति गौरिति व्युत्पत्तौ गमन-

कृत्तिकापदस्य कृत्तिकारोहिण्यन्यतरार्थकत्वेन यौगिकं योगरूढिकं एवमन्यान्यपि मार्गशीर्षादिपदानि इत्यर्थः। नहि द्विभचिभत्ववचनमित्यनेन आहित्यस्य सम्बन्धः इत्याह बोधयति वचनस्य कथनासम्भवात्। न च पौर्णमासी द्विभत्वादिकं किन्तु मासानामेवमिति तथाच रोहिणीयुक्तपौर्णमासीपक्षे कृत्तिकायोगाभावात् कार्त्तिकपदस्य योगरूढित्वाभावेऽपि मासानां द्विभत्वादिविशेषणत्वे शुक्लप्रतिपदादिदर्शान्तस्य मुख्यचान्द्रमासस्य त्रिंशत्तिथिसमुदायात्मकतया कदाचिदपि तत्र कृत्तिकाविरहस्यासम्भवात् रोहिणीनक्षत्रयुक्तपौर्णमासीयोगपक्षेऽपि त्रिंशत्तिथ्यात्मकमुख्यचान्द्रमासमध्ये कृत्तिकायोगस्यावश्यम्भावात् कार्त्तिकत्वसिद्धौ न कदापि योगरूढित्वव्याघात इति भावः। ननु यद्यपि कार्त्तिकादिसंज्ञायां योगरूढित्वसिद्धौ मासानामेव द्विभत्वादिविशेषणदाने दूषणान्तरं न दर्शितं तथापि मासानां द्विभत्वादिनिवेशे कृत्तिकानक्षत्रयुक्तमासः कार्त्तिकः एवं मृगशिरोनक्षत्रादियुक्तमासः मार्गशीर्षादिरपि भवितुमर्हति परन्तु द्वादशमासेषु कृत्तिकायोगसम्भवात् द्वादशमासाः कार्त्तिकः स्यात् एवं मृगशिरोनक्षत्रादियोगसम्भवात् द्वादशमासा अपि मार्गशीर्षादिरपि स्यात् इत्युक्तदोषश्चाच द्रष्टव्यः। न च पाणिनिरपीत्याह अनेनास्यान्वयः तथाच रोहिण्यादियोगेऽपि पौर्णमास्यां रोहिण्यादियोगेऽपि पौर्णमासीयुक्तत्वात् रोहिण्यादियोगात् कार्त्तिकादिपदानि च कार्त्तिकादिमासेषु न च यौगिकानि पाणिनिरपि इत्याह।

* न चाभिधीयमानमपीति। पौर्णमासीषु कृत्तिकादियोगाभावेऽपि रोहिण्यादियोगे कार्त्तिकादिमासेषु योगरूढित्वं विधीयमानमपि प्रमाणान्तरविरोधेन मुख्यार्थबाधक-

गौणार्थग्राहकप्रमाणान्तरं विना ग्रहणार्हं ग्राह्यं न च इत्यर्थः। न च प्रकृतिपदस्येति स्वार्थादयर्थबोधकलिङ्गरूपकृत्तिकादिपदस्य प्रकृतिरुक्ता शब्दशक्तिप्रकाशिकायां यथा—

स्वेतरार्थानवच्छिन्ना यत् स्वार्थस्यावबोधने।
यच्छब्दनिष्ठयो हेतुः प्रकृतिः सा तदर्थिका॥

अस्यार्थः। स्वेतरशब्दार्थविशेषितस्य यादृशस्वार्थस्य अन्वयबोधं प्रति स्वान्यवच्छितीत्तरत्वसंसर्गेण यादृशशब्दवत्तायां नियम एव हेतुः तादृशस्वस्यविधार्थे प्रकृतिरित्यर्थः। तथाच यदा कृत्तिकादियोगस्तदा मुख्यया इत्या यदा रोहिणीयोगस्तदा लक्षणया इत्या इत्यर्थः। मुख्यलाक्षणिकइत्त्वान्यतरान्वयेन शक्तिलक्षणान्यतरान्वयेन यौगिकत्वं योगरूढित्वं क्वचिदपि व्युत्पन्नं स्वीकृतं न चेत्यर्थः यदि चैवं स्यात् क्वचिच्छक्त्या क्वचिल्लक्षणया योगरूढित्वमङ्गीकृतश्चेदित्यर्थः रथकारपदस्य वर्षासु रथकार आदधीत इत्यत्र रथकारपदस्य रथमकुर्व्वति रथकरणानुकूलकृतिविरहेऽपि सौधन्वनजातीये सुधन्वाचार्य्यसङ्करजातीये।

तथाच मनुः।

वैश्याच्च जायते व्रात्यात् सुधन्वाचार्य्य एव च।
कारुषश्च विजन्मा च मैत्रः सात्वत एव च॥

अत्र कुल्लुकभट्टः। वैश्यात् पुनर्व्रात्यात् सवर्णायां सुधन्वाचार्य्यकारुषविजन्ममैत्रसात्वताख्या जायन्ते एकस्य चैतान्यपि नामानि तथा रथकारपदस्य लक्षणया रथमकुर्व्वत्यपि सौधन्वनजातीये रथकरणार्हता दुर्व्वारः स्यात् इत्येकवाक्यार्थः तदन्यलक्षणया वा तदन्यस्मिन् सौधन्वजातिभिन्ने रथकारपदस्य लक्षणया वा यौगिकत्वात् योगरूढित्वात् वैवर्णिकेऽपि ब्राह्मणादिवर्णत्रयेऽपि तत्सम्भवात् लक्षणया योगरूढित्वसम्भवात् वर्षासु रथकार आदधीत इत्यत्र वर्षाकालीनरथकारकर्तृकत्वेन विहिताधानकर्म्मणि वैवर्णिकाधिकारः ब्राह्मणक्षत्रियवैश्याधिकारोऽपि दुर्व्वारः स्यादित्यपरो वाक्यार्थः। तथाच कात्यायनीयश्रौतसूत्रव्याख्याने श्वरस्वामिमतानुसारिकर्काचार्य्ययाज्ञिकदेवः। रथकारस्याधाने अग्न्याधेयकर्म्मणि अधिकारी भवति वर्षासु रथकार आदधीत इति श्रुतेः। अत्रेदं सन्दिह्यते। किं वैवर्णिकानामन्यतमो रथकरणयोगात् रथकारः आहोस्वित् नियतं किञ्चिज्जात्यन्तरमिति किमावत् प्राप्तं वैवर्णिकानामन्यतम एवेति कुतः सोऽपि हि रथं करोतीति योगात्

रथकार इत्युच्यते तस्य च चैवर्णिकत्वादाधानं प्राप्तमेव ऋतुमाचं विधेयं तथा सत्येकार्थ-विधानादाक्यभेदो न भवति लाघवञ्च जात्यन्तरपक्षे तस्याधानं विधातव्यं ऋतुसम्बन्धश्च तथा सति वर्षास्वादधीत रथकार आदधीतेत्येवं वाक्यभेदः स्यात्। अपिच शूद्रत्वसामर्थ्यात् प्रतिषिद्धः तस्मात् चैवर्णिकानामन्यतम एवेति पूर्वपक्षः।

सिद्धान्तमाह नियतश्चेति। चो वार्थे वाशब्दश्च पूर्वपक्षनिरासार्थः। न चैवर्णिको रथकारः तस्य शिल्पोपजीवनस्य प्रसिद्धत्वात् किन्तु नियतं जात्यन्तरमेव तच्च केचिदेवमाहुः वैश्यायां क्षत्रियादुत्पन्नो माहिष्यः शूद्रायां वैश्यादुत्पन्ना करणी तस्यां करण्यां माहिष्यादुत्पन्नो रथकार इति। तदुक्तं स्मृतौ। "माहिष्योयौ प्रजायेते विट्शूद्राङ्गनयो-र्नृपात्। शूद्रायां करणो वैश्यादिति।"

याज्ञवल्क्योऽपि।

वैश्याशूद्रीसु राजन्यान्माहिष्योयौ सुतौ स्मृतौ।
वैश्यायां करणः शूद्रात् विन्नास्वेष विधिः स्मृतः॥

विन्नासु विधिना परिणीतासु।

तथा।

"माहिष्येण करण्यान्तु रथकारः प्रजायते" इति।

अतो रथकारशब्द एवंविधसङ्करजातौ रूढः रूढिश्च योगाद्बलीयसीति न्यायात् रथं करोतीति योगं बाधित्वा जात्यन्तरमेव रथकारशब्देनोच्यते। तस्येदमाधानं कालविशिष्टं विधीयते विशिष्टविधानाच्च वाक्यभेदोऽपि न भवति। अपरे त्वाहुः रथकारशब्देनाच्च सौधन्वनानां ग्रहणम् ऋभूनां त्रित्वाधानमन्त्रवर्णनात्। सौधन्वनाश्च ऋभवः। सौधन्वना ऋभव इति ऋक्संहिता सामानाधिकरण्यनिर्देशात्।

तथा चाह मनुः।

व्रात्यात् तु जायते वैश्यात् सुधन्वाचार्य्य एव च।
कारुषश्च विजन्मा च मैत्रः सात्वत एव च॥ इति।

अतो मनूक्तौ यः सुधन्वा व्रात्यवैश्यपुत्रः तत्पुत्राणां सौधन्वनानामृभूणामेवाधिकारः यत्तु याज्ञवल्क्येनोक्तौ न तस्याधिकारः सत्यपि रथकारशब्दवाच्यत्वे मन्त्रवर्णनाच्छागन्यायेन

**मगमनमपि लक्षयतीति गच्छत्यगच्छत्यपि यौगिकत्वं स्यात्*। एवं प्रासादपदमपि प्रक्षेपणलक्षणया यौगिकं स्यात् नायौगिकं किञ्चित् स्यात्†। तस्मात् प्रकृतिपदस्य मुख्यानुयोगादेव यौगिकत्वं नान्यथा यत्र तु मुख्यार्थयोगो नास्ति तत्र रूढिरेव‡। किञ्च**

---

सौधन्वनानामेवाधिकार इति। तथाच जैमिनिः। सौधन्वनास्तु हीनत्वान्नन्ववर्णात् प्रतीयेरन्निति सौधन्वना नाम जातिः हीनास्ते किञ्चित् चैवर्णिकेभ्यो जात्यन्तरं न च ते शूद्रा न वैश्या न क्षत्रिया न ब्राह्मणा इति। तेषामिदमाधानं कथं प्रसिद्धिः। नन्ववर्णाश्च नन्ववर्णो हि भवति सौधन्वना ऋभव इति ऋभूनां वेति च रथकारस्याधानमनन्वः। तस्मात् सौधन्वना ऋभवश्च रथकाराः अपि च तं नेमिऋभवो यथेति च ये नेमिं नमन्ति ते ऋभव इत्युच्यन्ते रथकाराश्च नेमिं नमन्ति तस्मादचैवर्णिकानामशूद्रानामेतदाधानमिति श्वरस्वामिन इत्यादि।

* एवं गच्छतीति गौरिति व्युत्पत्तावपि। गमेर्डौ इति सूत्रात् गमनार्थैं डौप्रत्ययेन गौरिति पदं साधु। अत्र गमनम् अगमनमपि लक्षयति तथाच गच्छति अगच्छत्यपि। अगच्छतीत्यत्र अकारो निषेधार्थः न गच्छतीत्यर्थः। न तु न गच्छति नञ्तत्पुरुषादगच्छति इति सुब्लुगाख्येन सह समासासम्भवात्। यौगिकत्वं योगरूढिकत्वं स्यात् तथाच गोशब्दस्य केवलरूढित्वं सर्व्वमतसिद्धं व्याहन्येत।

† एवं प्रासादपदमपीति। प्रासादो देवभूभुजामिति कोषात् देवगृहे राजगृहे च रूढिः इदं प्रासादपदं यदि प्रक्षेपणलक्षणया योगरूढिकं स्यात् तदा सर्व्वलोकसिद्धरूढित्वमस्य व्याहन्यते नायौगिकं किञ्चित् स्यात् इति यदि लक्षणया योगरूढित्वम् अङ्गीक्रियते किञ्चित् किमपि पदं न योगरूढिकं सर्व्वमेव पदं योगरूढिकं पदस्य रूढित्वं व्याहन्यते।

‡ उपसंहरति तस्मादिति। प्रकृतिपदस्य लिङ्गपदस्य मुख्यानुयोगादेव मुख्यत्वं शक्त्याश्रयत्वं तथाच शक्तिलक्ष्ययोगादेव यौगिकत्वं योगरूढित्वं वा नान्यथा न लक्षणया तथाच पौर्णमास्यां कृत्तिकादियोगादेव योगरूढित्वेन कार्त्तिकत्वं मासस्य न पौर्णमास्यां रोहिणीयोगे यत्र तु मुख्यानुयोगो नास्ति शब्दशक्त्या योगार्थो न प्रतीयते तत्र रूढिरेव लौकिकालौकिकप्रयोगप्राचुर्य्येण शब्दशक्त्या रूढित्वमेव प्रतीयते।

कृत्तिकादिपदानां रोहिण्यादिलक्षणया यौगिकत्वेऽपि मुख्यकृत्तिकादियोगेन यौगिकत्वस्य शीघ्रमवगमात् कार्त्तिकादिमासविहितं कर्म्म मुख्यनक्षत्रयोग एव व्यवतिष्ठेत* न लाक्षणिकयोगे† मुख्य-

---

* प्रतिबन्धिमाह किञ्चेति । कृत्तिकादिपदानाम् आदिना मृगशीर्षादिमासंज्ञकनक्षत्रादिपरिग्रहः रोहिण्यादि इत्यत्र आदिना आर्द्रादिनक्षत्रपरिग्रहः मुख्यकार्त्तिकादियोगेन कार्त्तिकादिमासषट्कमासंज्ञकं कृत्तिकानक्षत्रादियोगेन शीघ्रावगमादिति तथाच यत्र मुख्यकृत्तिकानक्षत्रयुक्तः तत्र कृत्तिकानक्षत्रयुक्तपौर्णमासीरूपकार्त्तिकीयोगस्य साक्षादेवावगतेः कार्त्तिकपदादयौगिकत्वस्य शीघ्रप्रतीतिर्भवतीति कार्त्तिकमासविहितं कर्म्म मुख्यनक्षत्रयोग एव मुख्यं अक्षाश्रयत्वं तथाच मुख्यमासंज्ञीपर्य्योगिकृत्तिकादिनक्षत्रयुक्तपौर्णमासीरूपकार्त्तिकीयोगयुक्तमासेष्वेव व्यवतिष्ठेत विदधीत ।

† न लाक्षणिकयोगे इति । तथाच यत्र तु रोहिणीयोगस्तत्र तु कार्त्तिकपदात् कृत्तिकाप्रतीतौ तत्र कृत्तिकाया अभावात् कृत्तिकापदलक्षणया रोहिणीयुक्तपौर्णमासीरूपगौणकार्त्तिक्यादियोगे कार्त्तिकपदात् यौगिकत्वप्रतीतेर्विलम्बितत्वात् न तत्र कार्त्तिकमासविहितं कर्म्म व्यवतिष्ठेत ।

अतएवोक्तम् ।

गौणे सदपि सामर्थ्यं न प्रमाणान्तरं विना ।
आविर्भवति मुख्ये तु शब्दादेवाविरस्ति तत् ॥
तात्पर्य्यञ्च ततो मुख्ये गौणार्थपरता पुनः ।
प्रमाणान्तरविज्ञेया तदभावान्न सिध्यति ॥

अस्यार्थः । गौणे अर्थे गौणार्थविषयकशाब्दबोधे सामर्थ्यं शब्दस्य तादृशशाब्दबोधनिरूपितानुकूलाकाङ्क्षादिमत्त्वं प्रमाणान्तरं विना मुख्यार्थबाधकगौणार्थबोधकप्रमाणं विना नाविर्भवति न गौणार्थबोधोपधानप्रयोजकं भवति मुख्ये तु मुख्यार्थबोधे तु शब्दादेव शब्दान्मुख्यार्थोपस्थितादेव एवशब्दात् प्रमाणान्तरापेक्षं व्यवच्छिद्यते । तच्छब्दनिष्ठमुख्यार्थबोधकत्वमाविरस्ति स्फुटीभविष्यति ।

लाक्षणिकयोगनिमित्तयोरतुल्यत्वेन तुल्यवद्विधानानुपपत्तेः* । मुख्यग्रहणे च तस्य नित्यमप्राप्ते(१)†राभाका इत्यादि नित्यवद्विधानं न स्यात्‡ । न च मुख्याभावे लाक्षणिकग्रहणार्थं वचनान्तरम-

(१) नित्यप्राप्तेरिति क्वचिदादर्शे पाठः ।

ननु मुख्यार्थतात्पर्य्यग्रहासत्त्वे कथं शब्दादेव मुख्यार्थबोधः इत्यत आह तात्पर्य्येति। औत्सर्गिकमिति शेषः तथाच मुख्यार्थबाधकाभावे तात्पर्य्यग्रहस्य प्रायःसम्भवादिति भावः। गौणार्थपरता गौणार्थतात्पर्य्यं तदभावात् प्रमाणान्तराभावात् न सिद्ध्यति न विषयीभवति। तथाच मुख्यार्थबाध एव गौणार्थतात्पर्य्यकल्पनादिति तात्पर्य्यरूपकारणस्य मुख्यार्थेऽसत्त्वे सामग्रीविरहात् न मुख्यार्थबोधत्वत्वैव प्रमाणान्तरसहकारगणनगौणार्थतात्पर्य्यग्रहाद्गौणार्थबोधः। मुख्यार्थबोधे तु न गौणार्थतात्पर्य्यबाधकाद्यपेक्षेति भावः।

* अत्र हेतुं दर्शयति मुख्यलाक्षणिकेत्यादि। मुख्यकृत्तिकादिनक्षत्रयुक्तपौर्णमासीरूपमुख्यकार्त्तिकीयोगरूपस्य कृत्तिकापदलक्षणीयरोहिणीनक्षत्रयुक्तपौर्णमासीरूपगौणकार्त्तिकीयोगरूपस्य च निमित्तयोः अतुल्यत्वेन मुख्यगौणरूपतया तुल्यबलत्वाभावेन। तुल्यवत् विधानानुपपत्तेरिति मुख्याभावे गौणार्थग्रहणस्य प्रमाणान्तरगम्यतया समविधानत्वाभावात्।

† मुख्ययोगमात्रस्य ग्राह्यत्वे पुनः प्रतिबन्धिं दर्शयति मुख्यग्रहणे चेत्यादि। मुख्यग्रहणे च मुख्यार्थमात्रग्रहणे च तस्य मुख्यार्थमात्रस्य नित्यप्राप्तेः नियमेन प्राप्तेरित्यर्थः। नित्यमप्राप्तेरिति पाठे तु मुख्यग्रहणे मुख्यार्थमात्रस्य ग्रहणे तस्य च गौणार्थस्य च नित्यमप्राप्तेः नियतत्वेनानुपस्थितेः इति तु नित्यवद्विधानं न स्यादित्यस्य हेतुः।

‡ आभाका इत्यादीति। आभाका सितपक्षेषु मैत्रस्यवणरेवती। आदिमध्यावसानेषु प्रख्यापावर्त्तबोधनमिति आभाका सितपक्षेषु श्रयनावर्त्तनादिकमिति वचनत्रयस्यानामाभाकापदानाम् आदिना आकामावैष्णनक्षत्रकमिति वचने आकामावैपदानाच्च प्रसिद्धशब्दैकदेशतया तत्तत्पदलक्षणीयानाम् आषाढ़भाद्रकार्त्तिकानाम् आषाढ़कार्त्तिकमाघवैशाखमासानां च नित्यवद्विधानं न स्यादित्यर्थः।

स्तीति यौगिकत्वव्युत्पादनमप्यफलं स्यात्* । यदेव कृत्तिकापदस्य लाक्षणिकत्वे दूषणं तदेव कार्त्तिकादिपदस्य रोहिण्यादियुक्तपौर्णमासीमध्यके मासि लाक्षणिकत्वेऽपीति हेयमेवैतत्† । आषाढ़पदमाचन्तु यौगिकं वक्तुं शक्यते‡ पूर्व्वोत्तराषाढ़योरुभयोरप्याषाढ़त्वात् । किञ्च यदा योगो निमित्तं पदानां तदा किं कृत्स्ननक्षत्रयोगः कृत्स्नपौर्णमास्याः अर्द्धपादादियोगोऽपि वा§ । तत्र कृत्स्न-

---

* ननु वचनान्तरादेव लाक्षणिकार्थग्रहणं भविष्यतीति कथमनुपपत्तिरित्याशङ्क्यते न च मुख्याभावे इत्यादि । इतीति इति हेतौ अन्यथानामनेकार्थत्वात् यौगिकत्वव्युत्पादनं योगरूढ़िलक्षणम् अन्योपान्त इत्यादिवचनेनेति शेषः । तथाहि अन्योपान्तः त्रिभः श्रेय इति वचनस्यान्यथानुपपत्त्या कल्प्यमानाया लक्षणाया निरूढ़त्वेन शक्तितुल्यतया तल्लक्षणमपि न दूषणावहमिति भावः ।

† ननु अगत्या लक्षणास्वीकारेऽपि मुख्ययोगाभावे कृत्तिकापदस्य कार्त्तिकपदस्य च उभयलक्षणास्वीकारे अतीव गौरवम् इत्याशङ्क्य निराकरोति यदेवेत्यादि । रोहिण्यादियुक्तपौर्णमासीमध्यके मासि रोहिण्यादियुक्तपौर्णमासी मध्ये यस्य तादृशे मासि मुख्यचान्द्रमासीत्यर्थः तथाच शेषा मासा द्विभा ज्ञेयाः कृत्तिकादिव्यवस्थया इत्यनेन कृत्तिकादिपदस्य रोहिण्यादिलक्षणया कृत्तिकारोहिण्यन्यतरनक्षत्रयुक्तपौर्णमासी कार्त्तिकी तद्योगात् कार्त्तिकः अत्र कृत्तिकापदस्य लक्षणा अथवा रोहिण्यादियुक्तपौर्णमासीमध्ये मासि रौहिणेयमासि लक्षणया कार्त्तिकत्वं हेयमेवैतदिति लक्षणां विना मुनिवचनस्यानुपपत्त्यभावात् लक्षणादूषणस्याकिञ्चित्करत्वमिति भावः ।

‡ लक्षणां विना उपपत्तिं दर्शयति आषाढ़पदमाचमिति । अत्र माचपदेन आषाढ़भिन्नज्यैष्ठादिमासानां सर्व्वदा मुख्ययौगिकत्वव्यवच्छेदः ।

§ आषाढ़माचस्य मुख्ययौगिकत्वं साधयति पूर्व्वोत्तराषाढ़योरित्यादि । आषाढ़त्वात् आषाढ़पदवाच्यत्वात् तथाच शेषा मासा द्विभा ज्ञेया इत्यनेन पूर्व्वोत्तराषाढ़माचस्य द्विभत्वेन तद्युक्तपौर्णमासीयोगात् नवाषाढ़स्य मुख्ययौगिकत्वव्याघात इति भावः । योगनिमित्तं

योगस्तावदनेकवत्सरैरेकस्यां कदाचिदिति न तेनाभाका इत्यादि व्यवहारो नित्यवत् शक्यः। एकदेशयोगे तु मासान्तरीयनक्षत्रयोगस्यावश्यम्भावान्न मूलापूर्व्वाषाढ़योर्योगे स एव चान्द्रो ज्यैष्ठश्चाषाढ़श्चेति स्यात्। उत्तराषाढ़ाश्रवणयोश्च योगे आषाढ़ः श्रावणश्चेति स्यात्। एवमितरत्रापि माससङ्करान्न कर्म्मणां व्यवस्थितिः स्यात्*। अल्पयोगेनापि यौगिकत्वात् भूयोऽवयवयोगा-

---

योगः तत्तन्नक्षत्रयुक्तपौर्णमासीयोगः कृत्स्ननक्षत्रयोगः पूर्णनक्षत्रयोगः सम्पूर्णपौर्णमास्यां सम्पूर्णत्वं षष्टिदण्डव्यापित्वम्।

यथा स्कान्दपुराणम्।

प्रतिपत्प्रभृतयः सर्व्वा उदयादुदयाद्रवेः।
सम्पूर्णा इति विख्याता हरिवासरवर्ज्जिताः॥
आदित्योदयवेलाया आरभ्य षष्टिनाड़िका।
तिथिस्तु सा हि शुद्धा स्यात्सर्व्वतिथ्यो ह्ययं विधिः॥

इति नारदीयात्। एकत्र निर्णीतः शास्त्रार्थो बाधकमन्तरेण अन्यत्रापि तथा इति न्यायात् नक्षत्रेऽपि तथा कल्प्यते।

* तत्र सर्व्वदा न सम्भवति इत्याह कृत्स्नयोगस्तावदित्यादि। अनेकवत्सरैः अनेकवत्सरात् परतः कदाचिदिदं सम्भवतीत्यर्थः। तेन साकल्ययोगयुक्तत्वेन आभाका आषाढ़-भाद्रकार्त्तिक इति व्यवहारो नित्यवत् सदा न शक्यः वक्तुमिति शेषः। एकदेशयोगे तु तिथिनक्षत्रयोः पादादियोगे तु मासान्तरीयनक्षत्रयोगस्य मासान्तरीयमासंज्ञाप्रयोजकनक्षत्रान्तरयोगस्य अवश्यम्भावात् एकस्यां पौर्णमास्यां सम्भवात् मूलाषाढ़योर्ज्ज्यैष्ठश्च आषाढ़श्चेति। यदा पौर्णमास्यां मूलायोगः तदा द्वे द्वे चित्रादितारायां पूर्णपर्व्वेन्दुसंयुते। मासाश्चैवादयो ज्ञेया इति वचनेन मूलानक्षत्रयुक्तपौर्णमासीयोगात् य एव चान्द्रमासः ज्यैष्ठसंज्ञको भवति तस्यां पुनः पौर्णमास्यां पूर्व्वाषाढ़नक्षत्रयोगात् स एव चान्द्रमास आषाढ़संज्ञकश्च भवतीत्यर्थः। एवं यस्यां पौर्णमास्याम् उत्तराषाढ़नक्षत्रयोगात् य एव चान्द्र आषाढ़नामको

दिति* चेत् न उभयोस्तुल्ययोगे एकस्यापि भूयोऽवयवयोगाभावाद्विनामकत्वापत्तेः†। किञ्च पूर्वमासीयनक्षत्रस्यैकस्यां पौर्णमास्यां भूयोऽवयवयोगेन तन्नामप्रवृत्तावपरपौर्णमास्याञ्च परमासीयनक्षत्रस्य भूयोऽवयवयोगेन परमासीयनामप्रवृत्तौ मध्यमासो विलुप्येत‡। दृष्टञ्चैतत् तथाहि चतुर्दशोत्तरसहस्रशाकवर्षे लिख्यमाने तुलास्थभास्करे अश्विनीभरणीभ्यां व्याप्ता पौर्णमासी तावदाश्विनी। ततस्तत्रैव वत्सरे वृश्चिकस्थे भास्करे कृत्तिकारोहिणीभ्यां व्याप्ता पौर्णमासी तेन सा कार्त्तिक्येव। तद्योगाच्चासौ

भवति पुनस्तस्यां पौर्णमास्यां श्रवणनक्षत्रयोगात् स एव चान्द्रः श्रावणनामकश्च भवति, एवमितरत्रापि। एकस्यां पौर्णमास्यां धनिष्ठाश्रतभिषायोगात् स एव चान्द्रमासः श्रावणो भाद्रश्च भवति। मासस्य द्वयादित्यादि। एकस्य चान्द्रमासस्य मासद्वयात्मकत्वात् सङ्कल्पवाक्ये कस्य वा मासस्योल्लेखः स्यादित्यर्थः।

* अल्पयोगेनापि यौगिकत्वात् भूयोऽवयवयोगादिति। अल्पयोगेनापि अल्पकालवृत्तिनक्षत्रयोगेनापि भूयोऽवयवयोगात् अधिककालवृत्तिनक्षत्रयोगात्। तथाहि अल्पकालेनापि यौगिकत्वात् तदपेक्षया भूयोऽवयवयोगात् भूयोऽवयवयोगानुसारेण मासविहितकर्म्मणो व्यवस्था भवतीत्यर्थः।

† दूषयति चेन्नेति। उभयोः नक्षत्रयोः तुल्ययोगे समानकालयोगे। तथाहि यत्र पौर्णमासी षष्टिदण्डात्मिका पूर्वार्द्धे एकनक्षत्रयोगः अपरार्द्धे अपरनक्षत्रयोगः तत्र एकस्यापि अधिककालवृत्तित्वाभावात् विनामकत्वापत्तेः नामशून्यत्वापत्तेः।

‡ दूषणान्तरमाह किञ्चेति। पूर्वमासीयनक्षत्रस्य पूर्वचान्द्रमासप्रयोजकीभूतस्य नक्षत्रस्य एकस्यां पौर्णमास्यां भूयोऽवयवयोगेन अधिककालवृत्तित्वेनेत्यर्थः। तन्नामप्रवृत्तौ वैशाखाद्यन्यतममासनामप्रसक्तौ। एवम् अपरपौर्णमास्यां परमासीयनक्षत्रस्य वैशाखाद्यन्यतमचान्द्रमाससंज्ञाप्रयोजकीभूतनक्षत्रस्याधिककालवृत्तित्वेन परमासीयनामप्रवृत्तौ पूर्वमासात् तृतीयमासस्य नामप्रसक्तौ मध्यमासः पूर्व्वाव्यवहितीत्तरमास इत्यर्थः।

कार्त्तिक एव। भवताम्मते तदनन्तरञ्च धनुःस्थभास्करे पौर्णमास्यां मृगशिरोनक्षत्रं नास्त्येव आर्द्रायुक्ता तु भूयोभिरवयवैः शेषे तु त्रयोदशदण्डा एव परं पुनर्व्वसुव्याप्ताः। तेन सा मार्गशीर्षी न तु पौषी अल्पयोगात्*। मकरादित्ये च पुष्याश्लेषाभ्याम् अर्द्धार्द्धव्याप्ता तेन सा न पौषी न च माघीति स्यात्†। भवतु वा कथञ्चिदेकद्विकदण्डगणननक्षत्राधिकयोगात् सा पौषी तद्योगाच्च पौषः। माघी वा तद्योगात् माघः,‡ अन्यतरस्तु विलु-

---

* एतच्च दृष्टान्तप्रदर्शनेन दृढ़ीकरोति दृष्टश्चैतदिति। चतुर्दशोत्तरसप्तसप्तशकाब्दे चतुर्दशाधिकसप्तसप्तशकाब्दे तुलास्थभास्करे सौरकार्त्तिके अश्विनीभरणीभ्यां व्याप्ता युक्ता आश्विनी तद्योगादाश्विन इति यथासम्भवक्रमेणोक्तमेतत्। वस्तुतस्तु अन्योपान्तस्त्रिभी ज्ञेय इति नियमात् रेवत्यश्विनीभरण्यन्यतमयुक्ता या पौर्णमासी सापि आश्विनी तद्योगात् स एव चान्द्रमास आश्विन एव भवति। ततस्तदनन्तरं वृश्चिकस्थभास्करे सौरमार्गे मासि कृत्तिकारोहिणीभ्यां व्याप्ता युक्ता भवताम्मते पौर्णमास्याम् अधिककालवृत्तित्वेनैव नक्षत्रस्य माससंज्ञाप्रयोजकतेति वादिनाम्मते इत्यर्थः तदनन्तरञ्च सौरमार्गादेः परतश्च धनुस्थे भास्करे सौरपौषे भूयोऽवयवैः अधिककालं व्याप्य आर्द्रायुक्ता पौर्णमासी भवति तेन अधिककालार्द्रानक्षत्रसम्बन्धेन सा पौर्णमासी मार्गशीर्षी एव भवति न पौषी अल्पयोगात् अल्पकालपुनर्व्वसुसम्बन्धात्।

† मकरादित्ये च सौरमाघे च पुष्याश्लेषाभ्याम् अर्द्धार्द्धव्याप्ता इति। सा न पौषी न च माघीति तथाच यत्र सौरपौषे पौर्णमास्यां पौषसंज्ञाप्रयोजकपुष्यनक्षत्रस्यार्द्धाप्तिः एवं माघसंज्ञाप्रयोजकाश्लेषानक्षत्रस्यार्द्धाप्तिः तत्र अधिकेन व्यपदेशा भवन्ति इति न्यायास्पर्शात् समव्याप्तिस्थले अधिकव्याप्त्यभावात् तेनार्द्धपरिमितपुष्यनक्षत्रयोगेन सा पौर्णमासी न पौषी, एवम् अर्द्धपरिमिताश्लेषनक्षत्रयोगेन सापि पौर्णमासी न माघीति। तयोर्योगे स चान्द्रमासो न पौषः नापि माघश्चेति।

‡ अधिकव्याप्तिमङ्गीकृत्य समाधत्ते भवतु वा कथञ्चिदेकद्विकदण्डगणननक्षत्राधिक-

प्येत*। कुम्भस्यादित्ये हि पौर्णमास्याः पञ्चदशदण्डा एव परं भवाव्याप्ताः पूर्व्वफल्गुन्या तु भूयसामवयवानां योगात् सा फाल्गुनीति तद्योगात् स फाल्गुनः स्यान्नास्ति माघः। मीनादित्ये तु पूर्णिमोत्तरफाल्गुनीहस्ताभ्यां व्याप्ता सोऽपि फाल्गुन एव द्विर्भवेत्†। अथ प्रथमं येन युक्ता पूर्णिमा तेन व्यपदिश्यते तद्योगाच्च तन्नामा मास इति नास्ति मासलोपः। नैतदपि तस्मिन्नेवाब्दे वृषसंक्रान्तिदिने प्रथमं स्वातीयुक्ता पूर्णिमा, असौ चैत्रः, वृषशेषे च पूर्णिमा अनुराधादण्डैकद्विकयुक्ता प्रथमं,

---

योगात् एकस्य द्विकस्य दण्डस्य गणनेन नवचत्वारिंशदधिकयोगादित्यर्थः इति यदि पुष्यनवचत्वारिंशद्दण्डैकद्विकाधिक्यमङ्गीक्रियते तदा सा पुष्ययुक्तपौर्णमासी पौषी भवितुमर्हति। एवं पुष्यापेक्षया अश्लेषानवचत्वारिंशद्दण्डैकद्विकाधिक्यमङ्गीक्रियते तदा सा माघ्यपि भवितुमर्हति। अतस्तयोर्योगात् स चान्द्रमासोऽपि पौषी माघो वा भवति।

* अन्यतरस्तु विलुप्येत इति। यदा पुष्याद्यपेक्षया आर्द्रादेरधिकव्याप्तिस्तदा तन्मासस्य मार्गशीर्षत्वेन पौषी विलुप्येत यदा वा मघाद्यपेक्षया पूर्व्वफाल्गुन्यादेर्व्याप्त्याधिक्यं तदा तन्मासस्य फाल्गुनतया माघो वा विलुप्येत।

† अधिकव्याप्तिं दर्शयति कुम्भस्यादित्ये इत्यादि। पौर्णमास्याः पञ्चदशदण्डाः एवं पञ्चदशदण्डमानमेव परं व्याप्ताः न भूयसामवयवानां पौर्णमास्या योग इति शेषः पूर्व्वफल्गुन्या भूयसामवयवानां योगात् पूर्व्वफल्गुन्या व्याप्ता सा पौर्णमासी फाल्गुन्येव परं भवतीत्यर्थः नास्ति माघः पौर्णमास्यामल्पकालमघासम्बन्धात् इति भावः। मीनादित्ये तु सौरचैत्रे पूर्णिमोत्तरफल्गुनीहस्ताभ्यां व्याप्ता उत्तरफाल्गुनीहस्ताभ्यां व्याप्ता पूर्णिमा। सोऽपि सौरचैत्रगतचान्द्रमासोऽपि फाल्गुन एव द्विर्भवेत्, सौरफाल्गुनगतचान्द्रमासोऽपि फाल्गुनः पूर्व्वफाल्गुन्याः पौर्णमास्यामधिककालव्यापनात्, एवं सौरचैत्रगतचान्द्रमासोऽपि फाल्गुन एव उत्तरफाल्गुनीहस्तयोः पौर्णमास्यां बहुकालव्यापित्वात्।

तेनासौ वैशाखः स्यात्, ज्यैष्ठो लुप्येत*। मिथुनादित्यपूर्णिमाया आषाढ़हयव्याप्तत्वादाषाढ़त्वस्य, कर्कटस्थसूर्ये च पौर्णमास्याः श्रवणधनिष्ठाव्याप्तत्वेन श्रावणत्वस्य च निर्विवादत्वात्। हृषशेष-पौर्णमास्याश्चानुराधायोगाभावे वैशाखो लुप्येत†। तथा सिंह-सूर्ये शतभिषापूर्वभाद्रपदाभ्यां व्याप्तत्वादसौ भाद्र एव। कन्या-सूर्ये च प्रथममुत्तरभाद्रपदयोगादसावपि भाद्र एव स्यात्। अवि-शिष्टयोगमात्रस्य निमित्तत्वे तु माससङ्करान्न कर्म्मणामनुष्ठान-व्यवस्थितिः स्यात्‡। तुलास्थे च भास्करे अश्विनीभरणीभ्यां युक्ते

---

* एतत्पूर्व्वपक्षे उत्तरयति अथेति। प्रथमं येन मासंज्ञाप्रयोजकीभूतनक्षत्रेण संयुक्ता पूर्णिमा भवति तेन नक्षत्रेणैव वैशाखीत्यादिना यथासम्भवं व्यपदिश्यते व्यवह्रियते, तद्योगाच्च तन्नक्षत्रयुक्तपौर्णमासीयोगाच्च यथासम्भवं वैशाखाद्यन्यतममासी भवतीत्यर्थः। अत्र प्राथमिकत्वेन तत्तन्नक्षत्रयुक्तपौर्णमासीयोगस्यैव तत्तन्नामकमासव्यवहर्तृत्वे नियामकता न तु बहुकालव्यापित्वेनापि। अतो मासलोपो नास्ति। तथाच कुम्भादित्ये पौर्णमास्यां मघा-सम्बन्धितया पञ्चदशदण्डकालस्य स्वल्पत्वेऽपि मघानक्षत्रयोगस्य प्राथम्यात् कुम्भादित्यगत-माघ्रमासो माघ एव भवति न फाल्गुन इति भावः। नैतदपि प्रथमं स्वातीयुक्तपूर्णिमा-असौ स्वातीयुक्तपूर्णिमासम्बन्धकमाघ्रमासस्यैव एव, तथाच हे हे चित्रादितारकाणामिति वचनेन चित्रास्वात्योरन्यतरनक्षत्रस्य चैत्रसंज्ञाप्रयोजकत्वात् तद्योगस्य प्राथम्याच्च। अनुराधा-दण्डैकादिकयुक्ता तेन असौ चान्द्रमासः वैशाखः, विशाखानुराधयोरन्यतरनक्षत्रस्य वैशाख-संज्ञाप्रयोजकत्वात् तद्योगस्य प्राथम्याच्च। ज्यैष्ठी विलुप्यते।

† तत्साधयति मिथुनादित्ये इत्यादि। सौराषाढ़े पूर्णिमाया आषाढ़हयस्य व्याप्त-त्वात् आषाढ़त्वस्य निर्विवादत्वादित्यग्रिमेन सम्बन्धः। कर्कटस्थे सूर्ये सौरश्रावणे श्रवण-धनिष्ठाव्याप्तत्वेन श्रावणत्वस्य च निर्विवादत्वात्। हृषशेषपौर्णमास्याम् अनुराधाभावे वैशाखी लुप्येत इति।

‡ पूर्णिमा अनुराधादण्डैकादिकयुक्ता इति प्राक् दर्शितम् इदानीन्तु अनुराधाभावे

ह्यसावाश्विनः पूर्वञ्च कन्यायामपि रेवतीयोगादाश्विन इति द्विर्भाद्रो द्विराश्विनश्च स्यात्, तथा त्रयोदशोत्तरसहस्रशकाब्दशेषे मीनस्थे सूर्य्ये पूर्व्वोत्तरफाल्गुनीव्याप्ता पूर्णिमा, तदनन्तरं मेषसूर्य्ये हस्तचित्राभ्यां युक्ता पूर्णिमा हस्तयोगात् फाल्गुनोऽप्यसौ त्रयोदशोत्तरसहस्राब्दीयकुम्भादित्वात् प्रभृति चतुर्दशोत्तरसहस्राब्दान्तमीनभोगपर्य्यन्तेन मासद्वयलोपः। भाद्राश्विनयोराद्यत्तत्वं,* फाल्गुनस्य द्विराद्यत्तत्वं,† मासानाञ्च सङ्करः स्यात्। मासलोपे सङ्करे च सति नियतक्रमावस्थितचान्द्रद्वादशमासगोचरो माघादिपदप्रयोगो बाध्यते‡। न च तदयुक्तं प्रयोगानुसारित्वात् स्व-

---

वैशाखोऽपि विलुप्येत इति दर्शयति। अविशिष्टयोगमात्रस्य अनियतयोगमात्रस्य हेतुत्वे तु यद्यपि परस्परविरुद्धानाम् एकत्रावस्थानं सङ्करः पृथिवीत्वतेजस्त्वादिना घटत्वं यदि नाना इत्यादिना उदाहृतं तथापि सोऽत्र न ग्राह्यः। अतएव स्वयमुदाहृतं भाद्राश्विनयोराद्यत्तत्वं फाल्गुनस्य द्विराद्यत्तत्वं मासानाञ्च सङ्करः स्यादित्यादि। माससङ्करात् मासानां साङ्क्ष्येद्विलोपादेः सम्भवात् न कर्म्मानुष्ठानव्यवस्थितिः कर्म्मानुष्ठानव्यवस्था न स्यात्।

* द्विलोपादिकं क्रमेण दर्शयति तुलास्थे चेत्यादि। कुम्भादित्वात् सौरफाल्गुनमारभ्य मीनभोगपर्य्यन्तेन सौरचैत्रपर्य्यन्तेन। मासद्वयलोपः वैशाखज्यैष्ठयोर्लोपः भाद्राश्विनयोराद्यत्तत्वं द्वित्वं द्विर्भाद्रः द्विराश्विनश्च भवतीत्यर्थः।

† फाल्गुनस्य द्विराद्यत्तत्वमिति। तथाच सौरफाल्गुनमारभ्य सौरचैत्रपर्य्यन्तेषु मध्ये फाल्गुनस्य वारद्वयप्राप्तत्वात्। त्रयोदशोत्तरसहस्रशकाब्दीयसौरफाल्गुनगतचान्द्रमासस्य एवं तदब्दीयसौरचैत्रगतचान्द्रमासस्य च फाल्गुनत्वम् इति पूर्व्वाब्दे फाल्गुनस्य द्वित्वम्, एवं चतुर्दशोत्तरसहस्रशकाब्दीयकुम्भमीनगतचान्द्रफाल्गुनस्य द्वित्वमिति द्विराद्यत्तत्वम्।

‡ मासलोपे च दोषं दर्शयति नियतक्रमेत्यादि। नियतक्रमावस्थितः वैशाखोत्तरज्यैष्ठस्यदुत्तराषाढ़ इत्यादिरूपः द्वादशमासः वैशाखादिचैत्रान्तः। तथाच नियतक्रमेण अवस्थिता ये चान्द्रा चान्द्ररूपाः द्वादशमासाः तद्गोचरत्वद्विषयः तद्विषयको यो

निमित्तबाधाच्चमत्वात् सङ्करलोपयोश्च क्रमान्तरापत्तेः। अथोच्यते यस्मिन् दर्शान्ते मासि मघादियुक्तपूर्णिमा,* तत्र माघादिप्रवृत्तिः, सूर्य्यचन्द्रयोर्हि पूर्णिमान्त एवान्योऽन्यं समसप्तकेनावस्थानात् परो विप्रकर्षो भवति। आदौ तु षड्दृष्टकेनाप्यवस्थानात्† । तथाहि त्रयोदशोत्तरसहस्रशाकान्ते मीनसूर्य्ये पूर्णिमा पूर्व्वोत्तरफाल्गुनीभ्यां व्याप्ता, तत्र पौर्णमास्याः शेषपञ्चदशदण्डाष्वेव परं कन्यायाञ्चन्द्रः‡ पूर्व्वं सिंह एव,तथा चतुर्दशोत्तरसहस्राब्दादौ मेषसूर्य्ये

—

माघादिपदप्रयोगः स बाध्यते इति वाक्यार्थः। ननु मलमासे सति मासस्य द्वित्वात् क्रमभङ्गेऽपि सति न क्षतिः तद्वदत्रापि भवतु को दोष इति चेन्न, द्वादशमासाः संवत्सरः क्वचित्त्रयोदशमासा इति श्रुत्या मलमासपाते त्रयोदशमाससंवत्सरस्य श्रौतत्वात् तदितरत्र द्वादशमाससंवत्सरस्य श्रुतिप्रतिपादितत्वेन द्वित्वलोपे च श्रुतिविरोधापत्तेः।

* न च तदयुक्तमिति। मघादिपदप्रयोगबाधो न युक्त इत्यर्थः। योगस्य पौर्णमास्यां नक्षत्रयोगस्य प्रयोगानुसारित्वात् प्रयोगसमनियतत्वात् स्वनिमित्तबाधाच्चमत्वात् स्वनिमित्तस्य प्रयोगस्य बाधितुमयोग्यत्वात् सङ्करलोपयोश्च सतोः क्रमान्तरापत्तेः क्रमान्यथापत्तेः। सिद्धान्तयति अथोच्यते यस्मिन् दर्शान्ते मासि यस्मिन् मुख्यचान्द्रे मासि मघादियुक्तपूर्णिमा न तु अश्लेषादियुक्तपूर्णिमा तत्र चान्द्रमासि माघादिप्रवृत्तिः माघादिसंज्ञाप्रवृत्तिः।

† अत्र हेतुमाह सूर्य्यचन्द्रयोर्हि पूर्णिमान्त एवान्योऽन्यं समसप्तकेनावस्थानात् अन्योऽन्यं परस्परं समसप्तकेन सूर्य्यभोग्यराशितश्चन्द्रभोग्यराशिः सप्तमः एवं चन्द्रभोग्यराशितः सूर्य्यभोग्यराशिः सप्तमः तेनावस्थानात् परो विप्रकर्षो भवति, तथाच सूर्य्याचन्द्रमसोर्यः परो विप्रकर्षः सा पौर्णमासीति गीर्भिलसूत्रात्। आदौ तु षड्दृष्टकेनावस्थानादिति आदौ अश्लेषानक्षत्रयोगे तु तथाच अश्लेषानक्षत्रस्य कर्कटघटकतया तद्राशिस्थे चन्द्रे कुम्भादिस्थे तु सूर्य्याचन्द्रमसोः षड्दृष्टकेनावस्थानं भवति।

‡ तथाहीत्यादि। मीनसूर्य्ये सौरचैत्रे मासि पूर्णिमा पूर्व्वोत्तरफल्गुनीभ्यां व्याप्ता पौर्णमास्याः शेषपञ्चदशदण्डेष्वेव परं कन्यायां चन्द्रः इति अत्र पूर्व्वोत्तरफल्गुनीभ्यां व्याप्ता

पूर्णिमा हस्तचित्राभ्यां व्याप्ता, तत्र तुलासम्बन्धिनश्चित्रापरार्द्धस्य त्रयोदशदण्डा एव परं पूर्णिमान्ते भूताः। तदितरांशे तु पौर्णमास्याः कन्यायामेव चन्द्रो, मेषे च सूर्यः। तथा तद्वत्सर एव वृषसूर्ये,* पूर्णिमा स्वातीविशाखाभ्यां व्याप्ता. तत्स्वात्यंशे विशाखापदत्रये तुलायाश्चन्द्रः वृश्चिकसम्बन्धिविशाखाशेषैरष्टाभिरेव दण्डैः परमन्ते व्याप्ता, तेनान्त एव नियतं चन्द्रसूर्ययोरन्योऽन्यं सप्तमराश्यवस्थानं, न पुनरादावपि। तदेवमवच्छिन्नपूर्णिमात्रयेऽपि प्रथमं सूर्यात् षड्दृष्टकेनैव चन्द्रस्यावस्थानम्।

---

इत्युपादानात् एकस्यां पौर्णमास्यां सम्पूर्णैभयनक्षत्रयोर्व्याप्तसम्भवात् पूर्वफल्गुनीशेषार्द्धोत्तरफल्गुनीपूर्वार्द्धाभ्यां व्याप्ता पौर्णमासीत्युपलभ्यते, सम्भाव्यते च ततश्चोत्तरफल्गुन्या द्वितीयपादः पौर्णमास्याः शेषपञ्चदशदण्डेष्वेव परमवतिष्ठते तस्य द्वितीयपादस्य कन्याघटकतया च कन्यायां चन्द्र इत्युक्तं सङ्गच्छते।

* पूर्वं सिंह एव इति। मघापूर्वफल्गुन्युत्तरफल्गुनीपादः सिंह इत्युपादानादेव पूर्वफल्गुन्याः शेषार्द्धस्य उत्तरफल्गुन्याः प्रथमपादस्य च सिंहघटकतया च पूर्वं सिंह इत्यपि सङ्गच्छते। तथाच चतुर्दशसहस्राब्दादौ मेषसूर्ये पूर्णिमा हस्तचित्राभ्यां व्याप्ता इत्यादि अत्र तुलासम्बन्धिनश्चित्राशेषार्द्धस्य तुलासम्बन्धिनश्चित्राद्वितीयपादस्य त्रयोदशदण्डा एव परं प्रथमत्रयोदशदण्डा एव परं पूर्णिमान्ते पूर्णिमान्तपर्यन्तं व्याप्य भूता अवस्थिता। यद्यप्यत्रापि पूर्ववत् सम्पूर्णहस्तचित्राभ्यां व्याप्तसम्भवात् हस्तशेषार्द्धचित्रापूर्वार्द्धाभ्यां व्याप्ता वक्तुमुचिता, तथापि चित्रापूर्वार्द्धस्य कन्याघटकतया कन्यास्थे चन्द्रे मेषस्थसूर्ये च षड्दृष्टकेनावस्थित्या समसप्तकेनावस्थित्वभावात् परमविप्रकर्षाभावेन पौर्णमास्यपि न घटते, अतोऽगत्याप्यत्र हस्तचतुर्थपाद-किञ्चिन्यून-चित्रापादत्रयाभ्यां व्याप्ता वक्तव्या, यदि चात्र नक्षत्रपादस्य पञ्चदशदण्डात्मकतया त्रयोदशदण्डेति कथनमनुचितं भवति तथापि तदानीन्तनतिथिपरिमाणमवधार्य्य ग्रन्थकारेण लिखितमतो नानुचितं किञ्चित्। तदितरांशे चित्रापूर्वार्द्धादौ। वृषसूर्ये सौरज्येष्ठे।

अतएव मार्कण्डेयः ।

"आदिपादार्द्धमात्रेण नक्षत्रस्यान्वयेऽप्यसौ ।
तिथिरन्तेऽपि संयुक्ता विपरीता न सा पुनः ॥" (१)

अस्यार्थः । सूर्य्यात् सप्तमराशिसम्बन्धिना नक्षत्रेणान्त एव नियत इति । तदन्ते तु तन्नक्षत्रयोगात् कार्त्तिकादिपदानि यौगिकानीति* । तदप्ययुक्तम् । चतुर्दशोत्तरसहस्रशाकाब्दे वृश्चिकस्थे धनुस्थे च सूर्य्ये पौर्णमास्यां मृगशिरोयोगस्याभावात् तदन्तयोगस्य सुतरामभावान्मार्गशीर्षमासविलोपापत्तेः† । किञ्च द्विभक्तिभत्वमन्तरेणापि प्रतिपदादिदर्शान्ते चान्द्रे मासि कार्त्तिकादिपद-

---

(१) हेमाद्रौ तथाच भट्टरगोता इति कृत्वा एतद्वचनं लिखितं परन्तु तृतीयचरणे तिथिरन्तेऽपि इत्यत्र तिथिरर्द्धेऽपीति पाठो दृश्यते ।

---

* स्वातीविशाखाभ्यां व्याप्ता इति । अत्रापि पौर्णमास्यन्ययानुपपत्त्या सप्तदण्डावशिष्टस्वाती चयःपञ्चाशद्दण्डमात्रावस्थितविशाखाभ्यां व्याप्तेति वक्तव्या, तत्स्वात्यंशे स्वातीशेषसप्तदण्डे विशाखाशेषैरष्टाभिर्दण्डैः पञ्चचत्वारिंशद्दण्डात् परतः षट्चत्वारिंशद्दण्डमारभ्य अष्टाभिर्दण्डैरित्यर्थः । तदेवमवच्छिन्नपूर्णिमायोगे नक्षत्रनक्षत्रावच्छिन्नमीनमेषवृषगतपूर्णिमायोगेऽपीत्यर्थः यतएव अन्ययोगस्य ग्राह्यता अतएवेत्यर्थः । अन्वये सूर्य्यात् सप्तमराशौ अर्थात् स्थितस्य नक्षत्रस्य आदिपादार्द्धमात्रेणापि अन्त एव संयुक्ता चेत् तदैव अपरिवार्थे अव्ययानामनेकार्थत्वात् असौ पौर्णमासी तिथिः पौर्णमासीतिथिपदवाच्या, विपरीता अन्तभिन्ने संयुक्ता चेत् सा पौर्णमासी तिथिर्न भवतीत्यर्थः । यौगिकानि योगरूढिकानीत्यर्थः ।

† तदप्ययुक्तमिति । अथोच्यते इत्यारभ्य दृषमूर्य्ये इत्यादयन्तं यदुक्तं तदप्ययुक्तमित्यर्थः । वृश्चिकस्थे धनुस्थे च सूर्य्ये सौरमार्गे सौरपौषे च मृगशिरोयोगस्याभावात् मृगशिरःपदस्योपलक्षणतया मृगशिरआर्द्रायोगस्यात्यन्ताभावादित्यर्थः । अन्यथा मृगशिरआर्द्रायोगस्य मार्गशीर्षघटकतया मार्गशीर्षविलोपापत्तेरित्यसङ्गतं भवेत् ।

प्रयोगदर्शनात् द्विभवित्रियोगादपि कथं यौगिकत्वम्। किञ्च सकलतिथेः किं योगो निमित्तम्। अथ सकलभस्य योगो वा, बहुयोगो वा, आदौ वा, अन्ते वा, योगमात्रं वा, सर्व्वं व्यभिचरति। इदन्तु नोपभोगिनि रवावुपक्रान्ते* चतुर्दशोत्तरदशशत-शाकाब्दे कार्त्तिके चान्द्रे तत्पूर्णिमाश्विनीभरणीभ्यां व्याप्ता। न च कृत्तिकादियुगयोगः। न च नासौ कार्त्तिक इति† नियमात्तच्च प्रयोगस्य‡। तथाहि चतुर्दशोत्तरसहस्रशाकाब्दे तुला-

---

* प्रतिबन्ध्यन्तरं दर्शयति किञ्चेति। द्विभचित्रसमन्तरेण व्यतिरेकेणापि प्रतिपदादि-दर्शान्ते मासि मुख्यचान्द्रे मासि कार्त्तिकादिपदप्रयोगदर्शनात् इति। तथाच—"कृष्णपक्षे चतुर्दश्यां मासार्द्धं जायते यदि। तत्रयोदशगे सूर्य्ये राहुणा ग्रस्यते शशी॥" मासार्द्धं कार्त्तिकादौ कृत्तिकादि। ततश्च कृष्णचतुर्दश्यां मासार्द्धयोगे तत्पूर्व्वपौर्णमास्यां कृत्तिका-रोहिण्यादिरूपद्विभत्वादियोगाभावस्य सिद्धिः सुतरामेव। अपिच मासार्द्धमित्यस्य कार्त्तिकादौ कृत्तिकादेर्वक्तव्यत्वादेव कार्त्तिकादिप्रयोगोऽपि सिद्ध एव। सकलतिथेः सम्पूर्णतिथेः। सकलभस्य सम्पूर्णनक्षत्रस्य। सर्व्वं व्यभिचरति सर्व्वानुगतत्वेन द्विभत्वादि-योगो न सम्भवति। इदन्तु सर्व्वं व्यभिचरति सकलतिथेरित्यादि यदुक्तम् इदन्तु सर्व्वं व्यभिचरतीत्यर्थः उपभोगिनि राश्युपभोगिनि राशिस्थे सूर्य्ये अर्थात् सौरे मासि उपक्रान्ते आरब्धे सति दर्शान्ते मासि न भवति।

† तदेव दर्शयति चतुर्दशोत्तरदशशतशाकाब्दे इत्यादि। कार्त्तिके चान्द्रे मुख्य-चान्द्रकार्त्तिके मासि तत्पूर्णिमा तन्मुख्यचान्द्रकार्त्तिकमाससम्बन्धिनी पूर्णिमा अश्विनी-भरणीभ्यां व्याप्ता अश्विनीभरणीभ्यामेव व्याप्ता न तु कृत्तिकायुगयोगः कृत्तिकायुगस्य कृत्तिकारोहिणीयोगो न त्वित्यर्थः। न च नासौ कार्त्तिकः असौ कार्त्तिको न भवति इति न अर्थात् कार्त्तिको भवत्येव इत्यर्थः।

‡ अत्र हेतुं दर्शयति नियमात्तच्च प्रयोगस्य इति। तत्र अश्विनीभरणीव्याप्तपौर्ण-मासीयुक्तचान्द्रमासि प्रयोगस्य कार्त्तिकप्रयोगस्य नियमात् शास्त्रेण विहितत्वात्।

स्यादित्याष्टमदिनोपक्रान्तस्य प्रतिपदादिदर्शान्तमासस्य † पौर्णमास्यश्विनीभरणीभ्याम् व्याप्ता कृत्तिकारोहिण्योरन्यतरयोगाच्च* कार्त्तिकः। तथा तदनन्तरितस्य वृश्चिकादित्यसप्तमदिनोपक्रान्तस्य प्रतिपदादिदर्शान्तमासस्य पूर्णिमा कृत्तिकारोहिणीभ्यां व्याप्ता मृगशिरआर्द्रयोश्चान्यतरयोगा‡न्मार्गशीर्षः॥। एवंविध

---

* तदेवोपपादयति तथाहीति। तुलास्यादित्याष्टमदिनोपक्रान्तस्य सौरकार्त्तिकाष्टमदिनारब्धस्य प्रतिपदादिदर्शान्तमासस्य मुख्यचान्द्रमासस्य पौर्णमास्याम् अश्विनीभरणीभ्यां व्याप्तायां कृत्तिकारोहिण्योरन्यतरयोगाच्च।

† कार्त्तिक इति। कृत्तिकारोहिण्योरन्यतरयोगयुक्तः स चान्द्रमास इति शेषः चकारात् अश्विनीभरणीव्याप्तपौर्णमासीयुक्तः स चान्द्रमासोऽपि कार्त्तिकः तथा यथा स चान्द्रमासः कार्त्तिकः तथा इत्यर्थः। तदनन्तरितस्य तदव्यवहितसौरकार्त्तिकानन्तरभागतस्य वृश्चिकादित्यसप्तमदिन उपक्रान्तस्य सौरमार्गस्य सप्तमदिनारब्धस्य प्रतिपदादिदर्शान्तमासस्य पूर्णिमायां कृत्तिकारोहिणीभ्यां व्याप्तायां मृगशिरआर्द्रयोरन्यतरयोगाच्च।

‡ मार्गशीर्ष इति। मृगशिरआर्द्रायुक्तः स च चान्द्रमास इति शेषः। चकाराच्च कृत्तिकारोहिणीयुक्तोऽपि स चान्द्रमासः मार्गशीर्ष एव भवतीत्यर्थः यद्यपि वक्ष्यमाणपद्मपुराणवचनात् भरणीयुक्तत्वेऽपि चान्द्रमासस्य कार्त्तिकत्वं वाचनिकम्। अत्र तादृग्वचनाभावात् कथं कृत्तिकारोहिणीयोगे चान्द्रमासस्य मार्गशीर्षत्वम् इति चेन्न भरणीनक्षत्रयोगे चान्द्रमासस्य वाचनिककार्त्तिकत्वात् तदनन्तरागतस्य चान्द्रमासस्य तादृग्वचनाभावेऽपि कार्त्तिकोत्तरमार्गशीर्ष इति क्रमनियमादेव तस्य मार्गशीर्षत्वे निर्विवादात्। अत्र क्वचित् पुस्तके पौर्णमास्यश्विनीभरणीभ्यां व्याप्तां कृत्तिकारोहिण्योरन्यतरयोगाच्च कार्त्तिकः तथा तदनन्तरितस्य इत्यादि कृत्तिकारोहिणीभ्यां व्याप्तां मृगशिरआर्द्रयोरन्यतरयोगाच्च मार्गशीर्ष इति। क्वचिच्च व्याप्तामित्यत्र व्याप्ता इति विन्दुरहितपाठो दृश्यते तदुभयपाठोऽपि प्रामादिक एव। अन्यथा उत्तरत्रान्यतरयोगाच्चेत्यनन्वयापत्तेः व्याप्तायामित्येव पाठः समीचीनः।

एव कार्त्तिको द्वापञ्चाशदधिकनवशतसंख्याते शकाब्दे अम्बुकादिर्दर्शितवान्(१)*। न च तौ कार्त्तिकमार्गशीर्षौ न भवत एवेति वाच्यं† द्वयोरेव(२) तुलाद्वश्चिकादित्यारब्धत्वाद्वा ‡ द्वश्चिकधनुःसंक्रान्तिचिह्नितत्वाद्वा। कार्त्तिकमार्गशीर्षपदप्रयोगाविवादात्। तत्रैव च प्रयोगेण योगस्य यन्त्रितत्वात्। अनेनैवं धृते दर्शान्तेऽपि सावनमासेषु प्रयोगात्।

अतएव पद्मपुराणम्।

कार्त्तिक्यान्तु यदा ऋक्षमाग्नेयमभवति क्वचित्।
महती सा तिथिर्ज्ञेया स्नानदानादिकर्म्मसु॥
यदा याम्यन्तु भवति तिथौ तस्यां नराधिप।
तिथिः सापि महापुण्या ऋषिभिः परिकीर्त्तिता॥

---

(१) अम्बुकादिभिर्दर्शितवान् इति मूं पुं पाठः।

(२) क्वचिदादर्शपुस्तके द्वयोरेव तुलाद्वश्चिकादिमासेषु च प्रयोगादित्येवमाचक्षते। तत अतएव इत्यस्ति, तुलाद्वश्चिकादित्यारब्धत्वादित्यादिकं नास्ति।

---

* अत्र ग्रन्थकारीयसंवादं दर्शयति एवंविध एव च कार्त्तिक इत्यादि। अश्विनीभरणीभ्यां युक्तः अम्बुकादिभिः अम्बुकभट्टादिभिः दर्शित इत्येव पाठः साधुः दर्शितवानिति तु अपपाठः अम्बुकादिभिरित्यनन्वयापत्तेः।

† तदुभयोः कार्त्तिकत्वं मार्गशीर्षत्वञ्च विचारसुखेन साधयति न च तावित्यादि। तौ चान्द्रमासौ कार्त्तिकमार्गशीर्षौ न भवत एवेति वाच्यं न चेत्यर्थः।

‡ तत्साधकं हेतुद्वयं क्रमेण दर्शयति द्वयोरेव इत्यादि तुलाद्वश्चिकादित्यारब्धत्वात्। तथाच तुलास्थरव्यारब्धचान्द्रमासत्वं कार्त्तिकत्वम्, एवं द्वश्चिकस्थरव्यारब्धधनुःसंक्रान्तिप्रतिपदादिदर्शान्तत्वं मार्गशीर्षत्वमिति लक्षणम्। यदाह व्यासः। सौनादिस्थो रविर्यैर्मासारब्धप्रथमक्षणे। भवेत्तेऽब्दे चान्द्रमासास्तैश्चाया द्वादश स्मृता इति॥ आरब्धप्रथमक्षणे आद्यक्रियाद्यसमये।

स्वादित्याष्टमदिनोपक्रान्तस्य प्रतिपदादिदर्शान्तमासस्य† पौर्णमास्यश्विनीभरणीभ्याम् व्याप्ता कृत्तिकारोहिण्योरन्यतरयोगाच्च* कार्त्तिकः। तथा तदनन्तरितस्य वृश्चिकादित्यसप्तमदिनोपक्रान्तस्य प्रतिपदादिदर्शान्तमासस्य पूर्णिमा कृत्तिकारोहिणीभ्यां व्याप्ता मृगशिरआर्द्रयोश्चान्यतरयोगात्‡मार्गशीर्षः§। एवंविध

---

* तदेवोपपादयति तथाहीति। तुलास्थादित्याष्टमदिनोपक्रान्तस्य सौरकार्त्तिकाष्टमदिनारभ्यस्य प्रतिपदादिदर्शान्तमासस्य मुख्यचान्द्रमासस्य पौर्णमास्याम् अश्विनीभरणीभ्यां व्याप्तायां कृत्तिकारोहिण्योरन्यतरयोगाच्च।

† कार्त्तिक इति। कृत्तिकारोहिण्योरन्यतरयोगयुक्तः स चान्द्रमास इति शेषः चकारात् अश्विनीभरणीव्याप्तपौर्णमासीयुक्तः स चान्द्रमासोऽपि कार्त्तिकः तथा यथा स चान्द्रमासः कार्त्तिकः तथा इत्यर्थः। तदनन्तरितस्य तदव्यवहितसौरकार्त्तिकानन्तरभागतस्य वृश्चिकादित्यसप्तमदिन उपक्रान्तस्य सौरमार्गस्य सप्तमदिनारभ्यस्य प्रतिपदादिदर्शान्तमासस्य पूर्णिमायां कृत्तिकारोहिणीभ्यां व्याप्तायां मृगशिरआर्द्रयोरन्यतरयोगाच्च।

‡ मार्गशीर्ष इति। मृगशिरआर्द्रायुक्तः स च चान्द्रमास इति शेषः। चकाराच्च कृत्तिकारोहिणीयुक्तोऽपि स चान्द्रमासः मार्गशीर्ष एव भवतीत्यर्थः यद्यपि वक्ष्यमाणपद्मपुराणवचनात् भरणीयुक्तत्वेऽपि चान्द्रमासस्य कार्त्तिकत्वं वाचनिकम्। अत्र तादृशवचनाभावात् कथं कृत्तिकारोहिणीयोगे चान्द्रमासस्य मार्गशीर्षत्वम् इति चेन्न भरणीनक्षत्रयोगे चान्द्रमासस्य वाचनिककार्त्तिकत्वात् तदनन्तरागतस्य चान्द्रमासस्य तादृशवचनाभावेऽपि कार्त्तिकोत्तरमार्गशीर्ष इति क्रमनियमादेव तस्य मार्गशीर्षत्वे निर्विवादात्। अत्र क्वचित् पुस्तके पौर्णमास्यश्विनीभरणीभ्यां व्याप्तां कृत्तिकारोहिण्योरन्यतरयोगाच्च कार्त्तिकः तथा तदनन्तरितस्य इत्यादि कृत्तिकारोहिणीभ्यां व्याप्तां मृगशिरआर्द्रयोरन्यतरयोगाच्च मार्गशीर्ष इति। क्वचिच्च व्याप्तामित्यत्र व्याप्ता इति विन्दुरहितपाठो दृश्यते तदुभयपाठोऽपि प्रामादिक एव। अन्यथा उत्तरचान्यतरयोगाच्चेत्यनन्वयापत्तेः व्याप्तायामित्येव पाठः समीचीनः।

एव कार्त्तिको द्वापञ्चाशदधिकनवशतसंख्याते शकाब्दे अम्बुकादिर्दर्शितवान्(१)*। न च तौ कार्त्तिकमार्गशीर्षौ न भवत एवेति वाच्यं† द्वयोरेव(२) तुलाद्वश्चिकादित्यारब्धत्वाद्वा ‡ द्वश्चिकधनुःसंक्रान्तिचिह्नितत्वाद्वा। कार्त्तिकमार्गशीर्षपदप्रयोगाविवादात्। तत्रैव च प्रयोगेण योगस्य यन्त्रितत्वात्। अनेनैवं धृते दर्शान्तेऽपि श्रावनमासेषु प्रयोगात्।

अतएव पद्मपुराणम्।

कार्त्तिक्यान्तु यदा ऋक्षमाग्नेयमभवति क्वचित्।
महती सा तिथिर्ज्ञेया स्नानदानादिकर्मसु॥
यदा याम्यन्तु भवति तिथौ तस्यां नराधिप।
तिथिः सापि महापुण्या ऋषिभिः परिकीर्त्तिता॥

---

(१) अम्बुकादिभिर्दर्शितवान् इति मूं पुं पाठः।

(२) क्वचिदादर्शपुस्तके द्वयोरेव तुलाद्वश्चिकादिमासेषु च प्रयोगादित्येवमाचमस्ति। तत अतएव इत्यस्ति, तुलाद्वश्चिकादित्यारब्धत्वादित्यादिकं नास्ति।

---

* अत्र ग्रन्थकारीयसंवादं दर्शयति एवंविध एव च कार्त्तिक इत्यादि। अश्विनीभरणीभ्यां युक्ताः अम्बुकादिभिः अम्बुकभट्टादिभिः दर्शित इत्येव पाठः साधुः दर्शितवानिति तु अपपाठः अम्बुकादिभिरित्यनन्वयापत्तेः।

† तदुभयोः कार्त्तिकत्वं मार्गशीर्षत्वञ्च विचारमुखेन साधयति न च ताविति। तौ चान्द्रमासौ कार्त्तिकमार्गशीर्षौ न भवत एवेति वाच्यं न चेत्यर्थः।

‡ तत्साधकं हेतुद्वयं क्रमेण दर्शयति द्वयोरेव इत्यादि तुलाद्वश्चिकादित्यारब्धत्वात्। तथाच तुलास्थरव्यारब्धचान्द्रमासत्वं कार्त्तिकत्वम्, एवं द्वश्चिकस्थरव्यारब्धशुक्लप्रतिपदादिदर्शान्तत्वं मार्गशीर्षत्वमिति लक्षणम्। यदाह व्यासः। मीनादिस्थो रविर्यैषामारब्धप्रथमलक्षणे। भवेत्तेऽब्दे चान्द्रमासाश्चैत्राद्या द्वादश स्मृता इति॥ आरब्धप्रथमलक्षणे आद्यक्रियाद्यसमये।

तस्यां कार्त्तिक्यां याम्यं भरणी तद्योगेऽपि कार्त्तिकत्वमव्याहतमेव प्रतीयते। अतएव* तस्मिन् कार्त्तिके देवोत्थानमविवादम्, अन्यथा वृश्चिके देवोत्थानं क्रियमाणं न चान्द्रे न वा सौरे कार्त्तिके कृतं स्यात्†। तुलास्थसूर्य्यसप्तमदिवसे अमावास्यायां लक्ष्मीप्रबोधस्य भूतत्वात्तदनन्तरितशुक्लपक्षे च देवोत्थानस्य तस्मिन् शुक्ले सदा विष्णुरिति नियतत्वात्‡ किञ्च फाल्गुनः त्रिभो

---

* वृश्चिकधनुःसंक्रान्तिचिह्नितत्वादेति। मेषगरविसंक्रान्तिः चान्द्रमासे यत्र भवति स चैत्रः। एवं वृषादिगरविसंक्रान्तिरित्यादिना वैशाखादयो ज्ञेया इति ब्रह्मगुप्तकृतचान्द्रमासलक्षणाभिप्रायेणोक्तम्। कार्त्तिकमार्गशीर्षपदप्रयोगाविवादात् कार्त्तिकमार्गशीर्षपदवाच्यत्वे विरोधिपक्षाभावादित्यर्थः। तत्रैव च तुलादित्याष्टमदिनीपक्रान्तवृश्चिकादित्यसप्तमदिनीपक्रान्तचान्द्रमासयोरेव च प्रयोगेण कार्त्तिकमार्गशीर्षलक्षणाक्रान्तत्वेन योगस्य पौर्णमास्यां नक्षत्रयोगस्य यन्त्रितत्वात् नियमितत्वात्। अनेन निरुक्तप्रकारेणैवभूते एवमवधृते दर्शान्ते मुख्यचान्द्रमासे सावनमासेषु तिथिसावनमासेषु च गौणचान्द्रमासेषु च इत्यर्थः प्रयोगात् कार्त्तिकादित्वविधानात्। यतएव पौर्णमास्यां भरणीयोगेऽपि कार्त्तिकत्वम् अतएवेत्यर्थः। कार्त्तिक्यां चान्द्रकार्त्तिकपौर्णमास्याम् आग्नेयम् अग्निदेवताकत्वात् कृत्तिका सा तिथिः स्नानदानादिषु महती महाफलदा इत्यर्थः। याम्यं यमदेवताकत्वात् भरणी तिथिः सापि भरणीयुक्तपौर्णमासीतिथिरपि। अव्याहतमेव अखण्डितमेव। यतएव तुलादित्यारब्धचान्द्रमासस्य कार्त्तिकत्वम् अतएवेत्यर्थः।

† तस्मिन् कार्त्तिके तुलादित्यारब्धचान्द्रकार्त्तिके देवोत्थानं हरिरुत्थानम् अविवादम् इति। तथाचान्द्रमासस्य कार्त्तिकत्वेन तत्र हरिबोधने न कस्यापि असम्मतत्वम्। अन्यथा तस्य कार्त्तिकत्वास्वीकारे वृश्चिके सौरमार्गे क्रियमाणं देवोत्थानं हरिरुत्थानम्। न चान्द्रे कार्त्तिके न वा सौरे कार्त्तिके कृतं भवेत्। तथाच कार्त्तिके परिबुध्येत शुक्लपक्षे हरिर्दिने मुनिनेन विरुध्येत इति भावः।

‡ तुलास्थसूर्य्यसप्तमदिवसे अमावास्यायां लक्ष्मीप्रबोधस्य भूतत्वादित्यादि। तथाच माधवः। अमावास्यां तुलादित्ये लक्ष्मीर्निद्रां विमुञ्चति। तस्मिन् शुक्ले सदा विष्णु-

मत इति पूर्व्वसिद्धं फाल्गुनमुद्दिश्य त्रिभत्वं ज्ञेयं*। विहितत्रिभसम्बन्धादेव फाल्गुनत्वमितरेतराश्रयं स्यात्†। न चैकनक्षत्रयोगनिमित्तं फाल्गुनमुद्दिश्य नक्षत्रान्तरयोगोऽपि निमित्तत्रयविधानमितिः पूर्व्वावधृतनिमित्तविरोधोऽ त्रिभपदे च विध्यनुवाददोषा-

---

स्तुलायामथ वृश्चिके॥ तस्मिन् शुक्ले सदा विष्णुरिति नियतत्वात् तस्मिन् शुक्ले सदा विष्णुरिति माण्डव्यवचनेन नियमितत्वादित्यर्थः।

* प्रतिबन्ध्यन्तरमाह किञ्चेति। फाल्गुनश्च त्रिभो मत इति पूर्व्वसिद्धफाल्गुनमुद्दिश्य त्रिभत्वं विधेयं विहितत्रिभसम्बन्धादेव फाल्गुनत्वमितरेतराश्रयत्वमिति तथाहि पूर्व्वसिद्धं नक्षत्रचितयान्यतमयुक्तपौर्णमासीयोगेन पूर्व्वसिद्धं फाल्गुनत्वमुद्दिश्य फाल्गुनश्च त्रिभो मतः इत्यनेन वचनेन यदि त्रिभत्वं विधेयं स्यात्।

† पूर्व्वप्रसिद्धत्वं दर्शयति विहितत्रिभसम्बन्धादेव फाल्गुनत्वमिति। ततश्च त्रिभत्वस्य फाल्गुनलक्षणघटकतया नाप्रहीतविशेषणबुद्धिर्विशेष्ये चोपजायते इति न्यायात् लक्षणप्रतीतौ त्रिभत्वज्ञानमपेक्षते। पुनः पूर्व्वप्रसिद्धफाल्गुनत्वमुद्दिश्य त्रिभत्वे विधेये विधेयत्रिभत्वप्रतीतौ च विहितत्रिभत्वसम्बन्धि फाल्गुनत्वज्ञानमप्यपेक्षते च। इति त्रिभत्वज्ञानापेक्षफाल्गुनत्वज्ञानं फाल्गुनत्वज्ञानापेक्षञ्च त्रिभत्वज्ञानमिति इतरेतराश्रयत्वम्। तल्लक्षणन्तु सग्रहसापेक्षग्रहसापेक्षग्रहकत्वम् इति।

‡ इतरेतराश्रयदोषं परिहर्त्तुमुपक्रमते न चैकनक्षत्रयोगनिमित्तमित्यादि। एकनक्षत्रं निमित्तं यस्य तं फाल्गुनत्वमुद्दिश्य। तथाच लाघवात् फाल्गुनीनक्षत्रयुक्तपौर्णमासीयोग एव निमित्ततया फाल्गुनलक्षणे निवेशनीयो न तु नक्षत्रचितयान्यतमयुक्तपौर्णमासीयोगो लक्षणशरीरे निवेशनीयो गौरवात्। तादृशफाल्गुनमुद्दिश्य फाल्गुनश्च त्रिभो मत इति वचनेन नक्षत्रान्तरयोगात् अन्यनक्षत्रयोगात् अपिकारात् स नक्षत्रयोग इति। इति निमित्तत्रयविधानं निमित्तीभूतत्रिभविधानं, ततश्च लक्षणशरीरे त्रिभत्वाप्रवेशात् इतरेतराश्रयदोषो न घटते इति भावः।

§ अत्र हेतुं दर्शयति पूर्व्वावधृतनिमित्तविरोध इति। तथाच फाल्गुनश्च त्रिभो

पत्तेः। पूर्वोक्तविकल्पकलापस्य च पूर्णिमान्तेऽपि मास्यविशेषात्तत्रापि यौगिकत्वं निरस्तं वेदितव्यम्। अस्मिंश्च दूषणगणे गणितज्ञेभ्यो यथोक्तं कालक्रममवगम्य विद्वद्भिः अज्ञातव्यम्। किञ्च पूर्णिमान्तो मासः क्वचिदपि श्रुतिस्मृतिगोचरो न वैशाखादिपदैर्निर्दिष्टः*। यत्तु वणिग्जनमात्रप्रयोगविषयः स चान्यथाप्युपपन्नः दर्शद्वयातिक्रमेण त्वधिमासद्विराषाढ़त्वादिकञ्च वदन्तो मुनयो दर्शान्त एव मासे वैशाखादिपदमिति दर्शयन्ति, तदन्त स्यैव तदानीं नियमेन सूर्य्यसंक्रान्तिवर्ज्जितत्वेनाधिमासत्वात्†,

---

मत इत्यनेन चिभानां निमित्तता अवधृता एकनक्षत्रयोगनिमित्तं फाल्गुनमुद्दिश्य चिभत्वे विधेयेऽपि एकनक्षत्रमात्रयोगस्य निमित्तत्वात् त्रयाणां पूर्व्वावधृतनिमित्तविरोध इत्यर्थः।

* चिभपदे च विध्यनुवादापत्तेरिति। एकनक्षत्रयोगनिमित्तं फाल्गुनमुद्दिश्य फाल्गुनस्य चिभो मत इति प्रागुक्तवचनेन चिभत्वे विधेये त्रयाणां नक्षत्राणां तन्मध्ये अप्राप्तनक्षत्रांशे विधिः। विधिरत्यन्तमप्राप्ताविति स्मरणात्। प्राप्तांशे अनुवादः प्राप्तानुसारित्वादनुवादस्य। पूर्वोक्तविकल्पकलापस्य सौरचान्द्रसावननाक्षत्रभेदेन चतुर्व्विधत्वेन विकल्पितस्य मासस्य च मध्ये पूर्णिमान्ते मासि गौणचान्द्रे मास्यविशेषात्। चान्द्रत्वेन विशेषाभावात्। यौगिकत्वं तत्तन्नक्षत्रयुक्तपौर्णमासीयोगेन योगरूढ़िकत्वञ्च निरस्तं वेदितव्यम्। अस्मिन् दूषणगणे अस्माभिर्निर्दिष्टे दोषसमूहे इत्यस्य अग्रिमेण अज्ञातव्यमित्यनेन सम्बन्धः। पूर्णिमान्तो मासः गौणचान्द्रमासः श्रुतिस्मृतिगोचरः सन् वैशाखादिपदैर्न निर्दिष्टः इत्यन्वयः। तथाच श्रुत्या स्मृत्या वा क्वचिदपि कुत्रापि वैशाखादिनामकत्वेन गौणचान्द्रमासो न विहित इत्यर्थः।

† ननु संक्रान्तिपौर्णमासाभ्यां तथैव नृपवैश्ययोरिति पारस्करवचनेन वैश्यसम्बन्धितया पौर्णिमान्तो मासः गौणचान्द्रमासो निर्दिष्ट एव कथम् अनिर्दिष्ट इत्याशङ्क्य निराकरोति यत्तु वणिग्जनमात्रेत्यादि। वणिग्जनो वैश्यः तन्मात्रप्रयोगविषयः तन्मात्रसम्बन्धितया पारस्करेणोक्तः स चान्यथाप्युपपन्न इति। अत्र पारस्करवचने वैशाखादिनामकत्वाश्रवणात्

न तिथ्यन्तरान्तस्थ प्रतिपदुपक्रान्तमासद्वयस्यैव चैकराशिसूर्य्योपक्रान्तत्वेन हिराषाढ़ादिप्रयोगविषयत्वात् ।

तथाहि ज्योतिःशास्त्रम् ।

"अमावास्याद्वयं यत्र रविसंक्रान्तिवर्ज्जितम् ।
मलिम्लुचः स विज्ञेयः उत्तरश्चोत्तमः स्मृत इति ॥
मिथुनस्थो यदा भानुरमावास्याद्वयं स्पृशेत् ।
हिराषाढ़ः स विज्ञेयः विष्णुः स्वपिति कर्कटे ॥"

तस्मात् पूर्णिमान्तो न वैशाखादिपदवाच्यो दूरे यौगिकत्वानुसारः । अमावास्यान्तेऽप्ययौगिकत्वमेवाह विष्णुः ।

मार्गशीर्षशुक्लपञ्चदश्यां मृगशिरःसंयुक्तायां* चूर्णित-

---

केवलपौर्णमासस्यमलमासस्यवणाच्च अन्यथा वैश्वस्य कुशीदप्रधानत्वात् पौर्णमास्याच्च सायं चन्द्रोदयेन सुख्यत्वज्ञानत्वादित्यादिना उपपन्नः । दर्शान्त एव मासे मुख्यचान्द्रमास एव न तु पौर्णमास्यन्तगौणचान्द्रमासे । वैशाखादिपदं वैशाखादिपदप्रयोगं दर्शयन्ति । तदन्तस्यैव दर्शान्तमासस्यैव सूर्यसंक्रान्तिवर्ज्जितत्वेन तदानीं नियमेन अधिमासत्वात् मलमासत्वात् ।

* न तिथ्यन्तरान्तस्थ पौर्णमास्यन्तगौणचान्द्रमासस्य । दर्शान्तमासस्य मलमासत्वं साधयति प्रतिपदुपक्रान्तेत्यादि । खाव्यवहितप्राक्क्षणावच्छेदे शुक्लप्रतिपदमारभ्य दर्शान्तमासस्यैव एकराशिसूर्य्योपक्रान्तत्वेन खाव्यवहितप्राक्क्षणावच्छेदे एकराशिस्थेन सूर्य्येणारब्धत्वेन हिराषाढ़ादिप्रयोगविषयत्वात् एकलक्षणाक्रान्तत्वेन शुद्धाशुद्धभेदेन हिराषाढ़ादिनामकत्वात् हिराषाढ़ः स विज्ञेयस्तुत्तरश्चोत्तमः स्मृत इत्यादिवचनेनेति शेषः । तत्प्रमाणं दर्शयति ज्योतिषे । अमावास्याद्वयम् अमावास्यान्तक्षणद्वयं रविसंक्रान्तिवर्ज्जितं रविक्रियोत्पत्तिराश्यन्तरसंयोगाभ्यां वर्ज्जितमित्यर्थः तस्मात् मुख्यचान्द्रमासस्य मलमासत्वात् पूर्णिमान्तमासः गौणचान्द्रमासः न मासपदवाच्यः न मासपदशक्यः । दूरे यौगिकत्वानुसार इति कृती यौगिक-

लवणस्य सुवर्णतुलाभम् (१) प्रस्थमेकं चन्द्रोदय ब्राह्मणाय प्रतिपादयेत्। अनेन कर्म्मणा रूपसौभाग्ययुक्ता जायते। पौषी चेत् पुष्ययुक्ता स्यात् तस्यां गौरसर्षपकल्केन वर्त्तितशरीरः(२) गव्यघृतपूर्णेन कुम्भेनाभिषिक्तः सर्व्वौषधिभिः* सर्व्वगन्धैः सर्व्ववीजैश्च स्नात्वा घृतेन भग-

(१) चूर्णितलवणस्य सुवर्णतुलाभमिति विष्णुसंहितायां पाठः।

(२) उद्वर्त्तितशरीर इति विष्णुपुराणे पाठः।

त्वानुसरणम्। तथाच गौणचान्द्रमासे मासपदाशक्यत्वात् कल्पनीया तु स्वभते नात्मानं योगत्वाधत एतन्न्यायस्याविषयत्वेन गौणचान्द्रमासे सर्व्वथा यौगरूढ़ित्वाभाव इति भावः। अयौगिकत्वं यौगिकत्वासम्भवम्। पञ्चदश्यां पौर्णमास्यां पञ्चदशकलाक्रियारूपत्वात्। मृगशिरःसंयुक्तायामिति अनेन मार्गशीर्षपदस्य यौगिकत्वाभावो विज्ञापितः।

* चूर्णितलवणस्य सुवर्णतुलाभं प्रस्थमेकमित्यादि। अत्र विधिमाह हेमाद्रौ व्रतखण्डे।

मार्गशीर्षे ततः प्राप्य चिरात्रोपोषितः शुचिः।
संपूज्य देवं प्रद्युम्नं हुत्वाग्नौ घृतमेव च॥
भोजयेद्ब्राह्मणांश्चाथ भोजनं लवणोत्कटम्।
चूर्णितस्य ततः प्रस्थं लवणस्य द्विजातये॥
महाराजतरत्नञ्च वस्त्रयुग्मं तथा गुरोः।
दद्याच्च कनकं राजन् कांस्यपात्रं तथैव च॥
मासेन लावण्यकरं प्रदिष्टं व्रतोत्तमं नाकगतिप्रदञ्च।
न केवलं यादव सर्व्वकामान् नरस्य दद्यात् पुरुषप्रधानम्॥

क्वचिदादर्शपुस्तके सुवर्णतुलाभमिति नास्ति। हेमाद्रावपि नास्ति, परन्तु महाराजतरत्नञ्च वस्त्रयुग्ममेतदस्ति। सौभाग्यलावण्ययुक्ता जायते नारीति शेषः। पौषी पौषपूर्णिमा गौरसर्षपकल्केन श्वेतसर्षपखलिना उच्छ्वासितशरीरः उन्मेषितशरीरः गव्यघृत-

वन्तं वासुदेवं स्नापयित्वा पुष्पगन्धधूपनैवेद्यादिभिश्च अभ्यर्च्च्य वैष्णवैः शाकलैर्वार्हस्पत्यैश्च मन्त्रैः पावकं हुत्वा ससुवर्णेन घृतेन ब्राह्मणं स्वस्ति वाचयेत् वासोयुग्मं तदन्ते दद्यात्(१)। अनेन कर्म्मणा पुष्यति। माघी मघायुक्ता चेत् स्यात् तस्यां तिलैः श्राद्धं कृत्वा पूतो भवेत्। फाल्गुनी फल्गुनीनक्षत्रयुक्ता चेत् स्यात् तस्यां ब्राह्मणाय संस्कृतं स्वास्तीर्णशयनं निवेद्य भार्य्यां रूपवतीं मनोज्ञां द्रविणवतीञ्चाप्नोति, नार्य्यपि भर्त्तारम्। चैत्री चित्रायुक्ता चेत् स्यात् तस्याश्चित्रवस्त्रप्रदानेन सौभाग्यमाप्नोति। वैशाखी विशाखायुक्ता चेत् स्यात् तस्यां पौर्णमास्यां ब्राह्मणसप्तकं क्षौद्रयुक्ततिलैः सन्तर्प्य धर्म्मराजं प्रीणयित्वा पापेभ्यः पूतो भवतीति। ज्यैष्ठी ज्येष्ठायुक्ता चेत् स्यात् तस्यां छत्रोपानहप्रदानेन गवाधिपत्यमाप्नोति। आषा-

(१) वासोयुगं कर्च्चे दद्यादिति विष्णुपुराणे पाठः।

पूर्णेन कुम्भेनाभिषिक्तः गव्यघृतपूर्णकुम्भस्थघृतेन महितसर्व्वशरीरः सर्व्वौषधिभिः सर्व्वौषधियुक्तजलैः।

सर्व्वौषधिगण उक्तो वैद्यके।

सुरा मांसी वचा कुष्ठं शैलेयं रजनीद्वयम्।
शठी चम्पकमुस्तञ्च सर्व्वौषधिगणः स्मृतः॥

एषां पत्रादीनामपि ग्रहणं कषायावयवग्रहणे मत्स्यपुराणविष्णुधर्म्मोत्तरयोः।

एषां पत्राणि साराणि मूलानि कुसुमानि च।
एवमादीनि चान्यानि कषायाख्यगणः स्मृतः॥

ख्याम् आषाढ़युक्तायाम् अन्नपानप्रदानेन तदेवाक्षय्य-माप्नोति। श्रावण्यां श्रवणयुक्तायां* जलधेनुं† शान्तां

---

* सर्व्वगन्धैः सर्व्वगन्धयुक्तजलैः सर्व्वबीजैः यवादिसर्व्वबीजयुक्तजलैः अभ्यर्च्च्य पूजयित्वा वैष्णवैः विष्णुमन्त्रैः इदं विष्णुर्विचक्रमे इत्यादिमन्त्रैः शाकलैः देवकृतस्यैनमसीत्यादि सामवेदोक्ताष्टशाकलमन्त्रैः बार्हस्पत्यैः बृहस्पतेः परिदीया इति बार्हस्पत्यमन्त्रैश्च पावकं कृत्वा वह्नौ होमं कृत्वा ससुवर्णेन घृतेन सुवर्णसहितघृतदक्षिणया स्वस्ति वाचयेत् स्वस्तिपदोच्चारणेन स्वीकारं कारयेत्। तदन्ते ससुवर्णघृतदानान्ते वासोयुगं वस्त्रयुगं दद्यात्। अनेन कर्म्मणा पुष्यति पुष्टियुक्तो वृद्धियुक्तो वा भवति। माघी माघपौर्णमासी तिलैः तिलादिभिः इत्यादिबहुवचनान्ता गणस्य संसूचका इति स्मरणात् तिलैरिति तिलपदोपादानं याङि तिलस्य प्राधान्यज्ञापनार्थम्। फाल्गुनी फाल्गुनपौर्णमासी तस्यां फल्गुनीयुक्तपौर्णमास्यां संस्कृतं संस्कारयुक्तं स्वास्तीर्णम् आस्तीर्णमिति क्वचित् पाठः आस्तरणयोग्यं विस्तृतं शयनं शीयते अस्मिन् शयनं शय्यां निवेद्य दत्वा मनोज्ञां मञ्जुलां द्रविणवतीं धनवतीम्। नारी चरेत् ताटङ्गव्रतं करोति तदा धनिनं भर्त्तारं प्राप्नोतीत्यर्थः। चैत्री चैत्रपूर्णिमा चौद्रयुक्ततिलैः मधुयुक्ततिलैः। धर्म्मराजानमिति आर्षं धर्म्मराजः पितृपतिरित्यादि कोषात्। ज्यैष्ठी ज्यैष्ठपूर्णिमा उपानत् चर्म्मपादुका गवाधिपत्यं गोस्वामित्वं गोधनं प्राप्नोतीत्यर्थः। आषाढ्याम् आषाढ़पौर्णमास्यां तदेव अन्नपानादिकमेव अक्षय्यं क्षयरहितम्। श्रावण्यां श्रावणपौर्णमास्याम्।

† जलधेनुमाह—होता उवाच।

जलधेनुं प्रवक्ष्यामि पुण्येऽह्नि विधिपूर्व्वकम्।
गोचर्म्ममात्रं भूभागं गोमयेनोपलेपयेत्॥
तत्र मध्ये च राजेन्द्र पूर्णकुम्भन्तु विन्यसेत्।
जलपूर्णमुगन्धाढ्यं कर्पूरागुरुचन्दनैः॥
वासितां गन्धतोयेन तां धेनुं परिकल्पयेत्।
वस्त्रं तथापरं कल्प्यं घृतेन परिपूरितम्॥

वर्द्धनीकं महाराज पञ्चपुष्पैः समन्वितम् ।
दूर्व्वाङ्कुरैरुपस्तीर्य स्रग्दामैश्च विभूषितम् ॥
पञ्चरत्नानि निःक्षिप्य तस्मिन् कुम्भे नराधिप ।
मांसीमुशीरं कुष्ठञ्च तथा शैलेयबालुकम् ॥
आमलां सर्षपाश्वेताः सर्व्वधान्यानि पार्थिव ।
चतुर्दिक्षूपि पत्राणि चलार्थ्यैव प्रकल्पयेत् ॥
एकं घृतमयं पात्रं द्वितीयं दधिपूरितम् ।
तृतीयं मधुनश्चैव चतुर्थं शर्करायुतम् ॥
सुवर्णं मुखचञ्चूनि शृङ्गं कृष्णागुरूणि च ।
प्रशस्तपञ्चवर्णां मुक्ताफलमयेक्षणाम् ॥
ताम्रपृष्ठां कांस्यदोहां दर्भरोमसमन्विताम् ।
पुच्छं सूत्रमयं कृत्वा कृष्णाभरणभूषिताम् ॥
कम्बलं पुष्पमालाञ्च गुडास्यां शुक्तिदन्तिकाम् ।
जिह्वां शर्करया कृत्वा नवनीतेन च स्तनम् ॥
इक्षुपादान्तु राजेन्द्र गन्धपुष्पोपशोभिताम् ।
कृष्णाजिनोपरि न्यास्य वस्त्रैराच्छादितान्तु ताम् ॥
गन्धपुष्पैः समभ्यर्च्च्य विप्राय विनिवेदयेत् ।
एवं धेनुं तदा दत्त्वा ब्राह्मणे वेदपारगे ॥
साधुविप्राय राजेन्द्र श्रोत्रियायाहिताग्नये ।
तपोऽड्ढे वयोऽड्ढे दातव्या च कुटुम्बिने ॥
यो ददाति नरो राजन् यः पश्यति शृणोति च ।
प्रतिगृह्णाति यो विप्रः सर्व्वे मुच्यन्ति पातकात् ॥
ब्रह्महा पितृहा गोघ्नः सुरापो गुरुतल्पगः ।
विमुक्तः सर्व्वपापेभ्यो विष्णुलोकं स गच्छति ॥
योऽश्वमेधेन यजते समाप्तवरदक्षिणः ।
सवधेनुञ्च यो दद्यात् समंमेतन्नराधिप ॥

वासोयुगाच्छादितां गां दत्त्वा स्वर्गलोकमाप्नोति। प्रौष्ठपद्यां प्रौष्ठपदयुक्तायां गोदानेन सर्व्वपापविमुक्तो भवतीति। आश्वयुज्याम् अश्विनीगते चन्द्रमसि घृतपूर्णं भाजनं सुवर्णयुक्तं विप्राय दत्त्वा दीप्ताग्निर्भवति। कार्त्तिकी चेत् कृत्तिकायुक्ता स्यात् तस्यां सितमुच्चाण-मन्यवर्णं वा शशाङ्कोदये सर्व्वरत्नगन्धोपेतं ब्राह्मणाय दद्यात्, कान्तारभयं न पश्यतीति वचनम्*।

अत्र चेदित्यादिपदेभ्यो नक्षत्रयोगस्य पौर्णमास्यां कादाचित्-कत्वावगमात् नित्यवन्मार्गशीर्षादिपदप्रयोगनिमित्तत्वानुपपत्तेः†।

---

अलाबारस्त्रैकादिनं तिष्ठेच्च जलधेनुदो-
ऽथवा हविस्त्रैकादिनं यः पयोव्रतमास्थितः।
याद्दक्कोऽपि चिराचं वै तिष्ठेदेवं न संशयः॥
यत्र चीरवहा नद्यो मधुपायसकर्दमाः।
यत्र चाप्सरसां गीतं तत्र यान्ति जलप्रदाः॥
दाता च दापकश्चैव प्रतियाही च यो द्विजः।
ते सर्व्वे प्रापुरिर्मुक्ता विष्णुलोकञ्च प्राप्नुयुः॥

इति वाराहे जलधेनुमाहात्म्यनामाध्यायः।

* प्रौष्ठपद्यां भाद्रपौर्णमास्याम्। आश्वयुज्याम् आश्विनपौर्णमास्याम्। भाजनं पात्रं दीप्ताग्निः अतीव्रकृशो भवतीत्यर्थः। कार्त्तिकी कार्त्तिकपौर्णमासी। सितं श्वेतम् उच्चाणं वृषम्। अन्यवर्णं कृष्णादिवर्णम्। शशाङ्कोदये चन्द्रोदये। सर्व्वशस्यरत्न-गन्धोपेतं धान्ययवादिसर्व्वशस्ययुक्तं रत्नगन्धोपेतं सुवर्णचन्दनयुक्तम् एतद्वयम् उच्चविशेषणम्। कान्तारभयं दुर्गवर्त्मभयं कान्तारो वर्त्म दुर्गमममित्यमरः।

† अत्र चेदित्यादिपदैः यद्यर्थकचेदित्यादिशब्देभ्यः मार्गशीर्षादिपदप्रयोगनिमि-त्तत्वानुपपत्तेरिति। तथाहि मृगशिरसा युक्ता पौर्णमासी मार्गशीर्षी सा अस्मिन् मार्गशीर्षः।

अथ द्विभचिभत्वान्मासानां नक्षत्रान्तरयोगेऽपि तत्तत्पदप्रवृत्ते-श्चेच्छब्दस्योपपत्तिरिति। तन्न आषाढ्यामाषाढ़युक्तायाम् अन्न-पानदानेन तदेवाक्षय्यमाप्नोतीति न स्यात् आषाढ़द्वयमन्तरेणा-षाढ़ीपदाप्रवृत्तेः* आषाढ्यामित्यभिधायाषाढ़युक्तायामिति पुन-रभिधानानुपपत्तेः† आषाढ़योगादेवाषाढ़त्वात्।

तथा पद्मपुराणम्।

कार्त्तिक्यान्तु यदा ऋक्षमाग्नेयं भवति क्वचित्।
महती सा तिथिर्ज्ञेया स्नानदानादिकर्म्मसु॥

आग्नेयं कृत्तिका तद्युक्तपौर्णमास्या एव कार्त्तिकीत्वात् यदेति

---

एवंरीत्या यद्यपि मार्गशीर्षादिशब्दो यौगिकः तदा मार्गशीर्षादिपदादेव तत्पौर्णमास्यां तत्तन्नक्षत्रयोगस्य प्राप्तेः मार्गशीर्षपक्षदश्यां मृगशिरसा युक्तायामित्यनुवादापत्तेः। एवं पौषी चैदित्यादि यद्यर्थकचैच्छब्दप्रयोगानुपपत्तेश्च न नैमित्तिकत्वमसीषामिति भावः।

* तत्तन्मासंसंज्ञकनक्षत्राभावेऽपि चान्द्रमासशब्दस्य नैमित्तिकत्वं व्यवस्थापयति अथेति। द्विभचिभत्वात् अन्त्योपान्त्यः चिभः श्रेय इत्यादिवचनेन नक्षत्रद्वितयचितयज्ञापनात् नक्षत्रान्तरयोगेऽपि मासंसंज्ञकभिन्नापरनक्षत्रयोगेऽपि तत्तत्पदप्रवृत्तेः पौषमाघादिपदप्रवृत्तेः मासानामित्यनेनास्य सम्बन्धः चेच्छब्दस्योपपत्तिर्न वैयर्थ्यमित्यर्थः। दूषयति तन्नेति। आषाढ्याम् आषाढ़युक्तपूर्णिमायाम् अक्षय्यम् अक्षयम् आषाढ़द्वयमन्तरेणाषाढ़ीपदाप्रवृत्तेरिति पूर्व्वोत्तराषाढ़ाभ्यां नक्षत्राभ्यां विना आषाढ़ीपदस्याव्युत्पन्नत्वात्। तथाच अन्त्योपान्त्य इति वचनेन द्विभविधानेऽपि आषाढ़पदप्रवृत्तौ पूर्व्वोत्तराषाढ़योरेव प्राप्तेः आवश्यकत्वमिति भावः।

† तथाचान्यनक्षत्रयोगेन कार्त्तिक्यादिप्रयोगसिद्धौ चैदित्यादि शब्दप्रयोगोप-पत्तिसम्भवेऽपि पूर्व्वोत्तराषाढ़योरन्यतरयोगेनैवाषाढ़ीपदव्युत्पत्तेराषाढ्यामित्यनेनैव पूर्व्वोत्त-राषाढ़योगसिद्धेः पुनराषाढ़युक्तायामित्यस्यानुवादकतया वैयर्थ्यस्य दुष्परिहार इति भावः।

क्वचिदिति वचनं न स्यात्* तस्य तत्र नित्यसम्भवात्। तस्मात् कार्त्तिकादिपदानि निमित्तान्तरादेव न तु यौगिकानि कार्त्तिकादेः पौर्णमास्याः कार्त्तिक्यादिका इति सिद्धम्। भारतेऽपि माससम्बन्धेनैव पौर्णमासीनां महाफलत्वावगमात्।

यथा।

आषाढ़े कार्त्तिके वापि माघवैशाखयोरपि।
पौर्णमासीषु दातव्यं महादानं युधिष्ठिर॥

तथा माल्ये।

वैशाखपौर्णमास्यान्तु† ग्रहणे चन्द्रसूर्ययोः।
पौर्णमासी तथा माघे तस्यां दानं फलं महत्॥

तेन माघी चेत् मघायुक्ता स्यादित्यादिष्वपि सन्दिग्धेषु माससम्ब-

---

* अत्र हेतुं दर्शयति आषाढ़योगात् पूर्व्वोत्तराषाढ़योगात्। यदेति क्वचिदिति वचनं न स्यादिति इदन्तु न सम्यक्। शेषा मासा द्विधा ज्ञेयाः क्वत्तिकादिव्यवस्थया इति नियमेन रोहिणीयोगेऽपि कार्त्तिकीपदप्रवृत्तेः यदेति क्वचिदिति वचनस्य सार्थक्यसम्भवात्। अत्र प्रागुक्तम् आषाढ़ीयुक्तायामिति पुनरभिधानानुपपत्तेरित्यादि दोषमाचं साधीयः।

† माससम्बन्धेनैवेति। एवकारेण नक्षत्रसम्बन्धो व्यवच्छिद्यते। पौर्णमासीषु दातव्यं महादानमिति आषाढ़ादिमासानां पौर्णमासीषु यत् दातव्यं तन्महादानं महादानतुल्यफलजनकमित्यर्थः नतु महादानं दातव्यमिति तस्यार्थः। तथाले माससम्बन्धेनैव पौर्णमासीषु महाफलत्वावगमादिति यत्यकारीयलिपेरसंलग्नापत्तेः। नतु यत्यकारीयलिपेः साधुत्वे किं मानमिति चेन्न महादानं दातव्यमित्यत्रये दाधात्वर्थाविवक्षा स्यात् तत्सार्थक्याय माल्यपुराणवचनैकवाक्यतया यत्पदाध्याहारेणैव निरुक्तव्याख्यानस्य युक्तियुक्तत्वात्। पौर्णमास्यान्विति तुकारस्यार्थं उक्तसमुच्चयवाची।

न्यादेव पौर्णमासीनां माघीत्वादिकं निर्णीयते।* यत्पुनः पञ्जिकाकारमिश्रैः पञ्चशारदीयस्य विषयशुद्ध्यर्थमुक्तं कार्त्तिकमाससम्भवासु विशाखानक्षत्रयोगिनीष्वमावास्यासु पञ्चभिर्वर्षैः पञ्च सुत्या भवन्तीति अत्राविच्छेदेन तावत्तथाविधामावास्या पञ्चसु वर्षेषु न प्राप्यते।† तथाहि विशाखानक्षत्रयुक्तामावास्या तुलादित्यस्याष्टादशदिनेभ्यः परस्तादेव वृश्चिकादित्यस्य द्वादशदिनेभ्यः पुरस्तादेव परभवति‡। तुलायामष्टादश-

---

* उपसंहरति तेनेति सन्दिग्धार्थेष्विति। तथाच मघायुक्ता पौर्णमासी माघी उत माघमाससम्बन्धिनी पौर्णमासी माघीति अयं सन्देहः मासस्वन्यादेव माघस्य पौर्णमासी माघीति निर्णीयते न तु मघायुक्तपौर्णमासीति। ततश्च माघीपदं रूढिकमेव न तु यौगिकमिति पूर्व्वपक्षिणोऽभिप्रायः।

† मासपदस्य योगरूढित्वे पुनरपि व्यभिचारं दर्शयति यत् पुनरित्यादि। पञ्चशारदीयस्य पञ्चशारदीयनामकस्य कस्यचिद्यागविशेषस्य विषयशुद्ध्यर्थं विषयपरिदर्शनार्थं विशाखानक्षत्रानुयोगिनीषु विशाखानक्षत्रयुक्तासु। सुत्या सुत्यानामसोमकयागविशेषैः पञ्चभिर्वर्षैरिति सप्तम्यर्थे तृतीया पञ्चसु वर्षेष्वित्यर्थः। सुत्या उक्ता श्रौतकात्यायने २४अ ४का १सू। यथा तापश्चितं दीक्षाः संवत्सरमुपसदश्च तथा सुत्या (१)। अत्र कर्कभाष्यम्। तापश्चितमिति सत्रनाम तत्र दीक्षावत्सरमित्यर्थः। भवन्ति उपसदः सुत्याश्च इदानीमह्नान्याह देवम्।

अत्र सुत्या आह। गवामयनेनेयुः (१)। गतमेव गवामयनमेव कर्त्तव्यमित्यर्थः। अग्निष्टोमेन वा (२)। ईयुः अपूर्व्वशायमग्निष्टोमः नैकाहिकी न द्वादशाहिकः संस्थामाचोपदेशात् (सं)। अग्निष्टोमसंस्थेन अग्निष्टोमसाङ्स्थेनेत्यर्थः ज्योतिष्टोमेन पूरणं कर्त्तव्यं सुत्या भवन्ति अनुष्ठिया भवन्ति इत्यर्थः। अत्राविच्छेदेन यथाक्रमेण यथा प्रथमवर्षे न तथा द्वितीयादिवर्षे विशाखानक्षत्रयुक्तामावास्या प्राप्यते।

‡ तथाहीति। अमावास्यायां कार्त्तिकमाससम्बन्धिन्यां प्रतिवर्षं विशाखानक्षत्रयोगा-

दिनानि चित्रास्वातीगतः सूर्य इति* निर्विवादम्। ध्रुविके तु द्वादशदिनेभ्यः पुरस्तादनुराधाज्येष्ठयोरेव। अतस्तेषु दिवसेषु विशाखायां यदा न चन्द्रः तदा कथममावास्या† तदन्ते सूर्याचन्द्रयोरेकनक्षत्रावस्थाननियमात्। तथा त्रयोदशोत्तरसप्तदशशाकाब्दे तुलादित्यस्य सप्तदशदिने चित्रास्वातीव्याप्तामावास्या ध्रुविकादित्ये चानुराधाज्येष्ठाभ्यां युक्तेति। तद्वत्सरे तस्यां विशाखायोगो न वृत्त एवातो दर्शान्ते पौर्णमास्यन्ते वा कार्त्तिकपञ्चसु वर्षेषु विच्छेदेन प्राप्तेरभावाद्विच्छेदाभिप्रायं पञ्जिकाकारवचनं ग्राह्यम्। ‡ तत्र चेयं युक्तिः यदि वैशाखस्येयमिति

---

भावं दर्शयति। तुलादित्यस्य सौरकार्त्तिकस्य परस्तात् ऊर्द्धं ध्रुविकादित्यस्य सौरमार्गस्य पुरस्तात् पूर्व्वम्। तुलायां सौरकार्त्तिके अष्टादशदिनानि प्राप्येति शेषः।

* चित्रास्वातीगतः सूर्य इति। तथाच रविर्मासं निशानाथः सपाददिवसद्वयमिति वचनेनैकमासेन नवनक्षत्रपादात्मकैकराशिभोगनियमेन विंशतिदण्डाधिकत्रयोदशदिनै रविणा एकनक्षत्रं भुज्यते। ततश्च सौरकार्त्तिकस्याष्टादशदिनैः चित्रास्वात्योः नक्षत्रयोः भोगः समाप्यते।

† निर्विवादमिति। सौरकार्त्तिकस्याष्टादशदिनात् परं सूर्याचन्द्रमसोर्विशाखगतत्वेन राश्येकांशावच्छेदेन सद्भावस्थानात् विशाखानक्षत्रयुक्तामावास्याया अवश्यम्भावः प्रतीयते इति भावः। ध्रुविके तु सौरमार्गे तु। पुरस्तात् पूर्व्वम्। अनुराधाज्येष्ठयोरेव सूर्य इति शेषः। तेषु दिवसेषु अनुराधाज्येष्ठयो रविभोगसमनियतदिवसेषु कथममावास्या अमावास्या न सम्भवतीत्यर्थः।

‡ अत्रामावास्याया असम्भवे हेतुमाह तदन्ते इत्यादि। अमावास्याशेषयामे इत्यर्थः। एकनक्षत्रावस्थाननियमात् उपर्य्युपरीभावापन्नयोः सूर्य्याचन्द्रमसोः समसूत्रपातन्यायेन राश्येकांशावच्छेदेन सद्भावस्थाननियमात् इत्यर्थः। त्रयोदशोत्तरसप्तदशशाकाब्दे तुलादित्यस्य सौरकार्त्तिकस्य चित्रास्वातीव्याप्ता चित्रास्वातीभ्यां युक्ता। ध्रुविकादित्ये तु सौरमार्गे तु।

वैशाखी गृह्यते तदा वैशाखपदव्युत्पत्तिनिमित्तमण्द्वयमवगम्य पुनरणन्तरेण वैशाखी प्रत्येतव्या*। तथाहि विशाखानक्षत्रयुक्ता तु एकेनैवाण्प्रत्ययेनेति शीघ्रं शब्दावगतेरविच्छेदस्य† त्वशब्दार्थीभूतस्यौचित्यमात्रतोऽवगतेस्तस्य बाध एवेति तेषामभिप्रायः। पौषी चेत् पुष्ययुक्ता स्यादित्यादिषु चेच्छब्दात् पौषस्येति

---

सहस्रे चयोदशाधिकसप्तशतवत्सरे तस्याम् अमावास्यायां न हत्त एव न ग्राह्य एव। अतोऽमावास्यायां विशाखायोगाभावात् दर्शान्ते मुख्यचान्द्रे। पौर्णमास्यन्ते गौणचान्द्रे। अविच्छेदेन ग्राह्यैरभावात् पञ्चसु वर्षेषु यथाक्रमेण प्रतिवर्षम् अमावास्यायां विशाखायोगस्याभावात् विच्छेदाभिप्रायं न क्रमनियमार्थमित्यर्थः।

* अत्र विच्छेदाभिप्रायकत्वे इयं वक्ष्यमाणा युक्तिः तां युक्तिं दर्शयति यदीति। अत्र यद्यपि कार्त्तिकमाससम्भवासु इत्युपक्रम्य विच्छेदाभिप्रायेण पञ्जिकाकारवचनं व्याख्यमित्युक्तम् अत्रेयं युक्तिरित्युक्तौ तदुदाहरणत्वेन कार्त्तिकस्येयमिति मासपदव्युत्पत्तिप्रदर्शनं समुचितमेव न तु वैशाखस्येयमिति। तथात्वे अप्रस्तुताभिधानमपि स्यात्। तथापि पञ्जिकाकारवचने कार्त्तिकमाससम्भवास्त्वित्युक्तेश्च कार्त्तिकीपदविरहेण सर्वथा व्युत्पत्तिप्रदर्शनासम्भवमाशङ्क्य वैशाख्यामावास्यायां सप्तदश मारुतीरित्यादिश्रुतौ वैशाखीपदश्रुतेः। तदेव सर्वथा व्युत्पत्तिकल्पनस्थानमवगम्य प्रदर्शयति यदि वैशाखस्येयमित्यादि। वैशाखपदव्युत्पत्तिनिमित्तं वैशाखपदयोगार्थसिद्धिनिमित्तम्। अण्द्वयमवगम्येति। तथाच विशाखानक्षत्रयुक्ता पौर्णमासी वैशाखी सा अस्मिन् मासे स वैशाख: इति अण्द्वयेन वैशाखपदं सिद्धमिति भावः। ततश्च पुनरणन्तरेण वैशाखी प्रत्येतव्या तथाच वैशाखस्येयमिति तृतीयाण्प्रत्ययेन वैशाखीपदं सिद्धमिति भावः।

† विच्छेदाभिप्रायं प्रकटीकरोति तथाहीति। विशाखानक्षत्रयुक्ता तु एकेन अण्प्रत्ययेन, तथाच नक्षत्रेण युक्तः कालः इति प्रथमसूत्रविहितेन अणा साधितवैशाखीतिशब्दात् विशाखानक्षत्रयुक्तपौर्णमासीरूपार्थस्यैव झटित्यवगतिमात्रं न तु विच्छेदार्थस्य अविच्छेदार्थस्य वेति भावः।

पौषीति वचनार्थः*। अथाचाप्यविच्छेदानुरोधः†। ततः संवत्सरे राजीवा आनयन्ति तांश्चैवोक्षाः इत्यादिवचनबलात् तदा कार्त्तिके तदसम्भवात् वैशाखस्येयमिति वैशाख्यमावास्या ग्राह्या‡

---

* अविच्छेदार्थस्याप्राप्तौ हेतुमाह अशब्दार्थीभूतस्य प्रथमसूचविहितेन अणा साधित-वैशाखीशब्दाद्प्राप्तस्येत्यर्थः। ननु शब्दाद्प्राप्तस्य कथं बाधाशङ्का इत्यत आह औचित्य-मात्रतोऽवगतेरिति वाक्यार्थतात्पर्यमात्रतोऽवगतेरित्यर्थः। तथाच अशब्दार्थीभूतस्यापि वाक्यार्थतात्पर्यतोऽवगतिर्भवितुमर्हतीति भावः। तस्य अविच्छेदार्थस्य बाध एव अवि-वक्षा एवेत्यर्थः। तेषां पञ्जिकाकाराणाम्। पौषस्येति। पौषस्येयमिति इदमर्थे अण्प्रत्ययः न तु नक्षत्रेण युक्तः काल इति सूत्रानुसारेण पुष्ययुक्तपौर्णमासी पौषीति तथात्वे पुष्ययुक्ता चैत्रीत्यनुवादापत्तेः चैत्रशब्दवैयर्थ्यापत्तेश्च।

† औचित्यप्राप्ताविच्छेदार्थस्य विवक्षैवास्त्वित्यभिप्रेत्याह अथाचापीति। अवि-च्छेदानुरोध इति अविच्छेदार्थस्वीकारोऽस्तु इत्यर्थः। ततः संवत्सरे इत्यादिवचनबलादिति तदा कार्त्तिके तदसम्भवादिति वैशाखस्येयमित्यादौति च। तथाहि अविच्छेदानुरोध इति तु कार्त्तिके तदसम्भवादित्यत्र हेतुः तदसम्भवात् कार्त्तिकमासस्सम्बन्धित्यमावास्यायां पञ्चसु वर्षेषु अविच्छेदेन विशाखानक्षत्रयोगासम्भवादित्यर्थः। ततः संवत्सरे इत्यादि च वैशाखस्येयमित्यत्र हेतुः।

‡ तथाच वैशाख्याममावास्यायां सप्तदश मारुतोस्त्रिवर्षा अप्रवीता उपाकरोतीति श्रुतिप्राप्तवत्सतरीविशेषयति ततः संवत्सरे राजीवा आनयन्तीति। संवत्सरे प्रथम-संवत्सरे राजीवा राजीवपृश्नीरित्यर्थः। राजीवा राजीवाकाराणि पद्मवर्णानि पृश्नीनि मण्डलानि यासां ताः। तथाच कात्यायनश्रौतसूत्रभाष्यम्। पृश्नयो विचित्रवर्णा आलभ्यन्ते वत्सतर्यश्च त्रिवर्षा अप्रवीता इषमेनामुक्ताः पद्मवर्णा वत्सतर्यः सन्ति। प्रथमे वर्षे राजीव-पृश्नयः द्वितीये नवनीतम् एवं तृतीये चतुर्थे पञ्चमे अरुणादयस्त्रयः (का. श्रौ. सू. २३ अ., ६ का., पृ. १०२१)। अपरश्च दक्षिणा वत्सतराः पद्मवर्णाः पृश्नयः (१३)। पृश्नयो विचित्राः। वत्सतर्यश्च त्रिवर्षाश्चाप्रवीताः पद्मवर्णा राजीवपृश्नयः नवनीतपृश्नयः अरुणाः पिशङ्गयः सारङ्गय इति (१४)। अप्रवीता अप्रकामिताः राजीनयः पद्मपृश्नयः नवंपृश्नयः

नवनीतसदृशैश्चित्रैः अरुणा रक्ताः कपिलाः पिङ्गलाक्ष्यो मांसवर्णाः सारङ्ग्यो वर्णान्तरोपध्वस्ताः। पृश्नयो विचित्रवर्णा वृषभेणाप्रवीताः अभुक्ताः रायः राजीवाकाराणि पद्मवर्णानि पृश्नीनि मण्डलानि यासां ताः नवनीतवर्णाः अरुणा अव्यक्तरागाः पिङ्गलाक्ष्यः कपिलाः सारङ्ग्यः वर्णान्तरोपनीताः कर्बुराः दक्षिणा भवन्ति। (२२ क., का. ६, पृ. १०१२)।

उक्तञ्च मीमांसादर्शनस्यैकादशाध्यायद्वितीयपादे शबरस्वामिना यथा। अस्ति पञ्चशारदीयोऽहीनः मारुतीयः शारदीयो यः कामयेत बहु स्यामिति स एतेन यजेत इति। अत्र श्रूयते। वैशाख्यामग्नावाधायां सप्तदश मारुतीस्त्रिवत्सा अप्रवीता उपाकरोतीति। सप्तदश पृश्नीनुक्षतान् पर्य्यग्निकृतान् प्रोक्षितानितरा आलभन्ते प्रेतरानुसृजन्ति इति। ततः संवत्सरे राजीवत आनयन्ति। तांश्चैवोक्षाः तान् पर्य्यग्निकृतान् पर्य्यग्निकरणं नाम आहवनीयात् उल्मुकेन पर्युं पर्य्यग्निकरोति इति इतरा आलभन्ते प्रेतरान् उत्सृजन्ति इति।

अत्र सैव चिन्ता, किमुक्षाणामुत्सर्गः आरण्यवत् कर्म्मशेषः, अथवा प्राजापत्यवत् संस्कारकर्म्मप्रतिषेधः। तेषाञ्च सृत्यासु प्रतिप्रसवः, चौस्त्रीनुक्षाः एकैकस्मिन् अहनि आलभन्ते पञ्चोत्तमे इति। यदि कर्म्मशेषप्रतिषेधः प्रतिवर्षम् अन्ये उक्षाणः अथ संस्कारप्रतिषेधः, ततस्त एव पञ्चवर्षाणि उपरुध्यन्ते पुनः पुनः संस्क्रियन्ते, अत्यासु सृत्यासु आलभ्यन्ते इति पृ. ७२८।२९।

कात्यायनश्रौतसूत्रस्य षष्ठेविंशाध्यायस्य चतुर्थकाण्डिकायां द्वितीयसूत्रम्। पञ्चशारदीयः। २। इतीयं संज्ञा। चतुर्थसूत्रमाह। तेन यज्यमानाः पञ्चवर्षाण्यारभ्य युजीष्वेकेषु चतुस्त्रिंशतं पशूनालभते मारुतान्। ४। तेनेति पञ्चशारदीयोपलक्षणम्। सं। आश्वयुजीशुक्लपक्षे सप्तम्याम् अष्टम्यां वा। पञ्चमसूत्रमाह। वैश्यस्तोमदक्षिणालिङ्गान्। ५। सं। वैश्यस्तोमदक्षिणाया इव लिङ्गानि येषां ते तान्। तानि च दक्षिणा वत्सतराः (२२।१६।२)। षष्ठसूत्रमाह। उक्षो वत्सतरीवर्णानुपूर्व्वेण। ६। प्रतिवर्षम्। सं। तत्र प्रतिवर्षम् उक्षो वृषभान् वर्णानुपूर्व्वेण वर्णक्रमेण वत्सतरीरालभते। उक्षाणो वृषभाः साण्डाः सेचनसमर्थाः पञ्चवर्षाः पृश्नयो विचित्रवर्णा आलभ्यन्ते। वत्सतर्य्यश्च त्रिवर्षा अप्रवीता वृषभेणाभुक्ताः। पञ्चवर्णा वत्सतर्य्यः सन्ति—प्रथमे वर्षे राजीवपृश्नयः, द्वितीये नवनीतम्, एवं तृतीये चतुर्थे पञ्चमे अरुणादयस्त्रयः (१०२१ पृ.)।

तस्याः प्रत्यब्दभावात् * यत् पुनरेतत्साधनार्थमुक्तमम्बुकेन मेषादित्यगतामावास्यायां वैशाखीपदं रूढं नक्षत्रयुक्तायान्तु यौगिकं तत्पुना रूढितो दुर्ब्बलमिति† तदयुक्तम्। वैशाखस्येयं वैशा-

---

अधिकरणमालाया एकादशाध्यायस्य चयोदशाधिकरणमाचरयति।

"उत्सर्गः किमुत्कर्षत्यागी वाद्योऽत्र पूर्ववत्।
अन्यहृत्तिलयीरत्तमाह पञ्चत्वयोर्विधौ ॥ १६ ॥
वाक्यभेदादिशिष्टानामन्येषां कर्म्मणां विधिः।
तस्मादारण्यवच्छेषत्याग उत्सर्ग इष्यताम्" ॥ १७॥

अत्यहीनेषु पञ्चशारदीयनामकः कश्चित् पञ्चाहविशेषः। स पञ्चसु वर्षेष्वनुष्ठेयः। तत्र प्रथमे वर्षे विशाखानक्षत्रयुक्तायाममावास्यायां सप्तदश स्त्रीपशवः सप्तदशौदाणश्च विद्धितासेषु सर्व्वेषु प्रोक्षितेषु च सत्सु स्त्रीपशूनामालभ्य पुंपशूनामुत्सर्गश्चाम्नायः। पुनर्द्वितीये तृतीये चतुर्थे च वत्सरे तथैवानुष्ठानमाम्नायः। पञ्चमादाम्नायते चौस्त्रीनिकैकस्मिन्नहन्यालभेरन् पञ्चोत्तमेऽहनीति। तत्र वत्सरचतुष्टयगतासु चतसृषु अमावास्यासु योऽयं पशूनामुत्सर्गस्तत्र कर्म्मशेषत्यागो न भवति किन्तूत्कर्षः। चौस्त्रीनिति वाक्येनालभ्यस्याभिधानात्। यथा पूर्वं प्राजापत्यानामालभ्योत्कर्षस्तथाचापि युज्यते इति प्राप्ते ब्रूमः। चौस्त्रीनेकस्मिन्नहन्यालभेरन्नित्यत्र पर्य्यग्निकरणानन्तरभाविनं प्राप्तमालभ्यमनूद्यैकाहत्वचित्वगुणयोर्विधौ वाक्यं भिद्येत। तथा पञ्चोत्तमेऽहनीत्यत्रोत्तमाहत्वपञ्चत्वयोर्निर्धौ वाक्यभेदः। तस्मात्तद्गुणद्वयविशिष्टानाम् अन्येषां कर्म्मणां विधिरभ्युपेयः। तथा सत्यारण्यपशुन्यायेन सप्तदशौदाणः पर्य्यग्निकरणप्रोक्षणाभ्यां समापनीया इति माधवाचार्य आह स्म। पृ. ४९१।

* वैशाख्याममावास्यायां प्रतिवर्षं प्राप्तिं दर्शयति। तस्याः प्रत्यब्दभावात् अब्दम् अब्दं प्रति प्रत्यब्दं तत्र भावात् सत्त्वात् वैशाखसम्बन्धि वैशाख्यमावास्यायाः प्रतिवैशाखं सङ्गावात्।

† अम्बुकभट्टमतं दूषयितुमुत्थापयति यत् पुनरेतदित्यादि। एतत्साधनार्थं वैशाखीपदसिद्ध्यर्थम्। मेषादित्यगतायां सौरवैशाखगतायाम्। वैशाखीपदमिति तथाच वैशाखस्येयमित्यर्थे वैशाखीपदं रूढं रूढिशक्तिविशिष्टम्। नक्षत्रयुक्तायामिति विशाखा-

खीति पदस्य क्लृप्तयोगादेव प्रवृत्तिसम्भवे समुदायशक्तिकल्पना-नुपपत्तेः कथं रूढ़िता। प्रोचणीशब्देऽप्ययमेव* कल्पनीया तु लभते नात्मानं योगबाधत इत्युक्तत्वात्†। ननु वैशाखपदं मास-वाचकं तत्सम्बन्धिनी च तिथिर्नावयवान्तरोपात्ता येनावयवशक्त्या यौगिकत्वमतो रूढ़िरेव‡ उच्यते। अणप्रत्ययेन सहावयवद्वयं

---

नचयुक्ता पौर्णमासी वैशाखी अचैव वैशाखीपदं यौगिकं योगरूढ़िकमित्यर्थः। न तु विशाखानचयुक्ता वैशाखसामावास्या इत्यर्थे वैशाखीपदं यौगिकम्। तच सूर्यस्य मेषगत-त्वेन चन्द्रस्य तुलाद्यश्विकान्यतरगतत्वेन च अनयोरेकराशिस्थलाभावेन सौरवैशाखसम्बन्धि-न्यामसम्भवात्। रूढ़िता दुर्बलमिति "लक्ष्यात्मिका सती रूढ़िर्भवेद्योगापहारिणीति" स्मरणात्।

* दूषयति तदयुक्तमिति। क्लृप्तयोगादेव मासतत्सम्बन्धिलक्षणक्लृप्तयोगादेव प्रवृत्ति-सम्भवे शक्यत्वनिर्णयसम्भवे। तथाच वैशाखस्य इयमित्यच वैशाखशब्देन मास उच्यते तत्रेदमर्थविहितताद्धितप्रत्ययेन मासतत्सम्बन्धिलमुच्यते इत्युभाभ्यामवयवाभ्यां वैशाखीपदं वैशाखमासतत्सम्बन्धित्वबोधकत्वेन यौगिकमेव न तु समुदायशक्त्या रूढ़िकमिति भावः। अच दृष्टान्तं दर्शयति प्रोचणीशब्दे अयमेव यौगिकार्थ एव स्वीकृत इति शेषः।

† अच प्रमाणं दर्शयति कल्पनीया लित्यादि। पूर्वार्द्धन्तु लक्ष्यात्मिका सती रूढ़ि-र्भवेद्योगापहारिणीति। रूढ़िः शक्तिः वैदिकलौकिकप्रयोगबाहुल्येन सुप्रसिद्धा सती योगापहारिणी भवेत्। कल्पनीया शक्तिस्तु योगबाधतो योगार्थं बाधित्वा आत्मानं स्वरूपं न लभते परन्तु योगार्थसहकारेणैव रूढ्यर्थं लभते। यथा मण्डपपदं मण्डपानकर्तृत्वरूप-योगार्थं बाधित्वा गृहत्वावच्छिन्नरूपरूढ्यर्थं बोधयति। एवं पङ्कजपदं पङ्कजनिकर्तृत्वरूप-योगार्थसहकारेणैव पद्मत्वावच्छिन्नरूपयोगरूढ्यर्थं बोधयति।

‡ वैशाख्यादिपदं रूढ़िरेव, इत्याशङ्कते नन्वित्यादि। तत्सम्बन्धिनी च तिथिरिति वैशाखस्येयमित्यच षष्ठ्या सम्बन्धित्वमात्रबोधकतया तिथिस्तु नावयवान्तरोपात्ता न मासस्य अन्यावयवत्वेन ग्रहीतुं शक्या येन हेतुना यौगिकत्वं सेत्स्यतीति शेषः। अतः अवयवशक्त्या अर्थप्रकाशशक्त्याभावात्। रूढ़िरेव एवकारेण योगरूढ़िलक्ष्यव्यवच्छेदः।

यद्यपि तत्र श्रूयते तथापि वैशाखपदमेव षष्ठीतत्पुरुषवत्सम्बन्धिनं लक्षयति। तेन प्रकृतिपदमवयवस्थाने वर्त्तत इति यौगिकत्वम्*। यद्वा वैशाखीपदमित्यत्र प्रथमाप्रत्ययेन वृद्धौ भूतायामपि पुनरणन्तरेणापि दीर्घस्य स्थाने दीर्घो भवतीतिवदपरापि वृद्धिरणविकारस्तत्सहितं वैशाखीपदं यौगिकं† लक्ष-

---

* यौगिकत्वं व्यवस्थापयति उच्यते इत्यादि। अणप्रत्ययेन सहावयवद्वयमिति। तथाच अणप्रत्ययैकावयवः अपरश्च प्रकृतीभूतवैशाख एव इत्यवयवद्वयमित्यर्थः। ननु वैशाखीत्यत्र वैशाखस्येयमिदमर्थे विहितेन अणा साधितवैशाखीत्तरविहितेन ङीपा अण्लोपे कथम् अणप्रत्ययेन सहावयवद्वयमित्याह यद्यपीति। तथापि अणप्रत्ययलोपेऽपि षष्ठीतत्पुरुषवदिति राजपुरुष इत्यत्र षष्ठीलोपेऽपि यथा राजपदं राजसम्बन्धिनं बोधयति तथा वैशाखीत्यत्र वैशाखपदं वैशाखसम्बन्धिनं बोधयति। तेन वैशाखीपदस्य वैशाखसम्बन्धित्वरूपार्थबोधकत्वेन प्रकृतिपदं प्रकृतिपदमपि अवयवस्थाने अवयवकार्य्यकारित्वे इति हेतौ यौगिकत्वमिति। तथाच प्रकृतिपदस्य अवयवस्थानीयत्वेन सम्बन्धित्वार्थबोधकत्वात् यौगिकत्वमिति भावः।

† ननु लुप्तविभक्तेः स्मारकत्वात् राजपुरुष इत्यत्र राजपदेन राजसम्बन्धित्वार्थसम्भवेऽपि लुप्तप्रत्ययस्य स्मारकतायाः अदृष्टत्वात् कथं राजपुरुषदृष्टान्तेन वैशाखीपदस्य वैशाखसम्बन्धित्वार्थबोधकतासम्भवः लक्षणया चेत् लक्षणया यौगिकत्वं पदस्य कदापि न सम्भवति इत्यत आह यद्वेति। प्रथमाप्रत्ययेन नक्षत्रेण युक्तः काल इति सूत्रेण विशाखानक्षत्रयुक्ता पौर्णमासीत्यर्थे प्रथमाप्रत्ययेन पुनरणन्तरेणापीति सास्मिन् पौर्णमासीति संज्ञायामिति द्वितीयसूत्रविहितेन द्वितीयेन अणा वृद्धौ भूतायामित्यनुषङ्गेणान्वयः। दीर्घस्य स्थाने दीर्घो भवतीति यथा ऋक्षस्यैव वृद्धेरौचित्येऽपि प्रकृते वैशाखौ इत्यत्र आद्यौ ऋक्षाभावेऽपि दीर्घस्य ऋक्षत्वमुपचर्य्य यथा सूत्रबलात् दीर्घस्थाने पुनर्दीर्घो भवति तद्वत् अपरा वृद्धिः तृतीया वृद्धिः अण्विकार इति वैशाखस्येयमिति इदमर्थविहितस्य तृतीयस्याणो विकारः प्रकृतेरन्यथाभावः तृतीयेन अणा साधिता इत्यर्थः विकारशब्दस्य अजहल्लिङ्गत्वात् स्त्रीलिङ्गविशेषणत्वेऽपि न स्त्रीलिङ्गता। तत्सहितम् अण्विकारवृद्धिसहितं यौगिकमिति। तथाच

णिकमेव वा वैशाखीपदं स्वसम्बन्धिनि न तु रूढ़म्। सा चेयं लक्षणा* नक्षत्रेण युक्तः कालः सास्मिन् पौर्णमासीति संज्ञाया-मित्यण्हयावगमसापेक्षत्वान्नक्षत्रयोगमात्रेणामावास्या-विशेषाव-गमः शीघ्रमिति स एव वचनार्थः स्यात्†। यद्वापर-

---

दधि पश्यतीत्यादौ चम्पककुसुमसुवासितवसनादिवत् क्रियजनितसंस्कारादेव संख्याकर्म्मादयव-गम इतिवत् अण्लोपेऽपि हृद्धिप्रयोजकीभूताण्जनितसंस्कारादेव सम्बन्धित्वार्थलाभादयौगि-कत्वसिद्धिरिति भावः।

* ननु दधि पश्यति इत्यादौ अन्वयानुपपत्त्या क्रियजनितसंस्कारः कल्प्यः प्रकृते तु तथाविधानुपपत्त्यभावात् कथम् अण्प्रत्ययजनितसंस्कारकल्पनमित्यत आह लाक्षणिक-मेवेति। स्वसम्बन्धिनि वैशाखसम्बन्धित्वार्थबोधकत्वे। न तु रूढ़मिति। तथाच वैशा-खस्येयमिति इदमर्थविहितेन छतीयेन अणा साधितत्वेऽपि स्त्रीपा अण्लोपे निमित्तापाये नैमित्तिकस्याप्यपाय इति न्यायात् तादृशार्थाप्रतीतौ वैशाखीत्यत्र वैशाखीपदस्य स्वसम्बन्धित्व-लक्षणया वैशाखसम्बन्धित्वरूपलाक्षणिकार्थ एव प्रतीयते। न तु प्रमाणाभावात् रूढ्यर्थ इति भावः। सा चेयमिति। अत्र पक्षव्यत्ययश्चत्पदाध्याहारेणान्वयः। तथाच यतः न रूढ़िः अतः सा चेयं लक्षणा इत्यर्थः।

† नक्षत्रयुक्तायान्तु यौगिकमित्यनुकेनोक्तत्वात् तन्मतेनापि यौगिकत्वं साधयितुं वैशाख्यमावस्यायां परम्परया नक्षत्रयोगं दर्शयति नक्षत्रेण युक्तः काल इत्यादि। अण्हया-वगमसापेक्षत्वादिति निरुक्तसूत्रहयविहिताण्हयसाधितवैशाखज्ञानसापेक्षत्वादित्यर्थः। नक्षत्र-योगमात्रेण विशाखानक्षत्रयुक्तपौर्णमासी वैशाखी सा अस्मिन् वैशाखः तस्येयमेवम्परम्परया विशाखानक्षत्रयोगमात्रेण अमावास्याविशेषावगमः शीघ्रमिति वैशाखसम्बन्धित्वविशिष्टामा-वस्यायाः झटित्यवगतिः स एव वचनार्थः स्यात् परम्परया विशाखानक्षत्रयोगमङ्गीकृत्यैव वचनार्थः स्यात् न तु साक्षात् विशाखानक्षत्रयोगेन। तथात्वे चन्द्रस्य हस्तिकराशिस्थत्वेन सूर्यस्य मेषवृषान्यतरराशिस्थतया च एकराशिस्थत्वाभावेन वैशाखस्यामावास्यायां सर्व्वथैव विशाखानक्षत्रयोगासम्भवात् सा वैशाखस्यामावास्या या रोहिण्या सम्बुध्यते इति श्रुति-

मुक्तं नक्षत्रेण युक्तः काल इति नक्षत्रयुक्तपौर्णमास्येव वैशाख्यादिपदेनोच्यते न कालमात्रमिति तदप्यनागमम्*। पौषी रात्रिः पौषमहः† माघी रात्रिः माघमहः इति नक्षत्रेण युक्तः काल इत्यस्मिन्नेव सूत्रे उदाहृतत्वात् मासस्वन्धेनोदाहरणत्वानुपपत्तेः‡। मासस्वन्धस्यापक्रान्तत्वात् नक्षत्रेण युक्ततयोदाहरणस्यादेयत्वात्। अन्यथा पौषी पौर्णमासीत्येवोदाहरेत् अतएव सूत्रेऽपि काल इति नोच्यते। नक्षत्रेण युक्ता पूर्णिमे-

---

विरोधाच्च। यद्यपि लक्षणया योगरूढित्वकल्पनं न युक्तिसङ्गतं तथाप्यत्र सर्व्वथैव रूढ्यर्थासम्भव इति ज्ञापनार्थमिदं वागाड्म्बरमाचं मन्तव्यम्।

* यदापरसुक्तं यदप्यपरसुक्तमित्यर्थः अस्मुकभट्टेनेति शेषः तदेवाह नक्षत्रेण युक्तः काल इति। नक्षत्रयुक्तकालार्थं अण् भवति इति सूत्रे कालपदेन सामान्यस्य विशेषपरत्वात् पौर्णमासी काल एवोच्यते। तथाच नक्षत्रेण युक्ता पौर्णमासीत्यर्थे अण् भवतीति प्रथमसूत्रार्थः। तदनागमं तत्प्रमाणशून्यम्।

† तदेव साधयति पौषी रात्रिः पौषमह इत्यादि। यदि पुष्ययुक्तपौर्णमासीत्यर्थे अण् भवतीति प्रथमसूत्रार्थः स्यात् तदा पुष्ययुक्ता या रात्रिः सा पौषी एवं पुष्ययुक्तं यदहः तत्पौषमित्याद्युदाहरणं कदापि नोपपद्यते।

‡ तदेव दर्शयति उदाहृतत्वात् पौषी रात्रिरित्यादेरिति शेषः। मासस्वन्धेनोदाहरणत्वानुपपत्तेरिति। पौषी रात्रिः पौषमहरित्यादेर्मासस्वन्धेनोदाहरणत्वानुपपत्तेः असम्भवादित्यर्थः। तथाच नक्षत्रेण युक्तः काल इति प्रथमसूत्रे यदि कालपदेन पौर्णमासी गृह्यते एवं सात्मिन् पौर्णमासीति संज्ञायामिति द्वितीयसूत्रेऽपि सैव गृह्यते, ततश्च सूत्रद्वयमेव मासस्वाधकं भवेत्। प्रकृते पौषी रात्रिरित्यादेरुदाहृतत्वेन मासस्वन्धेनोदाहरणमसम्भवीति भावः।

त्येवं ब्रूयात् सास्मिन् पौर्णमासीतिवत्। धर्म्मशास्त्रेषु च तिथ्यन्तरेष्वपि प्रायशः प्रयोगः दृश्यते*।

तथाच गोभिलः।

प्रौष्ठपद्यां हस्तेनोपाकरणं तैषीमुत्सृजन्तीति।

प्रौष्ठपदी भाद्रपदस्य तिथिरनियता तस्यां हस्तेनोपाकरणं भाद्र एव तिथनक्षत्रयुक्ता कृष्णत्रयोदश्यादिका तैषीत्युक्ता छन्दोगानामुत्सङ्कारणाय तिथिः पौर्णमास्येव नक्षत्रयोगात्तथोच्यते इत्यनागमम्। यच्च वैशाखमासस्य वैशाखीति ग्रहणं† काला-

---

* मासस्वस्वस्यापक्रान्तत्वादिति। पुष्ययुक्ता या रात्रिः सा पौषीत्यादौ उदाहरणचतुष्टये मासस्वस्वस्याप्राप्तत्वादित्यर्थः नक्षत्रयुक्ततया नक्षत्रयुक्तकालसामान्यबोधकतया उदाहरणस्य पौषी रात्रिरित्याद्युदाहरणसादेयत्वात् अयुक्तत्वादित्यर्थः। अन्यथा कालपदस्य पौर्णमासीपरत्वे यतएव सूत्रे स्पष्टार्थत्वेन पौर्णमासीपदविधानस्य समुचितत्वम् अतएवेत्यर्थः। धर्म्मशास्त्रेषु गोभिलगृह्यादिस्मृतिषु। तिथ्यन्तरेषु पौर्णमासीभिन्नतिथिष्वपि प्रायशो भूय एव।

† प्रौष्ठपदी भाद्रस्य तिथिरनियता इति। भाद्रपौर्णमास्यां हस्तनक्षत्रयोगस्यासम्भवादाह भाद्रस्य अनियततिथिरिति। तथाच गोभिलः। "सूर्य्याचन्द्रमसोर्यः परो विप्रकर्षः सा पौर्णमासीति"। परो विप्रकर्षः सप्तमराश्यवस्थानरूपः। ततश्च हस्तनक्षत्रस्य कन्याघटकतया तस्मिन् चन्द्रमसि सिंहे कन्यायां वा तदानीं रविस्थितौ सूर्य्याचन्द्रमसोः कदापि सप्तमराश्यवस्थानं न घटते।

विशेषतस्तु—"अन्त्यीपान्त्यौ चिभौ ज्ञेयौ फाल्गुनस्य चिभो मतः।
मेषा मासा द्विभा ज्ञेया कृत्तिकादिव्यवस्थया॥"

अत्र कृत्तिकादिव्यवस्थया इत्यनेन उपान्त्यो भाद्रो भवति। स च चिभः श्रतभिषया पूर्व्वोत्तरभाद्रपदाभ्यां युक्तः अतो भाद्रपौर्णमास्यां सर्व्वथा हस्तयोगासम्भवः। यच्च पुनर्हस्तयोगः सम्भवति भाद्रसम्बन्धि-तत्तिथिप्राप्त्यर्थम् अनियता इत्युक्तम्। भाद्र

ट्ठञिति ठञ्प्रत्ययेन वैशाखीति स्यात् इत्युपाध्यायपादानां दूषणं तदपि पौषी चेत् पुष्यायुक्ता स्यादित्यादि। कार्त्तिक्यान्तु यदा ऋक्षमाग्नेयम्भवति क्वचित्। अपरपक्षाष्टकाभिधानाय च प्रौष्ठपद्यष्टकाभ्युदय* इत्यादिभिर्मुनिभिरेव ठञ्प्रत्ययस्यानित्यता-

---

एव तिष्यनक्षत्रयुक्ता पुष्यनक्षत्रयुक्ता कृष्णचयोदश्यादिका भाद्रगौणचान्द्रीयकृष्णचयोदश्यादिका तिथिरित्यन्वयः। उक्ता इति। तथाच "सूर्याचन्द्रमसोर्यः परः सन्निकर्षः सामावास्या" इति गोभिलसूत्रात् परः सन्निकर्षश्च उपर्यधोभावापन्नयोः सूर्याचन्द्रमसो राश्येकांशावच्छेदेन सङ्गावस्थानरूपः स च दर्शान्तयामाव्यभिचारी। ततश्च अमावास्याः शेषयामे तादृशसङ्गावस्थाननियमात् सिंहस्थसूर्ये भाद्रगौणचान्द्रीयकृष्णचयोदश्यादितिथौ कर्कटराशिघटकपुष्यनक्षत्रयोगः कथञ्चित् सम्भवतीति भावः। उक्तसङ्करणाय अध्ययनविरामाय।

तथाच हेमाद्रौ वचनम्।

"चयोदश्यादितो वर्ज्यं दिनानां नवकं ध्रुवम्।
माङ्गल्येषु समस्तेषु ग्रहणे चन्द्रसूर्ययोः॥"

अपिच तत्रैव कात्यायनः।

"उपाकृत्योदगयने ततोऽधीयीत धर्म्मवित्।
उत्सर्गश्चैक एवैषां तैष्यां प्रौष्ठपदेऽपि वा॥"

धर्म्मविज्ञः उदगयने उत्तरायणे उपाकृत्य वेदानारभ्य अधीयीत अध्ययनं कुर्य्यात्। प्रौष्ठपदे गौणचान्द्रभाद्रे मासि पुष्यनक्षत्रयुक्तकृष्णचयोदश्यादितिथौ एषां वेदानाम् एक उत्सर्गः समापनमेव कर्त्तव्य इति शेषः। पौर्णमास्येव नक्षत्रयोगात् तिष्यनक्षत्रयोगात् यथा तैषीत्युच्यते तदनागमं प्रमाणशून्यमित्यर्थः। भाद्रपौर्णमास्यां तिष्ययोगस्यासम्भवादिति शेषः। यद्येति उपाध्यायपादानां दूषणमिति अग्रिमेण सम्बन्धः। वैशाखमासस्य वैशाखीग्रहणं वैशाखमाससम्बन्धि-वैशाखी यदि गृह्यते इत्यर्थः।

* कालाट्ठञितीति। कालवाचिभ्यः भवार्थे ठञ्प्रत्ययो भवतीत्यर्थः। ठञ्प्रत्ययेन वैशाखीति स्यात् तदा ठञ्प्रत्ययेनैव वैशाखीति पदसिद्धिः स्यात् न तु अणप्रत्ययेन। तथाच

विज्ञापनाददूषणम्*। प्रयोगमूलत्वात् व्याकरणस्य तद्बाधाच्चमत्वात् शास्त्रकाराणाञ्चैवमादिप्रयोगादर्शनात्†। सामान्यतः प्राग्दीव्यतोऽणिति तत्र जातः‡ तत्र भव इत्याद्यन्यतमविहिताण्प्रत्ययेन वैशाख्यादिपदनिष्पत्तिसम्भवात्। क्वचिदपवादविषयेऽप्युत्सर्गः प्रवर्त्तत इति पाणिनीयानां व्यवहारादपवादकठञ्विषयेऽप्यण्प्रवृत्तेः। किञ्च वैशाखिकी ज्यैष्ठिकीत्यादिप्रयोगस्य

---

सामान्यकालवाचिभ्यो विहितठञा साधितपदस्य रूढित्वमिति उपाध्यायपादानामाशयः। पौषी पौषपूर्णिमा। कार्त्तिक्यां कार्त्तिकपौर्णमास्याम्। आग्नेयं कृत्तिका। अपरपक्षाष्टकाभिधानाय चतुर्थ्यष्टकाभिधानाय। प्रौष्ठपद्यष्टका भाद्रमुख्यचान्द्रीयकृष्णपक्षाष्टमी।

तथाच श्राद्धविवेके।

या चाप्यन्या चतुर्थी स्यात् तामेव कुर्य्यादिशेषतः।
वर्षासु मेध्यशाकेषु चतुर्थ्यामेव सर्व्वदा।
प्रौष्ठपद्यामतीतायामष्टकात्वं भविष्यति॥

चतुर्थ्यां चतुर्थ्यष्टकायामित्यर्थः।

* ठञ्प्रत्ययस्यानित्यता इति। तथाच सामान्यकालवाचिभ्य एव ठञ् भवति। यथा मासिकमार्द्धमासिकमित्यादि। विशेषकालवाचिभ्यस्तु अण् इति। यथा पौषी माघीत्यादि। अदूषणमित्यस्य तदपि इत्यनेन सम्बन्धः।

† ननु व्याकरणसूत्रानुसारादेव प्रयोगो भविष्यति कथं ठञ्प्रत्ययस्यानित्यता इत्यत आह प्रयोगमूलत्वादित्यादि। प्रयोगो मूलं यस्य तस्य भावः तस्मात् तथाच सिद्धप्रयोगस्य सिद्धपदस्य साधनार्थमेव व्याकरणस्य सूत्रं न तु व्याकरणसूत्रमेव मूलं सिद्धपदस्येति भावः। एवमादिप्रयोगादर्शनात् ठञा साधितवैशाख्यादिप्रयोगादर्शनादित्यर्थः।

‡ प्राग्दीव्यतोऽणिति। तेन दीव्यति इत्यतः प्राक् अण् अधिक्रियते इति काशिकावृत्तिः। तत्र जात इति अणादयो घादयश्च प्रत्ययाः प्रकृतालेषामतःप्रभृत्यर्थाः समर्थविभक्तयश्च निर्दिश्यन्ते। तत्रेति सप्तमी समर्थाज्जात इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति इत्यादि काशिकावृत्तिः।

लोके शास्त्रे चादर्शनात्* कालाट्ठञिति सूत्रे च वैशाखादिपदतत्-समानार्थस्य कालविशेषवचनस्य नाम्नोऽनुदाहृतत्वात् अवान्तरभेद-विशेषेण(१) तु सकलकालवचनस्य मासार्द्धमासमात्रस्य ठञ्प्रत्य-येन मासिकम् आर्द्धमासिकमित्येवोदाहृतत्वात् विशेषवाचिनो वैशाखादिपदात् ठञ्प्रत्ययो नास्त्येवेत्येवावधार्य्यते। तेन पूर्व्वोप-न्यस्तप्रयोगा उपपन्नाः। यद्यपि च वृद्धिर्यस्याचामादिस्तद्वृद्धमिति सूत्रेण यस्येति समुदाय उच्यते, अचां मध्ये यस्य वृद्धिसंज्ञक आदि-भूतस्तद्रूपं वृद्धसंज्ञं भवति, वृद्धसंज्ञा च वैशाखादीनामस्ति तेन च वृद्धाच्छ इत्यण्बाधेन छविधानात् वैशाखीयेत्यादि भवेदिति चोद्यं†, तदपि परिहृतम्। विष्णुव्यासादिमुनिप्रयोगानुपपत्तितः पूर्व्वसूत्रत्रयप्राप्तमणमेतन्न बाधते। किञ्च वृद्धिर्यस्यादिसूत्रे वा नामधेयस्येति वृद्धसंज्ञा वक्तव्या वक्तव्यत्वेन च विशेषवाचिनः पदस्य पाक्षिकी वृद्धसंज्ञा तेन देवदत्तस्येयं देवदत्तीया दैवदत्ती

---

(१) अवच्छेदविशेषेण तु इति क्वचिदादर्शे पाठः।

---

* तत्र भव इति। कालादिति निवृत्तम्। तत्रेति सप्तमी समर्थाद् ष्यञ् प्रातिपदि-काद्भव इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। सत्ता भवत्यर्थो गृह्यते न जन्म, तत्र जात इति गतार्थत्वादिति काशिकावृत्तिः। क्वचिदपवादविषये विशेषविषये उत्सर्गः सामान्यः। अपवादकठञ्विषये विशेषठञ्विषये। अदर्शनादिति तथाच वैशाखिकी ज्यैष्ठिकीत्यादि प्रयोगो न व्यवहारिक इति भावः।

† अचामिति। जातौ बहुवचनमिति काशिका। वृद्धाच्छ इत्यण्बाधेन छविधा-नादिति। वृद्धसंज्ञकाच्छप्रत्ययो भवति अण्बाधेन अणं बाधित्वा छविधानात् छप्रत्यय-विधानादित्यर्थः। चोद्यं कुतर्कं परिहृतं दूषितम्।

वा क्वाण्प्रत्ययाभ्यामेषामुदाहृतं तेन वैशाखादीनां कालविशेषनामत्वेन पाक्षिकी ह्रस्वसंज्ञा अतो वैशाखस्येयमिति वैशाखीत्यण सिध्यति। अतएव लोके माघीसप्तमी माघीद्वादश्यादि व्यपदिश्यते। ननु चेद्यौगिकम्, द्विभत्रिभसङ्कीर्त्तनं किमर्थमुच्यते स्वयमेव पृच्छन् योगान्नु भवतीति साधितमवगतञ्च भवता*। यद्यस्य प्रयोजनं नोपलभ्यते निरर्थकमेव। इदञ्चास्य प्रयोजनम्। यथाथर्ववेदमुच्चादिराष्ट्राणां विषयाणाञ्च च्यवनादीनाम्(१) नक्षत्रकीर्त्तनं तथा तत्तन्मासीयनक्षत्रोपजातदिव्यान्तरीक्षभौमापत्सूचितशुभाशुभफलविपाकज्ञापनाय मासानां नक्षत्रकीर्त्तनं यन्मासीयनक्षत्रं पीड़यत्यनुकूलयति वा शुभाशुभनिमित्तं वा भवति तस्मिन्नेव मासि फलविपाकमवधार्य्यानिष्टप्रशमनाय नृपतेर्ब्राह्मणाः शान्तिहोमादौ प्रवर्त्तन्ते। तथा उपयामगृहीतोऽसि मधवे त्वा गृह्णामीत्यादिविहितमधुमाधवादिमासेज्यायां सनक्षत्राः साधिदेवता इज्यन्ते इति मासानां नक्षत्रकीर्त्तनप्रयोजनम् अतएव मासः कार्त्तिकोऽग्निदैवत्य इत्यादिना

(१) व्यर्थवादिनामिति क्वचित् आदर्शपुस्तके पाठः।

* पूर्व्वसूत्रचयप्राप्तमणं नक्षत्रेण युक्तः काल इत्यादि पूर्व्वसूत्रचयविहितम् अण्प्रत्ययम्। एतत् क्वप्रत्ययः। वा नामधेयस्येति वक्तव्या इति वार्त्तिकसूत्रम्। दैवदत्तीया इति क्वप्रत्ययेन सिद्धं, दैवदत्ती इति अणा सिद्धम्। क्वाण्प्रत्ययाभ्यां क्वप्रत्ययेन अण्प्रत्ययेन चेत्यर्थः। द्विभत्रिभसङ्कीर्त्तनमिति अन्योपान्त्यौ त्रिभौ ज्ञेयौ फाल्गुनश्च त्रिभो मतः। शेषा मासा द्विभा ज्ञेया कृत्तिकादिव्यवस्थया इति वचनेनेति शेषः। योगान्नु भवतीति इति योगानुसारेण प्रयोगो भवतीति साधितम् अवगतञ्च भवता इत्यन्वयः।

मासानान्देवताः कीर्त्तिता विष्णुना। तस्माच्चान्द्रे सौरे वा यौगिकत्वानुपपत्तेः रूढ़िरेव वाच्या। तत्र सौर एव रूढ्या वाच्य इति जितेन्द्रियः। सौरचान्द्रयोः श्रुतिस्मृतिगृहीतत्वाविशेषे*-ऽप्यनेक(१)शक्तिकल्पनागौरवापत्तेरेकत्र शक्तिकल्पनायां सकलजनप्रसिद्धेः सौरे विनिगमनाप्रमाणं सौर एव वैशाखादयो मुख्याः तदपि न मनोऽनुगतमिति दीक्षितेन दूषितं†, सर्व्वजनप्रसिद्धेऽपि राजपदस्य राज्यकर्त्तरि मुख्यत्वानङ्गीकारात्।

(१) अनेकत्र इति क्वचिदादर्शे पाठः।

* स्वयं नक्षत्रप्रयोजनं दर्शयति इदक्षेत्यादि। इदं वक्ष्यमाणं यथाथर्व्ववेदम् अथर्व्ववेदम् अनतिक्रम्य यथाथर्व्ववेदम् उक्तादिराष्ट्राणां राज्यसम्बन्धिद्विषादिपशूनां विषयाणाञ्च धनसम्पत्त्यादीनाञ्च च्यवनादीनाञ्च च्यवनप्रभृतीनाम् ऋषीणाञ्च नक्षत्रकीर्त्तनमिति। तथाच अथर्व्ववेदे। राष्ट्रसम्बन्धिद्विषादीनां धनसम्पत्त्यादीनाञ्च शुभाशुभज्ञापनार्थं च्यवनादिभिः ऋषिभिः नक्षत्रकीर्त्तनम्। दिव्यानां स्वर्गीयाणां देवसम्बन्धिनीनामित्यर्थः अन्तरीक्षाणाम् आकाशसम्बन्धिनीनां भौमानां भूमिसम्बन्धिनीनाम् आपदां आपत्सूचितशुभाशुभानाम् इत्यर्थः। मधुमाधवादिमासेज्यायां चैत्रवैशाखादिमासविहितयागे। सनक्षत्राधिदेवता नक्षत्रेण सहाधिदेवताः। मासः कार्त्तिकोऽग्निदैवत्य इत्यादिनेति तथाच विष्णुः मासः कार्त्तिकोऽग्निदैवत्यः। अग्निश्च सर्व्वदेवानां मुखं तस्मात्तु कार्त्तिकं मासं बहिःस्थायी गायत्रीजपनिरतः सकृदेव हविष्याशी संवत्सरकृतात् पूतो भवतीत्यादि। तस्मात् व्यभिचारात् सर्व्वदा योगाप्रसक्तेः। सौर एव न चान्द्रो रूढ्या वाच्यः निरूपदमासपदशक्यः। श्रुतिस्मृतिगृहीतत्वाविशेषेऽपि सा वैशाखस्यामावास्या या रौहिण्या सम्बुद्ध्यते। मधुश्च माधवश्च वासन्तिकावृतुरित्यादिश्रुत्या, इन्द्राग्नी यत्र हूयेते मासादिः स प्रकीर्त्तितः इत्यादिस्मृत्या, तपस्तपस्यौ शिशिरौ इत्यादिस्मृत्या च चान्द्रसौरयोः परिग्रहाविशेषेऽपि।

† अनेकशक्तिकल्पनागौरवापत्तेरिति। सौरे चान्द्रे च उभयत्र मासपदशक्तिकल्पने अन्याय्यत्वानेकार्थ इति न्यायेन नानाशक्तिकल्पनागौरवापत्तेः। सकलजनप्रसिद्धिः बहु-

तदुक्तं* वार्त्तिककारपादैः ।

न चाल्पत्वबहुत्वाभ्यां प्रयोक्तॄणां विशिष्यते ।
वाच्यवाचकभावोऽयमच्चपादादिशब्दवत्† ॥
विभीतके अच्चशब्दो यद्यप्यल्पैः प्रयुज्यते ।
तथापि वाचकस्तस्य ज्ञायते शकटाङ्गवत् ॥

"अथ राज्ञः कर्म्म राज्यमिति" पाणिनिना व्युत्पादितत्वात् अप्रसिद्धे च राजनि तत्कर्म्मनिरूपणात् । क्षत्रियजातिरेव तत्र राजपदस्यार्थ इति अत्र न कश्चिद्विरोधः‡ । नैतदत्रापि पाणिनिनैव

---

संवादित्वं प्रयोगबाहुल्यं सौरे सौरे शक्तिकल्पने विनिगमनाप्रमाणम् । एकत्र पक्षपातिनी युक्तिर्विनिगमना तदेव प्रमाणं विनिगमकमित्यर्थः । दीक्षितेन दीक्षितनाम्ना निबन्धकारेण ।

* सकलजनप्रसिद्धिरिति । सौरशक्तिकल्पने यत् विनिगमनाप्रमाणमुक्तं तच्च व्यभिचारं दर्शयति सर्व्वजनप्रसिद्धेऽपीति । राज्यकर्त्तरि राज्ञः कर्म्म राज्यं तत् करोतीति राज्यकर्त्ता तस्मिन् राज्यकर्त्तरि मुख्यलक्षणस्वीकारात् शक्यत्वास्वीकारात् । तदुक्तं प्रयोगबाहुल्यं न शक्तिग्राहकमानमित्युक्तम् ।

† न चाल्पत्वबहुत्वाभ्यामिति । प्रयोगाणाम् अल्पत्वबहुत्वाभ्यां न विशेष्यते न सङ्कोच्य विशेषपरतया न गृह्यते । अयं वाच्यवाचकभावः वाच्यवाचकत्वम् । अच्चपादादिशब्दवत् अच्चश्च पादश्च तदादिवत् ।

‡ अत्राच्चशब्दरूपं दृष्टान्तं विवृणोति विभीतक इति । बहेड़ा इति ख्याते द्रव्यविशेषे । तस्य विभीतकशब्दस्य शकटाङ्गवत् शकटाङ्गस्येव । एवञ्च यत्नानुशासनं विना अल्पप्रयोगत्वेनैव शक्तेरस्वीकारेण भूरिप्रयोगेण शक्तिकल्पनमिति भावः । तस्य विभीतकस्य शकटाङ्गं चक्रद्वयधारणदण्डः । अप्रसिद्धे च क्षत्रियभिन्नेऽपि तत्कर्म्मनिरूपणात् राज्यकर्म्मदर्शनात् राजपदस्यार्थः राजपदशक्यार्थः । न कश्चिद्विरोध इति । तथाच राज्यकर्त्तरि शक्तिस्वीकारे राज्यकर्तृनियततया कर्तृभेदेन शक्यतावच्छेदकधर्म्मभेदापत्ति-

साश्विन् पौर्णमासीति संज्ञायां विशाखादिनक्षत्रयुक्तपूर्णिमायोगात् वैशाखादिशब्दानां व्युत्पादनात् सौरेषु आश्विनपौषमाघेष्वश्विनीपुष्यमघायुक्तपूर्णिमानां सर्व्वथैवासम्भवात्*। चान्द्रे तु कादाचित्केनापि योगेनात्यन्तयोगव्याहत्या† विशेषणत्वसम्भवात्

---

गमः स्यात् चत्रियजातौ शक्तिस्वीकारे तु शक्यतावच्छेदकस्य चत्रियत्वस्य जातित्वेनानुगततया सर्व्वसम्मतं भवतीति भावः।

* नैतदिति। जितेन्द्रियेण मासपदस्य सौरे रूढिशक्तिरुक्ता। तत्र च सकलजनप्रसिद्धिः विनिगमना प्रमाणं हेतुरित्युक्तम्, दीक्षितेन तु तत्र सर्व्वजनप्रसिद्धेः शक्तिग्राहकत्वे व्यभिचारमात्रं प्रदर्शितम् इदानीन्तु। मूलकारः स्वमतं परिष्कर्त्तुमापातः सौरशक्तौ प्रतिबन्धिं दर्शयित्वा चान्द्रशक्तिं प्रमाणयितुं विचारमारभते नैतदचापीति। वैशाखादिशब्दानां वैशाखादिमासपदानां व्युत्पादनात् यौगिकत्वप्रतिपादनात् आश्विनपौषमाघेषु आश्विनपौषमाघमासत्रयमात्रेषु सर्व्वथैवासम्भवादिति। तथाच सूर्य्याचन्द्रमसोर्यः परो विप्रकर्षः सा पौर्णमासीति गोभिलसूत्रात् सौराश्विने अश्विनीनक्षत्रस्य मेषघटकतया तस्मिन् चन्द्रे कन्याराशौ रवौ च एवं सौरपौषे पुष्यनक्षत्रस्य कर्कटघटकतया तस्मिन् चन्द्रे धनुषि रवौ च एवं सौरमाघे मघानक्षत्रस्य सिंहघटकतया तस्मिन् चन्द्रे मकरराशौ सूर्य्ये च षड्भकैनावस्थानात् तेषु सौरमासेषु तेषु नक्षत्रेषु च सर्व्वदैव पूर्णिमायोगस्यासम्भवेन साश्विन् पौर्णमासीति सूत्रस्याविषयत्वात् सा व्युत्पत्तिर्न घटते इति। अश्विनीनक्षत्रयुक्ता पौर्णमासी आश्विनीति विशेषणं मासस्य कदापि न सम्भवतीति भावः।

† चान्द्रेत्यादि। चान्द्राश्विनादौ कादाचित्केनापि योगेनेत्यादि। तथाच तुलादौ चान्द्राश्विनीयपौर्णमास्याम् अश्विनीयोगः सम्भवत्येव। तत्र तुलास्थे सूर्य्येऽश्विन्या मेषघटकतया तस्मिन् चन्द्रे सति सप्तमराश्यवस्थानात् एवं चान्द्रपौषीयपौर्णमासीः मकरे सम्भवात् चान्द्रमाघीयपौर्णमास्याश्च कुम्भे सम्भवाच्च तत्र मकरस्थे कुम्भस्थे च सूर्य्ये पुष्यनक्षत्रस्य कर्कटघटकतया एवं मघानक्षत्रस्य सिंहघटकतया च तस्मिन् तस्मिन् चन्द्रे सति सूर्य्याचन्द्रमसोः सप्तमराश्यवस्थानात् एवमपरापरचान्द्रमासीयपौर्णमासामपि तत्तन्माससंज्ञकनक्षत्रयोगः सम्भव-

पाणिनिपुरस्काराय मेषाद्युपक्रान्ताश्च प्रतिपदादिदर्शान्ताश्चान्द्रा एव मुख्या वैशाखादयः*। तथा सा वैशाखस्येत्यादि श्रुत्या चान्द्रस्यैव वैशाखस्य निर्दिष्टत्वात् वाचसन्देहे यववराहादिन्यायेनैव तदवगम इति चान्द्रो वैशाखः। तत्सामान्यादितरेष्वपि तथात्वमिति न्यायात् ज्यैष्ठादयोऽपि चान्द्रा एव मुख्याः। सौरस्तु मेषादित्यारभ्यत्वगुणयोगाद्गौण इति चेदतिदूषणं तपस्तपस्यादिश्रुत्या सौराणां माघादिद्वादशमासानामेव निर्दिष्टत्वात्†। ननु न ते माघादिपदैर्निर्दिष्टाः सत्यं तपस्तपस्यादिपदानां

---

त्वेव। ततश्च कादाचित्केनापि योगेन अत्यन्तायोगव्यावृत्त्या तदत्यन्ताभावाभावरूपयोग्यतावत्त्वमनेनेत्यर्थः।

* विशेषणत्वसम्भवादिति। वैशाख्यादिपौर्णमास्याश्चान्द्रमासविशेषणत्वसम्भवात् तथाच चान्द्रवैशाखादिपौर्णमास्याः विशाखादिमाससंज्ञकनक्षत्रयोगसम्भवात् विशाखानक्षत्रयुक्तपौर्णमासी वैशाखी सा अस्मिन् वैशाखः। अत्र वैशाख्याश्चान्द्रमासविशेषणत्वं स्पष्टमवगम्यते। सौरे तु पौषमाघाश्विनपौर्णमास्याः पुष्यादिनक्षत्रयोगस्यासम्भवात् पौष्या माघ्या आश्विन्याश्च पौर्णमास्याः पौषादिमासविशेषणत्वं कदापि न सम्भवतीति भावः। पाणिनिपुरस्काराय पाणिनिसम्मताय। मेषाद्युपक्रान्ताः मेषादिस्थरव्यारब्धाः मुख्या मासपदशक्याः।

† श्रुत्या उपपादयति सा वैशाखस्येति। सा वैशाखस्यामावास्या या रौहिण्या सम्बुध्यते इति निर्दिष्टत्वाद्विधेयत्वात् वाचसन्देहे श्रुत्यसन्देहे एव यववराहन्यायस्तु प्राक् प्रदर्शितः तदवगमः श्रुत्यावधारणं तथाच अत्र श्रुत्यादिभिश्चान्द्र एव मासपदशक्तौ निर्णीतायां सत्यां न न्यायावसर इति भावः। चान्द्रो वैशाखः सा वैशाखस्य अमावास्या इति श्रुतौ वैशाखः चान्द्र एवेत्यर्थः या रौहिण्या सम्बुध्यते इत्यनेन ध्रुवराशिघटकरौहिणीयोगस्य अमावास्यायां ध्रुवराशौ सौरज्यैष्ठ एव सम्भवति न तु कदापि मेषराशौ सौरवैशाखे तत्र सूर्याचन्द्रमसोरेकराश्यवस्थानाभावात्। तथाच गोभिलः। सूर्याचन्द्रमसोर्यः परः सन्निकर्षः सामावास्या इति। परः सन्निकर्षश्च उपर्यधोभावापन्नयोः सूर्याचन्द्रमसो राश्येकांशावच्छेदेन सद्भावस्या-

लोकतः भागुरिवचनात् कौषकारस्मरणाच्च माघादिपर्य्यायत्वावधारणात् यो हि* रोहिणीं लोकसिद्धामेव प्राजापत्यनक्षत्रवचनतामादाय चान्द्रस्य वैशाखमात्रस्य श्रुत्या परिग्रहणं वदति स कथं लोकशास्त्रप्रसिद्धम् माघादिपर्य्यायत्वं तपस्तपस्यादीनां बाधते†। भूयसामनुरोधेन रोहिणीपदस्यैव प्राजापत्यनक्षत्रवचनत्वं कुतो न बाधते‡। तस्माच्चान्द्रसौरयोरुभयोरपि श्रुति-

---

नम्। तत्सामान्यादितरेष्वपि तथात्वमिति। तथाच वैशाखस्य श्रुतौ चान्द्र एव ग्रयोगात् तत्सामान्यात् तत्साधारण्यात् इतरेषु ज्यैष्ठादिष्वपि मासेषु तथात्वं चान्द्रशक्यत्वम्। मुख्या मासपदशक्या इत्यर्थः। अतिदूषणम् अतिमन्दम्। निर्दिष्टत्वात् विहितत्वात्।

* भागुरिवचनादिति। तपस्तपस्यौ शिशिरौ तौ मासौ माघफाल्गुनौ। कौषकारस्मरणादिति। तपा माघेऽथ फाल्गुने स्यात्तपस्यः फाल्गुनिकः स्याच्चैचे चैत्रिको मधुरित्यादि। माघादिपर्य्यायत्वावधारणादिति। तपस्तपस्यादिशब्दानां माघफाल्गुनादेः पर्य्यायत्वस्य विभिन्नपदैन एकार्थाभिधायकतया सह पठितत्वस्य निश्चयात्। यो हीति यो विरुद्धवादीत्यर्थः वदति इत्यनेनास्य सम्बन्धः।

† रोहिणीपदस्येति। या रोहिण्या सम्बुध्यते इति श्रुतिस्थरोहिणीपदस्य प्राजापत्यनक्षत्रवचनतां प्रजापतिर्देवता अस्येति देवतार्थे तद्धितप्रत्ययात्। अश्वियमदहनकमखज इत्याद्यभिधाय ईश्वराभानामिति वचनेन रोहिण्याः प्रजापतिदेवताकत्वात् प्राजापत्यनक्षत्रवाचकतामादाय। श्रुत्या सा वैशाखस्यामावास्या या रोहिण्या सम्बुध्यते इति श्रुत्या। वैशाखमात्रस्येति तत्श्रुतौ ज्यैष्ठादिपदाश्रवणादिति भावः। स च विरुद्धवादी। लोकशास्त्रप्रसिद्धमिति एतत्पर्य्यायत्वविशेषणम्। तपस्तपस्यादीनामिति सम्बन्धे षष्ठी माघादिपर्य्यायत्वमित्यनेनास्य सम्बन्धः बाधते इति कथं वदतीत्यन्वयः।

‡ एतदेव साधयति भूयसामनुरोधेनेति। विरुद्धधर्म्मसमवाये भूयसां सधर्म्मकत्वमिति न्यायेनेति शेषः। रोहिणीपदस्येत्यादि। तथाच तपस्तपस्यौ शैशिरावृतुरित्यादिश्रुत्या पर्य्यायद्वारा माघादिद्वादशमासानां सौराणामिव प्रतिपादनात् विरुद्धधर्म्मसमवाये

परिगृहीतत्वात् नास्ति यववराहन्यायः*। किञ्च वैशाखपद-वाच्यसन्देहे यववराहपदस्थेव वैशाखपदस्य भवति नियामिका श्रुतिः न तु तदन्येषाम्†। न ह्यन्यदीयवाक्यशेषेणान्यसंशयो-ऽपनीयते तत्सामान्यादिति न्यायेन च‡ लोकशास्त्रप्रसिद्धतप-

भूयसां सधर्मकत्वमिति न्यायेन बहूनामनुरोधात् रौहिणीपदस्थेव प्राजापत्यनक्षत्रवचनत्वं कथं न बाधते तथाच पर्य्यायद्वारा वैशाखादिद्वादशमासानां सौरत्वावगमात् सौरे च वैशाखे अमावास्यायां रौहिणीयोगस्यासम्भवात् बहूनामनुरोधात् वरं रौहिणीपदस्य लक्षणया अश्विन्यादिपरत्वमस्तु इति भावः।

* नास्ति यववराहन्याय इति। तथाच वाच्यसन्देह एव यववराहन्यायस्य दृष्टान्तत्व-सम्भवात् अत्र सौरचान्द्रयोरप्युभयोरेव श्रुतिपरिगृहीतत्वेन वाच्यसन्देहाभावात् नात्र यव-वराहन्यायावसर इति भावः। स च न्यायः प्राक् दर्शितः, पश्चादपि दर्शितो भविष्यति।

† ननु वैशाखमासस्य श्रुतिपरिगृहीतत्वेन तया श्रुत्या वैशाखपदस्य उपलक्षणतया ज्यैष्ठादिपरिग्रहो न भवितुमर्हति इत्याशङ्क्य किञ्चेति। वैशाखपदवाच्यसन्देहे इति वैशाखपदं चान्द्रे प्रक्रम्य उत सौरे इत्येवंरूपवाच्यसन्देहे इत्यर्थः। यववराहपदस्थेव तथाच यवपदस्य दीर्घशूके आर्य्यव्यवहारः प्रियङ्गुषु म्लेच्छव्यवहारः। वराहपदस्य शूकरे आर्य्यव्यवहारः क्षणशकुनौ म्लेच्छव्यवहारः। अतो यववराहपदयोर्वाच्यसन्देहे यवान्या ओषधयो म्लायन्ते अधैते सीदमाना इवोत्तिष्ठन्तीति वराहं गावोऽनुधावन्तीति श्रुती एव नियामिके वाच्यसन्देहनाशिके इत्यर्थः। ततश्च एते यवाः सीदमानास्तिष्ठन्तीति वाक्यशेषात् यवपदस्य दीर्घशूके वराहं गावोऽनुधावन्तीति वाक्यशेषात् वराहपदस्य शूकरे शक्तिग्रहस्तथा वैशाखपदस्य वाक्यसन्देहे सा वैशाखस्यामावास्या इति श्रुतौ वैशाखपदश्रुतेः वैशाखमासस्यैव वाच्यनिर्णये सैव श्रुतिर्नियामिका न तु ज्यैष्ठादीनां वाच्यनिर्णये इत्यर्थः।

‡ अत्र हेतुं दर्शयति न ह्यन्यदीयेत्यादि। वाक्यशेषस्य संशयनिरासकत्वेऽपि यत्र यो वाक्यशेषः स च तद्वाक्यगतपदस्यैव वाच्यसंशयमपनयति न तु भिन्नवाक्यीयस्येत्याह न ह्यन्यदीयवाक्यशेषेणेत्यादि। तत्सामान्यादिति न्यायेन चेति अपनीयते इति प्राक्तनेन

**स्तपस्यादिपर्य्यायतया माघादिशब्दानामवधृतसौरवचनत्वबाधे* यववराहादिषु म्लेच्छप्रसिद्धे† र्बाधादप्येकनियतामरकोषादिष्वपि**

---

सम्बन्धः तथाच न्यायस्य शास्त्रतो दुर्ब्बलत्वादत्र शुक्रस्य शुचिश्च शैषाहतुरित्यादि श्रुत्या पर्य्यायद्वारा ज्यैष्ठादीनां सौरे वाचनिर्णयात् सन्देहाभावेनाच न्यायानवसर इति भावः।

* अन्यदीयवाक्यशेषादिरन्यसन्देहनिरासकत्वे प्रतिबन्धिमाह लोकशास्त्रप्रसिद्धेति। लोकशास्त्राभ्यां प्रसिद्धा तपस्तपस्यादिर्या पर्य्यायता तया अवधृतसौरवचनत्वबाधे अवधृतसौरशक्तेर्बाधस्वीकारे इत्यर्थः। तथाच सा वैशाखस्यामावास्या इति श्रुतौ श्रौततया वैशाखपदस्य चान्द्रवैशाखपरत्वेन शक्तौ निर्णीतायामपि वैशाखपदस्योपलक्षणतया तपस्तपस्यौ शैशिराहतुरित्यादि श्रुत्या तपस्तपस्यादीनां सौरतया तत्पर्य्यायद्वारा माघादीनामपि प्रतीतसौरशक्तेः निरुक्तश्रुत्या वैशाखपदस्योपलक्षणतया बाधः स्वीक्रियते इति भावः।

† यववराहादिषु म्लेच्छप्रसिद्धेर्बाधादिति। यवपदस्य म्लेच्छप्रसिद्धेः प्रियङ्गुषु म्लेच्छानां यवव्यवहारस्य कृष्णशकुनौ च म्लेच्छानां वराहव्यवहारस्य च श्वपचे सीदमानास्तिष्ठन्तीति वराहं गावीऽनुधावन्तीति श्रौतवाक्यशेषेण बाधादपीत्यर्थः। तथाचाधिकरणमालायां माधवाचार्यः।

यवादिशब्दाः किंन्यर्था नो वार्थ्यम्लेच्छसाम्यतः॥
दीर्घशूके प्रियङ्वाद्या इयेऽप्यर्था विकल्पिताः॥
यवान्या इति शास्त्रस्यप्रसिद्धित्वात् बलीयसी।
शास्त्रीयधर्म्मे तेनात्र प्रियङ्वादिर्न गृह्यते॥ १५॥

यवमयश्चरुर्भवति वाराही उपानहावुपयुञ्जत इति श्रूयते। तत्र यवशब्दमाद्यार्थां दीर्घशूके प्रयुञ्जते वराहशब्दञ्च शूकरे। म्लेच्छास्तु यवशब्दं प्रियङ्गुषु वराहशब्दं कृष्णशकुनौ। तथा सति लोकव्यवहारेण निश्चितव्येषु शब्दार्थेषु आर्य्यम्लेच्छप्रसिद्धयोः समानबलत्वादुभयविधा अप्यर्था विकल्पेन स्वीकार्य्या इति प्राप्ते ब्रूमः। शास्त्रीयधर्म्मावबोधे शास्त्रप्रसिद्धिर्बलीयसी प्रत्यासन्नत्वात् अविच्छिन्नपारम्पर्य्यागतत्वाच्च। शास्त्रे च यवविध्यर्थवाद एवं श्रूयते। यवान्या श्रीफलयः स्त्रायन्ते अश्वपचे सीदमाना इवोत्तिष्ठन्तीति। इतरौषधिविलक्षणे अतिदुर्द्धीर्घत्वे दृश्यते न तु प्रियङ्गुषु तेषामितरौषधिपाक-

बाध्येत। तस्मात्तपस्तपस्यौ शिशिरौ तौ मासौ माघफाल्गुनौ। तथा तपा माघेऽथ फाल्गुने स्यात्तपस्य इत्यादि भागुरिकोष-कारस्मरणाल्लोकतश्च तपस्तपस्यादिपदसमानार्थतावगतेः तैश्च श्रुतावुपनीतत्वात् माघादिशब्दानामपि श्रुतित एव सौरार्थत्वावगतेः*। बह्वनामनुरोधेन वैशाखादिपदस्यैव अन्यथा वर्णन-

---

कालात् पूर्वं पच्यमानत्वात् उपसदिध्यर्थवादश्चैवं भवति। वराहं गावीऽनुधावन्तीति गवामनुधावनं शूकरे भवति न तु क्षणशूकुनौ। तस्माद्दीर्घशूकादिर्यवादिशब्दार्थः इत्याह। शब्दशक्तिप्रकाशिकायां जगदीशतर्कालङ्कारस्तु यवपदस्य कङ्कुप्रभृतौ म्लेच्छानां दीर्घशूके च शिष्टानां व्यवहारात् एकमात्रशक्तेः परिच्छेत्तुमशक्यत्वात् नानार्थत्वस्य चान्याय्यत्वात् यवमयश्चरुर्भवतीति श्रुतौ यवपदस्यार्थसन्देहे—

वसन्ते सर्व्वशस्यानां जायते पचशातनम्।
सोदमानास्तु तिष्ठन्ति यवाः कणिशशालिनः॥

इति विध्यर्थाकाङ्क्षया प्रवर्त्तमानात् वाक्यशेषाद्दीर्घशूके एव यवपदशक्तिग्रहात् कङ्कुप्रभृतौ म्लेच्छानां यवव्यवहारेऽपि शिष्टानां न तद्भवतीत्याह।

* बाधादपीति। एकनियतामरकोषादिषु इति। तथाच तस्माद्बाधादपि शक्ति-ग्राहकत्वेन एकनियतामरकोषादिषु प्रसिद्धसङ्केतं बाध्यत इत्यर्थः तथाच यदि एकत्रस्थित-वाक्यशेषादन्यदीयवाच्यनिर्णयः स्यात् तदा एकत्र वाक्यशेषात् म्लेच्छप्रसिद्धेर्बाधादपि अन्यत्रा-मरादिप्रसिद्धसङ्केतबाधः स्यादित्यापततीति भावः। तद्वाक्यशेषबलेन एकनियततया अव्यभिचारितया कोषादिवाक्यबोध्यपदवाच्यत्वं बाध्यत तुल्ययुक्त्या इति भावः। तस्मात् कोषादिवाक्यबोध्यशक्तिबाधापत्तेरित्यर्थः भागुरिकोषकारस्मरणात् तौ मासौ माघफाल्गुना-वित्यन्तं भागुरिवचनं स्यात्तपस्येत्यादि कोषवचनम्। लोकतश्च ह्रस्वव्यवहारतश्चेत्यर्थः तपस्यादिरित्यादिना फाल्गुनिकः स्याच्चैत्रे चैचिकी मधुः। वैशाखे माधवी राधौ ज्येष्ठे शुक्रः शुचिस्त्वयमित्यादिपरिग्रहः। तपस्यादिसमानार्थतावगतेरिति माघादीनामिति शेषः तैश्च तपस्तपस्यादिभिश्च सौराणामेव एवकारेण चान्द्रव्यवच्छेदः। तथाच अयनस्य सौरत्वात् तद्-

मुचितमिति विपरीतोऽत्र यववराहादिन्यायो युक्तः†। न च

---

घटकतपस्तपस्यादीनां सुतरां सौरत्वं माघादिशब्दानां श्रुतित एव तपस्य तपस्यश्च शैशिरा-ऽतुः मधुश्च माधवश्च वासन्तिकाऽतुः शुक्रश्च शुचिश्च वैषाऽतुः। अथैतदुदगयनं देवानां दिनम्। नभाश्च नभस्यश्च वार्षिकाऽतुः इषश्च ऊर्जश्च शारदाऽतुः। अथैतद्दक्षिणायनं देवानां रात्रिरिति श्रुतिरप्येत्यर्थः।

† बह्वनामनुरोधेनेति। विरुद्धधर्मसमवाये भूयसां सधर्मकत्वमित्यादि न्यायादिति।

विरोधी यत्र वाक्यानां प्रामाण्यं तत्र भूयसाम्।
तुल्यप्रमाणसत्त्वे तु न्याय एव प्रवर्त्तकः॥

इति वचनाच्चेति शेषः। अन्यथावर्णनं सौरपरत्ववर्णनम्। तथाच एतदुदगयनम् एतद्दक्षिणायनमित्यनेन अयनयोरुक्तत्वात् सूर्य्यगत्या अयनस्य सौरत्वस्य सिद्धत्वाच्च तद्घटकानां तपस्तपस्यादिशब्दानामेव सौरत्वेन विरुद्धधर्मसमवाये भूयसां सधर्मकत्वमिति न्यायात् भूयसामनुरोधेन मासानां सौरपरतया शक्तिसिद्धौ सत्यां सा वैशाखस्यामावास्या या रौहिणा सम्बुध्यते इति श्रुत्यन्तरस्य अन्यथानुपपत्त्या तत्रस्थरौहिणीपदस्य लक्षणया आश्विन्यादिलेनान्वयसम्भवात् वैशाखपदस्य सौरपरत्वमिति भावः। विपरीतयववराहादि-न्यायो युक्तः यववराहादिन्यायस्य व्यतिक्रमो युक्त इत्यर्थः। यच्चात्र स्मार्त्तेन दूषणमभिहितं सा वैशाखस्यामावास्या या रौहिणा सम्बुध्यते इति श्रुत्या चान्द्र औपदेशिकी शक्तिः कृता सौरे तु तपस्तपस्यादिश्रुत्या पर्य्यायद्वारा शक्तिकल्पना सा च कृतशक्तिविरोधादभवितुं नार्हति। तत्र चान्द्रे कृतशक्तिस्तु परमसिद्धैव। तथाच मधुश्च माधवश्च वासन्तिका-ऽतुरिति श्रुतौ मधुमाधवपदयोरयनघटकतया सौरपरत्वमवश्यं वाच्यम्। सा वैशाखस्या-मावास्या या रौहिणा सम्बुध्यते इति श्रुतौ रौहिणा इषघटकतया तदयुक्तामावास्यायाः सौरवैशाखे असम्भवाच्चान्द्रवैशाखपरत्वम् अवश्यं वाच्यम्। ततश्च मधुश्च माधवश्च इति श्रुतौ अयनघटकतया मधुमाधवपदस्य सौरपरत्वात् तदैकवाक्यतया सा वैशाखस्यामावास्या इति श्रुतौ वैशाखपदस्य सौरपरत्वान्यथानुपपत्त्या अन्यायश्चानेकार्थत्वमिति न्यायेन श्रुत्यैकवाक्यतया च तत्रत्यरौहिणीपदस्यागत्या लक्षणया अश्विन्यादिपरत्वस्यावश्यकत्वं कथं चान्द्रे कृतशक्तिः सङ्गच्छते।

याज्ञिनिपुरस्कारः तस्यापि नवसु सौरेषु विशेषात् माघपौषाश्विनेषु हि तत्पुरस्कारः। स चात्यन्तयोगव्यावृत्त्या वाच्यः* सोऽपि न सम्भवति। एकस्या एव हि व्यक्तेः कादाचित्कयोगेनात्यन्तायोगव्यावृत्त्या भवति विशेषणम्। यथा त्रिदण्डी परिव्राजक इति यस्यैव दण्डत्रयं स एव करस्थेनापि त्रिदण्डेन त्रिदण्डीत्युच्यते न तु परिव्राजकान्तरम्। अन्यथा परिव्राजकत्वसामान्यादेकदण्डोऽपि त्रिदण्डीत्युच्यते त्रिदण्डी चैकदण्ड इति। अत्र च कस्याश्चिच्चान्द्रव्यक्तौ नक्षत्रयोगो नास्त्येव। तेन तत्र नात्यन्तायोगव्यावृत्तिरयोगादेव। यस्याश्च योगः†

---

* पाणिनिपुरस्कारः नक्षत्रेण युक्तः कालः सास्मिन् पौर्णमासीति सूत्रद्वयानुसारेण मासचर्ययुक्तपौर्णमासीयोगः सौरशक्तौ न च सम्भवतीत्यर्थः। तदेव दर्शयति नवसु इत्यादि। तस्यापि तादृशयोगस्यापि नवसु कार्त्तिकमार्गशीर्षफाल्गुनचैत्रवैशाखज्यैष्ठाषाढ्यश्रावणभाद्रेषु नवसु सौरमासेषु अविशेषात् अविशेषेण योगप्राप्तेः माघपौषाश्विनेषु स तत्पुरस्कारः सौरेषु तेषु मासचर्ययुक्तपौर्णमासीयोगः न च सम्भवति षड्दृष्टकैनावस्थानादिति शेषः। स च योगः अत्यन्तायोगव्यावृत्त्या तदत्यन्ताभावाभावरूपयोग्यतया वाच्य इत्यर्थः।

† निषेधयति सोऽपि न सम्भवतीति। एकस्या एव व्यक्तेरिति एवकारेण भिन्नव्यक्तेर्व्यवच्छेदः कादाचित्कयोगेन यदा कदाचित् एकवारयोगेन अत्यन्तायोगव्यावृत्त्या अत्यन्तयोगाभावाभावसत्त्वेन भवति विशेषणमिति अभावविरहात्तत्त्वं वस्तुनः प्रतियोगिता इति स्मरणात् तदत्यन्ताभावाभावस्य प्रतियोगिरूपतया विशेषेण भवतीति भावः। अत्र दृष्टान्तमाह यथा त्रिदण्डी परिव्राजकः स एव करस्थेनापि त्रिदण्डेन करे दण्डत्रयधारणेन। एतेन त्रिदण्डीति यौगिक इत्युच्यते न तु परिव्राजकान्तरमिति परिव्राजकस्य त्रिदण्डीति संज्ञा न लिख्यर्थः। अन्यथा संज्ञास्वीकारे परिव्राजकत्वसामान्यात् परिव्राजकत्वधर्मवत्त्वात् एकदण्डीऽपीति अपिकारात् दण्डरहितोऽपि त्रिदण्डी उच्यते उच्यतामित्यर्थः तथाच एक-

त्वापि योगो नित्यो न कादाचित्कः। चान्द्रत्वेनैकतामादायोच्यत इति चेत् न। मासान्तरीयचान्द्राव्यक्तावपि चान्द्रत्वविशेषात्तत्पदवाच्यता स्यादिति*। वैशाखादिपदानामन्योऽन्यपर्य्यायत्वं प्रसज्येत। मेषाद्यारब्धप्रतिपदादिमासतयैकत्वेनात्यन्तायोगव्यावृत्तिरुच्यते इति चेत् तर्हि मेषादारब्धत्वमात्रे चान्द्रसौरव्यक्तीनामप्येकत्वात्। सौरेऽप्यत्यन्तायोगव्यावृत्त्या विशेषणत्वम् अप्रतिहतम्। वैशाखादिप्रयोगविषयत्वे लोकसिद्धे हि पाणिनेरनुशासनम्। अन्यथा तिथ्यन्तरारब्धेषु सावनेषु चाविशेषात्। सौराणाञ्च वैशाखादिपदप्रयोगविषयत्वं चान्द्रस्येवाविशिष्टं तममादे तदप्यविरुद्धम्। किञ्च विशाखानक्षत्रयुक्ता पूर्णिमा कदाचिदस्मिन्मासि भवतीति वैशाखपदप्रवृत्तौ पाणिनिमुरस्कारे वैशाखपदावयवोपात्तस्य विशाखायुक्तपूर्णिमायोगस्य प्रवृत्तिनिमित्तत्वात्। कथमयौगिकत्वं पदावयवोपात्तस्य हि

दण्डधारणात् एकदण्डी परिव्राजक इति। दण्डपरित्यागात् अदण्डपरिव्राजक इति शिष्टव्यवहारविरोधः स्यादिति भावः। चिदण्डी चैकदण्ड इति तथाच यद्यनयोः परिव्राजकस्य संज्ञा दण्डधारी च चिदण्डीत्युच्यतामित्यापततीति भावः। नक्षत्रयोगो नास्त्येव मासस्य नक्षत्रयोगस्यात्यन्ताभावः। तेन हेतुना अत्र अयोगादेव न अत्यन्तायोगव्यावृत्तिः न नक्षत्रयोगस्य अत्यन्ताभावाभावः। यस्माच्च चान्द्रव्यक्तौ च योगः नक्षत्रयोगः।

* चान्द्रत्वेनैकतामादायेति। ननु कस्माच्चित्रान्द्रव्यक्तौ नक्षत्रयोगाभावेऽपि चान्द्रमासान्येतत् सत्त्वात् चान्द्रत्वसामान्यधर्म्मेण अनयोरैक्यात् तादृशधर्म्मादाय नक्षत्रयोगाभावेऽपि यौगिकत्वमुच्यते इति चेन्न। मासान्तरीयचान्द्रव्यक्तौ वैशाखभिन्नज्यैष्ठरूपचान्द्रव्यक्तौ तत्पदवाच्यता वैशाखपदवाच्यता स्यात् चान्द्रत्वरूपसामान्यधर्म्मेणैक्यादिति भावः।

प्रवृत्तिनिमित्तत्वेन यौगिकत्वं सम्भवतीति त्रिदण्डीतिवत्*। यथा चैकादशाध्यायाद्यपूर्व्वपक्षे स्वर्गकामनाया अत्यन्तायोगव्यावृत्त्या विशेषणत्वेऽपि यौगिकत्वमेव स्वर्गकामपदस्य न रूढिः कल्पना-

* अन्योऽन्यपर्य्यायत्वं प्रसज्येत इति। तथाच यदि चान्द्रत्वरूपसामान्यधर्म्म एव प्रयोजकः स्यात् तदा तादृशसामान्यधर्म्मादाय वैशाखो ज्यैष्ठपर्य्यायः स्यात् ज्यैष्ठोऽपि वैशाखपर्य्यायः स्यात् एवमपरापरोऽपि अपरापरमासपर्य्यायः स्यादिति भावः। मेषाद्यारभ्य-प्रतिपदादिमासतया मेषादिस्थरव्यारभ्यमुक्तप्रतिपदादिदर्शान्तमासत्वेनैक्यमादाय अत्यन्ता-योगव्यावृत्तिः नचत्वयोगात्यन्ताभावाभावरूपयोग्यता उच्यते इत्यर्थः। तर्हि तादृशमासत्व-सामान्यधर्म्मेणैक्यमादाय अत्यन्तायोगव्यावृत्तिः तदत्यन्ताभावाभावरूपयोग्यतास्वीकारे चेत्यर्थः मेषाद्यारभ्यकालीनचन्द्रक्रियाया अव्यभिचारित्वे चान्द्रसौरव्यक्तीनामप्यैक्यात् तत्क्रिया-घटितचान्द्रसौरमासव्यक्तीनामप्यैक्यसम्भवादित्यर्थः। सौरेऽत्यन्तायोगव्यावृत्त्या अपरचान्द्र-वत् सौरेऽपि नचत्वयुक्तपौर्णमासीयोगात्यन्ताभावाभावरूपयोग्यतासत्त्वात् विशेषणत्वं मासचै-युक्तपौर्णमासीविशेषणत्वम् अप्रतिहतम् अविरुद्धं सौरमासस्येति शेषः। पाणिनेरनुशासनं मासचैयुक्तपौर्णमासीयोगानुसरणम् अन्यथा तादृशानुशासनास्वीकारे तिष्यन्तरानुरुध्येषु मुख्यवान्द्रेषु सावनेषु च गौणचान्द्रेषु च अविशेषात् विशेषाभावात् चान्द्रस्येव चान्द्रे यथा वैशाखादिपदप्रयोगः तथा सौरेऽपीत्यर्थः। अस्मिन् मासि भवतीति हेतौ वैशाखपदप्रवृत्तौ वैशाखजन्यशक्तिप्रतिपादितमुख्यार्थबोधे पाणिनिसूत्रसाधितवैशाखपदस्यावयवोपात्तस्य एक-देशीभूतस्य तत्पुरस्कारस्य पाणिनिमासपदविशेषणत्वेन गृहीतस्य प्रवृत्तिनिमित्तत्वस्याभावात् अनियततया शक्यतावच्छेदकत्वस्याभावादित्यर्थः। कथं यौगिकत्वं मासस्येति शेषः तथाच अतिप्रसक्त्यादनापादकनियतत्वधर्म्मिणि अवच्छेदकत्वस्वीकारात् कादाचित्कत्वेनानियततया प्रवृत्तिनिमित्तत्वाभावात् न मासस्य यौगिकत्वसम्भव इति भावः। पदावयवोपात्तस्य एक-देशीभूतस्य नियतविशेषणत्वेन गृहीतस्य प्रवृत्तिनिमित्तत्वेन शक्यतावच्छेदकधर्म्मवत्त्वेन यौगि-कत्वं भवति सिध्यतीति भावः।

गौरवात्*। अथ व्यक्त्यन्तरयोगं विनापि रथमकुर्व्वति रथकार-

---

* यौगिकपदस्य चिदख्यातिवदृष्टान्तमभिधाय पुनर्दृष्टान्तयति यथाच यथावेत्यर्थः। एकादशाध्यायाद्यपूर्व्वपक्षे जैमिनिन्यायन्यायेनैकादशाध्यायस्य प्रथमपादस्यपूर्व्वपक्षे स्वर्गकामनाया अत्यन्तायोगव्यावृत्त्या अत्यन्तायोगस्य अत्यन्ताभावस्य व्यावृत्त्या अभावेन योगात्यन्ताभावाभावरूपयोगेन स्वर्गकामनाया विशेषणत्वेऽपि पुरुषविशेषणत्वेऽपि। तथाच दर्शपौर्णमासाभ्यां स्वर्गकामः पुरुषो यजेत इति विधौ पुरुषविशेषणस्य स्वर्गकामपदस्य यौगिकत्वमेव न रूढिः न रूढिशक्तिः। मीमांसकमते शक्तेरतिरिक्तपदार्थतया कल्पनागौरवमेव भवतीति भावः।

तथाच मीमांसादर्शनस्य एकादशाध्यायस्याद्याधिकरणं यथा—

दर्शपूर्णमासयोः प्रधानानि आग्नेयादीनि. तेषां स्वर्गः फलं श्रूयते,—'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति। स किं तेषां तन्त्रेण भवति, उत मिथेन? इति। एवं चातुर्म्मास्यादिष्वपि द्रष्टव्यम्।

'ननु च नैवाच स्वर्गः फलं श्रूयते,—स्वर्गकामपदेन तावत् पुरुषोऽभिधीयते, यजेतेत्यनेनापि यागनिर्वृत्तिः, तयोर्वाक्येन सम्बन्धः, केनेदानीं फलमुच्यते?' अनेनैव स्वर्गकामपदेनेत्याह। 'ननु पुरुषस्य अयं वक्ता'। न खलु कश्चित् पुरुषः स्वर्गकामो नामास्ति। 'ननु च यस्य स्वर्गे कामः स स्वर्गकाम इति'। एतदेव न जानीमः कस्य स्वर्गे काम इति, य एव हि स्वर्गकामः स एवास्वर्गकामो भवति इति। 'एवं तर्हि कालोपदेशोऽयं भवति.—यदा स्वर्गकामस्तदा यजेत इति'। अत्रापि न कश्चित् कालविशेषोऽस्ति, यस्मिन्नियमेन स्वर्गकामः स्यात्. सर्व्वेषु कालेषु सर्व्वे कामा अनियमेन उत्पद्यन्ते। तत्र न कश्चित् कालविशेषोऽनेन शक्यते व्यपदेष्टुम्। 'एवं तर्हि नैवायं पुरुषोपदेशो नापि कालोपदेशः, किं खलु. फलकामो निमित्तं, स्वर्गविषये कामे उत्पन्ने यजेत इति, यथा कपालानि नष्टे यजेत इति'। अस्य पक्षस्य सूत्रेणैव परिहार उक्तः,—"फलकामो निमित्तमिति चेत्" (६।२।६)। "न नित्यत्वात्" (६।२।१०) इति। नित्यानि अग्निहोत्रादीनि कर्म्माणि, तानि यदि निमित्ते विधीयन्ते, नित्यलमेषां विहन्येत। तत्र

पदस्येव दर्शनादयौगिकत्वम्*। तदाह पाणिनिः "योगप्रमाणे

नित्यचोदना यावज्जीविकाद्या अपरुध्यन्ते, लिङ्गानि च 'अप वा एष स्वर्गाल्लोकात् च्यवते यो दर्शपूर्णमासयाजी सन् पौर्णमासीम् अमावास्यां वाऽतिपातयेत्' इत्येवमादीनि।

परिशेषात् फलसंयोग एवायम्। 'कथं पुनरनेन शक्यते फलं विधातुम्?' तदुच्यते, 'स्वर्गकामो यजेत' इति। यदि वा स्वर्गकामी यागायोपदिश्यते यथा 'लोहितोष्णीषाः'; यदि वा यागः स्वर्गकामाय, यथा मलिनः स्नायात्, बुभुक्षितोऽश्नीयात् इति। तच्च यदि स्वर्गकामः कर्मणे उपदिश्यते, उपदिष्टोऽपि न प्रवर्तेत, को हि परार्थं प्रयासमातिष्ठेत्? तथा कर्मचोदनाऽनर्थिकैव भवति, अथ यागः स्वर्गकामार्थः, ततोऽसौ पुरुषस्योपकरोति, तं पुरुषः स्वार्थेन करोति इति; तथा कर्मचोदना अर्थवती भवति। अपिच यागविधौ शुत्यर्थः परिगृहीतो भविष्यति, स्वर्गकामविधौ वाक्यार्थः। तस्माद्यागः स्वर्गकामस्योपकारकः। स्वर्गकामस्य अनेकपुत्रपशुग्रामान्नाद्यादिलाभकरः, स यदि पुत्रान्नाद्यादीनामन्यतमं करोति, ततः स्वर्गकामशब्दोऽविवक्षितार्थः पुरुषमात्रवचनो भवति; तथाच आनर्थक्यमेव, अन्तरेणापि हि तद्वचनं पुरुषमात्रमाख्यातादेव गम्यते। तस्माद्यागात् स्वर्गी भवति। तत्रानेककर्मसन्निपाते दर्शपूर्णमासादिषु भवति संशयः,—किं तत्रभवेषां फलम्, उत भेदेन? इति। किं प्राप्तम्?—भेदेन इति। किं कारणम्? इमानि आग्नेयादीनि प्रधानानि परस्परानपेक्षाभिश्चोदनाभिः पृथग्भूतानि उत्पन्नानि पृथगेव फलमाकाङ्क्षन्ति। तत्सन्निधौ स्वर्गादिफलं श्रूयमाणं भेदेनाकाङ्क्षितत्वाद्भेदेनैव सम्बध्यते। तस्मात् प्रति प्रधानं फलभेद इत्येवं प्राप्तम्।

* सर्वेषां व्यक्तौ योगाभावेऽपि यस्यां कस्यांचिद्व्यक्तौ योगेऽपि यौगिकत्वं मासस्य स्यादित्याशङ्क्य निराकुरुते अथेत्यादि। व्यक्त्यन्तरयोगात् विनापीति अन्या व्यक्तिः व्यक्त्यन्तरम् अत्र योगं विना। तदयोगोऽस्ति मासचैत्रयुक्तपौर्णमासीयोगोऽस्ति इति हेतौ तत्पुरस्कारः सास्मिन् पौर्णमासीति पाणिनिसूत्रेण यौगिकत्वसिद्धिः। मेषस्यसूर्यावयवायां मेषस्थरव्यारब्धायामित्यर्थः। तत्समानजातीयतया चान्द्रमासारब्धकाले सौरमासस्याप्यारब्धतया अत्यन्तायोगव्यावृत्त्या तादृशपौर्णमासीयोगात्यन्ताभावस्याभावेन विशेषणले मासचै-

च तदभावेऽदर्शनं स्यात्"। यौगिकस्य योगाभावे अप्रयोगः स्यात् इत्यर्थः। न चाप्रयोग इति न यौगिकत्वं तन्न अतएव रथकरणस्येव नात्यन्तायोगव्यावृत्त्या विशेषणत्वमपीति कथं पाणिनिपुरस्कारः। कस्याश्चिच्चान्द्रव्यक्तौ तद्योगो नास्तीति तत्पुरस्कार इति चेन्न मेषस्थसूर्य्यारब्धायां कस्याश्चिच्चान्द्रव्यक्तौ योगदर्शनादेवं सौरस्यापि मेषस्थादित्यारब्धत्वेन समानजातीयतयात्यन्तायोगव्यावृत्त्या विशेषणत्वेन पाणिनिपुरस्कारविरोधात्। अतएव दीक्षितेन तत्पुरस्कारमभिधायापि तदपरितोषेण कारणान्तरमेवोक्तम्। अथ सन्देहस्तथापि वाचसन्देहे यववराहादिश्रुतितो नेष्यते (१) "सा वैशाखस्यामावास्या या रोहिणा सम्पद्यत" इत्यन्तं तदपि च दूषितम् उभयोरपि श्रौतत्वात्* विपरीतो वा यावद्विशेषः। वैशाखादयो द्वादशैव

(१) श्रुतितोपमेष्यते इति क्वचिदादर्शे पाठः।

युक्तपौर्णमासीयोगस्य सौरमासविशेषणत्वे इत्यर्थः। रथकारपदस्येव रथम् अकुर्वति रथकारपदस्य यथा न यौगिकत्वम्।

* सूत्रार्थं स्वयं व्याकरोति यौगिकस्येत्यादि। न चाच नञ्च इति हेतौ यत एव योगाभावे न यौगिकत्वं रथकरणस्येव रथकारस्येव अत्यन्तायोगाभावेनापि न विशेषणत्वमित्यर्थः इति हेतौ। यत एव न पाणिनिपुरस्कारः अतएवेत्यर्थः। यववराहवच्छ्रुतितो नेष्यते इति। यवे वराहे च यथा वाचसन्देहो नास्ति, तद्वदापि श्रुतितो वाचसन्देहो न इष्यते। श्रुतिं दर्शयति सा वैशाखस्यामावास्या इत्यादीति। उभयोरपि श्रौतत्वात् चान्द्रसौरयोरुभयोरपि वाचतायाः श्रुतिप्रतिपादितत्वादित्यर्थः। एतदपि दूषितमित्यन्वेति।

मासाः सौराः श्रौताः। चान्द्रस्तु वैशाख एव परं श्रौतः। तदेवं भूयसामनुरोधेन सौरवचनत्वमवधार्यते। पाणिनेस्तु प्रकृतिप्रत्ययविभागकरणं स्वरमात्रप्रयोजनकम्।

तदाह वार्त्तिककारपादाः।

"यदार्थस्य (१) विसंवादः प्रत्यक्षेणोपलभ्यते।
स्वरसंस्कारमात्रार्था तत्र स्यात्पाणिनिस्मृतिः॥" *

किञ्च मेषादित्योपक्रान्तत्वोपाधिना चान्द्रवैशाखो वाच्यः। मेषादित्यकाल एव सौरो वैशाखः। तेन सौरावगमसापेक्षा†

---

(१) यत्रार्थस्येति क्वचिदादर्शे पाठः।

* उभयत्र श्रुत्या मासपदवाच्यमभिधाय विशेषमभिदधाति विपरीतो वा इति। तावद्विशेष इति उच्यते इति शेषः। विशेषं दर्शयति भूयसामनुरोधेनेति। विरुद्धधर्म्मसमवाये भूयसां सधर्म्मकत्वमिति न्यायादिति शेषः। सौरवचनत्वं सौरशक्तिः मासपदस्येति शेषः। प्रकृतिप्रत्ययविभागकरणं साग्निन् पौर्णमासीति संज्ञायामित्यादिसूत्रेणेति शेषः। स्वरमात्रप्रयोजनं स्वरसंस्कारमात्रप्रयोजनं स्वरस्य यः संस्कारविशेषः उदात्तानुदात्तमेदेनोच्चारणं तन्मात्रप्रयोजनं न तु वाच्यत्वनिर्णयप्रयोजनम्। अर्थस्य तद्धितार्थस्य विसंवादः बाधित्वं प्रत्यक्षेण प्रत्यक्षादिप्रमाणेन आदिना शास्त्रपरिग्रहः। तेन क्वत्तिकादियोगव्यभिचारस्य शास्त्रगम्यत्वेऽपि तत्संग्रहः। स्वरस्य उदात्तादेः क्वचित् संस्कारस्य पदसाधुतायाः सिद्ध्यर्थं ज्ञानार्थम्। अत्र तद्धितार्थे पाणिनिस्मृतिः पाणिनिना विहितप्रत्ययाः।

† सौरशक्तौ लाघवं दर्शयति किञ्चेति। मेषादित्योपक्रान्तोपाधिना मेषस्थरव्यारभ्यशुक्लप्रतिपदादिदर्शान्तत्वधर्म्मेण। मेषादित्यकालः मेषस्थरविकाल एव। सौरावगमसापेक्षा सौरज्ञानसापेक्षा। नाग्नीतविशेषणवद्विर्विशेषे चोपजायते इति न्यायादिति

चान्द्रावगतिर्जघन्या सौरात्। तत्र तर्हि मेषादिरप्यसूर्योपक्रान्तत्वमेव। सौरचान्द्रयोरेकवैशाखादिप्रवृत्तेर्निमित्तमस्तु उभयत्र च मुख्यमिति*। नैतत् शुक्लप्रतिपदितरतिथ्यारम्भेषु दर्शेतरान्तेषु सावने च त्रिंशदहोरात्रकेऽतिप्रसङ्गात्। न च तेभ्यो व्यावृत्तं सौरदर्शान्तचान्द्रमासाभिधाने शक्तिभेदापत्तेः (१) सौरवचनत्वमेव†। तेन मेषभोगो यावत्कालं स वैशाखः वृषादिभोगावच्छेदे च ज्यैष्ठादयः सौराः। तत्रैकस्मिन् वत्सरे राशिभोग-

---

(१) तेभ्यो व्यावृत्तं सौरदर्शान्तचान्द्रमासानुमतं किञ्चिदुपसुपलभामहे। तस्मादुभयाभिधाने शक्तिभेदापत्तेरिति आदर्शद्वये पाठः।

---

* चान्द्रावगतिरिति। तथाच प्रथमोपस्थितत्वात् सौर एव मुख्यश्चैत्रादिशब्दवाच्य इत्यर्थः। ननु तर्हि सौरे शक्तिस्वीकारेऽपि मेषादित्वे मेषस्थरवौ सौरवैशाखेऽपि चान्द्रस्य उपक्रान्तत्वम् आरब्धत्वमेव सौरचान्द्रयोरिति वृत्तिवं समन्वयः वैशाखादिप्रवृत्तेः वैशाखादिपदशक्तेरेकं निमित्तं कारणमस्तु। उभयत्र मुख्यत्वमिति तथाच उभयत्र सौरे चान्द्रे च मासपदं मुख्यमिति भावः।

† दूषयति नैतदिति। शुक्लप्रतिपदितरतिथ्यारम्भेषु दर्शेतरान्तेषु तथाच यदि सूर्येणारब्धत्वमेकं निमित्तं स्यात् शुक्लप्रतिपदितरतिथ्यारम्भेषु दर्शेतरान्तेषु प्रतिपदन्तेषु यत्किञ्चित् त्रिंशत्तिथ्यात्मकतिथिचान्द्रेषु इत्यर्थः। एवं त्रिंशदहोरात्रात्मकसौरसावनेषु च अतिप्रसङ्गादतिव्याप्तेरित्यर्थः यथाश्रुतन्तु न सङ्गच्छते। वैशाखादिप्रवृत्तेरित्युक्तेः तादृशमासयोर्वैशाखादिसंज्ञाविरहादतिप्रसङ्गाप्रसक्तेः। वस्तुतस्तु शुक्लप्रतिपदितरतिथ्यारम्भेषु कृष्णप्रतिपत्तिथ्यारम्भेषु दर्शेतरान्तेषु पौर्णमास्यन्तेषु गौणचान्द्रवैशाखादिषु अतिप्रसक्तेरित्यर्थः। चकारानवस्थायां पूर्वोक्तदोषमावं साधीयः। तेभ्यो व्यावृत्तं गौणचान्द्रादिभ्यो व्यावृत्तं सौरदर्शान्तचान्द्रमासानुमतमिति न च नहीत्यर्थः। शक्तिभेदापत्तेः नानाशक्तिकल्पनापत्तेः सौरवचनत्वमेवेति तथाच वैशाखादिपदं सौरमासशक्तमिति भावः।

स्याद्वृत्त्यभावात् नाधिमासोऽत्रानुगतं किञ्चिद्रूपमुपलभामहे। तस्मात् उभयविधाने न मलिम्लुचो न च हिराषाढ़ादिकं चान्द्रस्तु गौणः। तथापि संक्रान्तिचिह्निते हिराषाढ़ादिकव्यास्ति*। यथा ब्रह्मगुप्तः। मेषगरविसंक्रान्तिः शशिमासे भवति यत्र स चैत्रः (१)। एवं वैशाखाद्या वृषादिसंक्रान्तियोगेन न ह्येकस्मिन् वत्सरे मेषादिसंक्रान्तिराद्वृत्ता भवति। तेनात्रापि न मासाद्वृत्तिः। अतोऽस्मिन् वचने मेषगरविसंक्रान्त्यादिपदानि मीनाद्युपक्रान्तलक्षणानि। मीनाद्युपक्रान्तेष्वेव चान्द्रेषु मेषादिसंक्रान्तेर्नियतत्वात्। अतएवोपक्रान्तलक्षणायामुपक्रान्तत्वस्य गौण-वैशाखादिपदप्रवृत्ताविदं प्रमाणम्। यथा—

"एकसंज्ञौ यदा मासौ स्यातां संवत्सरे क्वचित्।
तत्राद्ये पितृकार्य्याणि देवकार्य्याणि चोत्तरे॥"†

---

(१) तच्चैवम् इति क्वचिदादर्शे पाठः।

---

* उपसंहरति तेनेति। मेषभोगी यावत्कालं यावत्कालमेव मेषभोगी भवति स वैशाखः। तथाच मेषस्थरविभोगकाली वैशाख इत्यर्थः। राशिभोगस्य एकराशिभोगस्य आवृत्त्यभावात् वारद्वयासम्भवात्। नाधिमासः न मलिम्लुचः सौरमास इति शेषः। न च हिराषाढ़ादिकमिति। तथाच सौरमासस्य हिराषाढ़ादित्वं न सम्भवतीति भावः। तदा कोऽधिमास इत्यत आह चान्द्रस्तु गौणः तथाच गौणस्तु चान्द्रः अधिको मासः कदाचिद्भवितुमर्हतीति भावः। संक्रान्तिचिह्निते सौरे मासि संक्रान्त्या सौर उच्यते इति स्मरणात्।

† प्राचीनब्रह्मगुप्तमासलक्षणं दर्शयति तथा ब्रह्मगुप्त इति। मेषग इत्यादि। यत्र शशिमासे सूक्ष्मचान्द्रे मासि मेषगरविसंक्रान्तिः मीनतो मेषराशौ रविसञ्चारी भवति स

चैत्रनामा मुख्यचान्द्रमासो भवतीत्यर्थः। एवं यत्र यत्र मुख्यचान्द्रमासि वृषादिराशौ रविसञ्चारी भवति स चान्द्रवैशाखादिर्भवति। नहीति आवृत्त्या पौनःपुन्येन एकस्मिन् मेषादिमीनपर्य्यन्तसौरसंवत्सरे मेषादिसंक्रान्तिर्नहि भवति। तथाच रवेर्वक्रातिचारा-भावात् मेषादिमीनपर्य्यन्तेषु द्वादशराशिषु यथाक्रममेव सञ्चारी भवति न त्वेकस्मिन् संवत्सरे पुनः पुनर्मेषादिसंक्रान्तिर्भवितुमर्हतीति भावः। तेन अत्र न सौरमासाद्वृत्तिः नैकसंज्ञकमासद्वयम्। अस्मिन् वचने ब्रह्मगुप्तलक्षणे मेषगरविसंक्रान्त्यादिपदानि मेषगत-रविसंक्रान्तिः आदिर्येषां तानि पदानि मीनाद्युपक्रान्तलक्षणानि मीनादिस्थरव्यारब्ध-लक्षणानि शशिमासपदानीत्यर्थः मीनाद्युपक्रान्तेषु मीनादिस्थरव्यारब्धेष्वित्यर्थः। अत एव मीनाद्युपक्रान्तादौ नियतत्वम् अतएवेत्यर्थः। उपक्रान्तलक्षणायां मेषादिराशिस्थरव्या-रब्धत्वेन शशिमासलक्षणायामित्यर्थः। उपक्रान्तत्वस्य मेषादिस्थरव्यारब्धत्वरूपधर्म्मस्य गौणवैशाखादिपदप्रवृत्तौ गौणवैशाखादिपदजन्यबोधविषयतावच्छेदकत्वे च इदं ब्रह्मगुप्त-लक्षणं प्रमाणम्। तथाच शशिमासानियततया नियतरूपेण मेषादिरविसंक्रान्तेरसम्भ-वात् मीनादिस्थरव्यारब्धत्वेन शशिमासो विशेषणीयः। ततश्च नागृहीतविशेषणा बुद्धि-र्विशेष्ये चोपजायते इति न्यायात् मीनादिराशिस्थरविकालस्योपस्थितौ तत्र शक्यताव-च्छेदकत्वकल्पनालाघवेन चैत्रादिपदस्य शक्यत्वसिद्धौ मीनादिस्थरव्यारब्धत्वस्य गुरुधर्म्मतया तत्र शक्यतावच्छेदकत्वकल्पनाया अन्याय्यत्वात् सुतरां लक्ष्यतावच्छेदकत्वकल्पनं समुचित-मिति भावः। एकसंज्ञौ एकनामानौ मासौ मलमासशुद्धमासौ क्वचित् माधवादिषट्कमध्ये तत्र तयोराद्यमासे मलमासात् पूर्व्वमासे न तु एकसंज्ञमासयोः प्रथममासे मल-मासरूपे पितृकार्य्याणीति कृष्णपक्षकार्य्यमात्रपरं देवकार्य्याणीति शुक्लपक्षकार्य्यपरम्। तथाच मलमासाश्रितं कर्म्म कृष्णपक्षोदितञ्च यत्। तत् कर्त्तव्यं पूर्व्वमासे शुक्लपक्षोदितं परे॥ अथवा पितृकार्य्यपदं प्रेतकार्य्यपरम्। तथाच निर्मसे मलिनं मासं प्रेतानान्तु हिताय वै इति वचनं पूर्व्वमासपरं यथाश्रुतमलमासरूपपूर्व्वमासपरम्। हैमाद्रिस्तु षष्टिभिर्दिवसैर्मासः कथितो बादरायणैः। दैवकार्य्याणि पूर्व्वेऽस्मिन् पितृकार्य्याणि चोभयोरिति वचनमधिकं लिखित्वा एवमादीनि मलमासे दैवकार्य्यपितृकार्य्यप्रतिपादकानि वचनानि आवश्यकदैवकार्य्यपितृकार्य्यविषयाणि द्रष्टव्यानीति व्याख्यातवान।

तथा ज्योतिःशास्त्रम्। "द्विराषाढ़े द्विरावणम्" इति। संक्रान्तेरनाद्दत्ततया मासद्वयस्यैकनामतानुपपत्तेरेकराशिस्थे तु सूर्ये ऽधिमासे प्रतिपदादिदर्शान्तस्य मासद्वयस्योपक्रान्ततया भवति समाननामत्वम्। तन्निर्देशार्थमेव संक्रान्तिपदं भूयसामनुरोधेन वा मुख्यार्थमेव ब्रह्मगुप्तवचनं वर्णयिष्यामः। मेषाद्युपक्रान्तत्वं चान्द्रे गौणत्वं चान्द्रे गौणवैशाखादिपदप्रवृत्तौ निमित्तं वाच्यं तद्विना निमित्तान्तरादधिमासयोरेकनामत्वानुपपत्तेः। अत एवाधिमासस्य परभूतमासेन सह षष्टिदिनैनैकमासत्वमेकचोपक्रान्तत्वसाम्यात् न तु पूर्वेण*। संक्रान्तेस्तु निमित्तत्वे मलमासस्य संक्रान्तिशून्यत्वात् पूर्वापरयोश्च तद्योगात् न क्वचि-

* द्विराषाढ़े मलमासे। सङ्क्रान्तेः एकनामकसङ्क्रान्तेः अनाद्दत्ततया पुनःप्राप्त्यभावेन। मासद्वयस्य सौरमासद्वयस्य। प्रतिपदादिदर्शान्तस्य मुख्यचान्द्रस्य। समाननामत्वमिति। तथाच मलमासे चान्द्रमासस्य सङ्क्रान्तिशून्यत्वात् यत्र कृष्णचतुर्दश्यां मेषसङ्क्रान्तिः तत्परतः शुक्लप्रतिपदि च वृषसङ्क्रान्तिः तत्र प्रथमचान्द्रमासस्य स्वाव्यवहितमेषस्यारभ्यारब्धतया वैशाखत्वम्। एवं प्रतिपदि वृषसङ्क्रान्तेः तदादिदर्शान्तकपचान्द्रमासस्यापि मेषस्यारभ्यारब्धतया च वैशाखत्वं सुतरां समाननामत्वसिद्धिरिति भावः। मेषाद्युपक्रान्तत्वं मेषस्यारभ्यारब्धत्वम्। गौणवैशाखादिपदप्रवृत्तौ गौणवैशाखादिपदप्रयोगे। तद्विना मेषाद्युपक्रान्तत्वस्य निमित्तत्वास्वीकारे। अधिमासयोः मलमासशुद्धमासकपैकनामकचान्द्रमासद्वयस्य। अतएव चान्द्रमासयोरेकनामत्वादेव। षष्टिदिनैन षष्टितिथिभिरित्यर्थः। एकमासत्वमिति। तथाच षष्ट्यादिदिवसैर्मासः कथितो बादरायणैरिति। एकचोपक्रान्तत्वसाम्यात् एकराशिस्थरव्यारब्धत्वेन उभयोरेवाभिन्नलक्षणाक्रान्तत्वात्। न तु पूर्वेण मलमासात् पूर्वमासमादाय तेन सह षष्टिदिनैनैकमासत्वम्।

दृश्यत्र विशेत्। उभयत्र वा प्रविशेदविशेषात्*। यद्यपि प्रतिपदितरतिथ्यारब्धानां† दर्शेतरतिथिसमाप्यानामपि शशिमासेनोपादानं भवति, तथापि—

"दर्शाद्दर्शश्चान्द्रखिंशद्दिवसस्तु सावनो मासः।
रविसंक्रान्तिषु चिह्नः सौरोऽपि निगद्यते॥"

परतिथ्यन्तरारब्धपूर्वतिथिसमापनीयमात्रस्य चान्द्रत्वात् त्रिंशत्तिथिकश्चान्द्र इति वक्तव्ये यद्दर्शद्वयाक्रान्तक्रोडीकृतमात्रस्य कीर्त्तनं तद्वैशाखादिपदानां तथाविधमासनामत्वज्ञापनार्थं तस्यानन्यप्रयोजनत्वात् शशिमासग्रहणे वैशाखादिषष्ठमासेषु

---

* सौरमासस्य मलमासत्वं खण्डयति। सङ्क्रान्तेस्तु निमित्तत्वे सौरमासनिमित्तत्वे आदित्यराशिभोगेन सौरो मासः प्रकीर्त्तित इति वचनेनादित्यैकराशिभोगावच्छिन्नकालस्य सौरमासत्वात् मलमासस्य सङ्क्रान्तिशून्यत्वात्।

अमावास्याद्वयं यत्र रविसङ्क्रान्तिवर्जितम्।
मलमासः स विज्ञेयो विष्णुः स्वपिति कर्कटे॥

इत्यादिवचनात् पूर्वापरयोश्च तद्योगात् शुद्धाशुद्धमासयोः सङ्क्रान्तियोगात् अत्र सौरमासे, न विशेत् सौरमासस्य मलमासत्वं न भवेत् इत्यर्थः। यदि स्वीक्रियते तदा अविशेषात् उभयत्र शुद्धाशुद्धयोः उभयोरपि मलमासत्वं भवेत्।

† ननु चान्द्रमासस्य मलमासत्वे—

एका तिथिः कापि तदादिभूता तिथिस्तृतीयेऽपि तिथिप्रबन्धः।
मासः स चान्द्रस्तिथिनामि यः स्यात् चान्द्रीं कलां प्राप्य सदा प्रवृत्तः॥

इति वचनेन तिथिचान्द्रस्यापि चान्द्रनामत्वकथनात् तस्यापि मलमासत्वं स्यादित्याशङ्क्यते यद्यपि प्रतिपदितरतिथ्यारब्धानामित्यादि। द्वितीयाद्यादिप्रतिपदाद्यन्तानां तिथिचान्द्रमासानामित्यर्थः।

प्रतिवत्सरं षड़धिमासा भवेयुः*। तथाहि द्वितीयायां मेष-संक्रान्तौ तदनन्तरितृतीयारभ्यस्य द्वितीयान्तस्य तृतीयाया-श्चतुर्थ्यां वा वृषसंक्रान्तौ मलमासत्वं स्यात् संक्रान्तिशून्यत्वात्। ततः पञ्चम्यामुपक्रम्य चतुर्थ्यन्तस्य सप्तमीषष्ठ्योरन्यत्र मिथुन-संक्रान्तौ मलमासत्वमिति। मेषाद्युपक्रान्तेषु प्रतिपदुपक्रम-दर्शान्तेषु चान्द्रेषु गौणा इति सिद्धम्।

अतएव ब्रह्माण्डपुराणम्।

"क्षणा मुहूर्त्ताः† दिवसा निशाः पक्षाश्च कृत्स्नशः।
मासाः संवत्सराश्चैव ऋतवोऽथ युगानि च।
तदादित्यादृते सर्व्वा कालसंख्या न विद्यते॥"

* इदानीं तिथिचान्द्रस्य मलमासत्वं खण्डयति तथापीत्यादि। दर्शादिर्दर्शान्तश्चान्द्र इति दर्शादनन्तरं शुक्लप्रतिपदमारभ्य दर्शान्तश्चान्द्र इत्यर्थः।

अतएव विष्णुधर्म्मोत्तरे।

चन्द्रमाः कृष्णपक्षान्ते सूर्य्येण सह युज्यते।
सन्निकर्षादथारभ्य सन्निकर्षमथापरम्।
चन्द्रार्कयोर्युधैर्मासश्चान्द्र इत्यभिधीयते॥

त्रिंशद्दिवसस्तु इति। अत्र दिवसपदं तिथिपरं सौरदिनपरमपि तेन सौरसावन-श्चान्द्रसावनश्च लभ्यते। रविसंक्रान्तिचिह्नः आदित्यैकराशिभोगावच्छिन्नः कालः सौरमासः। परतिथ्यन्तरारब्धपूर्व्वतिथिसमापनीयमासस्य द्वितीयाद्यारब्धप्रतिपदाद्यन्तमासमासश्चेत्यर्थः। दर्शादयान्तक्रीड़ीकृतमासस्य शुक्लप्रतिपदादिदर्शान्तमासस्य। षड़धिमासा भवेयुः मलमास-षट्कं भवेदित्यर्थः।

† तदेव दर्शयति तथाहीति। द्वितीयायां मेषसङ्क्रान्तौ तदनन्तरितृतीयारभ्यस्य

तथा ब्रह्मगुप्तः ।

"चैत्रसितादेरुदयाद्भानोर्दिनमासा वर्षयुगकल्पाः ।
सृष्ट्यादौ लङ्कायां समं प्रवृत्ता दिनेऽर्कस्य ॥"

सन्तु वा चान्द्रेष्वपि वैशाखादयो मुख्याः तथाहि साक्षात् वैशाखपदस्य श्रुतावेव चान्द्रे प्रयोगदर्शनम् किन्त्वेकं तत्। माघादिपदानाञ्च बह्वनामेव श्रुतौ सौरार्थत्वं प्रतीयते किन्तु पर्य्यायमुखेन न साक्षात्। तेनैकं साक्षात्तेन बलवदपरञ्च भूयस्त्वेन। तथैकमल्पत्वाच्च दुर्ब्बलम् अन्यच्च व्यवधानादिति। द्वयोरपि

द्वितीयान्तस्य। तथाच यत्र शुक्लद्वितीयायां मेषसङ्क्रान्तिः वृषसङ्क्रान्तिस्तु शुक्लप्रतिपदि तत्र तदुत्तरारब्धशुक्लद्वितीयादि-शुक्लद्वितीयान्तचिंशत्तिथिप्रचयरूपस्य कस्यचित् तिथि-चान्द्रमासस्य मध्ये रविसङ्क्रान्त्यभावात् स मासो मलमासो भवितुमर्हति। एवं यत्र शुक्लचतुर्थ्यां मिथुनसङ्क्रान्तिः कर्कटसङ्क्रान्तिस्तु तदुत्तरशुक्लद्वितीयायां चतुर्थ्यां वा तत्र तदुत्तरशुक्लपञ्चम्यादि-शुक्लचतुर्थ्यन्तचिंशत्तिथिप्रचयरूपस्य कस्यचित् तिथि-चान्द्रमासस्य रविसङ्क्रान्तिशून्यत्वात् मलमासत्वापत्तिरपि भवितुमर्हति। एवंरीत्या सप्तम्यादि षष्ठ्यन्तमासस्य दशम्यादि-नवम्यन्तमासस्य द्वादश्यादि-एकादश्यन्तमासस्य पौर्णमास्यादि-चतुर्दश्यन्तमासस्यापि मलमासत्वं भवितुमर्हति इत्येवम् षट्तिथिचान्द्रमासाः अधिमासाः भवेयुः इति वर्षुलार्थः। मेषाद्युपक्रान्तेषु प्रतिपदुपक्रमदर्शान्तेषु मेषस्यारब्धप्रतिपदादिदर्शान्तेषु। गौणाः वैशाखादयः मासा इति शेषः। यतएव वैशाखादयः सौरे मुख्या चान्द्रे गौणा अतएवेत्यर्थः। त्रुटा इति चिंशत्कलारूपा। मुहूर्त्ताः दिवसस्य पञ्चदशभागाः।

तथाचामरः।

"अष्टादशनिमेषास्तु काष्ठाः त्रिंशत्तु ताः कलाः।
तासु त्रिंशत् त्रुटयस्ते तु मुहूर्त्तो द्वादशास्त्रियाम् ॥"

तुल्यत्वावधारणेन विनिगमनाप्रमाणाभावात् उभयत्र शक्तिरत्वादिपदानामिव विनिगमनाप्रमाणाभावात् अनेकशक्तिस्वीकारः तदस्तु तावदेकान्ततश्चान्द्रवचनत्वं न निह्नोपनीयम् । सौरवचनत्वं तावत्सिद्धं चान्द्रस्य तु मुख्यार्थत्वेऽपीप्सितपूर्वकमीप्सितप्रतीतिवत्* । सौरमेषादिभोगावगमपूर्वकत्वाच्चान्द्रवैशाखाद्यवगमस्य जघन्यतया सर्व्वत्र माघादिपदेभ्यः सौराणामेव शीघ्रावगमः ।

अतएव च ।

"माघे मासि चतुर्थ्यान्तु वरमाराध्य च श्रियम् ।
पञ्चम्यां कुन्दकुसुमैः पूजा कार्य्या समृद्धये ॥" पुराणस्य ।

तथा भविष्ये ।

"माघे मासि तृतीयायां गुड़स्य लवणस्य च ।
दानं श्रेयस्करं राजन् स्त्रीणाञ्च पुरुषस्य च ॥"

मत्स्यपुराणे ।

"यस्मान्मन्वन्तरस्यादौ रथानापुर्दिवाकराः ।
माघमासस्य सप्तम्यां तस्मात्स्यात् रथसप्तमी ॥"

---

* आदित्याहते सूर्य्यसम्बन्धं विना । चैत्रसितादेः चैत्रशुक्लप्रतिपदः । भानोरुदयात् सूर्य्योदयमारभ्य लङ्कायां गणनायाम् । भानोरुदयात् अर्कस्य दिने इत्युपादानात् दिनमासवत्सरादीनां सौरत्वमिति ग्रन्थकर्त्तुराशयः । श्रुतावेव सा वैशाखस्यामावास्या इत्यादिश्रुतावेव । श्रुतौ तपश्च तपस्यश्च शैशिराद्यृतुरित्यादिश्रुतौ । एकं चान्द्रार्थत्वं साक्षात्तेन श्रुतौ साक्षात् वैशाखपदनिर्द्देशेन । अपरं सौरार्थत्वन्तु भूयस्त्वेन नानाश्रुतौ पर्य्यायद्वारा माघादीनां निर्द्देशेन बलवदिति अनुसन्धेनाशयः । व्यवधानादिति दुर्ब्बलमिति

तथा स्मृतिसमुच्चये ।

"सूर्य्यग्रहणतुल्या हि शुक्ला माघस्य सप्तमी ।
अरुणोदयवेलायां तत्र स्नानं महाफलम् ॥
माघे मासि सिते पक्षे सप्तमी कोटिभास्करा ।
तस्यां स्नानार्घ्यदानाभ्यामायुरारोग्यसम्पदः ॥"

इत्यादिवचनविहितवरचतुर्थीश्रीपञ्चमी*माघीसप्तमीनां मकरस्थ-सूर्य्य एव नित्यं निर्व्विवादः परिग्रहः । चान्द्रमाघवचनत्वे तु कथमनुत्कर्षः । तुल्यवदुभयवचनत्वे वा सौरपरिग्रहे किं प्रमाणम् । अतएव दीक्षितेन नायमर्थो विसृष्टः कष्टत्वात् । न च

---

अनुसङ्गेनान्वयः । न निर्ल्लोपनीयं न सर्व्वतोभावेन खण्डयितुं योग्यम् । ईप्सितपूर्व्वकं प्राप्तुमिष्टम् ईप्सितं तदेव पूर्व्वं यस्य ।

* सौरमेषादिभोगावगमपूर्व्वकत्वादित्यादि । तथाच चान्द्रस्य मुख्यार्थत्वेऽपि मुख्यार्थत्वस्वीकारेऽपि ईप्सितप्रतीतौ यथा ईप्सितज्ञानं पूर्व्वमपेक्षते तथा चान्द्रप्रतीतौ सूर्य्यसम्बन्धिमेषादिराशिभोगज्ञानं पूर्व्वमपेक्षते । तथा च मेषादिराशिस्थ रविप्रारम्भ-शुक्लप्रतिपदादिदर्शान्तत्वमिति चान्द्रवैशाखादिलक्षणे चान्द्रज्ञानस्य सौरज्ञानसापेक्षतया मेषादिराशिस्थरविकत्वमिति सौरमासलक्षणस्य लघुतया शक्यतावच्छेदकत्वलाघवेन च सौरशक्तिः वैशाखादीनां प्रतीयते इति भावः । अतएव मासपदस्य सौरे शक्तिस्वीकारादेव । वरचतुर्थी वरदाचतुर्थी । तथाचायं वचनार्थः । माघे मासि चतुर्थ्यां वरं वरदां दुर्गाम् आराध्य पञ्चम्यां श्रियं प्राप्य सन्तुष्टये कुन्दकुसुमैः पूजा कार्य्या । अतएव भविष्योत्तरे माघशुक्लपञ्चमधिकृत्य—

"चतुर्थी वरदा नाम तस्यां गौरी सुपूजिता ।
सौभाग्यमतुलं कुर्य्यात् पञ्चम्यां श्रीरपि श्रियम् ॥"

"हिराषाढ़क्रिया तावद्यावद्विष्णोः प्रबोधनम् ।
विबुद्धे तु हरौ कार्य्याः सूर्य्यगत्येतराः क्रियाः ॥"

अनेन विबुद्धे हरौ सूर्य्यगत्या* कर्म्मविधानात् योगनिद्रास्थे चान्द्रेण कर्त्तव्यताविधिः† । शयनात्प्रभृति चान्द्रस्य विरोधाच्च

---

* कथमनुत्कर्षः उत्कर्षाभावः । तुल्यवदुभयवचनत्वे चान्द्रे सौरे च उभयत्र तुल्यवच्छक्तिस्वीकारे । सौरपरित्यहे सौरमाचशक्तिपरित्यहे किं प्रमाणम् प्रमाणं नास्तीत्यर्थः । अतएव सौरशक्तौ ,प्रमाणत्वाभावादेव । अयमर्थः सौरार्थः विसृष्टः परित्यक्तः न स्वीकृत इत्यर्थः कष्टत्वात् तत्साधने कष्टसाध्यत्वात् । तथाच दीक्षितेन चान्द्र एव मासपदशक्तिः स्वीकृता न सौरे इति भावः । हिराषाढ़क्रिया चान्द्रेण क्रिया सौरे हिराषाढ़त्वासम्भवात् । यावद्विष्णोः प्रबोधनं हरेरुत्थानपर्य्यन्तमिति यावत् । विबुद्धे जागरिते सूर्य्यगत्या सौरेण ।

† तथाच वचनस्य यथाश्रुतार्थपरतामादाय क्रमेण व्यभिचारं दर्शयति उपाकर्म्मेत्यादि । योगनिद्रास्थे हरिशयनमध्ये । चान्द्रेण कर्त्तव्यताविधिः चान्द्रमासेन चातुर्म्मास्यव्रतादेः कर्त्तव्यताविधिः ।

तथाच वराहपुराणम् ।

आषाढ़शुक्लद्वादश्यां पौर्णमास्यामथापि वा ।
चातुर्म्मास्यव्रतारम्भं कुर्य्यात् कर्कटसंक्रमे ॥
तदभावे तुलार्कोऽपि सत्त्वेन नियमं व्रती ।
कार्त्तिकशुक्लद्वादश्यां विधिवत् तत् समाचरेत् ॥

महाभारते ।

चतुर्ष्वपि हि तत्तीर्थं चातुर्म्मास्यव्रतं नरः ।
कार्त्तिक्यां शुक्लपक्षे तु द्वादश्यां तत् समापयेत् ॥

यद्यप्यत्र चातुर्म्मास्यव्रते द्वादश्यां पौर्णमास्याम् आरम्भपक्षे द्वयोरेव विध्योः चान्द्रविहितत्वं सम्भवति नापरयोः कर्कटसंक्रान्तितुलार्कारम्भयोः प्रत्युत सौरविहितत्वमेव, तथापि कार्त्तिकशुक्लद्वादश्यां समापनोक्तेः समाप्तिकालमादायैव तत्प्रवृत्तिरिति भावः ।

ततःप्रभृति सौरस्य ग्रहणं वाच्यम्। यतः शयितेऽप्युपाकर्म-रोहिण्य-ष्टमी-श्रवणाद्वादशी-हरितालिकाचतुर्थी-सुखरात्रिप्रभृतीनां सौर-नियमस्य दर्शनात्। विबुद्धे तु हरौ वह्नुत्सवार्थञ्चान्द्रनियम-दर्शनात्*। तथोत्तरत्रिकाधिमासे आगामिवत्सरे कर्कटे शयिते

* शयनात् प्रभृति चान्द्रस्य विरोधाच्चेति। आगामिनि तदा वर्षे कुक्षौ माधवः स्वपेत् इति वचनात् इति मेधः। ततःप्रभृति शयनात् प्रभृति हरिशयनमारभ्य इत्यर्थः। अत्र उपाकर्म वेदारम्भवेदसमापनानामकं कर्म। रोहिण्यष्टमी जन्माष्टमीव्रतम्। हरि-तालिकाचतुर्थी सिंहसंक्रान्तिनी शुक्लचतुर्थी। सुखरात्रिका कार्त्तिकसंक्रान्तिप्रतिपद्।

तथाच स्मृतिसमुच्चये।

उपाकर्म तु कर्त्तव्यं कर्कटस्थे दिवाकरे।
हस्तेन शुक्लपक्षस्यां श्रावण्यां श्रवणेन च॥

अपरमाह गार्ग्यः।

सिंहे रवौ च पुण्यर्क्षे मध्याह्ने विचरेद्यदि।
छन्दोगा मिलिताः कुर्युरुत्सङ्गः सर्व्वछन्दसामित्यादि॥

भविष्योत्तरे।

सिंहराशिगते सूर्य्ये गगने जलदाकुले।
मासि भाद्रपदेऽष्टम्यां कृष्णपक्षेऽर्द्धरात्रके॥
शशाङ्के वृषराशिस्थे नक्षत्रे रोहिणीयुते।
वसुदेवेन देवक्यामहं जातो जनाः स्वयम्॥
एकेनैवोपवासेन कृतेन कुरुनन्दन।
सप्तजन्मकृतात् पापात् मुच्यते नात्र संशयः॥

अथ श्रवणाद्वादशी भविष्योत्तरे।

मासि भाद्रपदे शुक्ला द्वादशी श्रवणान्विता।
महती द्वादशी ज्ञेया उपवासे महाफला॥

भगवति श्रीपतौ शक्रदुर्गाविष्णूत्थानानां सिंहकन्यातुलास्वेव दर्शनात्। शयिते विबुद्धे च हरौ मन्वन्तरादितिथीनां विहितत्वात्*

---

इति भाद्रपदे सिंहस्थरवौ सौरभाद्रे इत्यर्थः। शुक्लद्वादश्यां श्रवणनक्षत्रे तदुत्तरपौर्णमास्यां श्रुतभिषापूर्व्वभाद्रपदपादत्रयान्यतरावस्थिते चन्द्रे सिंहस्थे रवावेव सप्तमराश्यवस्थानात् पौर्णमासी सम्भवति। कर्कटस्थे सूर्ये कन्यास्थे वा अन्त्योपान्त्यौ विभौ ज्ञेयावित्यादिवचनात् सास्मिन् पौर्णमासीति संज्ञायामिति पाणिनिसूत्राच्च तच्च शुक्लद्वादश्यां श्रवणनक्षत्रं न सम्भवति।

सिंहे गते दिनकरे सितचारुपक्षे हर्य्यार्द्रपादमुपगच्छति वै शशाङ्के।

उत्तिष्ठते त्रिदिवमन्दिरवन्दनीयो यात्याङ्गतो निशि निषीदति वज्रपाणिरित्यादि॥

तुलाराशिगते सूर्ये अमावास्यां नराधिप।
स्नात्वा देवान् पितॄन् भक्त्या संपूज्याथ प्रणम्य च।
क्षत्वा तु पार्व्वणश्राद्धं दधिक्षीरगुडादिभिः॥
ततोऽपराह्णसमये घोषयन्नगरे नृपः।
लक्ष्मीः संपूज्यतां लोका उल्काभिश्चाभिवेक्ष्यतामित्यादि॥

तथाच। अत्र हरिशयनमध्यकरणीयोपाकर्म्मादौ सौरदर्शनात् योगनिद्राख्ये चान्द्रेण कर्त्तव्यताविधिर्न घटते इति भावः।

वङ्गोत्सवार्थं चान्द्रनियमदर्शनादिति। तथाच स्कन्दपुराणे।

फाल्गुन्याः पूर्व्वतो विप्राश्चतुर्दश्यां निशामुखे।
वङ्गोत्सवं प्रकुर्व्वीत दीपमण्डपपूर्व्वतः॥

फाल्गुन्याः फाल्गुनसम्बन्धिपौर्णमास्याः। अत्र फाल्गुनसम्बन्धिपौर्णमास्यवगतेश्चान्द्रत्वं प्रतीयते।

* उत्तरचन्द्राधिमासे श्रावणादिमासत्रयमध्ये मलमासपाते आगामिवत्सरे इति। तथाच श्रावणादौ मलमासपाते तत्पूर्व्वाषाढे हरिशयनस्य जातत्वात् मलमासात् परं मासद्वयौ आगामिवर्षे चान्द्राषाढः कर्कट एव सौरश्रावण एव सम्भवतीति भावः।

सौरचान्द्रयोरन्यतरावधारणं न स्यात्। तस्मात् सौर एव मुख्यत्वात्* अनुत्कर्षः कर्म्मणाम्। तेनैतदपि वचनं† यथोक्तन्यायबलवत्त्वेनैव वर्णनीयम्। तेनाशोकाष्टमीमदनोत्सवमदनभञ्जिकादीनामपि सौरेष्वेव चैत्रादित्यविधिः सिध्यति। देवशयनादौ तु जघन्यचान्द्रपरिग्रहे सप्रपञ्चं प्रमाणं वर्णयिष्यामः। तस्मात् सौरो वैशाखादिर्मुख्यो जघन्यश्चान्द्र इति स्थितम्‡। सा वैशा-

---

तथाच राजमार्त्तण्डे।

कन्यासिंहकुलीरेषु यदा दर्शहयं भवेत्।
आगामिनि तदा वर्षे कुलीरे माधवः क्षपेत्॥

शक्रदुर्गाविष्णूत्थानां शक्रोत्थानदुर्गोत्सवविष्णुप्रबोधानामित्यर्थः। सिंहकन्यातुलासु यथाक्रमं सिंहे शक्रोत्थानं कन्यायां सौराश्विने दुर्गोत्सवः तुलायां सौरकार्त्तिके हरेरुत्थानञ्च। तथाच पूर्ववत्सरे श्रावणादिचिके मलमासपाते आगामिनि वत्सरे कर्कटे हरिशयनवत् सिंहे शक्रोत्थानस्य कन्यायां दुर्गोत्सवस्य तुलायां हरेरुत्थानस्य चावश्यम्भाव इति भावः। अयिते हरिशयनमध्ये विकुण्ठे हरेरुत्थानादूर्द्धं मन्वन्तरादितिथीनां विहितत्वात् शयनमध्ये श्रावणस्य कृष्णाष्टमी भाद्रस्य तृतीया आश्विनशुक्लनवमी कार्त्तिकशुक्लद्वादशी च मन्वन्तरादित्वेन तिथिचतुष्टयमात्रं लभ्यते अपरञ्च उत्थानादूर्द्धं लभ्यते।

* सौरचान्द्रयोरन्यतरावधारणमिति। श्रावणकृष्णाष्टमी भाद्रतृतीयाश्विनशुक्लनवम्यादयस्त्रियः किं सौरमाससम्बन्धिन्यः उत वा चान्द्रमाससम्बन्धिन्यः एकतरावधारणं न स्यात्। तस्मादिति तस्मात् उभयोः श्रुतिसिद्धतया उभयत्र शक्तिप्रसक्तौ प्रागुक्तयुक्तेः सौरे मुख्यत्वात् मासपदस्येति शेषः।

† अनुत्कर्षः कर्म्मणामिति। तथाच आदित्ये सिद्धकृत्ये च चान्द्रमिष्टमित्यादिवचनात् कर्म्मणाम् औत्कर्षेण न चान्द्रे मासपदशक्तिनिर्णय इति भावः। एतदपि वचनं हिरण्यगर्भक्रिया तावदित्यादिवचनम्।

‡ यथोक्तन्यायबलवत्त्वेनेति। उक्तन्यायमनतिक्रम्य सौरशक्तिनिर्णायकयुक्तिमनतिक्रम्य इत्यर्थः। तस्य बलवत्त्वेन।

खस्यामावास्या इत्यत्र तु मुख्यस्यान्वयाभावात् जघन्यस्यापि चान्द्रस्य परिग्रह इति*। मासशब्दश्च सौरसावननाक्षत्रचान्द्रेषु त्रिंशद्गुणितषष्टिनाड्यवच्छिन्नकालरूपतया† सर्व्वत्र वर्त्तमानो न

---

उपसंहरति तेनेति। अशोकाष्टमी स्कान्दे।

मौने मधौ शुक्लपक्षे अशोकाख्यां तथाष्टमीम्।
पिबेदशोककलिकाः स्वायाल्लौहित्यवारिणि॥

मदनोत्सवः भविष्ये।

चैत्रशुक्लचयोदश्यां दमनं मदनात्मकम्।
कृत्वा संपूज्य विधिवत् वीजयेद्व्यजनेन तु॥
तच्च सम्मुचितः कामः पुत्रपौत्रविवर्द्धनः।
चैत्रशुक्लचयोदश्यां पूजनीयो यथाविधि।
रतिप्रीतिसमायुक्तो ह्यशोकमणिभूषितः॥

दमनः दमनश्चः सम्मुचितः प्रीणितः। यत्यक्तन्यते मासपदस्य सौरग्रहः अत्र चैत्रपदं सौरचैत्रपरम्।

मदनभञ्जिका स्कन्दपुराणसौरागमयोः।

मधुमासे तु संप्राप्ते शुक्लपक्षे चतुर्दशी।
प्रोक्ता मदनभञ्जीति सिद्धिदा तु मनीत्सवे॥
पूजयिष्यन्ति ये मर्त्या तदङ्गभवपल्लवैः।
ते यान्ति परमं स्थानं मदनस्य प्रभावत इत्यादि॥

मधुमासे सौरचैत्रे। जघन्यचान्द्रपरिग्रहे असुख्यचान्द्रपरिग्रहे सप्रपञ्चं सविस्तरम्। जघन्यः गौणः इति स्थितं व्यवस्थितम्।

* जघन्यस्यापि चान्द्रस्य परिग्रह इति। तथाच सा वैशाखस्य अमावास्या या रोहिण्या सम्बुध्यते इत्यत्र श्रुतौ रोहिण्या वृषघटकतया मुख्ये मेषस्थरवौ सौरवैशाखे असम्भवात् अगत्या वैशाखपदस्य चान्द्रपरतेति भावः।

† ननु यदि मासपदस्य सौरे शक्तिस्तदा कथं मासत्रयुर्विधः शास्त्र इत्युक्तं सङ्गच्छते।

पृथक् शक्तिमपेक्षते। चतुर्विधा एव मासाः पुराणे दर्शिताः॥
"सौरः सौम्यश्च विज्ञेयो नाक्षत्रः सावनस्तथा।
मासश्चतुर्विधः शास्त्रे क्रियाभेदान्मनीषिभिः॥"
तत्र षष्टिनाड्यवच्छिन्नत्वं सावनमासे त्रिंशद्गुणस्य नियतमेव*॥

---

सामान्यधर्मावच्छिन्नानामेव वस्तूनां परस्परविरुद्ध-तद्व्याप्यधर्मप्रकारेण प्रतिपादनस्य विभागपदार्थत्वात् अतस्त्रिंशद्गुणितषष्टिनाड्यवच्छिन्नकालत्वरूपतादृशमासचतुष्टयानुगत-सामान्यधर्ममादाय तेषां विभागं सम्पादयितुं सामान्यधर्मं दर्शयति मासशब्दश्चेत्यादि। सौरः आदित्यैकराशिभोगावच्छिन्नः कालः सावनः सौरसावनः त्रिंशदहोरात्रात्मकः नाक्षत्रः आयुर्दाशे स्मृतं प्राज्ञैर्नाक्षत्रं षष्टिनाड़िकमिति नाड़ीषष्ट्या तु नाक्षत्रमहोरात्रं प्रचक्षते, तत्रिंशता भवेन्मास इति वचनोक्तषष्टिदण्डात्मकदिनत्रिंशद्दिनरूपोऽपि नाक्षत्रमासो ग्राह्यः। न तु सर्व्वत्रपरिवर्त्तेषु नाक्षत्रमिति चोच्यते इति वचनोक्तसप्तविंशतिनक्षत्रात्मकनाक्षत्रमासः तत्र त्रिंशद्गुणितत्वासम्भवात्। त्रिंशद्गुणितषष्टिनाड्यवच्छिन्नकालरूपतया त्रिंशद्गुणितः त्रिंशद्भागेन गुणितः इत्यर्थः एतत्तु सावननाक्षत्रमासे नियतं सौरमाससस्तु रविगतेर्मन्दत्वाभ्यां त्रिंशद्दिनन्यूनाधिककालेऽपि सम्भवितुमर्हति। षष्टिनाड्यवच्छिन्नकालरूपतया इति षष्टिनाड्यवच्छिन्नेति नाक्षत्रमासे नियतं सौरसावनयोस्तु रविभुज्यमानकालमादाय किञ्चिदधिकषष्टिदण्डावच्छिन्नकालरूपतया इति बोद्धव्यम्। तथाच रविदिनभोगस्तु लग्नदण्डपलानि द्विगुणीकृतानि पलविपलान्यौत्सर्गिकाणि त्रिंशद्दिनन्यूनाधिकवशात्तु किञ्चिदधिकन्यूनानि च। तथाच दिनं दिनं यानि यानि भुक्तानि तानि रव्युदयलग्नस्य राशिशेषे प्रविष्टानि अवशिष्टानि दिवसीयानि एवं तत्समलग्नपलविपलानि दिनशेषप्रविष्टानि अवशिष्टानि रात्रिसम्बन्धीनि।

* कालरूपतया यद्यपि दिनतिथ्योर्भेदात् विभिन्नत्वं तथापि सूर्य्यक्रियाप्रचयचन्द्रक्रियाप्रचयत्वोपलक्षितकालत्वेन एकत्वं विवक्षितम्। वर्त्तमान इति तथाच सौरसावननाक्षत्रचान्द्रेषु त्रिंशद्भागगुणितषष्टिदण्डावच्छिन्नकालरूपत्वेन सर्व्वत्र वर्त्तमानोऽपि मासशब्दः पृथक् प्रत्येकविश्रान्तां शक्तिं नापेक्षते इत्यर्थः। शक्तिग्राहकप्रमाणाभावात् प्रागुक्तयुक्त्या

चान्द्रसौरनाक्षत्राणां त्रिंशद्भागस्य वृद्धिह्रासादिना यद्यप्यनियतं तथाप्यौत्सर्गिकं षष्टिनाड्यवच्छिन्नत्वमादाय लक्षणकरण*मतएव वृद्धिह्रासाक्षित्युच्यते। अन्यथा वृद्धिह्रासव्यपदेशानुपपत्तेः†।

---

सौरे शक्तिसङ्गावादत्र लक्षणया तादृशसामान्यधर्म्मादाय अर्थबोधकत्वात्। सौम्यः सोमसम्बन्धी चान्द्र इत्यर्थः। षष्टिनाड्यवच्छिन्नत्वं सावनमासे त्रिंशद्भागस्य नियतमिति षष्टिनाड्यवच्छिन्नत्वं किञ्चिदधिकषष्टिनाड्यवच्छिन्नत्वमित्यर्थः। त्रिंशद्भागस्येति सावनस्त्रिंशत्तादिनैरिति वचनादिति शेषः।

* चान्द्रसौरनाक्षत्राणामिति तु लिपिकरप्रमादः। तथाच चान्द्रस्य चन्द्रकलाक्रियाप्रचयरूपतया तदुपलक्षितकालरूपतया वा वास्तवह्रासवृद्धी दृश्येते। सौरस्यापि रविगतेर्मन्दत्वामन्दत्वाभ्यां ह्रासवृद्धी दृश्येते। नाक्षत्रस्य तु—

नाड़ीषष्ट्या तु नाक्षत्रमहोरात्रं प्रचक्ष्यते।
तत्त्रिंशता भवेन्मासः सावनोऽर्कोदयैस्तथा॥

इति सूर्य्यसिद्धान्तोक्तनाक्षत्रमासस्य तु सावनमासप्रकृतितया सावनमासवदत्रापि नियतत्वमेव। परन्तु अर्कोदयैस्तथा इत्युक्तेः एकार्कोदयादूर्द्धम् अपरार्कोदयपर्य्यन्तकालस्य रविभुज्यमानकालमादाय षष्टिदण्डात् किञ्चिदधिकत्वम्। अतएव सिद्धान्तसन्दर्भे "सावनं दण्डाः षष्टिरहः खलग्रखगुणांशाख्यास्तदैनं भवेत्। अतः सावनसंवत्सरेणैकदिनाधिकत्वत्सरौ नाक्षत्रौ भवतीत्यनयोर्भेद इति स्मार्त्तः आह स्म।

औत्सर्गिकमिति। नाड़ीषष्ट्या तु नाक्षत्रमहोरात्रं प्रचक्ष्यते।
तत्त्रिंशता भवेन्मासः सावनोऽर्कोदयैस्तथा।
ऐन्दवस्तिथिभिस्तद्वत् संक्रान्त्या सौर उच्यते॥

इति सूर्य्यसिद्धान्तवचनादिति शेषः।

† अतएव वृद्धिह्रासाक्षित्युच्यते इत्यादि। तथाच सिद्धान्तशिरोमणौ।

मध्यन्ते परिभीयन्ते खकाला वृद्धिहानितः।
मासा एते स्मृता मासास्त्रिंशत्तिथिसमन्विता इति॥

तथाविधमासस्य चार्द्धं पक्षः। द्वादश मासाः संवत्सरः*। यत्तु त्रयोदश वा इत्युक्तं तत्र सौरसावनादिषु तावत् त्रयोदशत्वं नास्ति किन्त्वधिमासपाते चान्द्रस्य† तत्र संवत्सरपदस्यानेकशक्तिकल्पनानुपपत्तेः‡ त्रयोदशमासा अपि द्वादशैव एकसंज्ञत्वात्। एक एवाभ्यस्तो न पृथगेवासावित्यविरोधः द्वादशादिमासा इत्यस्य§

---

तेन चन्द्रस्य ह्रद्धिह्रासतः ह्रद्धिह्रासकालाभ्यां परिमिता ये स्वकालाः चन्द्रसम्बन्धिकालाः चन्द्रक्रियारूपाः तत्र ते मासाः स्मृता इत्यर्थः।

लघुहारीतः। चक्रवत् परिवर्त्तेत सूर्य्यः कालवशात् यतः।

अतः सांवत्सरं श्राद्धं कर्त्तव्यं मासचिह्नितम् इत्यादि॥

यतः सूर्य्यः कालवशात् चक्रवत् गतेर्मन्दत्वामन्दत्वाभ्यां गच्छेत् तथा चैकराशिमुपभुञ्जानो रविर्मेषादौ मन्दगत्या कामप्येकां तिथिं हिः स्पृशति तुलादौ शीघ्रगत्या कामप्येकां तिथिं न स्पृशति एतेन चान्द्रसौरयोरेव ह्रासह्रद्धी सम्भवतः नान्येषाम्।

* तथाविधमासस्य चार्द्धं पक्ष इति। सावनमासस्य अर्द्धं पञ्चदशदिनानि पक्षः। सौरमासस्य ह्रासह्रद्धिवशात् यदा त्रिंशद्दिनात्मको मासः तदा तदर्द्धं पञ्चदशदिनानि पक्षः यदा द्वात्रिंशद्दिनात्मको मासः तदा तदर्द्धं षोड़शदिनानि पक्षः इत्यादिक्रमेण कल्पनीयः। चान्द्रमासस्य च त्रिंशत्तिथ्यात्मकतया तदर्द्धं प्रतिपदादिपञ्चदशतिथयः पक्ष इति।

† यत्तु त्रयोदश वेत्युक्तम् इति। त्रयोदशमासा वा संवत्सर इत्यर्थः। तत्र सौरसावनादिषु आदिना नाक्षत्रमासपरिग्रहः। त्रयोदशत्वं नास्तीति तथाच द्वादश मासा संवत्सरः क्वचित् त्रयोदशमासा इति श्रुतौ क्वचिदिति मलमासपाते इत्यर्थः। तथाच सौरसावननाक्षत्रमासानां मलमासत्वाभावात् त्रयोदशत्वं न सम्भवतीति भावः।

‡ तत्र वत्सरपदस्यानेकशक्तिकल्पनानुपपत्तेरिति। तथाच द्वादशमाससमुदायत्वं वत्सरत्वम् एवं मलमासपाते त्रयोदशमाससमुदायत्वं वत्सरत्वम् एवं कल्पने अनेकशक्तिकल्पना स्यात्। गौरवात्तु तत्कल्पनयोरन्याय्यत्वमिति भावः।

§ ननु श्रुतिप्रतिपाद्यत्वात् नानाशक्तिरेवास्तु इत्यत आह त्रयोदशापि द्वादश एव एकसंज्ञत्वादिति। तथाच चैत्रादिवत् मलमासस्य संज्ञान्तरविरहात् मलमासपाते

सौरश्च वत्सरः षड्ऋतवश्च तपस्तपस्यौ शिशिरावृतुः इत्यादिश्रुत्या शिशिरवसन्तग्रीष्मवर्षाशरत्हेमन्ताख्याः कथिताः। तत्र त्रिभिः शिशिराद्यृतुभिरुदगयनम्। तद्देवानान्दिनम्। वर्षादिभिः त्रिभिर्दक्षिणायनं सा रात्रिः। अस्य वचनं प्रागेव लिखितम्। ऋतुर्वा संवत्सरो हेमन्तग्रीष्मवर्षाभिः*।

तदाह।

"ग्रैष्महैमन्तिकान्मासानष्टौ भिक्षुर्विचक्रमेत्।
दयार्थं सर्व्वभूतानां वर्षास्वेकत्र संवसेत्॥"

तदा च शिशिरस्य हेमन्तेऽन्तर्भावः वसन्तस्य ग्रीष्मे शरदो वर्षासु।

तदाह यतिधर्म्मे देवलः।

"न चिरमेकत्र वसेदन्यत्र वार्षिकात्†। श्रावणादिश्चतु-

---

आषाढ़ादेरपि शुक्लाशुक्लत्वभेदेन द्विराषाढ़त्वात् षष्ठ्या तु दिवसैर्मासः कथितो बादरायणैरिति व्यासवचनाच्च त्रयोदशत्वेऽपि एकलक्षणाक्रान्तत्वेन एकसंज्ञकत्वात् द्वादशमासा इत्यस्य अविरोधात् विरोधाभावात् एक एव अभ्यस्त एकमास एव अभ्यस्तः शुक्लाशुक्लत्वभेदेन असौ मासः न पृथक् न स्वतन्त्रत्वेन प्रतीतस्तथाच द्वादशमासत्वावच्छिन्नकालत्वं संवत्सरत्वमिति भावः।

* सौरश्च संवत्सरः षड्ऋतवः द्वादशमासात्मकः ऋतुर्मासद्वयं तदेव प्रमाणयति। तपस्तपस्यौ माघफाल्गुनौ। ऋतुर्वा संवत्सरः हेमन्तग्रीष्मवर्षाभिरिति तृतीया अभेदे। हेमन्तग्रीष्मवर्षाभिन्नः संवत्सरः। अत्र हेमन्तः मार्गपौषमाघफाल्गुनमासचतुष्टयरूपः। ग्रीष्मः चैत्रवैशाखज्यैष्ठाषाढ़मासचतुष्टयात्मकः। वर्षाः श्रावणभाद्राश्विनकार्त्तिकमासचतुष्टयरूपः। एतच्च सर्व्वलोकप्रत्यक्षसिद्धम्।

† एतदेवोपपादयति तदा चेत्यादि। शिशिरस्य हेमन्तेऽन्तर्भावः उभयोः शीत-

मासिको वार्षिकः कालः। अतो हेमन्तप्रत्यासन्नः शिशिरो हेमन्ततः प्रविष्टः ग्रीष्मे वसन्तः शरद्वर्षासु।" चान्द्रादिभिस्तु न ऋतुव्यवस्था* न चायनस्य। किन्तु चान्द्रो मासः पितॄणामहोरात्रं तत्र कृष्णपक्षो दिनं शुक्लपक्षो रात्रिः। यथा मनुः।

"पित्र्ये रात्र्यहनी मासः प्रविभागस्तु पक्षयोः।
कर्म्मचेष्टास्वहः कृष्णः शुक्लः स्वप्नाय शर्व्वरी॥"

इति मासादेर्निर्णयः†।

---

अघानत्वादिति भावः। न चिरमेकत्र वसेदिति। अत्र विशेषयति यतिमधिकृत्य काठकवल्लम्।

एकरात्रं वसेत् ग्रामे नगरे पञ्चरात्रकम्।
वर्षाभ्योऽन्यत्र वर्षासु मासांश्च चतुरो वसेत्॥

* हेमन्तप्रत्यासन्नः शिशिर इति। हेमन्तः शिशिरोऽस्त्रियामिति कोषोक्तेः। चान्द्रादिभिस्तु न ऋतुव्यवस्था इति। तथाच वत्सरघटकयोरयनयोर्घटकत्वेन चान्द्रमासादिभिः ऋतुव्यवस्था नास्तीत्यर्थः। न तु सामान्यत ऋतुव्यवस्था नास्तीत्यर्थः। अतएव कुल्लभट्टाद्यं मासि मासि अपर्य्याप्तत्वात् प्रति इति वचनं सङ्गच्छते। हेमाद्रौ विशेषेण चान्द्रर्तुरुक्तः यथा चिकाण्डमण्डने। अतस्तत्कार्त्तक्रियाः सर्व्वाः कुर्य्याच्चान्द्रमासर्तुषु। चन्द्रः पुनः पुनर्जन्मा तस्माच्चन्द्रवशादृतुः॥ हेत्प्रकरणे चन्द्रं प्रकृत्याह तिथितिरिः। स ऋतून् कल्पयतीति चान्द्रीऽयं ऋतुकल्पः।

† पित्र्ये रात्र्यहनीति। मासः गौणचान्द्रमासः पित्र्ये पितृसम्बन्धिनी रात्र्यहनी। कर्म्मचेष्टास्विति निमित्तार्थे सप्तमी। कर्म्मकरणनिमित्तं कृष्णः कृष्णपक्षः तथाच पार्व्वणादिरूपपितृकर्म्मकरणयोग्यः कृष्णपक्षः। स्वप्नाय विशेषविहितातिरिक्तकर्म्मनिषेधाय शुक्लः शुक्लपक्षः रात्रिस्वरूप इत्यर्थः।

इति मासादेर्निर्णयः।

## सम्प्रत्यधिमासनिरूपणम् ।

अधिको मासोऽधिमासः । तस्य बीजमुपदर्शितं ज्योतिःशास्त्रे ।

"दिवसस्य हरत्यर्कः षष्टिभागमृतौ ततः ।
करोत्येकमहश्छेदं तथैवैकञ्च चन्द्रमाः ॥
एवमर्द्धतृतीयानामब्दानामधिमासकम् ।
ग्रीष्मे जनयतः पूर्वं पञ्चाब्दान्ते तु पश्चिमम् ॥"*

दिवसस्याहोरात्रस्य षष्टिभागं दण्डमेकं सूर्यः प्रतिदिनं हरति लङ्घयति । तेन ऋतौ षष्ट्याहोरात्रैः षष्टिनाड्याकर्षात्तिथिरेका सूर्येणाक्रुष्टा एवञ्चन्द्रेणापि । तेन चन्द्रार्काभ्यां प्रत्यृतु दिनद्वयाकर्षादृद्धेन द्वादश दिनानि लभ्यन्ते । दिनपदं तिथिपरम् । एवं तृतीयाब्देनापि अधिमासा निष्पद्यन्ते । अर्द्धतृतीयानामपि गणनक्रमादौचित्यप्राप्तमिदमुक्तं न तु नियतं तिथिवृद्धिक्षासादिना

---

* मासं निरूप्य तत्प्रसङ्गेनाधिमासं निरूपयितुं प्रतिजानीते सम्प्रत्यधिमासनिरूपणमिति क्रियते मयेति शेषः । कर्म्मयोग्यमासादधिकसङ्ख्यकः कर्म्मानर्हो मासः अधिकमासः मलमास इत्यर्थः । षष्टिभागं षष्टिभागैकभागम् ऋतौ मासद्वये एकमहश्छेदम् एकतिथेराकर्षणम् । अर्द्धतृतीयानाम् अर्द्धं तृतीयं येषाम् । ग्रीष्मे माधवादिषट्के पूर्वं वैशाखादिचिकपतितं पञ्चाब्दान्ते तु पश्चिमं श्रावणादिचिकपतितम् अधिमासकं मलमासं चन्द्रार्कौ जनयत इत्वन्वयः । ननु दिवसस्याहोरात्रस्य दण्डमेकं रविर्हरति इत्वन्वये ऋतौ अहश्छेदपदेन कथम् एकतिथ्याकर्षणसम्भव इति चेन्न सावनाधिपस्य रवेस्तिथ्येकदण्डाकर्षणासम्भवात् । अहोरात्रस्य दण्डैकाकर्षणेऽपि चान्द्रमासस्य मलमासत्वात् चन्द्रस्य तत्समकालतिथ्येकदण्डकर्षणात् सावनदिनस्य द्वहेरसम्भवाच्च सूर्याकर्षितदण्डैकेनागत्या सत्यरिमितितिथ्युत्पत्तेरेव कल्पनीयत्वात् ।

न्यूनाधिकत्वदर्शनात्। इदन्तु नियतम् एकस्मादधिमासादारभ्य तृतीयसंवत्सरे भवतीति।

यत्तु।

"गतेऽब्दद्वितये सार्द्धे पञ्चपक्षे दिनद्वये।

दिवसस्याष्टमे भागे पतत्येकोऽधिमासकः॥" इति।

तद्गणितविद्भिः सुगणितसिद्ध्यर्थमधिमासान्तरमेवोक्तं न तच्छास्त्रोपयुक्तमिति* न तद्विचित्यते। माधवादिषट्के चाधिमासपातः तत्रैव रविसंक्रान्तिद्वयात्मा तस्य दर्शनात्। तेन माधवादिचिके पतने पूर्वं इत्युच्यते। उत्तरार्द्धिके पाते पश्चिम इत्युच्यते। अन्यथा अनादित्वात् कालस्य पौर्व्वापर्य्यानुपपत्तेः पूर्व्वापरत्विकभेदेन

* ज्योतिषवचनेन साईद्विवर्षोपरि मलमासविधानात् तद्विरुद्धतया राजमार्त्तण्डीयवचनस्य विषयव्यवस्थाप्रदर्शनार्थमाशङ्कते यद्यपीति। सप्तदशदिनाधिकाष्टमासाधिकवर्षद्वयाभ्यवहितोत्तरदिवसाष्टमभागनैयत्यं मलमासस्य यदुक्तमित्यर्थः स्वगणितसिद्ध्यर्थमिति।

सौरसंवत्सरस्यान्ते मासेन शशिजेन तु।

एकादशातिरिच्यन्ते दिनानि भृगुनन्दन॥

इति विष्णुधर्म्मोत्तरीयवचनपर्य्यालोचनया वर्षे एकादशतिथिद्वयी वर्षद्वये द्वाविंशतितिथिद्वयद्वि र्भवति। षण्मासेन तु साईपञ्चतिथिद्वयद्वि र्भवति। ततो दिवामानाधिकसप्तदशाहोरात्रसहितमासद्वयेन साईद्वयतिथिद्वयी मिलित्वा तादृशकालस्य त्रिंशत्तिथ्यात्मकाधिमासयोग्यकालत्वेन गणितसिद्धिप्रदर्शनार्थम् अधिमासान्तरम् अधिमाससम्भवयोग्यतामात्रं न तु वास्तविकाधिकमासान्तरं कालान्तरे अधिमासपाते तदानीमधिमासान्तरस्यास्वीकृत्वात्। न तु शास्त्रीयोपयुक्तमिति। सूर्य्याचन्द्रमसोर्गतेर्मन्दत्वामन्दत्वाभ्यां कालान्तरीयाधिकमासघातस्येष्टत्वेन तत्रैव शास्त्रीयस्य नैयत्याभावादिति भावः।

चाधिमासभेदकीर्त्तनं कार्य्यभेदार्थं तच्च वक्ष्यामः । एतदेव सङ्क्षिप्य परिशिष्टेन प्रदर्शितम् ।

मध्ये विषुवतोर्भानुर्वर्द्धयेत् यान्यहानि तु ।
तैः सम्भूयाधिको मासः पतत्येवं त्रयोदशः ॥

मेषगविषुवमारभ्य तुलागविषुवपर्य्यन्तेनेत्यर्थः । अतएव

"माधवादिषु षट्केषु मासि दर्शद्वयं यदा ।
द्विराषाढ़ः स विज्ञेयः शेते च श्रावणे हरिः ॥
दर्शद्वयं यदैकस्मिन् भवेद्वै विषुवान्तरे ।
द्विराषाढ़स्तदा कार्य्यः कर्किण्यर्के हरिः स्वपेत् ॥"

द्वादशमासेष्वधिमासपाते विषुवान्तर इति न विशिष्यात्* ।

यत्तु ।

"आषाढ़द्वयसंयुक्तं पौर्णमासीद्वयं यदा ।
द्विराषाढ़ः स विज्ञेयः विष्णुः स्वपिति कर्कटे ॥"

* न तद्विद्यते इति गणितमात्रप्रसिद्धतया वास्तविकत्वाभावादिति शेषः । रविसंक्रान्तिद्वया चित्रद्विनाधिककालीन रविसंक्रान्त्या तस्य चान्द्रमासोल्लङ्घनस्य इत्यर्थः । पूर्व्वं इत्युच्यते इति माधवादिषण्मासस्य प्रकृतकालतया माधवादिकस्य सुतरां पूर्व्वत्वमिति भावः । अन्यथा निरुक्ताभिप्रायं विना । कालस्य सृष्टिकालस्य । कार्य्यभेदार्थं हरिशयनादिकार्य्यस्य मासविशेषज्ञापनार्थम् । विषुवती महाविषुवजलविषुवती: मेषसंक्रान्तितुलासंक्रान्त्योर्मध्ये भानुर्यानि अहानि तैर्द्वादशभूतैरहोभिः मिलित्वा त्रयोदशाख्यः अधिमासः पतति । एकस्मान्मलमासात् तृतीयवर्षमध्ये इति शेषः । मेषतुलासंक्रान्त्योर्मध्ये दिनद्वयं अतएवेत्यर्थः । द्विराषाढ़ः द्विराषाढ़ादिरित्यर्थः । विषुवान्तरे महाविषुवजलविषुवतीर्मध्ये । न विशिष्यात् न विशिष्य ब्रूयात् ।

तदपि मिथुनाधिमासपाते तथा भवतीति तस्यैव चिह्नभूतं, न तु तदपि पृथक् एव द्विराषाढ़लक्षणम्।

यदपि।

"वैशाखादितुलान्तेषु यदि पूर्णद्वयं भवेत्।
द्विराषाढ़: स विज्ञेय: शयनावर्त्तनादिषु॥"

इति वचनं, तदपि मेषादिषु षण्मासेषु अधिमासपाते सति वैशाखादीनां पूर्णिमानाम् अन्यतमा द्विर्भवत्यधिमासस्यैव लक्षणम्। न चैकस्मिन् सौरे मासि पूर्णिमाद्वयमिति, तस्य पृथग्लक्षणमिति तस्यार्थ: मूलभूतशुद्ध्यन्तरकल्पनापत्ते:, किन्तु अधिमासस्तु चेत्तदानीं न पतित:*। "दिवसस्य हरत्यर्कं" इत्यादिनोक्तस्य कारणस्य तृतीयाद्य एव हेतुत्वात्। अथ पूर्णिमाद्वयस्यैकनक्षत्रयोगान्मासद्वयमिति। तन्नाषाढ़ादिपदप्रवृत्तौ

---

* आषाढ़द्वयसंयुक्तमिति। शुक्लाशुक्लभेदेनाषाढ़द्वयसम्बन्धि इत्यर्थ:। तस्य मलमासस्य चिह्नभूतमिति चान्द्रमासस्य द्वित्वात् मलमासपाते पौर्णमासीद्वयसम्भवादिति भाव:। तस्यैव अधिमासस्यैव चिह्नभूतं ज्ञापकमात्रं न तु तदपि पृथगेव द्विराषाढ़लक्षणमिति यथा अमावास्याद्वयं रविसंक्रान्तिवर्ज्जितमिति मलमासलक्षणं तथा पूर्णिमाद्वयं रविसंक्रान्तिवर्ज्जितरूपवास्तविकपृथक्मलमासलक्षणं न इत्यर्थ:। लक्षणज्ञापकमात्रम्। ननु यथा अमावास्याद्वयं रविसंक्रान्तिवर्ज्जितम् इति मलमासलक्षणं तथा पूर्णिमाद्वयं रविसंक्रान्तिवर्ज्जितमिति मलमासलक्षणं स्वादित्याशङ्क्य निराकरोति न चेत्यादि। तस्य मलमासस्य। उक्तस्य तस्येति वचनस्य। मूलभूतशुद्ध्यन्तरकल्पनापत्तेरिति। अमावास्याद्वयस्य रविसंक्रान्तिवर्ज्जितत्ववत् पूर्णिमाद्वयस्य रविसंक्रान्तिवर्ज्जितत्वरूपमलमासलक्षणस्वीकारापत्ते: पूर्णिमाद्वयघटितस्य लक्षणपरत्वे व्यभिचारं दर्शयति अधिमासस्तु चेत्तदानीं न पतित इति। अधिमासस्तु न भवति परन्तु एकस्मिन् सौरे मासि पूर्णिमाद्वयं भवति।

नक्षत्रयोगस्य प्रबन्धेन कारणत्वनिराकरणात्*। सौरे रविभोगस्य चान्द्रे च तदारब्धत्वस्य प्रवृत्तिनिमित्तत्वात्। अत्र यद्यपि नाधिमासपातः तथाप्येकराशिसूर्ये पूर्णिमाद्वयादेव शयनाद्युत्कर्षो वचनात्। तत्र, "आभाका सितपक्षे"ष्वित्यादिवचनानां बाधापत्तेः†। वैशाखादिपूर्णिमाद्वये सति कर्कटशेषे शयनात्।

* ननु पूर्णिमाद्वयस्य रविसंक्रान्तिवर्ज्जितत्वे मलमासौ भवत्येव कुतो व्यभिचारः इत्याशङ्क्य निराकरोति दिवसस्य इत्यादि। तथाच एकस्मान्मलमासात्तृतीयाब्दे एव मलमासनियमात् यत्र तृतीयाब्दे न भवति परन्तु एकस्मिन् सौरे पूर्णिमाद्वयं भवति तत्र व्यभिचारी घटत एवेति भावः। एकनक्षत्रयोगात् मासद्वयमिति। तथाच मलमासाभावेऽपि पूर्णिमाद्वयेऽपि विशाखाद्येकनक्षत्रयोगात् विशाखादिनक्षत्रयुक्ता पौर्णमासी सान्निध्यनेन एकलक्षणाक्रान्तत्वेन मासद्वयत्वमित्यर्थः। प्रबन्धेन पूर्व्वनिर्दिष्टप्रबन्धेन कारणत्वनिराकरणात् कदाचित् पौर्णमास्यां नक्षत्रयोगाभावेन व्यभिचारात् नक्षत्रयोगस्य कारणत्वासम्भवादित्यर्थः।

† तदा मासप्रवृत्तौ कस्य निमित्तता इत्यत आह सौरे रविभोगस्य इत्यादि। रविभोगस्य रविराशिभोगस्य। तथाच आदित्यराशिभोगेन सौरमासः प्रकीर्त्तित इति विष्णुधर्म्मोत्तरीयात्। तदारब्धस्य रविभुक्तराश्यारब्धस्य।

तथाच। मीनादिस्थो रविर्यैषामारब्धप्रथमक्षणे।
भवेत्तेऽब्दे चान्द्रमासाः चैत्राद्या द्वादश स्मृताः॥

इति व्यासवचनात्। ननु यद्यपि न प्रकृतौ मलमासः तथापि यथा मलमासस्थले आषाढादेर्द्विर्त्वात् मलीभूतप्रथमाषाढादेः परतः शयनादिकं भवति। तथा प्रकृतमलमासाभावेऽपि एकराशिस्थे पूर्णिमाद्वये सति वचनबलात् हरिशयनार्थं द्विराषाढादिकमङ्गीकृत्य प्रकृताषाढादेः परतः कल्पनीयाषाढादौ हरिशयनादिकं भविष्यति इत्याशङ्क्यते अत्र यद्यपीत्यादि। दूषयति तत्रेति। आभाका सितपक्षेषु इत्यादिवचनानां बाधापत्ते-

न तत्सौरे नापि चान्द्रे आषाढ़े स्यात्। अविचारितवचनार्थ-परिग्रहे च। "मिथुनस्थो यदा भानुरमावास्याद्वयं स्पृशेत्" इति स्पर्शमात्रावगमात् अतिक्रमणं विनापि शयनोत्कर्षो* मलिम्लुच एव श्रावणे देवशयनं स्यात्। तस्मादेवमादिवचनानाम-मावास्यान्ताधिमासप्रदर्शकत्वमेव(१) न तु पृथग्लक्षणान्तरत्वम्। यतएव मेषादिषट्क एवाधिमासपातः अतएव तुलाविषुवादि-मेषपर्य्यन्तेन संक्रान्तितिथिवृद्धिभावं दर्शयति।

(१) अमावास्यान्ताधिमासप्रदर्शकत्वमेवेति क्वचिदादर्शे पाठः

रिति। आभाका इत्यादि नानावचने आषाढ़ादेः द्वादश्यामेव शयनादिविधानात्तत्कल्पनीय-पक्षस्य प्रकृताषाढ़ादिलविरहात्तद्बाधापत्तेरित्यर्थः।

तथाच वराहपुराणम्।

द्वादश्यां सन्धिसमये नक्षत्राणामसम्भवे।
आभाका सितपक्षेषु शयनावर्त्तनादिकम्॥

अपरञ्च। आभाकाद्येषु मासेषु मथुरा माधवस्य तु।
द्वादश्यामेव कुर्व्वीत शयनावर्त्तनादिकम्॥

* बाधापत्तिं दर्शयति वैशाखादिपूर्णिमाद्वये सतीत्यादि। कर्कटशेषे इति तथाच प्रकृताषाढ़पक्षात् परतः कल्पनीयाषाढ़पक्षस्य कर्कटशेषे सम्भवात् सुतरां तत्पक्षस्य सौराषाढ़गतत्वाभावात् चान्द्राषाढ़गतत्वाभावाच्च तत्र हरिशयने तद्वचनबाधापत्तिरिति भावः। अविचारितवचनार्थपरिग्रहे च तात्पर्य्यविशेषम् अविचार्य्य वचनस्य यथाश्रुतार्थमात्रपरिग्रहे च अतिक्रमं विना चान्द्रमासीयाङ्गनं विना शयनोत्कर्षो हरेः शयनोत्कर्षो यदि स्वीकर्त्तव्य इति शेषः।

"यां तिथिं समनुप्राप्य तुलां गच्छति भास्करः।
तयैव तिथ्या संक्रान्तिः(१)र्यावन्मेषं न गच्छति॥"

ननु तुलादिषट्केऽपि वक्रातिचाराभ्यां सूर्य्यस्य संक्रमणे भवत्यधिमासः। तथाच वक्रातिचारवचनम्।

"यदा वक्रातिचाराभ्यां सूर्य्यसंक्रमणं भवेत्।
क्षत्रियाणामसृग्धारास्तदा पिबति मेदिनी॥
न्यूनातिचारे दुर्भिक्षं राष्ट्रं शस्त्रसमाकुलम्।
राजपुत्रसहस्रास्रक्लेकार्द्रा चापि मेदिनी॥"

तथाहि पञ्चपञ्चाशदधिकनवशतसङ्ख्यके शकाब्दे तुलासंक्रान्तिरमावास्यायां भूता। ततोऽतिचारेण वृश्चिकसंक्रान्तिः प्रतिपदि पुनश्च ऋजुगत्या अमावास्यायां धनुःसंक्रान्तिर्भूतो दृष्टः तुलादावधिमासपातः अम्बुजेन लिखितः। अतएव

"लोकस्य फाल्गुने वृष्टौ राज्ञो विजयमादिशेत्।"*

---

(१) तयैव सर्व्वसंक्रान्तिरिति पाठो ग्रन्थान्तरे दृश्यते।

---

* मलिम्लुच एव श्रावणे दैवशयनं स्यादिति। अत्र एवकार इवार्थे अव्ययानामनेकार्थत्वात् मलिम्लुच इवेत्यर्थः तथाचयत्र सौराषाढे अमावास्याद्वयमाचं नतु चान्द्रमासोल्लङ्घनं भवति तत्र यदि यथाश्रुतवचनार्थमादाय हरिशयनोत्कर्षः स्वीक्रियते तदा आषाढमलमासे यथा श्रावणे हरिशयनं भवति तथात्रापि स्यादिति भावः। तस्मात् वचनस्य यथाश्रुतस्यार्थस्यायुक्तत्वात् एवम् आदिवचनानाम् आषाढद्वयसंयुक्तं पौर्णमासीद्वयं यदा इत्यादिवचनानाम् अधिमासप्रदर्शकत्वमेव मलमासज्ञापकत्वमाचम्। मेषादिषट्क एव सौरवैशाखाद्यश्विनपर्य्यन्त एव। तुलाविषुवादि तुलासंक्रान्तिरूपजलविषुवादीत्यर्थः। मेषपर्य्यन्तेन मेषः पर्य्यन्तं सीमा यस्य तेन कार्त्तिकादिचैत्रावधिकेनेत्यर्थः। संक्रान्तितिथिद्वित्वभावं सूर्य्यस्य

इति फलश्रुतिः। फाल्गुने अधिमासादित्यर्थः। तिथ्यन्तरे च बहुश एव वक्रातिचारदर्शनात् अत्रासम्भवः कथमाशङ्क्यताम्*। तथायमपरो दोषः पूर्वदर्शिततुलाधिमासे तुलास्थरव्युपक्रान्तं मासद्वयम् अपरश्च मासो धनुःस्थोपक्रान्त इति वृश्चिकस्थरव्युपक्रान्तस्य मार्गशीर्षस्य लोपः स्यात्†। तथा तस्मिन्नेव वत्सरे अमावास्यायां धनुःसंक्रान्तौ भूतायां विषुवपर्य्यन्तं तस्यामेव संक्रान्तौ वृषादिसंक्रान्तेश्चैकद्विकतिथिवृद्धिनियतत्वात्तत्राप्यधिमासान्तरमिति सार्द्धसंवत्सरद्वयेनैकोऽधिमासः पततीति न स्यात्। अत्रोच्यते "दिवसस्य हरत्यर्कः" इति चन्द्रार्कक्रताहश्छेदेन सार्द्धवत्सरद्वयेन त्रिंशत्तिथीनामेव लाभात्तत्रैव सम्भूयाधिमासव्यातस्य वाचनिकत्वात् अधिमासद्वयं कारणाभावादेव न सम्भ-

---

शीघ्रगमनात् न्यूनकालेन संक्रान्तितिथिवृद्धिभावं तिथिवृद्धित्वं सौरमासादधिककालेन चान्द्रमाससमापनमित्यर्थः। वक्रातिचाराभ्यां रविगतेर्मन्दत्वामन्दत्वाभ्यामित्यर्थः वस्तुतो रवेर्वक्रातिचारासम्भवात्। ततोऽतिचारेण रवेः शीघ्रगत्या। अमुकेन अमुकभट्टेन दृष्टः लिखितश्च ग्रन्थः। यत एव माधवादिभिन्नैरपि अधिमासः अतएवेत्यर्थः। फाल्गुने अधिमासात् लोकस्य वृष्टिर्हर्षः विजयम् आदिशेत् कथयेत्।

* तिथ्यन्तरे तुलासङ्क्रान्त्यवच्छिन्नतिथिसजातीयतिथिभिन्नतिथौ रविगतेर्मन्दत्वामन्दत्वदर्शन सङ्क्रान्तिदर्शनात् अत्र तुलादिषण्मासमध्ये असम्भवः अधिमासस्यासम्भवः।

† दोषान्तरं दर्शयति अथायमपरो दोषः। तदेव निर्दिशति पूर्वदर्शितेत्यादि। तुलास्थरव्यारब्धमासद्वयं तुलास्थरव्यारब्धत्वेन चान्द्रकार्त्तिकद्वयम्। धनुःस्थोपक्रान्तः धनुःस्थरव्यारब्धः इतीति इति हेतौ। तथाहि तुलास्थरव्यारब्धत्वेन चान्द्रकार्त्तिकद्वयानन्तरं धनुस्थरव्यारब्धत्वेन चान्द्रपौषत्वात् चान्द्रकार्त्तिकानन्तरं वृश्चिकस्थरव्यारब्धत्वाभावात् वृश्चिकरव्युपक्रान्तस्य चान्द्रमार्गशीर्षस्य लोप इत्यर्थः।

वति। ननु कोऽयं दृष्टापलापः*। सत्यं तुलादित्यादौ दृश्यमानो नायमधिमासः किन्तूत्पातादधिमाससधर्म्मायम्। अतएव प्रतिपदि वृश्चिकसंक्रान्तौ तस्य तुलारम्भत्वेऽपि† "यां तिथिं समनुप्राप्य" इति शास्त्रतो वृश्चिकारम्भार्हत्वात्तचानारम्भेऽपि शङ्खवेलान्यायेन प्रत्यभिज्ञानाद्भवति मार्गशीर्षपदवाच्यताः‡।

---

* तस्मिन् वत्सरे इति यस्मिन् वत्सरे तुलायाम् अधिमासः तस्मिन्नेव वत्सरे इत्यर्थः। विषुवपर्य्यन्तं मेषसंक्रान्तिपर्य्यन्तम्। तस्यामेव अमावास्यायामेव वृषादिसंक्रान्तेरिति आदिना मिथुनकर्कटयोः परिग्रहः। एकद्विकत्रिकतिथिवृद्धिनियतत्वात् प्रतिपद्द्वितीयातृतीयातिथिवृद्धिनियतत्वात्। तथा च यस्मिन् वत्सरे वृषसंक्रान्तिः प्रतिपदि, मिथुनसंक्रान्तिः द्वितीयायां, कर्कटसंक्रान्तिश्च तृतीयायां भूताः, तस्मिन् एव मेष एव अधिमासान्तरं मलमासान्तरम् एकोऽधिमासः पततीति इति हेतौ न स्यादिति एकवत्सरे मलमासद्वयमिति शेषः। तैरेव त्रिंशत्तिथिभिरेव सम्भूय मिलित्वा अधिमासस्य एकाधिकमासस्यैव वाचनिकत्वात् अधिमासद्वयं न सम्भवतीत्यन्वयः। प्रमाणान्तरापेक्षया प्रत्यक्षस्य स्वतः प्रमाणत्वादाशङ्क्यते नन्वित्यादि कोऽयं कथमित्यर्थः। दृष्टापलापः दृष्टस्य तुलायां मेषे च दृष्टस्य मलमासद्वयस्य कथमपलाप इत्यर्थः।

† स्वीकृत्य समाधत्ते सत्यमित्यादि। दृश्यमानः दृश्यमानोऽपीत्यर्थः। किन्तूत्पातादधिमाससधर्म्मायम् उत्पातेन मलमाससमानधर्म्मा न तु प्रकृतमलमास इत्यर्थः। तथाच संवत्सरप्रदीपे।

"उत्पातेन भवेद्दृश्यस्तु कालस्यातिक्रमः क्वचित्।
न स स्याद्व्यवहाराङ्गमित्याह भगवान्भृगुः॥"

यत एव न प्रकृताधिमासः अतएवेत्यर्थः। तस्य चान्द्रमासस्य।

‡ प्रकृताधिमासत्वाभावे प्रमाणं दर्शयति यां तिथिमित्यादि। तया तिथ्या। शङ्खवेलेति दक्षिणप्रदेशे मध्याह्नसमये प्रतिनियतं शङ्खध्वनिर्भवति तत् श्रुत्वा बुभुक्षवो लोकाः भोजनार्थमागच्छन्ति। अथ कदाचित् तदानीं यदि शङ्खध्वनिर्न भवति इयं शङ्खवेला इत्यवधार्य्य आगच्छन्ति इति न्यायस्यार्थः। प्रत्यभिज्ञानादिति पूर्व्वानुभूतपदार्थस्य इदन्ता-

अतिचारपदाच्च स्वस्थानमतीत्य चरतीत्यमावास्यैव वृश्चिकसंक्रान्तेः स्वस्थानमवसीयते वृषादिसंक्रान्तिषु तु पूर्व्वतिथ्यतिक्रमेऽपि नातिचारपदप्रयोगः शास्त्रे। तत्र तिथिविशेषस्य संक्रान्तिस्थानतया शास्त्रतोऽनधिगमात्। व्यभिचारेण प्रमाणान्तराप्रचारात्। अतएव यदा कन्यायामधिमासपाते प्रतिपदि तुलासंक्रान्तौ भूतायां वक्रगत्या सूर्य्योऽमावास्यायां वृश्चिकं याति पुनः ऋजुगत्या* प्रतिपदि धनुःसंक्रान्तिस्तदा वृश्चिके संक्रान्ति-

---

वच्छेदेनाभेदावगाहिज्ञानं प्रत्यभिज्ञानम्। मार्गशीर्षपदवाच्यता इति तथाहि तुलासंक्रान्तेरमावास्यायां जातत्वात् प्रतिपदि वृश्चिकसंक्रान्तावपि तस्या वृश्चिकसंक्रान्तेरमावास्यायामेव योग्यत्वात् तदुत्तरशुक्लप्रतिपदादिदर्शान्तमासस्य तुलास्थरव्यारब्धत्वेऽपि योग्यतया वृश्चिकस्थरव्यारब्धत्वात् मुख्यचान्द्रमार्गशीर्षत्वमित्यर्थः।

* तदेवोपपादयति अतिचारपदादित्यादि। तत्र मेषादौ अधिमासस्य प्रक्षेपत्वादेवोपपादयति वृषादिसंक्रान्तिषु त्विति। पूर्व्वतिथ्यतिक्रमेऽपि अमावास्यामतिक्रम्य प्रतिपदि वृषादिसंक्रान्तिषु सतीषु इत्यर्थः। नातिचारपदप्रयोगः शास्त्रे शास्त्रे अतिचारपदप्रयोगो नास्तीत्यर्थः। तथाच "यां तिथिं समनुप्राप्य तुलां गच्छतीति" वचनमुक्त्वा यदा वक्रातिचाराभ्यामिति वचनस्योक्तत्वात् पूर्व्ववचने "यावत् मेषं न गच्छती"त्युक्तत्वाच्च प्रतिपदि वृषादिसंक्रान्तौ भूतायामपि नातिचारपदप्रयोगः सम्भवतीति भावः। तत्र मेषवृषादिसंक्रान्तिषु तिथिविशेषस्य अमावास्यादेः संक्रान्तिस्थानतया मेषवृषादिसंक्रान्तिस्थानतया इत्यर्थः तथाच "यावन्मेषं न गच्छति" इत्युक्तत्वात्। मीनपर्य्यन्तस्यैव अमावास्यायां योग्यता न वृषादेरिति भावः। व्यभिचारेण अमावास्याभिन्नतिथौ वृषादिसंक्रान्तिदर्शनेन प्रमाणान्तराप्रचारात् प्रमाणान्तरसत्ताया अभावात्। यत एव तुलादिषण्णासे तुलासङ्क्रान्त्यवच्छिन्नतिथिसजातीयतिथौ मीनपर्य्यन्तसङ्क्रान्तेर्योग्यतास्वीकारः अतएवेत्यर्थः। वक्रगत्या मन्दगत्या सूर्य्यस्य वक्रातिचाराभावात्। ऋजुगत्या स्वभावगत्या इत्यर्थः।

शून्यः प्रतिपदादिदर्शान्तो मासः पतति तस्य द्वश्चिकारब्धत्वेन पूर्वस्य च कन्यारब्धत्वेनाकार्त्तिकत्वात् चान्द्रकार्त्तिकलोपादेवोत्थानं विफलं स्यात्*। तुलादित्यगताश्विनशुक्लपक्षस्य दुर्गोत्थानार्थत्वात्। द्वश्चिकसंक्रान्त्यमावास्यायाश्च लक्ष्मीप्रबोधार्थत्वात्। 'तस्मिन् शुक्ले सदा विष्णुरिति' वचनेन लक्ष्मीप्रबोधनान्तरितशुक्लपक्ष एव देवोत्थानं सदेति नियमात्†। ततश्च वक्रातिचारक्रत-

---

* द्वश्चिके सङ्क्रान्तिशून्यः प्रतिपदादिदर्शान्तो मासः पततीति। अमावास्यायां द्वश्चिकसङ्क्रान्तेर्जातत्वात् तदुत्तरशुक्लप्रतिपदादिदर्शान्तो मासः द्वश्चिकसङ्क्रान्तिशून्यो भवतीत्यर्थः। तस्य चान्द्रमासस्य द्वश्चिकारब्धत्वेन द्वश्चिकस्थरव्यारब्धत्वेन। पूर्वस्य च तत्पूर्वचान्द्रमासस्य च कन्यारब्धत्वेन कन्यास्थरव्यारब्धत्वेन अकार्त्तिकत्वात्। तथाच तुलासङ्क्रान्तेः प्रतिपदि जातत्वात्। स्वाव्यवहितप्राक्तनावच्छिन्नकन्यास्थरव्यारब्धतया तुलास्थरव्यारब्धत्वाभावेन च तच्चान्द्रमासस्य

"मीनादिस्थो रविर्यैषामारब्धप्रथमे क्षणे" इति व्यासवचनात्

आश्विनत्वेन कार्त्तिकत्वाभावादित्यर्थः। देवोत्थानं हरेरुत्थानं, विफलं स्यादिति चान्द्रकार्त्तिके तस्य विधानात्।

तथाच। "अमावास्यां तुलादित्ये लक्ष्मीर्निद्रां विमुञ्चति।

तस्मिन् शुक्ले सदा विष्णुस्तुलायामथ द्वश्चिके॥"

इति तस्मिन् तदुत्तरशुक्लपक्षे तुलादित्यगतामावास्योत्तरशुक्लपक्षस्तु चान्द्रकार्त्तिकस्यैव भवति अन्यस्यासम्भवात्।

† ननु "तुलायामथ द्वश्चिके" इत्यनेन तुलायां शुक्लपक्षे हरिबोधनविधानात् तुलागताश्विनशुक्लपक्षे हरिप्रबोधनं भवतु इत्यत आह तुलादित्यगताश्विनशुक्लपक्षस्य दुर्गोत्थानार्थत्वात्। तथाहि आश्विने दुर्गोत्थानविधानात् तत्परतः तुलायाञ्च हरिप्रबोधनविधानाच्च तुलागताश्विनशुक्लपक्षे दुर्गोत्थानमेवोचितं न तु विष्णूत्थानम्। तथाच—

मासलङ्घनेऽपि 'यां तिथिं समनुप्राप्य' वचनेन प्रतिपद एव संक्रान्त्यर्हज्ञापनात्। तुलोपक्रान्त्यर्ह एवासौ मास इति तस्य कार्त्तिकत्वात्तत्रैव देवोत्थानमित्यवश्यं वाच्यम्। अतएवासौ नाधिमासो न मलिम्लुचः* साऽर्द्धवत्सरद्वये त्रिंशत्तिथिभिरेव पतितस्य तथात्वात्। अतएव प्रतिपदि तुलासंक्रान्तौ तुलायां वक्रेणामावास्यादौ यदि वृश्चिकं रविर्व्रजति तदैकस्याः कन्यागतत्वादपरस्य वृश्चिकगतत्वात् 'अमावास्यां तुलादित्ये लक्ष्मीर्निद्रां विमुञ्चतीति' नैकत्रापि स्यात्तदभावाच्च, तस्मिन् शुक्ले सदा विष्णुरित्येतदपि, व्याहन्येत†। तेन तत्रापि यैवासौ वक्रेण वृश्चिकगता

---

"कर्किण्यर्के हरौ सुप्ते शक्रध्वजक्रियाश्विने।
तुलायां बोधयेत् देवौ वृश्चिके तु जनार्दनमिति"

वचनविरोधः स्यात्। सदेति "तस्मिन् शुक्ले सदा विष्णु"रितिवचनस्यसदापदेनेत्यर्थः।

* उपसंहरति ततश्चेति। वक्रातिचारकृतमासोल्लङ्घनेऽपि रवेः मान्द्यन्द्राशीघ्रगतिकृतचान्द्रमासोल्लङ्घनेऽपि। सङ्क्रान्त्यर्हत्वज्ञापनात् वृश्चिकसङ्क्रान्तियोग्यत्वज्ञापनात्। तुलोपक्रान्त्यर्ह एवासौ मासः तुलास्थरव्यारब्ध एकोऽसौ मासः इति हेतौ देवोत्थानं हरेरुत्थानम् अतएव योग्यतया तस्य कार्त्तिकत्वस्वीकारादेव योग्यतावलम्बनेन स्वीकृतः असौ कार्त्तिकः यतो नाधिमासः नाधिकमासप्रयोजकः अतो न मलिम्लुचः न मलमास इत्यर्थः।

† साऽर्द्धसंवत्सरद्वये इत्यादि। साऽर्द्धसंवत्सरद्वये त्रिंशत्तिथिभिरेव साऽर्द्धसंवत्सरद्वयसञ्चितत्रिंशत्तिथिभिरेव, पतितस्य आगतस्य चान्द्रमासस्य तथात्वात् मलमासत्वात्। प्रतिबन्धिं दर्शयति अतएवेति। क्रमसञ्चितत्रिंशत्तिथिभिः आगतस्य चान्द्रमासस्य मलमासत्वादेव एकस्याः पूर्व्वामावास्यायाः कन्यागतत्वात् प्रतिपदि तुलासङ्क्रान्तौ सत्यां सुतरां पूर्व्वामावास्यायाः कन्यागतत्वम्। अपरस्यापरामावास्यायाः वृश्चिकगतत्वात् अमावास्यायां वृश्चिकसङ्क्रान्तौ सत्यां सुतरां परामावास्यायाः वृश्चिकगतत्वम्। इति इति वचनोक्तं तुलादित्ये अमावास्यायां लक्ष्म्या उत्थानम् एकस्यामपि अमावास्यायां न स्यात् अमावास्यायास्तुला-

सा तुलादित्यस्यैवोत्पाता वृश्चिकस्थेत्यर्हतया तत्रैव सुखरात्रि-रुषः काल इत्यादि* क्रियत इत्यविरोधः। यदा पुनरमावास्या-यामेव तुलासंक्रान्तिर्भूता न भूतो माधवादिषट्केऽधिमासपातः अनन्तरमतिचारेण प्रतिपदि वृश्चिकसंक्रान्तौ वृत्तायामपरा अपि संक्रान्तयो विषुवपर्य्यन्तं प्रतिपद्येव भवन्ति तदाधिमासान्तरस्या-पतितत्वात् पूर्व्वाधिमासाच्चार्द्धतृतीयवत्सरसञ्चितदिवसैरधिमास-स्यावश्यभावात् अन्यस्य चानुपलम्भात् अत्र च बाधकाभावेन

---

दित्यगतत्वाभावात् तदभावाच्च लक्ष्म्या उत्थानाभावाच्च। व्याहन्येत लक्ष्म्या उत्थानात् परतो हरेरुत्थानविधानात्।

* उपसंहरति तेनेति। तत्रापि अमावास्यायां वृश्चिकसङ्क्रान्तावपि या एवास्यै अमावास्या वृश्चिकगता सामावास्या तुलादित्यस्यैव उपगता वृश्चिकस्था इति हेतोः अर्हतया प्रतिपदि वृश्चिकसङ्क्रान्तेः स्थानयोग्यतया तत्रैव तुलादित्यगतामावास्यायामेव "सुखरात्रिरुषः काले" इत्यादीति। तथाच भविष्योक्तं यथा—

"सुखरात्रिरुषः काले प्रदीपोज्ज्वलितालये।
बन्धुबन्धूनबन्धूंश्च वाचा कुशलयार्चयेत्॥
प्रदीपवन्दनं कार्य्यं लक्ष्मीमङ्गलहेतवे।
गोरोचनाचतत्रैव दद्यादङ्गेषु सर्व्वतः॥
विश्वरूपस्य भार्य्यासि पद्मे पद्मालये शुभे।
महालक्ष्मि नमस्तुभ्यं सुखरात्रिं कुरुष्व मे॥
वर्षाकाले महाघोरे यन्मया दुष्कृतं कृतम्।
सुखरात्रिप्रभातेऽद्य तन्मे लक्ष्मीर्व्यपोहतु॥
या रात्रिः सर्व्वभूतानां या च देवेष्ववस्थिता।
संवत्सरप्रिया या च सा ममास्तु सुमङ्गला॥" इत्यादि।

तुलादित्य एव संक्रान्तिशून्यस्य मासस्य पश्चात् कर्त्तव्यसंक्रान्ति-तिथ्यतिक्रमस्य इदानीमेव कृतत्वमवधार्य्याधिमासत्वं निर्णीयते समाधानान्तरं पुनरन्यत्र पश्यामः अतएव* नाशङ्कितमिदं कैश्चित्। कथं पुनरसावधिमासो ज्ञेय इत्यपेक्षायामाह परि-शिष्टः†।

"तस्यार्कौ दर्शकश्चैकराशौ दर्शद्वयातिगः।
मलिम्लुचः स विज्ञेयः कर्म्मणां फलनाशकृत्॥"

एकस्मिन्राशौ सूर्य्यौ दर्शद्वयमतिक्रम्य गच्छन्नधिमासं दर्शयति। सहजगत्या न, वक्रातिचाराभ्याम्। एतच्चतुर्दश्याममावास्यायां वा पूर्व्वसंक्रान्तौ प्रतिपदादिके च परसंक्रान्तौ भवति। तदाहि प्रतिपदादिदर्शान्तः सूर्य्यसंक्रान्तिशून्योऽधिमास एव मलिम्लुचः।

* अविरोध इति लक्ष्मीप्रबोधहरिप्रबोधादेरविरोध इत्यर्थः। अतिचारेण शीघ्रगत्या विषुवपर्य्यन्तं मेषपर्य्यन्तम् अधिमासान्तरस्य मलमासान्तरस्य अर्द्धतृतीयवत्सरसञ्चिततिथिसैः अर्द्धतृतीयं यस्य इति सार्द्धवत्सरद्वयसञ्चिततिथिभिरित्यर्थः। अन्यस्य माधवादिषट्कपति-तस्य अनुपलभ्यत्वात् अदृष्टत्वात् अत्र च तुलादित्ये च बाधकाभावेन सार्द्धवत्सरद्वय-सञ्चिततिथ्याकर्षादिति शेषः। यत एव तुलादिषट्के मलमासस्यावश्यकत्वम् अत-एवेत्यर्थः।

† नाशङ्कितमिदं कैश्चिदिति। यद्यपि तुलादेरनियतस्थानतया आशङ्का जायते तथापि नियतस्थानेषु माधवादिषट्केषु अधिमासान्तरादर्शनात् एकस्मात् मलमासात् तृतीयाब्दे मलमासान्तरस्यावश्यम्भावादेव तुलादौ नाशङ्कनीयमिति भावः। कथं पुन-रधिमासो ज्ञेय इति अनियतस्थानतया तुलादौ कथमधिमासो ज्ञातव्य इत्यर्थः। इत्यपेक्षायाम् इत्याकाङ्क्षानिवृत्तये आह मलमासज्ञापकलक्षणमिति शेषः।

तदाह परिशिष्टः।

"अमावास्यापरिच्छिन्नं रविसंक्रान्तिवर्ज्जितम्।
अधिमासं विजानीयात् गर्हितं सर्व्वकर्म्मसु॥"

अमावास्यापरिच्छिन्नमाद्यन्तयोरमावास्यान्तद्वयक्रोड़ीकृतम्।

तथापरमाह।

"द्वौ तिथ्यन्तावेकवारे यस्मिन् स स्याद्दिनक्षयः।
अधिमासः स विज्ञेयः संक्रान्तिर्यत्र नो रवेः*॥"

अतएवाह।

---

* तस्यार्क इति। एकराशौ दर्शद्वयातिगः स्वाव्यवहितपूर्व्वत्वस्वघटकत्वोभयसम्बन्धेन दर्शद्वयान्त्यक्षणद्वयमतिक्रम्य वर्त्तमानोऽर्कः तस्य मलमासस्य दर्शकः ज्ञापकः। स्वपदं मलमासत्वेनाभिधेयमानचान्द्रमासपरं स मलमासः यज्ञानां फलनाशकृत् विज्ञेय इत्वन्वयः। दर्शद्वयं दर्शद्वयान्त्यक्षणद्वयम्। दर्शयति ज्ञापयति। सहजगत्या नेति न भवतीत्यर्थः। कैन भवतीत्यपेक्षायामाह वक्रातिचाराभ्यां मन्दशीघ्रगतिभ्यामित्यर्थः। एतच्च मलमासस्यादनं च चतुर्दृश्यामिति मलमासस्यावश्यन्यावश्यापनार्थमुक्तम्। प्रतिपदादिदर्शान्तः सुख्यचान्द्र इत्यर्थः। अधिमास एवेति अधिमास एवेत्यर्थः। अत्र एवकारस्य व्यत्ययेन सूर्य्यसंक्रान्तिशून्य एव अधिमासः मलिम्लुच इत्यन्वयः। तथाच पूर्व्वामावास्यान्त्यक्षणे क्रियोत्पत्तौ प्रतिपदाद्यक्षणे राश्यन्तरयोगे तच्छुक्लप्रतिपदादिदर्शान्तमासस्य पूर्व्वराशिस्थरव्यारब्धतया पूर्व्वमासत्वेन मासद्वयाभावात् रविसंक्रान्तिशून्यत्वाभावाच्च न मलमासत्वमिति भावः। अमावास्यापरिच्छिन्नमित्यस्यार्थमाह आद्यन्तयोरित्यादि। आद्यन्तयोरिति सप्तम्या इत्तित्वमर्थः। अमावास्यान्तद्वयक्रोड़ीकृतं स्वाव्यवहितपूर्व्वत्वस्वघटकत्वोभयसम्बन्धेन संक्रान्तिशून्यामावास्याद्वयान्त्यक्षणद्वयविशिष्टम् एकराशिवृत्तिचान्द्रमासं सर्व्वकर्म्मसु गर्हितं मलमासं जानीयादित्यन्वयः। यस्मिन् सावनात्मकैकवारे। यच्च चान्द्रमासे रविसंक्रान्तिर्नो नास्ति नो निषेधे।

"वत्सरान्तर्गतः पापो यज्ञानां फलनाशकृत् ।
नैर्ऋतैर्यातुधाद्यैः समाक्रान्तो विनामकः ॥"

विरुद्धनामको विनामकः तस्य मलिम्लुचत्वात् न तु नामशून्यत्वात् । 'एकसंज्ञौ यदा मासाविति' विरोधात् तस्यापि परमासस्यैव तद्राशिस्थसूर्य्यारब्धत्वेन तन्नामत्वात् । अतएवैकनामतया एकत्वमेव स्मरन्ति ।

"एवं षष्टिदिनो मासस्तदर्द्धन्तु मलिम्लुचः ।
त्यक्त्वा तदुत्तरे कुर्य्यात् पित्रादेवादिकाः क्रियाः ॥"
"षष्ट्या तु दिवसैर्मासः कथितो बादरायणैः ।
पूर्व्वमर्द्धं परित्यज्य मासमुत्तरमाश्रयेत् ॥"

सौरत्वे च सनामकत्वमविवादात् । यद्वा विनामकत्वं नामशून्यत्वमौपचारिकम् आषाढ़ादिनाम्ना चान्द्रस्य कर्म्माङ्गतया विधौ तस्याननुप्रवेशात् सदपि नामासदेव पुत्रोऽप्यपुत्र इतिवत्*। अतो

---

* विरुद्धनामकत्वे हेतुमाह मलिम्लुचत्वात् मलिम्लुचनामकत्वात् एकसंज्ञौ एकनामकौ विरोधात् मलमासस्य नामशून्यत्वे एकनामकत्वविरोधात् । यत एवैकराशिसूर्य्यारब्धत्वेन एकमासत्वम् अतएवेत्यर्थः । षष्टिदिनः षष्टितिथ्यात्मकः तदर्द्धन्तु त्रिंशत्तिथ्यात्मकः त्यक्त्वा तन्मलमासं त्यक्त्वा उत्तरे शुद्धमासि । दिवसैस्तिथिभिः । सौरत्वे च सनामकत्वमविवादात् । अविवादादिति एकनामसौरमासद्वयासम्भवादिति भावः । औपचारिकं कर्म्मानर्हत्वेन गौणं तत्तन्मासविहितकर्म्मानर्हत्वप्रयोजकम् । विधौ मासविहितकर्म्मविधाने तस्य मलमासस्य अननुप्रवेशात् मलमासे सावकाशकर्म्मनिषेधेन वैधकर्म्माङ्गतया प्रवेशाभावात् सदपि नामेति मलमासस्येति शेषः । असदेव तत्तन्नामकमासविहितकर्म्माप्रयोजकत्वेन असत्तुल्यमित्यर्थः । अत्र दृष्टान्तमाह पुत्रोऽप्यपुत्रवदिति अन्वादिरिति शेषः ।

मेषगरविसंक्रान्तिः शशिमासे भवति यत्र तच्चैत्रम् । एवं वैशाखादि वृषादिसंक्रान्तियोगेन इति वचनम् । कर्म्माङ्गचैत्राद्यभिप्रायेण मुख्यार्थमेव । अतएव गृह्यपरिशिष्टम् ।

"मलं वदन्ति कालस्य मासं कालविदो जनाः ।
नेहेतात्र विशेषेज्यामन्यत्रावश्यकादिधेः ॥"

आषाढ़ादिपदैश्चान्द्रमासेषु विशेषेण विहितामिज्याम् । इज्यापदं वैदिककर्म्मोपलक्षणपरम् । तत्रेहेत न चेष्टेत ।

तथा ज्योतिःशास्त्रम् ।

"यदा शशी याति गभस्तिमण्डलं
दिवाकरः संक्रमणं करोत्यधः (१) ।
तदाधिमासः कथितो विरिञ्चिना
विवाहयात्रोत्सवयज्ञदूषकः (२) ॥"

अमावास्यान्ते चन्द्रस्य सूर्य्यमण्डलप्रवेशस्ततोऽधः पश्चात् प्रतिपदीत्यर्थः । स च विवाहादिदूषकः ।

तथा ज्योतिःपराशरः ।

"अग्न्याधेयं प्रतिष्ठाञ्च यज्ञदानव्रतानि च ।
देवव्रतवृषोत्सर्गचूड़ाकरणमेखलाः ।

---

(१) हेमाद्रौ करीत्यधः इत्यत्र करीत्यनु इति पठितम् ।

(२) दूषक इत्यत्र दोषकृदिति पठितं हेमाद्रौ ।

---

तथाच यथा अन्धपतितादिः पुत्रोऽपि स्वजन्यपुंस्त्ववानपि पुत्रकर्त्तव्यश्राद्धादिकर्म्मानधिकारितया अपुत्रतुल्यः तद्वदित्यर्थः ।

माङ्गल्यमभिषेकञ्च मलमासे विवर्जयेत् ॥"

दानं महादानं यदाह ।

"वापीकूपतड़ागादिप्रतिष्ठां यज्ञकर्म्म च ।
न कुर्य्यान्मलमासे च महादानव्रतानि च ॥"

महादानानि तुलापुरुषादीनि* तेष्वेव षोड़शसु महादानेक-

---

* अत इति । मलमासस्य कर्म्माङ्गतया असत्त्वात् । अग्निमासे चान्द्रमासे इति वचनं मासलक्षणाभिप्रायकं ब्रह्मगुप्तवाक्यं कर्म्माङ्गचैत्राद्यभिप्रायेण वैधकर्म्माङ्गीभूतचैत्रादि-मासलक्षणाभिप्रायेण मुख्यार्थमेवेति । तेन मलमासस्य वैधकर्म्माङ्गतया मुख्यार्थाभावेऽपि न क्षतिरिति भावः । यतो मलमासस्य न कर्म्माङ्गत्वम् अतएवैत्यर्थः । कालस्य शुक्लप्रति-पदादिदर्शान्तकालस्य मलमासं वदन्ति इत्यन्वयः । आवश्यकादिधिः आवश्यककर्त्तव्यनित्य-कर्म्मणोऽन्यत्र इह मलमासे विश्वेदेव्यां विश्वेदेव्यादिकम् । वैदिककर्म्मोपलक्षणपरमिति वैदिककर्म्मपदेनात्र सत्त्ववत्तुल्यकालकाम्यकर्म्म प्रातिष्ठिकनिषिद्धकर्म्म च उच्यते । गर्भस्रि-मण्डलं सूर्य्यमण्डलम् । अघः अमावास्यान्ते शुक्लप्रतिपदि । उत्सवः उपनयनादिः दृषकः दोषजनकः । अग्न्याधेयम् अग्न्याधानं श्रौताग्न्यादेर्ग्रहणं प्रतिष्ठां मठादेः । यज्ञदान-व्रतानि काम्ययागमहादानकाम्यव्रतानि । देवव्रतवृषोत्सर्गः देवोद्दिश्यत्यक्तव्रततरुपवृषोत्सर्गः मेखला उपनयनम् । माङ्गल्यं सुख्यकालाकृतान्नप्राश्नादिमङ्गलकर्म्म । अभिषेकः राज्या-भिषेकः । महादानानि तुलापुरुषादीनीति । यथा मत्स्यपुराणम् ।

"अथातः संप्रवक्ष्यामि महादानानुकीर्त्तनम् ।
आद्यन्तु सर्व्वदानानां तुलापुरुषसंज्ञितम् ॥
हिरण्यगर्भदानञ्च ब्रह्माण्डं तदनन्तरम् ।
कल्पपादपदानञ्च गोसहस्रञ्च पञ्चमम् ॥
हिरण्यकामधेनुञ्च हिरण्याश्वस्तथैव च ।
पञ्चलाङ्गलकं तद्वद्धरादानं तथैव च ॥
हिरण्याश्वरथस्तद्वद्विमहस्तिरथस्तथा ।
द्वादशं विष्णुचक्रञ्च ततः कल्पलतात्मकम् ॥

प्रवृत्तिनिमित्तस्य कुण्डमण्डपादीतिकर्त्तव्यताविशेषस्य सम्भवात्*।

यत्तु ।

"कनकाश्वतिला नागा(१) दासीरथमहीगृहाः ।
कन्या च कपिला धेनुर्महादानानि वै दश ॥"

तत् स्तुत्यर्थम् । अन्यथा बहुशक्तिकल्पनापत्तेः सर्व्वत्रानुगतस्यैकरूपस्याभावात् । अतो महादाननिषेधेन † सुवर्णशृङ्गिकादेर्वा

(१) कनकाश्वतिला गाव इति यत्रान्तरे पठितम् ।

सप्तसागरदानञ्च रत्नधेनुस्तथैव च ।
महाभूतघटं तद्वत् षोड़शः परिकीर्त्तितः ॥

* महादानैकप्रवृत्तिनिमित्तस्य तुलापुरुषादिषोड़शमहादानानुगतशक्यतावच्छेदकधर्म्मस्य । कुण्डमण्डपादीतिकर्त्तव्यताविशेषस्य कुण्डः खातविशेषः मण्डपो गृहविशेषः । आदिना विनायकादिपञ्चाशद्देवताहोमपरिग्रहः । एते इतिकर्त्तव्यताविशेषा अङ्गविशेषा यस्य तादृशस्य । तथाच कुण्डमण्डपविनायकादिपञ्चाशद्देवताहोमाङ्गकदानत्वमेव तुलापुरुषादिषोड़शमहादानानुगतैकशक्यतावच्छेदकं धर्म्मं महादानलक्षणम् । अत्र विनायकादिपञ्चाशद्देवताहोमाङ्गकत्वनिवेशात् कुण्डमण्डपाङ्गकत्वेऽपि मठदानस्य न महादानत्वापत्तिः । तत्र विनायकादिपञ्चाशद्देवताहोमाश्रवणात् स च होमो महादान एव भूयते यथा मत्स्यपुराणे "महाभूतघटस्तद्वत् षोड़शः परिकीर्त्तितः ।" इत्युक्त्वा—

"विनायकादिग्रहलोकपालवस्वष्टकादित्यमरुद्गणानाम् ।
ब्रह्माच्युतेशानवनस्पतीनां स्वतत्वतो होमचतुष्टयं स्यात् ॥" इत्युक्तम् ।

विनायकादिः षट् नव ग्रहाः दश दिक्पाला अष्टौ वसवः द्वादशादित्याः मरुद्गण एकः ब्रह्मादीनां चतुष्टयमिति पञ्चाशत् । तुलापुरुषादिदानानामिव कनकाश्वादिदानानामपि महादानत्वश्रुतेः ।

† एतेषां महादानत्वे प्राङ्निर्द्दिष्टषोड़शसंख्याकीर्त्तनं व्यर्थं स्यादित्यत आशङ्क्यते यत्त्विति । कनकं सुवर्णनिर्म्मितशृङ्गि नागः हस्ती मही भूखण्डम् । स्तुत्यर्थं प्रशंसार्थं न

दानमनिषिद्धमेव*। अनादरणन्तु (१) प्रामाण्यैकतया अन्यथा समाधानं कष्टावहम्†। तथा नष्टभार्गवादावप्येतन्निषिद्धं यथा।

"बाल्ये वा यदि वा वृद्धे शुक्रे चास्तमुपागते।
मलमास इवैतानि वर्जयेद्देवदर्शनम्॥"

देवदर्शनं चानादिदेवतायाः। यदाह।

"अनादिदेवतां दृष्ट्वा शुचः स्युर्नष्टभार्गवे।
मलिम्लुचेऽप्यनावृत्तं तीर्थस्नानमपि त्यजेत्॥

पूर्वार्द्धेन दर्शने दोषमात्रकीर्त्तनान्निषेधकल्पनातोऽनुषङ्गस्य बलवत्त्वात् त्यजेदित्यनुषज्यते। दर्शनं त्यजेदित्यर्थः। अनावृत्तमिति च न तीर्थस्नानमित्यनेनान्वितम्। द्वयोरपि कर्म्मकारकत्वात्

(१) अनाकरणन्तु क्वचित्पुस्तके पाठः।

तु वास्तविकमहादानम्। अन्यथा महादानस्वीकारे बहुशक्तिकल्पनापत्तेः नानाशक्तिकल्पनापत्तेः। ननु वचनबलात् नानाशक्तिकल्पना अस्तु को दोषः इत्यत आह सर्व्वत्रानुगतस्यैकरूपस्याभावादिति। कनकाश्वादिदशानुगतैकशक्यतावच्छेदकधर्म्मस्याभावादित्यर्थः। अत इति कनकाश्वादिदानस्य गौणमहादानत्वात्।

* अस्यसाहचर्य्यात् कनकशब्दस्य कनकनिर्म्मितशक्तिकपरत्वेन विकल्प्यते सुवर्णशक्तिकादैर्वेति। ननु कनकाश्व इति समस्तैकपदस्वीकारेण सुवर्णनिर्म्मिताश्व एवार्थोऽस्तु, किमिति कनकपदलक्षणया सुवर्णनिर्म्मितशक्तिकार्थोऽङ्गीक्रियते इति चेन्न; तथात्वे "महादानानि वै दश" इति दशसंख्याकीर्त्तनानुपपत्तेः।

† अनिषिद्धमेवेति। तेषां महादानत्वाभावात् महादाननिषेधेन तेषां निषिद्धत्वप्रसक्तेरिति भावः। अनादरणन्त्वित्यादि। तेषां मुख्यमहादानत्वखण्डनेन गौणमहादानत्वकल्पनरूपादरणन्तु। प्रामाण्यैकतया दशानुगतैकशक्यतावच्छेदकधर्म्मेण। अन्यथा समाधानं गौणार्थभिन्नप्रकारकसमाधानं कष्टावहं दुष्करम्।

त्यज्येदित्यनेनैवान्वयः*। परम्परान्वयस्त्वेकत्यजतिक्रियान्वयार्थः। चतुरो मुष्टीर्निर्वपतीतिवत्। स च देवतादर्शनेऽप्यविशिष्टः। तस्यापि त्यज्येदित्यनेनैवान्वयात्†। अतो वचनान्तरेषु देवतादर्शनं देवताविलोकनमित्यादिसामान्यपदानामनाहृतदर्शनपरत्वमेवानादिदेवताज्ञानार्थमेव तदपेक्षत्वात्। अन्यथा देवतामात्र-

* तथेति। यथा मलमासे एषां निषेधस्तथा नष्टभार्गवादावपि शुक्रास्तादावपीत्यर्थः। अनादिदेवताया: श्रीपुरुषोत्तमादेः। श्रीविश्वेश्वरस्यानादिदेवतात्वेऽपि "न ह्यहस्तोदयक्रतौ दोषो विश्वेश्वरालये" इति काशीखण्डीयप्रतिप्रसवात् तद्दर्शने न दोषः इति। दोषमात्रकीर्त्तनादिति शुचः स्वरित्यनेनेति शेषः। अनुषङ्गस्त्वेकैकान्वितपदस्यान्वयार्थमन्यचानुसन्धानमनुषङ्गः। न तीर्थस्नानमित्यनेन न तीर्थस्नानमात्रमित्यनेन द्वयोरपि अनाहृततीर्थस्नानयोरपि।

† ननु द्वयोरपि कर्मकारकत्वात् त्यजेदित्यनेनैवान्वय इत्युक्तं कथं संगच्छते। धात्वर्थावच्छेदकफलशालिनः एव कर्मत्वनियमात्। प्रकृते वर्जनार्थत्यजधात्वर्थतावच्छेदकीभूतकरणाभावफलस्य प्रतियोगितासम्बन्धेन तीर्थस्नान एव साक्षादन्वयः सम्भवति न तु विशेषणीभूतानाहृते इत्यत आह परम्परान्वयस्त्वेकत्यजतिक्रियान्वयार्थः इति। एकत्यजतिक्रियान्वयार्थः एकत्यजतिक्रियाफलान्वयार्थ इत्यर्थः तथाच विशेष्यविशेषणभावस्थले विशेष्यान्वयिक्रियाफलस्य परम्परया विशेषणान्वयस्वीकारात् अन्यथा सविशेष्यान्वयिनः अन्वयित्वं विशेषणत्वमिति नियमभङ्गापत्तेः। अत्र दृष्टान्तं दर्शयति चतुरो मुष्टीर्निर्वपतीतिवदिति मुष्टिविशेषणस्य चतुर इत्यस्य परम्परया निर्वपणक्रियान्वयात् यथा कर्मत्वं तथा प्रकृतेऽपीत्यर्थः। स च त्यजेदित्यस्यान्वयः। देवतादर्शने अनादिदेवतादर्शने अविशिष्टः अबाधितः तस्य देवतादर्शनस्य। अनाहृतदर्शनपरत्वमेवेति अत इति अनादिदेवतां दृष्ट्वा इति पूर्वार्द्धस्थित अनादिदेवतादर्शने। मलमासेऽप्यनाहृतमिति परार्द्धीयानाहृतविशेषणात्।

दर्शननिषेध एव स्यात्। अस्य च विशेषवचननिरपेक्षत्वात्*। आवृत्तदर्शननिषेधे च तावत्कालमनादिदेवतानामपूज्यताप्यापद्येत। विधिनिषेधानुपालकस्यैव शास्त्रतो देवपूजकत्वात्†। धवलेनाप्युक्तं प्राथमिकानादिदेवतादर्शननिषेधोऽयमिति। अन्यैस्तु न चिन्तितमिदम्।

---

* वचनान्तरेष्विति। "अस्ते सन्ध्यागते बालि भृगौ मासि मलिम्लुचे।
देवतादर्शनं दानं महादानं विवर्ज्जयेदिति स्मृतौ—
भृगावस्ते गुरौ सिंहे गुर्व्वादित्ये मलिम्लुचे।
त्यजेद्दानं महादानं व्रतं देवविलोकनमिति लघुहारीतवचने—
तीर्थस्नानविवाहदेवभवनं मन्त्रादि देवेक्षणं
दूरेणैव जिजीविषुः परिहरेदस्तं गते भार्गवे—

इति सोमशेखराख्यनिबन्धधृतवचने च देवतादर्शनं देवविलोकनमित्यादिसामान्यपदानां स्मृतिवचनस्थदेवतादर्शनं लघुहारीतवचनस्थदेवविलोकनं सोमशेखराख्यनिबन्धधृतवचनस्थादिपदयाह्यदेवेक्षणमिति सामान्यशब्दानाम् अनावृत्तपरत्वम् अनावृत्तविशेषणविशिष्टपरत्वमेवेत्यर्थः। अनादिदेवताज्ञानार्थमेव तदपेक्ष्यत्वादिति अनादिदेवतां दृष्ट्वा ऋचः सुरित्यादिवचने देवताया अनादित्वविशेषणात् तदेकवाक्यतया वचनान्तरस्थदर्शनीयदेवताया अपि तदपेक्षासत्त्वात् अन्यथा यथाश्रुतार्थस्वीकारे च देवतामात्रदर्शननिषेधः स्यादिति दृष्टापत्तौ प्रागुक्तं देवताया अनादित्वविशेषणं व्यर्थं स्यादिति भावः। अस्य च विशेषणस्य अनावृत्तविशेषणस्य विशेषवचननिरपेक्षत्वात् विशेषवचननिरपेक्षप्रवृत्तत्वात्।

† प्रतिबन्धिं दर्शयति आवृत्तेत्यादि। तावत्कालं समयाशुद्धिसत्ताकालम् अपूज्यता आपद्येत इति दर्शनं विना पूजनासम्भवादिति भावः। विधिनिषेधानुपालकस्यैव शास्त्रतो देवपूजकत्वात् इति तु पूजनाभावापत्तौ हेतुः। तथाच विधिनिषेधानुपालकत्वे समनियतशास्त्राधीनदेवपूजकत्वनियमात्तावत्कालापूजने निषेधानुपालकत्वसमनियतदेवपूजकत्वनियमो व्याहन्येत इति गन्थकर्त्तुराशयः।

बालवृद्धकालमाह।

"पक्षं वृद्धस्तु पूर्व्वेण दशाहं पश्चिमेन तु।
प्रत्युत्थाने दशाहन्तु पूर्व्वेण तु दिनत्रयम्॥"

तथा।

"प्राच्यामस्तङ्गमने त्रयोदश चतुर्दशान्यपरे।
प्रागुदये पञ्च निशा भृगुसूनोः षड़परे ज्ञेयाः॥"

तथा पठन्ति।

"जीवे केशरिसंस्थिते भृगुसुते नष्टे तथा बालके
वृद्धे दर्शयुगाग्निभे(१) रवियुते जीवे च मासे बुधः।
विद्यां पार्थिवदर्शनं सुरगृहं कूपं मठं मन्दिरं
कुर्य्यान्नैव विवाहनञ्च नगरारम्भन्तड़ागानि च॥"

तथा।

"रविणा संयुते जीवे सिंहसंस्थे गुरौ तथा।
अस्तङ्गते तथा शुक्रे बाले वृद्धे तथैव च॥
व्रतं यानं विवाहञ्च विद्यां पार्थिवदर्शनम्।
देवतायतनं कूपतड़ागाराममन्दिरम्॥
देवादीनां प्रतिष्ठाञ्च यागं कर्णस्य वेधनम्।
सर्व्वथा नैव कुर्य्याच्च करणे मरणम्भवेत्॥"

"केशरिगे सुरसचिवे व्रतमुद्वाहञ्च वर्जयेत्प्राज्ञः।

---

(१) क्वचिदादर्शे दर्शयुगाग्निभे इति पाठः।

व्रतकरणे व्रतभङ्गः स्यात् उद्वाहे योषितां मरणम्* ॥"

---

* स्वसिद्धान्तस्य प्रामाण्यसंस्थापनाय ग्रन्थकारान्तरीयसंवादं दर्शयति बल्लालेनाऽपीति। पञ्चं द्वङ्स्तु पूर्व्वेणेति पूर्व्वेण प्रातः प्रातः पूर्व्वदिशि दृष्ट्वा रविकिरणाच्छन्नतया न दृश्यते चेद्ग्रहः; तदा प्रागस्तमितः, अस्तमितकालात् प्राक् पञ्चं पञ्चदशाहं व्याप्य द्वङ्ः। पश्चिमेनेति सायं सायं पश्चिमदिशि दृष्ट्वा रविकिरणाच्छन्नतया न दृश्यते चेद्ग्रहस्तदा ग्रत्यगस्तमितः। अस्तमितात् प्राक् दशाहं व्याप्य द्वङ्ग इत्यर्थः। ग्रत्यग्बाल इति पूर्व्वदिशि अस्ते अस्तादूर्द्धं दशाहं व्याप्य ग्रत्यग्बालः उदितो भवति, एवं पश्चिमदिशि अस्ते अस्तादूर्द्धं दिनत्रयं व्याप्य पूर्व्वेण पूर्व्वदिग्विशिष्टः सन् बालः पुनरुदितो भवतीत्यर्थः। प्रागस्ते च द्वङ्ग्रस्य कालान्तरमाह तथा प्राच्यामित्यादि। एवं प्रागुदये च बालस्य कालान्तरमाह प्रागुदये पञ्चनिशेत्यादि।

अस्तकालमाह ज्योतिषे।

"द्वाविंशद्दिवसयावत् जीवस्य भार्गवस्य च।
द्वासप्ततिर्महत्यस्ते पादास्ते द्वादश क्रमादिति॥"

भङ्गान्तरमाह।

"पञ्चं द्वङ्गो महास्ते तु बालस्तत्र दशाहिकः।
पादास्ते तु दशाहानि द्वङ्गो बालो दिनत्रयम्॥"

महत्पादास्तः शुक्रस्य बृहस्पतेस्तत्रास्ति। जीवस्यास्तकालः द्वाविंशद्दिनानि द्वङ्बालयोः कालः पञ्चमावमिति विशेषः। केशरिसंस्थिते सिंहगते भृगुसुते शुक्रे नष्टे अस्तं गते दर्शयुगाग्निभे क्वचित् पुस्तके दर्शयुगाग्निभे इति पाठद्वयं दृश्यते तदुभयमपि लिपिकरप्रमादः दर्शयुगान्विते इत्येव पाठः साधुः दर्शयुगान्विते दर्शद्वयान्विते मासे मलमासे इत्यर्थः रविसुते जीवे गुर्व्वादित्ययोगे। विद्यां विद्यारम्भं पार्थिवदर्शनं राजदर्शनं मठं क्षात्रावासगृहं मन्दिरं साधारणगृहं पुरं वा। तडागानि वाप्यादिजलाशयान् आरामं उपवनम्। व्रतभङ्गः व्रतफलाभावः। जन्ममासे इति। न जन्ममासे न च चैत्रपौषे चौरं विवाहो न च कर्णवेध इति। यो जन्ममासे क्षुरकर्म्मयात्रां कर्णस्य वेधं कुरुते च मौञ्जादित्यादि। जन्मोदये जन्मसु तारकासु मासेऽथवा जन्मनि जन्मभे वा। व्रतेन विप्रो न बहुश्रुतो वा

"यात्रा चौरविवाहौ व्रतकरणकर्णवेधनं विद्याम्।
कुर्य्यान्न जन्ममासेऽस्तमिते शुक्रे शशाङ्के च॥"
"भृगावस्ते गुरौ सिंहे गुर्वादित्ये मलिम्लुचे।
त्यजेद्दानं महादानं व्रतं देवविलोकनम्॥
अस्ते सन्ध्यागते बाले भृगौ मासि मलिम्लुचे।
देवतादर्शनं दानं महादानं विवर्ज्जयेत्॥
महागुरौ विपन्ने च भृगावस्ते रवौ गुरौ।
महच्छब्दान्वितं कर्म्म नैव कुर्य्याद्विचक्षणः॥"
"कन्यायां कर्किसंस्थे मिथुनहरिगते केचिदाहुर्द्विजेन्द्राः
चापे मीने च राशौ दिवसकृतिगते सिंहसंस्थे च जीवे।
केचिल्लग्ने च जीवे दिनकरकिरणैर्लुप्तशुक्रप्रकाशे
विद्यारम्भं विवाहं सुरवरभवनं नैव यज्ञं प्रतिष्ठाम्॥"

एतानि पण्डिताः पठन्ति।

विवाहस्य—"त्रिदशगुरौ रविभवनमुपेते
भृगुतनये रविकिरणविलीने।
विबुधविलोकनवरफलदानं
भवति न शोभनफलमिति सत्यः॥" *

आरम्भ एव व्रतादेर्निषिद्धो न तु समाप्तिः।

---

विद्याविशेषैः प्रथितः पृथिव्यामित्यादिवचनैकवाक्यत्वात् जन्ममासे यात्राचौरविवाहकर्ण-वेधानामेव निषेधः न तु व्रतकरणविद्यादेः। एवं चौडाहस्य कुमारीणां जन्ममासे प्रशस्यते इति वचनात् विवाहनिषेधस्तु पुरुषस्यैवेति बोध्यम्।

* शशाङ्के चेति। चन्द्रे अस्तमिते नष्टचन्द्रे अमावास्यायामित्यर्थः। महागुरौ

तदाह काश्यपः ।

"ऋक्षैकमन्दिरगतौ यदि जीवभानू
शुक्रोऽस्तगः सुरवरैकगुरुश्च सिंहे ।
नारभ्यते व्रतविवाहगृहप्रतिष्ठा-
क्षौरादिकर्म्मगमनागमनञ्च धीरैः ॥"

नन्वधिमासे तत्तत्कर्म्मनिषेधात् षष्टिदिवसत्वाच्च तन्मासस्य षष्टि-दिवसेष्वेव निषेधः स्यात्* ।

---

महागुरुस्तु पुरुषस्य यदत्तकन्यायाश्च मातापितरौ, दत्तायां भर्त्ता एव महागुरुः । रवौ अस्तं संक्रान्तिशून्ये चान्द्रमासि मलमास इति यावत् वसुतौ रवेः प्रकृतात्मासम्भवात् । महच्छब्दान्वितं कर्म्मेति महादानमहापूजादि कर्म्म । मिथुनेति हरिशयने सति बोध्यं याज्ञा-यने हरौ सुप्ते सर्व्वकर्म्माणि वर्ज्यानीत्येकवाक्यत्वात् सर्व्वकर्म्माणीति सावकाशकर्म्माणीति ज्ञेयानि । हरिगते सिंहे लुप्ते अस्तं गते प्रकाशे उदये । पण्डिताः पठन्ति विवाहस्य विवाहसम्बन्धे । एतेन एतानि मूलग्रन्थे न लभ्यन्ते परन्तु निबन्धकारीयग्रन्थे दृश्यन्ते इत्या-याति । विदग्धगुरौ दहत्यतौ रविभवनस्थे सिंहगते भृगुतनये शुक्रे रविकिरणविलीने अस्तं गते विबुधविलोकनवरफलदानमिति वरं श्रेष्ठं फलं यस्य तत् वरफलञ्च तत् दानञ्चेति वरफलदानं महादानमित्यर्थः विबुधविलोकनञ्च वरफलदानञ्च द्वयोः समाहारः विबुध-विलोकनवरफलदानं शोभनफलं शोभनफलजनकं सम्यक्फलजनकं न भवतीत्यर्थः ।

* ऋक्षैकमन्दिरगतेत्यादि । एकस्मिन्नृक्षे गुर्वादित्ययोगे इत्यर्थः । व्रतेति व्रतपदमिह अविशेषादनन्तादिव्रतपरम् उपनयनादिपरञ्च आरम्भ एव निषिद्धो न तु समाप्तिरित्युक्तम् । अत्रायमाशयः । अनन्तव्रतादौ आरब्धानन्तरं समाप्तिसमये समया-शुद्धावपि । समाप्ते च व्रते तत्र प्रतिष्ठा तदनन्तरं न कालनियमस्तत्र तत्र विघ्ने परार्द्धिके इति वचनात् दोषाभावः । उपनयनादौ च भूकम्पादेर्न दोषोऽस्ति द्विरब्दे क्षते पुनरिति वचनात् अन्तरा समयाशुद्धौ दोषाभाव: सुतरामेव । षष्टिदिवसत्वाच्च मलमासस्येति मल-मासत्वेनाभिमतमासस्य इत्यर्थः द्विराषाढ़ादिनियमेन षष्टितिथ्यात्मकत्वात् ।

नैतदुक्तं हि ज्योतिःशास्त्रे।

"षष्ट्या तु दिवसैर्मासः कथितो बादरायणैः।
पूर्व्वमर्द्धं परित्यज्य उत्तरार्द्धं प्रशस्यते॥
अमावास्याद्वयं यत्र रविसंक्रान्तिवर्ज्जितम्।
मलिम्लुचः स विज्ञेयः उत्तरस्तूत्तमाभिधः॥"

अमावास्याद्वयसमाप्तिर्यदैकराशिस्थे सूर्य्य इत्यर्थः।

तथा शङ्खधरलिखितवचनानि।

"पक्षद्वयेऽपि संक्रान्तिर्यदि न स्यात्सितासिते।
तन्मासि मासिकं कार्य्यमुत्तरे मासि कारयेत्॥
एवं षष्टिदिनो मासस्तदर्द्धेषु मलिम्लुचः।
त्यक्त्वा तदुत्तरे कुर्य्यात् पित्रादेवादिकाः क्रियाः॥" *

तदेवमादिवचनैरुत्तरार्द्धस्य सकलकर्म्मार्हत्वज्ञापनान्न विरोधः†।

ननु किं सकलकर्म्मानर्हत्वमेव मलमासस्य नैतत्।

---

* अमावास्याद्वयमिति अमावास्यान्तक्षणद्वयमित्यर्थः रविसंक्रान्तिपदेन क्रियोत्पत्तिराश्यन्तरसंयोगावुच्येते। यत्रेति यत्किञ्चिच्चिह्नत्तिथ्यात्मकमासपरं तथाच स्वक्षणावच्छिन्नरविराशिभिन्नराशिसंयोगानुकूलक्रियोत्पत्तिशून्यस्वाव्यवहितामावास्यान्त्यक्षणकत्वे सति स्वप्रथमक्षणावच्छिन्नरविराशिभिन्नराशिसंयोगशून्यस्वघटकामावास्यान्त्यक्षणकत्वं मलमासत्वमिति लक्षणपर्य्यवसितं प्रथमस्वपदं चान्द्रमासाव्यवहितपूर्व्वक्षणपरं द्वितीयस्वपदं चान्द्रमासपरम्। स्वत्वमनुगतमतमाश्रित्य एतल्लक्षणं पर्य्यवसितम्। तन्मासि मासिकं मलमासत्वेन अभिमतौ यौ मासः तन्मासत्वेन विहितं मासिकं सावकाशं कर्म्म इत्यर्थः। तदर्द्धेषु पूर्व्वार्द्धेषु।

† न विरोध इति। नन्वधिमासे सर्व्वकर्म्मनिषेधादित्यादिना यो विरोध आशङ्कितः तस्य षष्टितिथ्यात्मकस्य बादरायणाद्युक्तमासस्य पूर्व्वार्द्धे त्रिंशत्तिथ्यात्मकमासे

यदाह बृहस्पतिः ।

"नित्यनैमित्तिके कुर्य्यात् प्रयतः सन्मलिम्लुचे ।
तीर्थस्नानं गजच्छायां प्रेतश्राद्धन्तथैव च ॥"

तीर्थस्नानमनाद्वत्तं गजच्छाया अमावास्याया अपराह्णः तत्र श्राद्धं यत् प्रेतस्य चतुर्थाहादि । वार्षिकश्राद्धं प्रतिसांवत्सरिकं वा* ।

अथ पुराणम् ।

"वनस्पतिगते सोमे छाया या प्राङ्मुखी तदा ।
गजच्छाया तु सा ज्ञेया पितॄणां दत्तमक्षयम् ॥"

---

कर्म्मनिषेधपर्य्यवसानेन उत्तराईस्य कर्म्मार्हतया च स च विरोधः समाहितः इत्यर्थः ।

* अधुना मलमासे कर्म्मसामान्यस्य निषेधः उत कर्म्मविशेषस्य इत्याशङ्क्यते नन्वधिमासे इत्यादि । नित्यनैमित्तिके इति नित्यपदम् अहरहःक्रियमाणकर्म्मपरं नैमित्तिकपदम् एकोद्दिष्टपरत्वेन वक्ष्यमाणम् । तीर्थस्नानादिकं स्वयं व्याकरोति तीर्थस्नानमनाद्वत्त-मित्यादि । तत्र अपराह्णे । प्रेतस्य यत् श्राद्धमिति सामान्येनोक्ता तदेव विशिनष्टि चतुर्थाहादीति ।

"चतुर्थे पञ्चमे चैव नवमैकादशे तथा ।
यदत्र दीयते जन्तोस्तन्नवश्राद्धमुच्यते ॥"

इति यमोक्तम् । वार्षिकश्राद्धं सपिण्डीकरणम् ।

"असंक्रान्तेऽपि कर्त्तव्यमाब्दिकं प्रथमं द्विजैः ।
तथैव मासिकं पूर्व्वं सपिण्डीकरणं तथा ॥"

प्रतिसांवत्सरिकमिति मलमासस्मृतविषयम् ।

"मलमासस्मृतानान्तु श्राद्धं यत् प्रतिवार्षिकम् ।
मलमासेऽपि तत् कार्य्यमिति भागुरिभाषितम् ॥"

पैठीनसिरपि । "मलमासे मृतानान्तु श्राद्धं यत् प्रतिवत्सरम् ।
मलमासेऽपि कर्त्तव्यं नान्येषान्तु कदाचनेति ॥"

तथा।

"सैंहिकेयो यदा सूर्य्यं ग्रसते पर्व्वसन्धिषु।
हस्तिच्छाया तु सा ज्ञेया तत्र श्राद्धम्प्रकल्पयेत्॥"

आह ऋष्यशृङ्गः।

"अवषट्कारहोमश्च पर्व्व चाग्रयणन्तथा।
मलमासे तु कर्त्तव्यं काम्या इष्टीर्विवर्ज्जयेत्॥"

आह प्रजापतिः।

"न कुर्य्यान्मलमासे तु काम्यं कर्म्म कथञ्चन।
त्यक्त्वा नैमित्तिकं श्राद्धं तद्धि तत्रैव कीर्त्तितम्॥
एकोद्दिष्टञ्च यच्छ्राद्धं तन्नैमित्तिकमुच्यते।
तत्कार्य्यं पूर्व्वमासेन कालाधिक्येऽपि धर्म्मतः॥"

आह सत्यव्रतः।

"जातकर्म्मणि यच्छ्राद्धं नवश्राद्धन्तथैव च।
प्रतिसंवत्सरश्राद्धं मलमासेऽपि तत् स्मृतम्॥
यस्मिन्नाग्निगते भानौ विपत्तिं यान्ति मानवाः।
तेषां तत्रैव कर्त्तव्या पिण्डदानोदकक्रिया॥
वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृताहनि।
मलमासेऽपि तत्कार्य्यं व्याघ्रस्य वचनं यथा॥" *

---

* गजच्छाया अमावास्यापराह्ण इत्युक्तम्। तत्र प्रमाणं दर्शयति अथ पुराणम्। वनस्पतिः अमावास्या। अतएव—

"अमावास्यां गते सोमे छाया या प्राङ्मुखी भवेत्।
गजच्छाया तु सा प्रोक्ता तत्र श्राद्धं प्रशस्यते॥"

तथा प्रचेताः।

"अधिमासो न कर्त्तव्यः श्राद्धे सांवत्सरादिके।
वर्षवृद्धाभिषेकादि कर्त्तव्यमधिकेन तु॥"

अधिमासो न कर्त्तव्यः त्यजनीयत्वमेवैतदस्य न कार्य्यम्। सांव-

---

इति वचने अमावास्यामिति स्पष्टमुक्तम्। अवघट्कारहोम इति अग्निहोत्रोपासन-वैश्वदेवादयः पर्व्व दर्शपौर्णमासौ पार्व्वणस्थालीपाकश्च इति हेमाद्रिमाधवौ यत्यक्तत्वे अमावास्यापार्व्वणं वक्ष्यमाणम् आयायणं नवश्रेष्टिः। नैमित्तिकं काम्यनैमित्तिकं काम्याधिक्येऽपि मासाधिक्येऽपि मलमासेऽप्यौत्यर्थः। जातकर्म्मणि यत् श्राद्धं जातकर्म्मनिमित्त-श्राद्धम्। एतच्छन्दोगव्यतिरिक्तपरम्।

"नाष्टकासु भवेच्छ्राद्धं न श्राद्धे श्राद्धमिष्यते।
न सौथन्ति जातकर्म्मप्रोषितागतकर्म्मसु॥"

इति छन्दोगपरिभाषितनिषेधात् तथाच नाष्टकासु इति सर्व्वाख्येवान्वाहार्य्यवतीति गोभिलसूत्रात् अष्टकादीनां गृह्यकर्म्मत्वेन,—

"यत् श्राद्धं कर्म्मणामादौ या चान्ते दक्षिणा भवेत्।
अमावास्यां द्वितीयं यदन्वाहार्य्यं तदुच्यते॥"

इति गोभिलसूत्रान्तरात् श्राद्धप्रसक्तौ निषेधः। श्राद्धे अन्वष्टकाश्राद्धे सौथन्ति सूत्रायन्ति आगतप्रसवं ज्ञात्वा होमः। नवश्राद्धं स्वयं वक्ष्यमाणं प्रतिसंवत्सरश्राद्धमिति मलमासमृतस्येति शेषः।

विपत्तिं यान्ति नाशं प्राप्नुवन्ति। तेषां तत्रैव कर्त्तव्या इति तु अन्याधिमासविषयं असंक्रान्तोऽपि कर्त्तव्यमाब्दिकं प्रथमं द्विजैरित्यादि वचनैकवाक्यत्वात्। वर्षे वर्षे तु यत् श्राद्धमिति प्रतिसांवत्सरिकश्राद्धस्य यन्मलमासकर्त्तव्यत्वमुक्तं तन्मलमासमृतस्य प्रतिसांव-त्सरिकश्राद्धमेव बोध्यं न तु शुद्धमासमृतस्येति।

तथाच कालमाधवधृतपैठीनसिः।

"मलमासमृतानाञ्च श्राद्धं यत् प्रतिवत्सरम्।
मलमासेऽपि कर्त्तव्यं नान्येषान्तु कदाचन॥"

त्वरादिश्राद्धञ्च कर्त्तव्यमेव । आदिशब्देन पुत्रजन्मादिनिमित्तं वृद्धिश्राद्धं नवश्राद्धञ्च भन्यते ।

नवश्राद्धमाह आश्वलायनः ।

"नवश्राद्धं दशाहानि नवमिश्रन्तु षड्तून् ।
अतःपरं पुराणं वै त्रिविधं श्राद्धमुच्यते ॥" *

---

* अधिमासी न कर्त्तव्य इत्यस्य तात्पर्य्यार्थमाह त्यजनीयत्वमेवेत्यादि । एतत् त्यजनीयत्वमेव अस्य न कार्य्यम् । पर्य्यवसितार्थमाह सांवत्सरिकादिश्राद्धं कर्त्तव्यमेव ।

हेमाद्रिस्तु । "वर्षे वर्षे च यत् श्राद्धं मातापित्रोर्मृतेऽहनि ।
मलमासे न कर्त्तव्यं व्याघ्रस्य वचनं यथा ।
अधिमासे न कर्त्तव्यं श्राद्धं सांवत्सरादिकमिति ॥"

मलमासशतशुद्धमासशतमेदेन अनयोर्वचनयोर्विरोधः परिहरणीयः । एतेन उत्तरार्द्धे अधिकेन तु इत्यस्य अधिके मलमासे वर्षवृद्ध्यभिषेकादिः स तु कर्त्तव्य इत्यर्थः अवसीयते । नवश्राद्धं दशाहानि नवमिश्रन्तु षड्तून् इति दशाहानि दशाहपर्य्यन्तम् । अत्र हेमाद्रौ विशेष उक्तः । यथा नागरखण्डे भर्तृयज्ञः ।

"त्रीणि सञ्चयनस्थानि तानि वै शृणु साम्प्रतम् ।
यत्र स्थाने भवेन्मृत्युस्तत्र श्राद्धन्तु कारयेत् ॥
एकोद्दिष्टं ततो मार्गे विश्रामे यत्र कारितः ।
ततः सञ्चयनस्थाने तृतीयश्राद्धमिष्यते ॥
पञ्चमे सप्तमे तद्वदष्टमे नवमे तथा ।
दशमैकादशे चैव नव श्राद्धानि तानि वै ॥"

कात्यायनः । "चतुर्थे पञ्चमे चैव नवमैकादशे तथा ।
यदत्र दीयते जन्तोस्तन्नवश्राद्धमुच्यते ॥"

व्यासः । "प्रथमे सप्तमे चैव नवमैकादशे तथा ।
यत्तु वै दीयते जन्तोस्तन्नवश्राद्धमुच्यते ॥"

"आद्यमेकादशेऽहनीति" वचनात् एकादशाहश्राद्धं षोड़शसम्बन्ध्येव। "श्राद्धमेकं दिनद्वयमिति" वचनाच्च द्वादशाहश्राद्धस्याप्यनुप्रवेशः*। अभिषेको यौवराज्यस्य। तत्साहचर्य्यात् वर्षद्वद्विपदमपि राजद्वद्विपरं तत्परस्मिन्मासि कर्त्तव्यम्। जन्मदिनन्तु सौर एव नियतम्। ननु तस्याप्युत्कर्षः श्रूयते।

यथा गृह्यपरिशिष्टम्।

"उपाकर्म्म तथोत्सर्गः प्रसवाहोऽष्टकादयः।
मानद्वद्वौ परा कार्य्या वर्ज्जयित्वा तु पैतृकम्॥"

प्रसवाहो जन्मदिनम्†। नैतत्सौर एव मासि तिथिद्वैधे तिथि-

नवमिश्रन्तु षड्तून् षड्तून् संवत्सरं व्याप्य नवमिश्रमिति पारिभाषिकम् मासिकादीनां नाम। अतःपरं पुराणमिति एतदपि पारिभाषिकं तथाच संवत्सरादूर्द्धं यत् सांवत्सरिकपार्व्वणादिकं तदेव पुराणपदवाच्यम्।

* आद्यमेकादशेऽहनीति वचनादिति। पूर्व्वप्रतीकन्तु,—

"मृताहनि तु कर्त्तव्यं प्रतिमासन्तु वत्सरम्।
प्रतिसंवत्सरञ्चैव आद्यमेकादशेऽहनि॥"

अस्यार्थः। संवत्सरं व्याप्य प्रतिमासं मृताहनि मृताहे मृताहनीत्यर्थं कर्त्तव्यं मासिकं श्राद्धमिति शेषः। प्रतिसंवत्सरं संवत्सरं प्रति मृताहनीत्यनुषङ्गेणान्वयः सांवत्सरिकमिति शेषः एकादशेऽहनि अशौचान्ताद्वितीयदिने आद्यश्राद्धं कर्त्तव्यमित्यनुषङ्गेणान्वयः। षोड़शसम्बन्ध्येव षोड़शश्राद्धान्तर्गतमित्यर्थः। द्वादशाहश्राद्धस्याप्यनुप्रवेश इति। तथाच बौधायनसूत्रम्। एकादश्यां द्वादश्यां वा श्राद्धकर्म्म प्रचक्षते। मत्स्यपुराणञ्च। एकादशाहश्राद्धमभिधाय द्वितीयेऽह्नि पुनरुद्दिष्टं समाचरेत् इति।

† साहचर्य्यादिति अभिषेकपदस्य यौवराज्याभिषेकपरत्वेन राज्ञ उपस्थितेरिति भावः। वर्षद्वद्विपदमिति वर्षस्य वयसो द्वद्विर्येन इति व्युत्पत्त्या राज्ञो दीर्घजीवित्व-

ह्रद्रापेक्षत्वादस्य वचनस्य उपाकर्म्मणः सौर एव नियतत्वात्। तत्सहचरितत्वात् प्रसवाहस्य।

तदाह।

"दशहरास्वनुत्कर्षश्चतुर्ष्वपि युगादिषु।
उपाकर्म्मणि चोत्सर्गे तत्कर्त्तव्यं हृषादितः॥"

अत्र तत्कर्त्तव्यं हृषादित इति स्थाने माघ्याश्चैव विशेषत इति कैश्चित् पठितं तदसङ्गतम्*। माघी चेत् मघायुक्ता स्यादिति

---

जनकर्मसङ्गत्यकर्म्माभिप्रेत्याह राजद्वयपरमिति। तत्परस्मिन् मासि कर्त्तव्यं युग्मासे कर्त्तव्यम्। अतएव काठकगृह्यम्।

"चूड़ां मौञ्जीबन्धनञ्च अग्न्याधेयं महालयम्।
राजाभिषेकं काम्यञ्च न कुर्य्यादधिमासके॥"

उपाकर्म्म तथोत्सर्गः वेदारम्भः वेदसमापनञ्च प्रसवार्हो जन्मतिथिरुक्तत्वम् अष्टकादयः अष्टकादिश्राद्धानि।

* नैतदिति परमासकर्त्तव्यतारूपोत्कर्षो नेत्यर्थः। अत्र हेतुमाह सौर एवेत्यादि। तथाच एकस्मिन् सौरमासि जन्मतिथ्यादिरुक्तत्वनिमित्तीभूतजन्मतिथेर्वारद्वयप्राप्तिरूपमानद्वयो जन्मतिथ्यादिरुक्तत्वं परजन्मतिथौ कार्य्यम्। प्रसवार्हस्य सौरमासनियतत्वमित्यर्थः। तदाह उपाकर्म्मणः सौरमासकर्त्तव्यतामाह दशहरास्वित्यादि। हैमाद्रावपि एतद्वचनं लिखितम्। परन्तु तृतीयचतुर्थचरणम् अन्यथा पठितम्। यथा—उपाकर्म्म-महाषष्ठीश्चैतदुक्तं हृषादितः। अस्यार्थः। हृषादितः हृषस्थसूर्य्ये आदिना सिंहस्थसूर्य्ये तुलास्थसूर्य्ये मकरस्थसूर्य्ये मेषस्थसूर्य्ये च सौरज्यैष्ठभाद्रकार्त्तिकमाघवैशाखेषु चेत्यर्थः। दशहरासु ज्यैष्ठशुक्लदशम्याम्। चतुर्ष्वपि युगादिषु इति यद्यपि युगादिविधायकवचने राशिस्थसूर्य्ये इत्याद्यश्रवणात् मुख्यचान्द्रभाद्रकृष्णत्रयोदशी कार्त्तिकशुक्लनवमी-माघपौर्णमासी-वैशाखशुक्लतृतीयासु च उपाकर्म्मणि वेदारम्भे उत्सर्गे वेदसमाप्तौ च अनुत्कर्षो नाद्यति तथापि हृषादित इति

श्रुतेः तदेकवाक्यतया सौरतिथिबोधनात् अनुत्कर्ष एव प्रतिभाति ।

तथाच विष्णुपुराणभविष्यपुराणयोः ।

"वैशाखमासस्य तु या तृतीया नवम्यसौ कार्त्तिकशुक्लपक्षे ।
नभस्यमासस्य तु कृष्णपक्षे चयोदशी पञ्चदशी च माघे ।
एता युगाद्याः कथिताः पुराणे अनन्तपुण्यास्तिथयश्चतस्रः ॥"

ब्रह्मपुराणञ्च । "वैशाखे शुक्लपक्षे तु तृतीयायां कृतं युगम् ।
कार्त्तिके शुक्लपक्षे तु नेता च नवमेऽहनि ॥
अथ भाद्रपदे कृष्णत्रयोदश्यान्तु द्वापरम् ।
माघे तु पौर्णमास्याञ्च घोरं कलियुगं तथा ॥" इति ।

उपाकर्म्मणि वेदारम्भे । उत्सर्गे वेदसमाप्तौ ।

याज्ञवल्क्यः । "अध्यायानामुपाकर्म श्रावण्यां श्रवणेन तु ।
हस्तेनौषधिभावे वा पञ्चम्यां श्रावणस्य तु ॥"

कात्यायनः ।

"अथातश्चोपाकर्म श्रवणेन श्रावण्यां पौर्णमास्यां वा" इत्यादि ।

पुनर्याज्ञवल्क्यः ।

"पौषमासस्य रोहिण्यामष्टकायामथापि वा ।
जलान्ते छन्दसां कुर्य्यादुत्सर्गं विधिवद्बहिः ॥" इत्यादि ।

उपाकर्म्मणि तथोत्सर्गे च अनुत्कर्ष-वचनविषये हेमाद्रौ विशेष उक्तः ।

यथाकालव्रद्धावुपाकर्म्मोत्कर्षः कात्यायनेन दर्शितः ।

"उत्कर्षः कालवृद्धौ स्यादुपाकर्म्मादिकर्म्मणि ।
अभिषेकादिवृद्धीनां न तूत्कर्षो युगादिषु ॥"

यत्तु अनुत्कर्षप्रतिपादकं ऋष्यशृङ्गवचनम् ।

"दशहरासु नोत्कर्षश्चतुर्ष्वपि युगादिषु ।
उपाकर्म्म-महाषष्ठ्याद्यैतदुक्तं व्रधादितः ॥"

इति छन्दोगविषयम् । तेषां हि कालवृद्धावपि सिंहार्के एव उपाकर्म्म ।

विष्णुविरोधात्*। न हि मघायुक्ता मकरस्थसूर्ये सम्भवति†।

---

यदाह गार्ग्यः। "सिंहे रवौ तु पुथर्चे मध्याह्ने विचरेद्यदि:।

छन्दोगा मिलिता: कुर्युरुत्सर्गं सर्व्वछन्दसाम्॥" इति।

अत्र तत् कर्त्तव्यं हषादित इति स्थाने इति एतत्पाठस्थाने इत्यर्थः। तदसङ्गतमिति।

* माघी चेन्मघायुक्ता स्यादित्यादि विष्णुविरोधादिति। ननु माघ्याश्चैव विशेषत इति पाठकल्पनेऽपि कथं विष्णुविरोधः सम्भवति। तथाहि हषादित इति पाठस्थाने माघ्याश्चैव विशेषत इति पाठकल्पने हषादिपदविरहात् सौरमासावगतिर्न जायते। ततश्च माघी मघायुक्ता चेत् स्यात् तस्यां तिलैः स्नानं कृत्वा पूती भवेत् इति विष्णुवचने मघायुक्तेति विशेषणेन सौरमासे मघासम्भवात् सौरफाल्गुनादावपि क्षतिविरहात् कथं विष्णुविरोधः सङ्गच्छते इति चेन्नैवम्। तत्कर्त्तव्यं हषादित इति पाठस्थाने माघ्याश्चैव विशेषत इति पाठकल्पने सौरबोधकहषादिपदविरहात् एतद्वचनेन सौरमासाप्रतीतावपि—

"दशहरासु नीत्कर्षस्चतुर्ष्वपि युगादिषु।

उपाकर्म्म-महाषष्ठ्याश्चैतदुक्तं हषादितः॥"

इति हेमाद्रिधृतेन ऋष्यशृङ्गवचनेनैकवाक्यतया दशहरादौ सौरज्यैष्ठादावेवानुत्कर्षस्यावश्यवक्तव्यत्वात् तत्सहचरिततया च माघ्याश्चैव विशेषत इत्यत्रापि सौरमाघप्रतीतौ सौरमाघे च माघ्यां मघायोगासम्भवेन विष्णुविरोधस्य जागरूकत्वात् वस्तुतो विष्णुविरोधस्य उपन्यचनतया पौनरुक्तिदोषेण असङ्गतकथनस्य युक्तियुक्तत्वाच्च। तथाहि माघे तु पौर्णमास्याञ्च घोरं कलियुगं तथा इत्यादिवचनेन माघीपौर्णमास्या युगादित्वेन चतुर्ष्वपि युगादिषु इत्यनेन प्राप्तेः माघ्याश्चैव विशेषत इत्यस्य पौनरुक्त्यं सुतरामेव।

† नहि मघायुक्ता मकरस्थे सम्भवतीति। तथाच मघानक्षत्रस्य सिंहघटकतया तत्स्थे चन्द्रमसि मकरस्थे सूर्ये षड्भकैनावस्थानात् सप्तमराश्यवस्थानाभावेन परमविप्रकर्षाभावात् सूर्याचन्द्रमसोर्यः परो विप्रकर्षः सा पौर्णमासीति गीर्भिलसूत्रात् मकरराशौ मघायुक्ता पौर्णमासी न घटते इति भावः।

पुष्याश्लेषयुक्ता तत्र भवति। तेन मघायुक्तायाः कुम्भ एव सम्भवात् कथमनुत्कर्षः।

अतएव।

"पौर्णमास्यो भवन्त्यन्याः कामं नक्षत्रयोगतः।
माघ एव तु माघी स्यान्मकरस्थे दिवाकरे॥"*

न नक्षत्रमपेक्षत इति वा चतुर्थं सर्व्वथा त्वनाकरमेव। तत्र वृषादित इति सप्तम्यास्तसिः वृषादिष्वित्यर्थः। तेन वृष एव दशहरा†। तुलामकरमेषसिंहेषु चतस्रो युगाद्याः। कर्कट-सिंहयोरेवोपाकर्म्मोत्सर्गाविति(१)। अतो जन्मदिनमपि सौर एव कार्य्यम्‡। एवञ्च सति वर्षवृद्धयभिषेकादि कर्त्तव्यमधिकेन तु

---

(१) उपाकर्म्मोत्सर्गाविति क्वचिदादर्शे पाठः।

---

* पुष्याश्लेषयुक्ता तत्र भवतीति। तथाच पुष्याश्लेषयोः कर्कटराशिघटकतया तत्स्थे चन्द्रे मकरराशौ रवौ च सप्तमराश्यवस्थानात् पुष्याश्लेषान्यतरनक्षत्रयुक्ता पौर्णमासी तत्र घटत एवेति भावः। मघायुक्ता कुम्भ एव सम्भवादिति। तथाच मघानक्षत्रस्य सिंहघटकतया तत्स्थे चन्द्रे कुम्भराशौ रवौ च सप्तमराश्यवस्थानसम्भवादिति भावः। अन्याः माघी-पौर्णमासीभिन्नाः।

† न नक्षत्रयोगमपेक्षत इति मकरराशौ माघीपौर्णमासीति शेषः। चतुर्थं माघ्यादैव विशेषत इति कल्पितचतुर्थचरणम्। अनाकरमेव अमूलमेव प्रमाणन्तु प्रागनुसन्धेयम्। उपसंहरति तेनेति। वृष एव वृषस्थे रवौ सौरज्यैष्ठ एवेत्यर्थः। यत्यक्लन्यते सौरज्यैष्ठसम्बन्धिनी शुक्लदशम्येव दशहरा न त्वाषाढगता चान्द्रज्यैष्ठसम्बन्धिनी दशमीति व्यवस्था।

‡ तुलामकरमेषसिंहेषु चतस्रो युगाद्या इति। यद्यपि युगादिविधायकवचने तुलामकरादिपदं नास्ति तथापि यत्यक्लन्यते मासपदस्य सौरशुक्लेर्विधायकवचनस्थकार्त्तिकादि-

इत्यत्र वर्षवृद्धिपदं यदि जन्मदिनाभिप्रायं तदा तस्यायमर्थः। अधिकेनाधिमासेनाधिमासस्यैवाधिकत्वाद्वर्षवृद्ध्यभिषेकमपि कर्त्तव्यम्। तुशब्दोऽप्यर्थः। निपातानामनेकार्थत्वात्*। अभि-

---

पदानां सौरपरत्वावगतेरवश्यम्भावज्ञापनार्थं तुलामकरमेषसिंहेषु इत्युक्तम्। कर्कटसिंहयोरेव उपाकर्म्मोत्सर्जनाविति तथाच निगमः।

"श्रावण्यां श्रावणीकर्म्म यथाविधि समाचरेत्।
उपाकर्म्म तु कर्त्तव्यं कर्कटस्थे दिवाकरे॥" इति।

मार्ग्यः। "सिंहे रवौ तु पुष्यर्क्षे मध्याह्ने विचरेद्यदि।
छन्दोगा मिलिताः कुर्युरुत्सर्गं सर्व्वछन्दसाम्॥"

जन्मदिनमपि जन्मतिथिकृत्यमपीत्यर्थः। सौर एव सौरमास एव। वर्षवृद्धिपदस्य राजवृद्ध्यर्थकत्वे लक्षणापत्तेराह वर्षवृद्धिपदं यदि जन्मदिनाभिप्रायमिति। तथाच जन्मदिनमपि जन्मतिथिकृत्यमपि सौर एव सौरमास एव कार्य्यम्।

अतएव न जन्ममासे न च चैत्रपौषे चौरं विवाहो न च कर्णवेध इति। यो जन्ममासे क्षुरकर्म्म याचामिति। जन्माख्यमासं किल भागुरिश्च इति। उद्वाहश्च कुमारीणां जन्ममासे प्रशस्यते इति। मासेऽथवा जन्मनि जन्मभे वा व्रतेन विप्रो न वृषलीपतीत्यादि बहुषु वचनेषु सौरार्थो दृश्यते।

* अधिकेनाधिमासेनाधिमासस्यैवाधिकत्वात् वर्षवृद्ध्यभिषेकमपि कर्त्तव्यमिति। जन्मतिथेर्निरवकाशत्वमेव बीजम्।

अतएव भविष्ये।

"कुर्य्यात् प्रायश्चित्तं कर्म्म प्रयत्नेन मलिम्लुचे।
नैमित्तिकन्तु कुर्व्वीत सावकाशं न यद्भवेदित्यादि॥"

ननु जन्मदिनकृत्यस्य सौरमासीयत्वे कदाचित्तत्तिथेरप्राप्तौ जन्मदिवसनिमित्तगुर्व्वादिपूजनमभिधाय "प्रतिसंवत्सरञ्चैव कर्त्तव्यश्च महोत्सव" इति वचनस्य "षष्ठीञ्च दधिभक्तेन वर्षे वर्षे पुनः पुनः" इति वचनस्य च का गतिः। यद्यकृत्यते एतद्वचनद्वयमसमूलमेव। यदिच बहुप्रामाणिकपरिगृहीतत्वेन समूलत्वमस्माभिरङ्गीक्रियते तदा सर्व्वैश्च जन्मदिवसे इत्यत्र

षेकोऽपि पुष्याभिषेकः। पौषे मलमासेऽपि कार्य्यः इत्यर्थः*।

---

दिवसपदं सावनदिनपरम्। यन्मासीय-यत्संख्यकदिने जातः वर्षे वर्षे तन्मासीय-तत्संख्यकदिने गुर्व्वादयः पूजनीयाः। अस्मिन्नर्थे न कुत्रापि व्यभिचारः।

अतएव दीपिकायाम्।

"जन्मर्क्षयुक्ता यदि जन्ममासि यस्य ध्रुवं जन्मतिथिर्भवेच्च।
भवन्ति संवत्सरमेव यावन्नैरुज्यसम्मानसुखानि तस्य॥"

इति वचनं सङ्गच्छते। तथाच अत्र समुच्चयार्थोगात् भवेच्चेति चकारो वार्थे तस्य च जन्मतिथावन्वयः। ततश्च यस्य जनस्य जन्ममासि जन्मनक्षत्रयुक्ता चकारवाच्याकाराद् केवला वा जन्मतिथिर्यदि भवेत् तस्य जनस्य संवत्सरं यावत् नैरुज्यसम्मानसुखानि भवन्ति। अत्र यदिकारात् जन्ममासि अनिष्टकरी जन्मतिथ्यप्राप्तिपक्षोऽपि ध्वनितः चान्द्रमासीयत्वे तु कदाचिदपि जन्ममासि जन्मतिथ्यभावो न घटते जन्मर्क्षयुक्तेति विशेषोपादानं नैरुज्यादेरातिशय्यज्ञापनार्थमिति कल्पनीयम्।

* राजाभिषेकस्य मलमासे स्पष्टनिषेधादाह अभिषेकोऽपि पुष्याभिषेकः। एष च कालिकापुराणवचनात् स्फुटीभविष्यति।

पौषे मलमासे इति।

"दशानां फाल्गुनादीनां प्रायो माघस्य च क्वचित्।
नपुंसकत्वं भवति न पौषस्य कदाचन॥"

नपुंसकत्वं मलमासत्वम्।

एव। "असंक्रान्तौ हि यो मासः कदाचित्तिथिवर्द्धितः।
कालान्तरात् समायाति स नपुंसक इष्यते॥"

इति वचनेन पौषस्य मुख्यमलमासत्वनिषेधात् पौषे मलमासे इत्यत्र मलमासपदं त्रयापरनामगौणमलमासपरम्।

तथाच काठकगृह्ये।

"यस्मिन् मासे न सङ्क्रान्तिः सङ्क्रान्तिद्वयमेव वा।
मलमासः स विज्ञेयो मासे त्रिंशत्तमे भवेदिति॥"

अथ क्षयमाससाधारण्ये मलमासस्य कीर्त्तनं मलमासवत् सावकाशकर्म्मनिषेधार्थम्।

पौषस्य क्षयमासत्वमाह वार्हस्पत्यज्योतिर्गणे।

"यथैकवर्षे त्वधिमासयुग्मं यत् कार्त्तिकादिचितये क्षयाख्यम्।
तद्वर्ज्जनीयं चितयं प्रयत्नादिवाहयज्ञौत्सवमङ्गलेषु॥"

क्षयमासस्य क्षणमाह तुर्य्योतिःसिद्धान्तभीमपराक्रमौ।

"असङ्क्रान्तमासोऽधिमासः स्फुटः स्यात् द्विसङ्क्रान्तमासः क्षयाख्यः कदाचित्।
क्षयः कार्त्तिकादित्रये नान्यदा स्यात् तदा वर्षमध्येऽधिमासद्वयं स्यात्॥"

तथाच क्षयापरनामगौणमलमासरूपे पौषे मरकदुर्भिक्षाद्यनिष्टनिवारकतया निरवकाशत्वेन पुष्याभिषेकः क्षितिपतिनावश्यं करणीयः। तद्विधिस्तु कालिकापुराणेऽष्टषष्टितमेऽध्याये ऽनुसन्धेयः। यथा—

पुष्याभिषेकः पुष्यस्नानम्। तस्य विधिर्यथा—

और्व्व उवाच।

"शृणु राजन्! प्रवक्ष्यामि पुष्यस्नानविधिक्रमम्।
येन विज्ञातमात्रेण विघ्ना नश्यन्ति सन्ततम्॥
पौषे पुष्यर्क्षगे चन्द्रे पुष्यस्नानं नृपश्चरेत्।
सौभाग्यकल्याणकरं दुर्भिक्षमरकापहम्॥
विष्कादिदुष्करणे व्यतीपाते च वैधृतौ।
वज्रे शूले हर्षणादौ योगे यदि न लभ्यते॥
तृतीययुक्तपुष्यर्क्षं रविसौरिकुजेऽहनि।
तदा समस्तदोषाणां तत् स्नानं हानिकारकम्॥
बहुदोषाश्च जायन्ते यदि राज्ञेषु चेतयः।
तदा पुष्यर्क्षमात्रे तु कुर्य्यान्मासान्तरेऽपि तत्॥
इयन्तु ब्रह्मणा शान्तिरुद्दिष्टा गुरवे पुरा।
शक्रार्थं सर्व्वदेवानां शान्त्यर्थञ्च जगत्पते!॥
तृषकेशास्थिवल्मीककीटदेशादिवर्ज्जिते।
शर्करांगनिभस्नादिदोषेण परिवर्ज्जिते॥

काकोलूककङ्कैश्च काकोलैर्गर्दभश्वेनकैः ।
वर्ज्जिते कण्टकिवनविभीतकविवर्ज्जिते ॥
शिग्रुश्लेष्मातकाभ्याञ्च जलौकाद्यैर्विवर्ज्जिते ।
सुस्थाने चम्पकाशोकवकुलादिविभूषिते ॥
हंसकारण्डवाकीर्णे सरसीरेऽथवा शुचौ ।
पुण्यस्नानाय नृपतिर्गच्छीयात् स्नानसुत्तमम् ॥
ततः पुरोहितो राजा नानावादित्रनिःस्वनैः ।
प्रदोषसमये गच्छेत्तत्स्थानं पूर्ब्ववासरे ॥
तस्य स्थानस्य कौवेर्य्यां दिशि स्थित्वा पुरोहितः ।
सुगन्धचन्दनैः पानैः कर्पूराद्यधिवासितैः ॥
गोरोचनाभिः सिद्धार्थैरक्षतैश्च फलादिभिः ।
गन्धद्वारेत्यादिभिस्तु मन्त्रैः सर्व्वाधिवासितैः ॥
अधिवास्य तु तत् स्थानं पूजयेत्तत्र देवताः ।
गणेशं केशवं शक्रं ब्रह्माणञ्चापि शङ्करम् ॥
उमया सहितं देवं सर्व्वांश्च गणदेवताः ।
मातॄश्च पूजयेत्तत्र नृपतिः सपुरोहितः ॥
मङ्गलान् सकलान् कृत्वा नानानैवेद्यसञ्चयम् ।
प्रदद्यात्पायसं स्वादु फलं मोदकयावकौ ॥
अधिवास्य तु तत् स्थानं दूर्व्वासिद्धार्थकाक्षतैः ।
तस्मात् स्थानात्तु भूतान्निःसारयेन्मन्त्रमीरयन् ॥
अपसर्पन्तु ते भूता ये भूता भूमिपालकाः ।
भूतानामविरोधेन स्नानमेतत्करोम्यहम् ॥
ततः करौ पुटीकृत्य मन्त्रेणानेन पार्थिवः ।
आवाहयेदिमान्देवान् पूज्यान् पुण्याभिषेकतः ॥
आगच्छन्तु सुराः सर्व्वे येऽत्र पूजाभिलाषिणः ।
दिशोऽभिपालकाः सर्व्वे ये चान्येऽप्यंशभागिनः ॥

ततः पुण्याञ्जलिं दत्त्वा पुनर्मन्त्रं पठेदिमम् ।
अथ तिष्ठन्तु विबुधाः स्थानमासाद्य मामकम् ॥
श्वः पूजां प्राप्य घातारी दत्त्वा शान्तिं महीभुजे ।
तत्र तां नृपती रात्रिं नयेत्तु सपुरोहितः ॥
स्वप्ने शुभाशुभं विद्यान्नृपस्तु सपुरोहितः ।
कृत्वा पूजान्तु देवानां रात्रौ स्थाने नृपः स्वपेत् ॥
शुभाशुभफलं स्वप्ने ज्ञेयं दोषशमस्मृते ।
दुःस्वप्नदर्शनं चेत् स्यात्तदा पुण्याभिषेचने ॥
होमं चतुःशतं कुर्य्याद्दद्याद्वापि गवां शतम् ।
गोवाजिकुञ्जराणाञ्च प्रासादस्य गिरेस्तरोः ॥
आरोहणं शुभकरं राज्यश्रीवृद्धिकारकम् ।
दधिदेवसुवर्णानां भुजगस्य च दर्शनम् ॥
वीणादूर्व्वांक्षतफलपुष्पच्छदविलेपनम् ।
श्वेतांशुच्छत्रशस्त्राणां पद्मस्य सुहृदां तथा ॥
लाभः क्षयकरः शंखोरत्नालङ्कारस्य भूभृतः ।
दर्शनञ्चोपरागस्य निगडेनास्य बन्धनम् ॥
मांसस्य भोजनञ्चैव पर्व्वतस्य विवर्त्तनम् ।
नाभिमध्ये तरूत्पत्तिर्मृतं प्रत्यनुरोदनम् ॥
अगम्यागमनं कूपपङ्कगर्त्तावसीर्णता ।
पर्व्वतस्य तथा नद्याः प्रोत्तारः शुष्ककर्त्तनम् ॥
स्वपुत्रमरणञ्चैव पानं रुधिरमद्ययोः ।
भोजनं पायसस्यापि मनुष्यारोहणं तथा ॥
कल्याणसुखसौभाग्यराज्यशुचयांस्तथा ।
एते स्वप्नाश्च कुर्व्वन्ति नृपस्य नृपसत्तम ! ॥
खरोष्ट्रमहिषाणान्तु आरोहो राज्यनाशकः ।
नृत्यं गीतं तथा हास्यं पाठश्चाप्यशुभप्रदः ॥

रक्तवस्त्रपरीधानं रक्तमाल्यानुरञ्जनम् ।
रक्तां कृष्णां स्त्रियञ्चैव कामयन् मृत्युमाप्नुयात् ॥
कूपान्तरे प्रवेशश्च दक्षिणाग्रागतिस्तथा ।
पङ्के निमज्जनं स्नानं भार्य्यापुत्रविनाशनम् ॥
नाभौ यस्य भवेत् स्वप्ने तरूत्पत्तिर्नृपस्य च ।
आदाय गर्भनाड़ीन्तु शकुनी याति खं द्रुतम् ॥
स तु राज्यान्तरं प्राप्य महाकल्याणमाप्नुयात् ।
दीर्घं विंशतिहस्तन्तु हस्तषोड़शविस्तृतम् ॥
कुर्य्यात्तु लक्षणोपेतं यज्ञमण्डलमुत्तमम् ।
ततोऽपरेऽह्नि पूर्व्वाह्णे मातृणां पूजनञ्चरेत् ॥
कुङ्कुमाक्तां वसोर्धारां हड्डिमाङ्कं तथैव च ।
चन्दनागुरुकस्तूरीधूपकर्पूरचूर्णकैः ॥
सम्पूज्य मण्डलस्थानं तस्मिन् ह्रीं शम्भवे नमः ।
अस्त्राय हुं फड़ित्येवं लिखेन्मन्त्रद्वयं बुधः ॥
मन्त्रविन्मण्डलस्यैव सूत्रैः काम्बलसम्भवैः ।
कौषेयैर्वा स्वस्तिकाख्यं प्रथमं मण्डलं लिखेत् ॥
चतुर्हस्तप्रमाणन्तु मण्डलं विलिखेत्ततः ।
हस्तप्रमाणं पद्मन्तु मण्डलस्य प्रकीर्त्तितम् ॥
द्वाराणि सार्द्धहस्तानि कर्णिकाकेशरोज्ज्वलम् ।
सितं रक्तञ्च पीतञ्च कृष्णं हरितमेव च ॥
शालिचूर्णैस्तु कौसुम्भैर्हारिद्रैर्हरिदुद्भवैः ।
कुर्य्यात्तथाञ्जनैश्चूर्णैः राजा मण्डलवृद्धये ॥
पद्मात्ततः समारभ्य नालां पश्चिमगामिनीम् ।
पश्चिमद्वारमध्येन शतहस्तां विनिर्हरेत् ॥
प्रत्येकद्वारमध्ये तु पद्मञ्चैवाष्टपत्रकम् ।
कुर्य्यान्मण्डलभागे तु चूर्णैरेव पृथक् पृथक् ॥

चूर्णैस्तु मण्डलं कृत्वा सूत्राण्युत्सारयेत्ततः ।
उत्सार्य्य सूत्रं प्रथमं मण्डलं पूजयेत्ततः ॥
भवनाय नम इति ततो हस्तं वियोजयेत् ।
सव्यावलम्बहस्तस्तु रजःपात्रं समारभेत् ॥
मध्यमानामिकाङ्गुष्ठैरुपरिष्टाद्यथेच्छया ।
अधोमुखाङ्गुलिं कृत्वा पातयेत् सुविचक्षणः ॥
समरेखा तु कर्त्तव्या विच्छिन्ना पुञ्जवर्जिता ।
अङ्गुष्ठपर्व्वनैपुण्यात् समा कार्य्या विजानता ॥
संसक्तं विषमं स्थूलं विच्छिन्नं क्रमराहितम् ।
पर्य्यन्तमर्पितं हस्तमालिखेन्न कदाचन ॥
संसक्ते कलहं विद्याद्दूर्ब्बरेखे तु विग्रहम् ।
अतिस्थूले भवेद्व्याधिर्नित्यपीड़ाविमिश्रिते ॥
विन्दुभिर्भयमाप्नोति श्रुत्पश्चान्न संशयः ।
क्रमायां चार्थहानिः स्याच्छिन्नायां मरणं ध्रुवम् ॥
वियोगी वा भवेत्तस्य इष्टद्रव्यसुतस्य वा ।
अविदित्वा लिखेद्यस्तु मण्डलन्तु यथेच्छया ॥
सर्व्वदोषानवाप्नोति ये दोषाः पूर्व्वभाषिताः ।
सितसर्षपपूर्व्वाभ्या रेखाः कार्य्याः प्रमाणतः ॥
विमलं विजयं भद्रं विमानं शुभदं शिवम् ।
वर्द्धमानञ्च देवञ्च रताख्यं कामदायकम् ॥
कुचकं स्वस्तिकाख्यञ्च द्वादशैते तु मण्डलाः ।
यथास्थानं यथायत्नं योजनीया विचक्षणैः ॥
सागरे मथ्यमाने तु पीयूषार्थं सुरासुरैः ।
पीयूषधारणार्थाय निर्म्मिता विश्वकर्म्मणा ॥
कलां कलान्तु देवानामसित्वा ते पृथक् पृथक् ।
यतः कृतासु कलसाश्चतस्ते परिकीर्त्तिताः ॥

नवैव कलसाः प्रोक्ता नामतस्तान्निबोधत ।
गौरीऽपगौरी मखसी मयूखश्च तथापरः ॥
मनीषा त्वसिभद्रश्च विरजस्तनुशोषकः ।
इन्द्रियग्नीऽथ विजयो नवमः परिकीर्त्तितः ॥
तेषामेव क्रमाद्भूप ! नव नामानि यानि तु ।
शृणु तान्यप्यशेषेण शान्तिदानि सदैव हि ॥
चितीन्द्रः प्रथमः प्रोक्तो द्वितीयो जलसम्भवः ।
पावनाग्नी ततो ज्ञौ तु यजमानस्ततः परः ॥
कोषसम्भवनामा तु षष्ठः स परिकीर्त्तितः ।
सोमस्तु सप्तमः प्रोक्तश्चादित्यस्तु तथाष्टमः ॥
विजयो नाम कलसो योऽसौ नवम उच्यते ।
स तु पञ्चमुखः प्रोक्तो महादेवस्वरूपधृक् ॥
घटस्य पञ्चवक्त्रेषु पञ्चवक्त्राः स्वयम्भवा ।
यथाकाष्ठास्थितः सम्यक् वासदेवादिना मतः ॥
मण्डलस्य च पद्मान्तः पञ्चवक्त्रं घटं न्यसेत् ।
चितीन्द्रं पूर्व्वतो न्यस्य पश्चिमे जलसम्भवम् ॥
वायव्ये वायवं न्यस्य आग्नेये ह्यग्निसम्भवम् ।
नैर्ऋत्यां यजमानन्तु ऐशान्यां कोषसम्भवम् ॥
सोममुत्तरतो न्यस्य सौरं दक्षिणतो न्यसेत् ।
न्यस्यैवं कलसांश्चैव तेषु च तान् विचिन्तयेत् ॥
कलसानां मुखे ब्रह्मा ग्रीवायां शङ्करः स्थितः ।
मूले तु संस्थितो विष्णुर्मध्ये मातृगणाः स्थिताः ॥
दिक्पाला देवताः सर्व्वा वेष्टयन्ति दिशो दश ।
कुक्षौ तु सागराः सप्त सप्तद्वीपाश्च संस्थिताः ॥
नक्षत्राणि ग्रहाः सर्व्वे तथैव कुलपर्व्वताः ।
गङ्गाद्याः सरितः सर्व्वा वेदाश्चत्वार एव च ॥

कलसेषु स्थिताः सर्व्वे तेषु तानपि चिन्तयेत् ।
रत्नानि सर्व्वबीजानि पुष्पाणि च फलानि च ॥
वज्रमौक्तिकवैदूर्य्यमङ्गापद्मेन्द्रस्फाटिकैः ।
सर्व्वधाममयं विल्वं नागरोडुम्बरं तथा ॥
बीजपूरकजम्बीरकाश्मीराम्रातदाडिमान् ।
यवं शालिञ्च नीवारं गोधूमं सितसर्षपम् ॥
कुङ्कुमागुरुकस्तूरीमदनं रोचनं तथा ।
चन्दनञ्च तथा मांसीमेलां कुष्ठं तथैव च ॥
कर्पूरं पत्रचण्डञ्च जलं निर्य्यासकाम्बुदम् ।
श्रैलेयं वदरं जातीपत्रपुष्पे तथैव च ॥
कालशाकं तथा पृक्का दैवी पूर्णकमेव च ।
वचां धात्रीं समङ्गिष्ठां तुरुष्कं मङ्गलाष्टकम् ॥
दूर्व्वां मोहनिकां भद्रां शतमूलीं शतावरीम् ।
पर्णानां सवलां क्षुद्रां सहदेवां गजाह्वयाम् ॥
पूर्णकोषां सितां पाठां गुञ्जां शिरसिकानलौ ।
व्यामकं गजदन्तञ्च शतपुष्पां पुनर्नवाम् ॥
ब्राह्मीं देवीं शिवां रुद्रां सर्व्वसन्धानिकां तथा ।
समाहृत्य शुभानेतान् कलसेषु निधापयेत् ॥
कलसस्य यथादेशं विधिं शम्भुं गदाधरम् ।
यथाक्रमं पूजयित्वा शम्भुं मुख्यतया यजेत् ॥
प्रासादेन तु मन्त्रेण शम्भुतन्त्रेण शङ्करम् ।
प्रथमं पूजयेन्मध्ये नानानैवेद्यवेदनैः ॥
दिक्पालानां घटेष्वेव दिक्पालानपि पूजयेत् ।
पूर्व्वं वह्निःस्थापितेषु ग्रहाणां कलसेषु च ॥
नवग्रहान् पूजयेत्तु मातृर्मातृघटेषु च ।
सर्व्वे देवा घटे पूज्या घटस्तेषां पृथक् पृथक् ॥

नवैव तत्र पूर्वोक्ताः सदा मुख्यतमा नृप ! ॥
भक्ष्यैर्भोज्यैश्च पेयैश्च पुष्पैर्नानाविधैः फलैः ॥
यावकैः पायसैश्चापि यथासम्भवयोजितैः ।
पुण्यस्नानाय नृपतिः पूजयेत् सकलान् सुरान् ॥
दक्षिणे मण्डलस्याथ कुण्डं निर्माय पायसैः ।
समिद्भिः शालिसिद्धार्थैर्घृतैर्दूर्वाक्षतैस्तथा ॥
कैवलैश्च तथैवाज्यैः पूजयेत् सकलान् सुरान् ।
क्षौमान्ते तोषयेद्विप्रैर्नृपः सार्धं पुरोहितम् ॥
क्षौमान्ते मण्डलोदीच्यां वेदिकायां सपट्टकम् ।
रोचनाद्यमलङ्कारान् तथा सर्वान्नियोजयेत् ॥
हस्त्रा क्षङ्गुलमङ्गुष्ठं द्विर्दशाङ्गुलयावधि ।
वृत्तं वा चतुरस्रं वा पद्मकर्णिकसंहितम् ॥
रत्नेशान् पद्ममध्ये तु गौरम्बिकविनायकैः ।
श्रीः श्रीश्चौ वरारोहा स्वामी देवौ शुभान्विता ॥
रत्नैः सर्वैरलङ्कारैः पट्टं कार्यं द्विहस्तकम् ।
हस्तविस्तारमुच्छ्रायं कर्त्तव्यन्तु दशाङ्गुलम् ॥
स्नानार्थं सार्धहस्तन्तु पट्टं वृत्तासनान्वितम् ।
शय्या चतुर्गुणा दीर्घा धनुर्मानन्तु पीठकम् ॥
गजसिंहकृताटोपं हेमरत्नविभूषितम् ।
सिंहाख्यं सार्धविस्ताराद्धासनमथापि वा ॥
व्याघ्रचित्रकपट्टैर्वा उपधानानि कारयेत् ।
अन्यैर्वा निर्मितैश्चर्ममृदुतूलकपूरितान् ॥
शय्या दैर्घ्यार्धविस्तीर्णा चतुर्हस्ता सुलक्षणा ।
वितस्त्यधिकमिच्छन्ति नृपस्य गुरुविद्यया ॥
अर्धचन्द्रसमं कुर्यादासनं चतुरस्रकम् ।
उपधानानि शय्यायाः कर्णादिमूलदेशतः ॥

षोड़शैवाच कार्याणि वर्षाचिचयुतानि च ।
यानं सिंहासनं पट्टं शय्योपकरणादिकम् ॥
राज्ञी नूतनयोग्यं तद्वेद्या उत्तरती न्यसेत् ।
तेषान्तु पश्चिमे स्वर्णरत्नौघनिचिते वरे ॥
पर्य्यङ्के यज्ञदार्व्यौघनिर्म्मिते मृदास्तरे ।
ऊर्ङ्काच्छादनसंयुक्तचर्म्माद्यास्था चतुष्टयम् ॥
वृषभस्य तथोर्णायाः सिंहशार्दूलयोरपि ।
पादपीठे रत्नयुते पादावारोप्य पार्थिवः ॥
तस्मिन् पर्य्यङ्कपृष्ठस्थे चर्म्मखण्डचतुष्टये ।
नानालङ्कारभूषाढ्यं नृपतिं रत्नमालिनम् ॥
स्नापयेद्ब्राह्मणैः सार्द्धं राजानं सुखसङ्गतम् ।
संवीतकम्बलं कृष्णं रत्नवस्त्रावशोभितम् ॥
कलसैर्बलिपुष्पाद्यैः शालिचूर्णैश्च स्नापयेत् ।
अष्टौ षोड़शविंशाष्टशतमष्टाधिकञ्च वा ॥
कलसानां समाख्याता अधिकस्योत्तरोत्तरम् ।
जयकल्याणदैर्मन्त्रैर्मङ्गलोत्थैश्च शाम्भवैः ॥
वैष्णवैरथ दिक्पालैर्यहमन्त्रैश्च मातृकैः ।
आज्यं तेजः समुद्दिष्टमाज्यं पापहरं परम् ॥
आज्यं सुराणामाहारमाज्ये लोकाः प्रतिष्ठिताः ।
भौमान्तरीक्षं दिव्यं वा यत्ते कल्मषमागतम् ॥
सर्व्वं तदाज्यसंस्पर्शात् प्रणाशमुपगच्छतु ।
ततोऽपनीय गात्रात्तु कम्बलं वस्त्रमेव च ॥
कलसैः स्नापयेद्रूपं पुण्यस्नानार्थपूरितैः ।
एभिर्मन्त्रैर्नरश्रेष्ठ ! तत्त्वतत्त्वार्थसाधकैः ॥
सुरास्त्वामभिषिञ्चन्तु ये च सिद्धाः पुरातनाः ।
ब्रह्मा विष्णुश्च रुद्रश्च साध्याश्च समरुद्गणाः ॥

आदित्या वसवो रुद्रा आश्विनेयौ भिषग्वरौ ।
अदितिर्देवमाता च स्वाहा लक्ष्मीः सरस्वती ॥
कीर्त्तिर्लक्ष्मीर्धृतिः श्रीश्च सिनीवाली कुहूस्तथा ।
दितिश्च सुरसा चैव विनता कद्रुरेव च ॥
देवपत्न्यश्च याः प्रोक्ता देवमातर एव च ।
सर्व्वास्त्वामभिषिञ्चन्तु सर्व्वे चाप्सरसां गणाः ॥
नक्षत्राणि मुहूर्त्ताश्च पक्षाहोरात्रसन्धयः ।
संवत्सरो दिवा रात्रिः कला काष्ठाः क्षणा लवाः ॥
सर्व्वे त्वामभिषिञ्चन्तु कालस्यावयवाश्च ये ।
वैमानिकाः सुरगणा मनवः सागरैः सह ॥
सरितश्च महानागा यक्षाः किंपुरुषास्तथा ।
वैखानसा महाभागा द्विजा वैहायसास्तथा ॥
सप्तर्षयः सदाराश्च ध्रुवस्थानानि यानि तु ।
मरीचिरत्रिः पुलहः पुलस्त्यो भृगुरङ्गिराः ॥
क्रतुः सनत्कुमारश्च सनकोऽथ सनन्दकः ।
सनातनश्च दक्षश्च जैगीषव्योऽथ नन्दनः ॥
एकतश्च द्वितश्चैव तिसो जावालिकाश्यपौ ।
दुर्व्वासा दुर्विनीतश्च कण्वः कात्यायनस्तथा ॥
मार्कण्डेयो दीर्घतपाः शुनःशेफो विदूरथः ।
और्व्वः संवर्त्तकश्चैव च्यवनोऽत्रिः पराशरः ॥
द्वैपायनो यवक्रीतो देवरातः सहानुजः ।
एते चान्ये च बहवो देवव्रतपरायणाः ॥
सग्निष्यास्तेऽभिषिञ्चन्तु सदाराश्च तपोधनाः ।
पर्व्वतास्तरवो नद्यः पुण्यान्यायतनानि च ॥
प्रजापतिः क्षितिश्चैव गावो विश्वस्य मातरः ।
वाहनानि च दिव्यानि सर्व्वे लोकाश्चराचराः ॥

अग्नयः पितरस्तारा जीमूताः खं दिशो जलम् ।
एते चान्ये च बहवः पुण्यसंकीर्त्तनाः शुभाः ॥
तीर्थैस्त्वामभिषिञ्चन्तु सर्व्वोत्पातनिवर्हणाः ।
इत्येवं शुभदैवत्यैर्मन्त्रैर्दिव्यैस्तथापरैः ॥
श्रीवैनारायणी रौद्रैर्ब्रह्मशक्रसमुद्भवैः ।
आपो हि ष्ठा हिरण्येति सम्भवेति सुरेति च ॥
मानस्तोकेति मन्त्रेण गन्धद्वारेत्यनेन च ।
सर्व्वमङ्गलमङ्गल्यैः श्रीश्च ते यहयोगिभिः ॥
इत्येवं स्नानमासाद्य गात्रमार्द्रत्य कम्बलैः ।
सर्व्वमङ्गलमन्त्रेण वस्त्रं कार्पासकं धियात् ॥
आचम्य च ततो देवान् गुरुं विप्रांश्च पूजयेत् ।
ध्वजं छत्रं चामरञ्च घण्टामश्वान् गजांस्तथा ॥
मन्त्रं जप्त्वा धारयेत्तु ततो गच्छेद्धुताशनम् ।
तत्र गत्वा वह्निमध्ये वह्निश्रीर्वीक्ष्य पार्थिवः ॥
अनिमित्तनिमित्तानि लक्षयेत्तत्र विन्दुभिः ।
दैवज्ञकञ्चुकामात्यवन्दिपौरजनैर्वृतः ॥
वादित्रघोषैस्तुमुलैस्तथा तीर्थ्यचिकैः शुभैः ।
कृत्वा शेषे पुनः शान्तिमाशीर्वाच्य च वै द्विजान् ॥
पूर्णां विधाय विधिवद्दक्षिणां कनकान्वितां ।
धान्यानि चाथ वासांसि दत्त्वा कुर्य्याद्विसर्ज्जनम् ॥
ततः शेषजलैः सर्व्वानमात्यादीन् पुरोहितः ।
सेचयेच्चतुरङ्गञ्च बलञ्चापि सराष्ट्रकम् ॥
एवं कृत्वा नृपः पश्चान्निराशं संयती भवेत् ।
मांसमैथुनहीनञ्च कुर्य्यान्मङ्गल्यसेवनम् ॥
पुण्यनक्षत्रयुक्ता तु तृतीया यदि लभ्यते ।
तस्यां पूज्या सदा देवी चण्डिका शङ्करेण च ॥

तथा कुथुमिः।

"अब्दमब्बुघटं दद्यादन्नाभिषसंयुतम्।
संवत्सरे विवृद्धेऽपि प्रतिमासञ्च मासिकम्॥"

"संवत्सरे विवृद्धेऽपी"त्यधिमासात्तिथिवृद्धा वेति द्वयोरपि ग्रहणम्*। तेनैकं मासिकश्राद्धमब्बुघटश्राद्धानि च त्रिंशद्विवर्द्धन्ते।

---

पञ्चालिकाविवाहाद्यैः शिशूनां कौतुकैस्तथा।
वैवाहिकेन विधिना नीदयेच्चण्डिकां शिवाम्॥
चतुष्पथेषु सर्व्वेषु देवदेवीगृहेषु च।
पताकाभिरलङ्कुर्य्यादेवं कुर्व्वन्न सीदति॥
एवं कृत्वा शान्तियागं तथा पुष्याभिषेचनम्।
चतुरङ्गैः समं राजा भार्य्याभिसनयैः सह।
राज्यमण्डलसंयुक्तः परत्रेह न सीदति॥
नातः परतरो यज्ञो नातः परतरीत्सवः।
नातः परतरा शान्तिर्नातः परतरं शिवम्॥
अनेनैव विधानेन नृपतेरभिषेचनम्।
युवराज्याभिषेकञ्च कुर्य्याद्राजपुरोहितः॥
नृपाभिषेककरणमादौ यदि समाचरेत्।
अनेनैव विधानेन स्थिरः स्यान्नृपतिस्तदा॥
अयं यज्ञः समुद्दिष्टः शक्रार्थं ब्रह्मणा पुरा।
एवं यज्ञं नृपो दृष्ट्वा परत्रेह न सीदति॥"

इति कालिकापुराणे पुष्याभिषेकः ६८ अध्यायः।

* अब्दमब्बुघटमिति। अब्दमिति यस्मिन्नब्दे पित्रादेर्मरणं तदब्दं व्याप्य प्रत्यब्दं संवत्सरे विवृद्धेऽपि मलमासपातेन तिथिवृद्धा वा विवृद्धेऽपि त्रयोदशमासात्मकसंवत्सरे अर्थात् मलमासेऽपि दद्यात्। एतत्काम्यं तत्प्रयोगश्च—अमुकगोत्र प्रेत अमुकदेवशर्म्मन् एतत्ते अन्नं सामिषं सोदकं स्वधा इति। संवत्सरे विवृद्धे त्रयोदशमासात्मकसंवत्सरे अधि-

तथा सत्यव्रतः ।

"संवत्सरस्य मध्ये तु यदि स्यादधिमासकः ।
तदा द्वादशके श्राद्धे कार्यं तदधिकं भवेत् ॥"*

अतो यद्विष्णुवचनम् ।

"मासिकान्नच्चेदधिमासपातो मासिकार्थं दिनमेकं वर्द्धयेत् ।"

तच्च यत् वर्द्धनं खण्डनमिति व्याख्यातं तत् कुयुमिसत्यव्रतवचनेन बाधितम् । न च वाच्यम् ।

"चतुर्थाह्नि त्रिपक्षे च षण्मासे चाब्दिके तथा ।
प्रतिमासं तथा तस्य श्राद्धान्येतानि षोड़श ॥"

इति निबध्यते† । सप्तदशत्वापत्तेः यतोऽधिकश्राद्धविधानदर्शना-

---

मासादिति । द्वादशमासाः संवत्सरः क्वचित्त्रयोदशमासा इति श्रुतेः । तिथिद्वया वेति वाकारः समुच्चये दिनद्वयिकमसच्चयार्थां तिथिद्वया चेत्यर्थः । द्वयोरपि ग्रहणमिति । तथाच औत्पातिकमलमाससमानधर्म्मभानुलङ्घितनामासंक्रान्तमासे तिथिद्वयाभावात् तदर्थाद्वयये अधिमासातिथिद्वया वेति द्वयोरपि ग्रहणमित्युक्तम् ।

* उपसंहरति तेनेति । एकं मासिकश्राद्धं वर्द्धते त्रिंशदब्दघटश्राद्धानि विवर्द्धन्ते इति लिङ्गव्यत्ययेनान्वयः । तथाच त्रयोदशमासात्मकमलमाससयुतवत्सरे प्रतिमासकर्त्तव्यतया एकमासिकश्राद्धस्य द्वयिः प्रत्यहकर्त्तव्यतया त्रिंशदब्दघटश्राद्धानां द्वयिश्च भवतीति भावः । संवत्सरस्य मध्ये एकादशमासाभ्यन्तरे इत्यर्थः । तथाच असंक्रान्तेऽपि कर्त्तव्यमाब्दिकं प्रथमं द्विजैरित्यादिवचनात् अन्त्याधिमासे मासिकद्वयिर्नास्तीति भावः । द्वादशके श्राद्धे प्रकृतद्वादशमासे द्वादशमासिके कृते अधिकं यन्मलमासात्मकमधिकं भवेत् तच्च तत् त्रयोदशमासिकं कार्य्यमित्यर्थः ।

† अत इति । मलमासपाते मासिकद्वयिरावश्यकत्वं यतः अत इत्यर्थः । मासिकान्न-

दुल्लर्गसिद्धसंख्यानुवादमात्रत्वात्। अमावास्यायां मृतस्य श्रौनामासिकं हवौ खण्डनीयमेव।

---

चेदिति चेदयदि मलमासपातः एकादशमासाभ्यन्तरे इति शेषः। यत् वर्धनं खण्डनमिति वर्धक् छेदनपूरणे इत्यनेन चुरादिवर्धधातोश्छेदनार्थत्वादाह वर्धनं खण्डनमिति। कुथुमिसत्यव्रतवचनेन बाधितमिति कुथुमिवचनम् अब्दमध्यघटं दद्यादिति वचनं सत्यव्रतवचनं संवत्सरस्य मध्ये तु इति वचनं बाधितम् तन्मतं खण्डितमित्यर्थः। चतुर्थाब्दे अस्थिसञ्चयनदिने षण्मासे एकाहन्यूनषण्मासे प्रथमषाण्मासिकश्राद्धमित्यर्थः। आब्दिके एकाहन्यूनाब्दिके द्वितीयषाण्मासिकश्राद्धमित्यर्थः। अन्यथा प्रतिमासिकमित्यनेन षष्ठमासिकादेः प्राप्तत्वात् षण्मासे इत्यादेरनुवादकता स्यात्। प्रतिमासं मासं मासं प्रति प्रतिमासं द्वादशमासिकानि इत्यर्थः। एतानि षोड़शश्राद्धानि।

अतएव हेमाद्रिः।

अस्थिसञ्चयने श्राद्धं त्रिपक्षे मासिकानि च।
रिक्तयोश्च तथा तिथ्योः प्रेतश्राद्धानि षोड़श॥ इति।

रिक्तयोस्तिथ्योरित्येकेनाङ्का न्यूने षष्ठे द्वादशे च मासे इत्यर्थः इत्याह। एतत् षोड़शश्राद्धं शिष्यपर्य्यन्तरहितस्य साग्नेर्बोध्यं तस्य सपिण्डीकरणनिषेधात्। एवं निरग्नेरपि शिष्यपर्य्यन्तरहितस्य सपिण्डनं नास्ति। यथा—

लघुहारीतः।

"पुत्रेणैव तु कर्त्तव्यं सपिण्डीकरणं स्त्रियाः।
पुरुषस्य पुनस्तस्मे भ्रातृपुत्रादयोऽपि चेति॥"

आदिशब्दग्राह्यमाह स एव।

"भ्राता वा भ्रातृपुत्रो वा सपिण्डः शिष्य एव वा।
सहपिण्डक्रियां कृत्वा कुर्य्यादभ्युदयं ततः॥"

भ्राता वेति वाशब्दात् भ्रातृपेक्षया प्रधानत्वेन पूर्वाधिकारिणां दौहित्रात्मानां समुच्चयः। चतुर्थाब्दे इति नवश्राद्धोपलक्षणम्। नवश्राद्धन्तु प्राग्दर्शितम्। नवश्राद्धसामान्यधर्ममादाय षोड़शत्वसंख्यापूर्त्तेः श्राद्धान्येतानि षोड़श इत्यनेन न विरोधः।

तथा कुथुमिः।

"संवत्सरातिरेको वै मासो यः स्यात्त्रयोदशः।
तस्मिंस्त्रयोदशं श्राद्धं न कुर्य्यादिन्दुसंक्षये॥"

अमावास्यायां मासिकस्य विशेषेण मलमासे निषेधात्। अपि तिथ्यन्तरकार्य्यस्याभ्यनुज्ञानम्। न च अमावास्यापार्व्वणश्राद्धस्यायं निषेध इति वाच्यम्। पुरुषभेदेन तस्यानियतसंख्यत्वात्त्रयोदशत्वानुपपत्तेः। नन्वब्दशेषेऽधिमासश्राद्धस्य क्रियमाणस्य त्रयोदशत्वं न पुनर्द्वितीयादिमासेषु क्रियमाणानां तेषां द्वितीयादिसंख्यत्वात्। नैतत् वार्षिकश्राद्धानि संकलय्य यतः कुतश्चिदारभ्य गणने त्रयोदशत्वं सर्व्वेषां त्रयोदशा इति गणनवत् पणपुरणादिवद्वा*। किञ्च पर्व्व चाग्रयणं तथेति पर्व्वामावास्या तन्नि-

---

* सप्तदशत्वापत्तेरिति। मलमासपाते इति शेषः। उत्सर्गसिद्धसंख्यानुवादमात्रत्वादिति सामान्यसिद्धसंख्यानुवादमात्रात्। अमावास्यायां कृतस्य औनामासिकम्। औनामासिकं मलमाससम्बन्धिमासिकम्।

तथाच व्यासः।

"मलिम्लुचे तु सम्प्राप्ते ब्राह्मणो म्रियते यदि।
ऊनाभिषेयी मासोऽसौ कथं कुर्य्यात्तदादिकम्"॥ इति।

द्वद्वौ खण्डनीयमेवेति। तथाचामावास्याकृतस्य मलमासपाते मासिकद्वित्वमेवेति भावः। तिथ्यन्तरकार्य्यस्य अमावास्याभिन्नतिथिकृतस्य मलमासनिमित्तकत्रयोदशमासिकद्वित्वभवतीत्यर्थः। पुरुषभेदेन नानापुरुषकर्त्तृकपार्व्वणानुष्ठानेन तस्य पार्व्वणस्य अनियतसंख्यत्वात् नियतसंख्यावाचकशब्देनानभिधानात्। त्रयोदशत्वानुपपत्तेरिति तथाच मलमासीयामावास्यायाः पूर्व्वं कस्यापि पार्व्वणमेकं भूतं, कस्यापि पार्व्वणद्वयं, कस्यापि त्रयं, चतुष्टयादिकं वा, इत्यतः अमावास्यायां कर्त्तव्यस्य पार्व्वणस्य सर्व्वेषां त्रयोदशत्वं न सम्भवतीत्यभि-

मित्तकस्य प्रतिप्रसवात् कथं तन्निषेधः*। नन्वेकस्मिन्मासि

---

प्रायः। अथवा पुरुषमेदेन इत्युपलक्षणम्। एकस्यापि जीवनपर्य्यन्तं पार्व्वणस्य किञ्चित्त्वात्। संख्याया अनियतत्वं, प्रेतश्राद्धस्य षोड़शत्वं, मलमासपाते सप्तदशत्वं नियतम्। तत्र प्रथमादिभेदोऽपि नियत इति भावः। अब्दशेषे अधिमासश्राद्धस्येति। तथाच मलमासपाते वत्सरस्य त्रयोदशमासात्मकत्वात् तत्र क्रियमाणस्य पार्व्वणस्य सुतरां त्रयोदशत्वम् इति भावः।

* अमावास्यापार्व्वणश्राद्धस्य मलमासकर्त्तव्यत्वाविधायकत्वप्रतिषेधवचनं दर्शयति किञ्चेति। पर्व्व अमावास्या तन्निमित्तकस्येति। यच्चाच स्मार्त्तेन दूषणमभिहितं, न तु पार्व्वणश्राद्धपरम्, तस्य कृष्णपक्षनिमित्तकत्वेन पर्व्वनिमित्तकत्वाभावादित्यादि, तन्न।

"अमावास्यां यत्क्रियते तत्पार्व्वणमुदाहृतम्।

क्रियते वा पर्व्वणि यत् तत्पार्व्वणमिति स्थिति"रिति वचने अमावास्यां यत् क्रियते इति श्रुतेः, पर्व्वणि यत् क्रियते इति श्रुतेश्च। अमावास्यापर्व्वणोर्निमित्तत्वे बाधकाभावात्। न चाच यत्पदश्रयश्रुतेः यत्पदेन कृष्णपक्षनिमित्तकश्राद्धमुच्यते। तथाच यत्कृष्णपक्षनिमित्तश्राद्धम् अमावास्यां पर्व्वणि च क्रियते तदेव पार्व्वणमित्यर्थो वाच्य इति वाच्यम्। एतद्वचने कृष्णपक्षनिमित्तश्राद्धानुपस्थितेः यत्पदेन तच्छ्राद्धकथनस्यायुक्तत्वात्। न च विधायकवचने अमावास्यापर्व्वणोरश्रवणात् यत्पदेन कृष्णपक्षनिमित्तश्राद्धं सुतरां वाच्यमिति वाच्यम्। "अमायां पितृभ्यो दद्यात् पूर्व्वेद्युर्ब्राह्मणान् सन्निपात्य" इति निरपेक्षश्रुतिबलात् अमावास्याष्टका कृष्णपक्षदशीषु चेत्यभिधाय।

"एतच्चानुपनीतोऽपि कुर्य्यात् सर्व्वेषु पर्व्वसु।
श्राद्धं साधारणं नाम सर्व्वकामफलप्रदम्॥
भार्य्याविरहितोऽप्येतत् प्रवासस्थोऽपि नित्यशः।
शूद्रोऽप्यमन्त्रवत् कुर्य्यादनेन विधिना बुधः॥"

इति विशेषविधिबलाच्च कृष्णपक्षातिरिक्तामावास्यानिमित्तकस्य पर्व्वनिमित्तकस्य च पृथक् श्राद्धद्वयस्य श्रवणात्। न च कृष्णपक्षनिमित्तस्य श्राद्धस्य पर्व्वकरणपक्षे फलविशेषज्ञापकमेवेदं वचनं न तु पर्व्वनिमित्तकश्राद्धविधायकमिति वाच्यम्। एतच्चानुपनीतोऽपि कुर्य्या-

तिथिद्वये सति पूर्व्वस्मिन्नेव मासि द्वादशभिर्मासैः सिद्धे संवत्सरे वार्षिकपुनराब्दिकसपिण्डीकरणान्तानान्तत्रैव कृतत्वात् कथं पुनर्मासिकप्रसक्तिः*। नैतत् वार्षिकादीनामिव वचनोत्कर्षात्।

---

दिति एतच्चेति चकारयुतैः पर्व्वनिमित्तत्वेन पृथक्श्राद्धस्यावश्यवक्तव्यत्वात्। तथाचायं वचनार्थः। एतत्प्रागुक्तश्राद्धचतुष्टयं, पर्व्वसु पर्व्वनिमित्तं साधारणं श्राद्धञ्च, "अनुपनीतो" जाताग्निः अपि समुचितसाग्न्यादिश्च "भार्य्याविरहितोऽपि" "प्रवासस्थोऽपि नित्यशः" कुर्य्यात्। श्राद्धस्य फलाकाङ्क्षायां "सर्व्वकामफलप्रदमिति" विशेषणम्। अनेन विधिना" एतच्छ्राद्धपञ्चकम् "शूद्रोऽपि" "अमन्त्रवत्" कुर्य्यादिति। यत्तु अपरपक्षे यदहः सम्पद्यते अमावास्यायान्तु विशेषेणेति निगमवचनम्। अस्यार्थः—कृष्णपक्षे यदहः यां तिथिं प्राप्य सद्व्यब्राह्मणादिकं लभ्यते तस्यां तिथौ कृष्णपक्षनिमित्तं श्राद्धम्, अमावास्यायाम् अमावास्यानिमित्तं श्राद्धञ्च कुर्य्यादिति शेषः। तुशब्दार्थे। एतद्रूपेण ग्रन्थकर्त्तुराशयवर्णने न स्मार्त्तोक्तदोषावकाशः इति दिक्। अतएव हेमाद्रिणा अवघट्कारहोमाश्च पर्व्व चाग्रयणन्तथा वचनमुक्ता अवघट्कारहोमाः अग्निहोत्रोपासनवैश्वदेवादयः पर्व्व दर्शपौर्णमासौ पार्व्वणस्थालीपाकश्च इति व्याख्यातम्। प्रतिप्रसवात् अमावास्यापार्व्वणस्य मलमासे कर्त्तव्यताविधानात्।

* अमावास्याकृतस्य मलमासे मासिकद्वित्वं सम्भवतीत्याह नन्वेकस्मिन्नित्यादि। एकस्मिन् मासि सौरमासि तिथिद्वये सति अमावास्याद्वये सति पूर्व्वस्मिन्नेव मासि मलमासरूपपूर्व्वचान्द्रमास्येव द्वादशभिर्मासैः पूर्व्वकृततिथिं विहाय अपरकृततिथिमादाय परिगणितैः द्वादशभिर्मासैः सिद्धे समाप्ते संवत्सरे वार्षिकपुनराब्दिकसपिण्डीकरणान्तानां द्वितीयषाण्मासिकद्वादशमासिकसपिण्डीकरणश्राद्धानामित्यर्थः। "पूर्व्वेद्युराब्दिकं श्राद्धं परेद्युः पुनराब्दिकमिति" वचनात् वार्षिकपुनराब्दिकपदाभ्यां द्वितीयषाण्मासिकद्वादशमासिके उच्येते। कथं मासिकप्रसक्तिरिति। अमावास्याकृतस्य त्रयोदशे मासि कथं मासिकद्वित्वप्रसक्तिः। सपिण्डनोत्तरं मासिकाश्रवादिति भावः।

तथाच विष्णुधर्मोत्तरे मार्कण्डेयः ।

"संवत्सरस्य मध्ये तु यदि स्यादधिमासकः ।
तदा त्रयोदशे मासि क्रिया प्रेतस्य वार्षिकी ॥"

वर्षनिमित्ताया वार्षिकपुनराब्दिकसपिण्डीकरणान्तश्राद्धक्रियाया उत्कर्षात् । यत्तु वदन्ति ।

"यस्मिन्राशिगते भानौ विपत्तिं यान्ति मानवाः ।
तेषां तत्रैव कर्त्तव्या पिण्डदानोदकक्रिया ॥"

इति वचनेन तेषामनुत्कर्षः तन्न । मृततिथिकर्त्तव्यसांवत्सरिक-श्राद्धविषयत्वादेवास्य वार्षिकसपिण्डीकरणयोस्तु नैवंरूपत्वात् ।

इत्यधिमासनिरूपणम् । *

---

* निषेधयति नैतदिति । वचनोत्कर्षात् विशेषवचनेन उत्कर्षात् अमावास्यामृतस्य मलमासे मासिकनिषेधेन शुद्धमासि अन्यस्योत्कर्षादिति । विपत्तिं विनाशम् । तेषां तत्रैव तत्सौरमास एव । मृततिथिकर्त्तव्यसांवत्सरिकविषयत्वात् मलमासमृतस्येति शेषः । शुद्धमासि मृतस्य मलमासे सांवत्सरिकश्राद्धनिषेधात् ।

इति मलमासनिरूपणम् ।

## अथ सम्मति द्विराषाढ़निरूपणम्।

तत्र ज्योतिःशास्त्रम्।

"व्रजति यदा मिथुनं विहाय कर्किं
त्यक्त्वा राजविवर्ज्जितान्तिथिञ्च सूर्य्यः।
भवति तदा नियतं द्विराषाढ़ः
सुरशयनस्य विधिर्द्वितीयमासि॥"*

राजा सोमस्तेन विवर्ज्जिता अमावास्योच्यते, तां विहाय कर्कट-गमनविशेषणात् कर्कटगमन एव तदतिक्रमो न मिथुनगमन-समय इति अमावास्याद्वयातिक्रमावगतेराषाढ़द्वयमेको मिथुने कर्कटे चापरः। एतदेवापरोऽप्याह।

* अथ द्विराषाढ़निरूपणमिति। अधिमासं निरूप्य तत्प्रसङ्गेन द्विराषाढ़निरूपणम् प्रतिजानीते सम्मति द्विराषाढ़निरूपणं द्विराषाढ़ादिनिरूपणं अथवा सुरशयनीयसाधारण-द्विराषाढ़निरूपणं क्रियते मयेति शेषः। व्रजति यदेति वचनार्थं स्वयं विवृणोति राजा सोम इत्यादि। तेन विवर्ज्जिता चन्द्रसम्बन्धरहिता। कर्कटगमन एव तदतिक्रमो न मिथुनगमन इति। तथाचार्यं वचनार्थः। सूर्य्यः पूर्व्वामावास्यान्त्यचरणं विहाय उपान्त्य-चरणादौ यदा मिथुनं व्रजति सञ्चरति, मिथुनं त्यक्त्वा राजविवर्ज्जितां सोमसम्बन्धरहितां परामावास्याञ्च विहाय कर्किं कर्कटराशिं व्रजति प्रतिपदादितिथाविति शेषः तदैव द्विराषाढ़ः द्विश्चान्द्राषाढ़ी भवति तत्र सुरशयनस्य हरिशयनस्य विधिः द्वितीयमासि कर्कट-गतशुद्धाषाढ़े भवतीत्यर्थः। तथाच पूर्व्वामावास्याया उपान्त्यचरणादौ मिथुनसङ्क्रमे तदुत्तरशुक्लप्रतिपदादिदर्शान्तमासस्य स्वाव्यवहितप्राक्चरणावच्छिन्नमिथुनस्थरव्यारब्धतया चान्द्राषाढ़त्वम्। एवं परामावास्याम् अतिक्रम्य शुक्लप्रतिपदादौ कर्कटसङ्क्रमे तच्छुक्ल-प्रतिपदादिदर्शान्तमासस्यापि स्वाव्यवहितप्राक्चरणावच्छिन्नमिथुनस्थरव्यारब्धतया च चान्द्राषाढ़त्वमिति द्विराषाढ़त्वं निर्विवाद इति भावः।

"मिथुनस्थो यदा भानुरमावास्याहयं स्पृशेत् ।
द्विराषाढ़: स विज्ञेयो विष्णु: स्वपिति कर्कटे ॥"

अमावास्याहयान्तं स्पृशेदित्यर्थ: । पूर्ववचनेन "राजविवर्जितां" त्यक्त्वा कर्कटगमनश्रुते: यदि दर्शहयमतिक्रमतीति बोद्धव्यम् ।

तथा ।

"अमावास्यामतिक्रम्य कुलीरं याति भास्कर: ।
द्विराषाढ़: स विज्ञेयो विष्णु: स्वपिति कर्कटे ॥"

अमावास्यामतिक्रम्यामावास्याहयमित्यर्थ: । एकातिक्रमस्य सदा दर्शनात् । न च तामतिक्रम्यैवान्तरं प्रतिपदि कर्कटगमने द्विराषाढ़ इति वाच्यम् । द्वितीयायामपि कर्कटसंक्रान्तौ द्विराषाढ़स्य निर्विवादत्वात् ।

तथा ।

"प्राप्त आषाढ़मासे तु सिनीवालीहयं भवेत् ।
द्विराषाढ़: स विज्ञेय: पतिते चाधिमासके ॥"

सिनीवाल्यमावास्यान्तहयं* भवेन्निष्पद्येत । निष्पत्तिश्च तिथेरन्तपर्य्यन्तेनैव ।

---

* अमावास्याहयान्तं स्पृशेदित्यर्थ इति । तथाच एकस्मिन् राशौ संक्रान्तिशून्यं पूर्वापरामावास्यान्त्यचणहयञ्चेत्तदैव अमावास्याहयान्त्यस्पर्शनं भवेदिति भाव: । यदि दर्शहयमतिक्रमतीति । दर्शहयान्त्यचणहयमतिक्रम्य सूर्य्य: राश्यन्तरं सञ्चरतीत्यर्थ: । प्राप्ते आषाढ़मासे तु सौराषाढ़मासे प्राप्ते सतीत्यर्थ: । सा दृष्टेन्दु: सिनीवालीति कीषात् चतुर्दशीयुक्तामावास्याया: सिनीवालीत्वात् । तदन्त्यहयस्य एकस्मिन् राशौ सत्त्वेऽपि मलमासासम्भवादाह सिनीवाल्यमावास्यान्त्यहयमिति सिनीवालीहयमचामावास्यान्त्यचणहयमित्यर्थ: ।

तथा।

"अमावास्यामतिक्रम्य यदार्कः कर्कटं व्रजेत्।
द्विराषाढ़ं तदा प्राहुः पतिते चाधिमासके॥"

पुराणस्य।

तदेतैर्मिथुनस्थसूर्य्येण द्वयातिक्रमे मुख्यश्चान्द्रो द्विराषाढ़ो दर्शितः। तस्यैव मिथुनस्थत्वव्युपक्रान्ततया द्विरावृत्तत्वात् सौरस्य नावृत्तिरित्युक्तम्। न च चान्द्रसौराभ्यां द्विराषाढ़स्तस्य प्रत्यब्दमेव भावात्*। मेषवृषसूर्य्येऽप्यधिमासे पतिते द्विराषाढ़ः पतिते चाधिमासक इति भूतनिर्देशात्। स तु गौणः कर्कटे चान्द्राषाढ़लाभनिमित्ततागुणयोगात्। कर्कटादावप्यधिमासपाते द्विराषाढ़माह पारस्करः।

---

* प्रथमचरणावच्छिन्नामावास्यादयमादाय मलमासापत्तिवारणाय तिथेरन्तपर्य्यन्तेनैवेति अन्त्यचरणपर्य्यन्तेनैव इत्यर्थः। यदार्कः कर्कटं व्रजेदिति पूर्व्वामावास्यान्त्यचरणमतिक्रम्य मिथुनमभिभुज्यमानोऽर्कः परामावास्यान्त्यचरणमतिक्रम्य यदा कर्कटं व्रजेत् सञ्चरेदित्यर्थः। "पतिते चाधिमासके" इत्यनेन पूर्व्वामावास्यायाः परतः शुक्लप्रतिपदि मिथुनसङ्क्रमेण अमावास्यादयातिक्रमेऽपि द्विराषाढ़त्वाभावं बोधयति। न च चान्द्रसौराभ्यामिति। तथाच चान्द्रत्वेन सौरत्वेन च आषाढ़स्य द्वित्वादिति भावः। निषेधयति तस्य प्रत्यब्दमेव भावादिति। तस्य द्विराषाढ़स्य प्रत्यब्दमेव भावात् अब्दम् अब्दं प्रति प्रत्यब्दम् इत्यव्ययं, तस्य भावः तस्मात्। तथाच चान्द्रसौराभ्यां द्विराषाढ़त्वस्वीकारे तस्य प्रतिवर्षसद्भावात् मिथुनस्थसूर्य्ये अमावास्यादयस्पर्शाभावेऽपि द्विराषाढ़त्वापत्त्या "मिथुनस्थो यदा भानुरमावास्यादयं स्पृशेत्। द्विराषाढ़स्तदा ज्ञेयः" इत्यादि विशेषवचनं व्यर्थं स्यादिति भावः।

"कृष्णपक्षे त्रयोदश्यां* कर्कटं याति भास्करः ।
द्विराषाढः स विज्ञेयः कुलीरे माधवः स्वपेत् ॥"

कुलीरः कर्कटः । कृष्णत्रयोदश्यां दक्षिणायनसंक्रान्तौ नियत एवोत्तरत्रिकेऽधिमासपातः ।

तथा ज्योतिःशास्त्रम् ।

"उत्तरायणमायाते सवितरि पतनं यदाधिमासस्य ।
भवति तदा द्विराषाढः शेते कर्किणि सुरारातिः ॥"

उत्तरमयनमायाते दक्षिणायने कर्कटादाविति यावत् । तदेवं सर्व्वत्राधिमासपाते द्विराषाढ इत्युक्तम् ।

अतएव परिशिष्टः सामान्येनैवाह ।

---

* "मेषवृश्चिकूर्य्येऽप्यधिमासे पतिते" इत्यादि स तु गौण इति । "माधवादिषु षट्-केषु मासि दर्शदयं यदा । द्विराषाढः स विज्ञेयः" इत्यादिवचनबोधितः । वैशाखादि-मासे दर्शद्वये द्विराषाढः स तु मौणी गौणीलक्षणायुक्त इत्यर्थः । तस्य द्विर्वैशाखत्वेन मुख्यद्विराषाढत्वाभावात् । गुणमाह कर्कटे चान्द्राषाढलाभनिमित्तत्वगुणयोगादिति । चान्द्राषाढलाभौ निमित्तौ यस्य तस्य भावः चान्द्राषाढनिमित्तता तदेव गुणं तस्य योगात् । तथाच आषाढे मलमासे सति शुद्धचान्द्राषाढस्य कर्कटगतत्वेन मुख्यद्विराषाढौ भवति ततश्च आषाढाव्यवहितोत्तरत्वविशिष्टकर्कटगतचान्द्राषाढत्वावच्छिन्नशक्तस्य द्विराषाढपदस्य वैशा-खादेर्मलमासत्वेऽपि चान्द्राषाढस्य कर्कटगतत्वेन कर्कटगतचान्द्राषाढस्य कर्कटगतचान्द्रा-षाढत्वगुणयोगात् गौणद्विराषाढत्वमक्षुण्णमिति भावः । द्विराषाढमाह गौणद्विराषाढमाह "कृष्णपक्षे त्रयोदश्या"मिति तु मलमासावश्यम्भावज्ञापनार्थम् । न तावन्मात्रनियमः । तेन कृष्णचतुर्दश्याम् अमावास्यान्यक्षणेऽपि संक्रान्तौ अपरामावास्यान्यक्षणात् ऊर्द्धमपर-संक्रान्तौ मलमासौ भवत्येव ।

"यदाधिमासः पतति तदा पूर्व्वौ मलिम्लुचः।
कार्य्यं नात्राभिषेकादि द्विराषाढ़ो भवेत्तदा॥
अमावास्याद्वयं यत्र रविसंक्रान्तिवर्ज्जितम्।
द्विराषाढ़ः स विज्ञेयः शेते च श्रावणेऽच्युतः॥"

एतदेव सङ्क्षिप्योक्तम्।

"माधवादिषु षट्केषु मासि दर्शद्वयं यदा।
द्विराषाढ़ः स विज्ञेयो विष्णुः स्वपिति कर्कटे॥"

ननु पूर्व्ववचने अमावास्याद्वयस्य रविसंक्रान्तिवर्ज्जितत्वे नाधिमासपातो द्विराषाढ़निमित्तमवगम्यते। तच्च चतुर्दश्यां पूर्व्वसंक्रान्तौ प्रतिपदि च परसंक्रान्तौ* भवतीति कथं दर्शेऽपि पूर्व्वसंक्रान्तौ द्विराषाढ़वर्णनम् उच्यते "दिवसस्य हरत्यर्कं" इति। तैः सभूयाभ्यां तृतीयाद्यमध्य एव नियताधिमासपातनिमित्ताभिधानात्। संक्रान्तिविरहितामावास्याद्वयस्य विंशत्यब्दैरपि दुर्लभत्वात्। एकराशिस्थसूर्य्यस्य दर्शद्वयातिक्रममात्रं तस्य लक्षणम्। तेन तल्लक्ष्यते अतएव तस्यार्कौ दर्शकश्चैकराशौ दर्शद्वयातिग इत्युक्तम्।

---

* कुलीरे माधवः स्वपेदिति। आगामिवर्षे इति बोध्यम्। एतत् पूर्व्वः मिथुनार्के शुक्लादश्यादौ हरिशयनस्य जातत्वात्। उत्तरचिके श्रावणादिचिके। उत्तरमयनमायाते गते सति अतीते सति इत्यर्थमाह दक्षिणायने इति। द्विराषाढ़ः गौणद्विराषाढ़ः। शेते कर्किणीत्यपि आगामिवर्षे ज्ञेयं सर्व्वत्र अधिमासपाते द्विराषाढ़ इत्युक्तं गौणद्विराषाढ़ इत्युक्तमित्यर्थः। अतएव गौणद्विराषाढ़त्वादेव। सामान्येनैवाह मासविशेषमनभिधाय द्विराषाढ़माचमुक्तम्। चतुर्दश्यां पूर्व्वसंक्रान्तौ प्रतिपदि च परसंक्रान्ताविति तु अमावास्याद्वयं यत्र रविसंक्रान्तिवर्ज्जितमित्यादि समग्रामावास्यावर्ज्जनरूपव्यवस्थायुतार्थमादाय।

तल्लक्षणीयमाह ।

"सूर्य्येण लङ्घितो मासश्चान्द्रः ख्यातो मलिम्लुचः ।"

चान्द्रमासस्यापि सूर्य्यलङ्घितस्य प्रत्यब्दं भावात्तं विशिनष्टि ।

"अमावास्यापरिच्छिन्नं रविसंक्रान्तिवर्जितम् ।
अधिमासं विजानीयाद्गर्हितं सर्व्वकर्म्मसु ॥"

प्रतिपदुपक्रान्तामावास्यान्त इत्यर्थः । तस्यैव मुनिभिर्नानाविधमुपलक्षणं दर्शितम् । अन्यथा "अमावास्याद्वयं स्पृशेत् ।" "अमावास्याद्वयं यत्र रविसंक्रान्तिवर्जितम् ।" अमावास्यामतिक्रम्येत्यव्यवस्थितवादान्नार्थो व्यवतिष्ठते । तस्मात्तृतीयाब्दनियतपतनो यथोक्तोऽधिमासो मिथुने पतने मुख्यं द्विराषाढं करोति अन्यत्र गौणम्* ।

इति द्विराषाढविवेकः ।

---

* कथं दर्शेऽपि पूर्व्वसंक्रान्तौ द्विराषाढवर्णनमिति पूर्व्वपक्षी दृढ़ीकृतः "सूर्य्येण लङ्घितो मासश्चान्द्रः ख्यातो मलिम्लुच" इत्यादिवक्ष्यमाणवचनात् । तदेवोपपादयति दिवसस्येत्यादि । तैः सम्भूय आभ्याम् । तृतीयाब्दमध्य एवेति । एकस्मात् मलमासात् तृतीयवर्षमध्ये एवेत्यर्थः । नियताधिमासपातनिमित्ताभिधानात् मलमासान्तरस्यावश्यम्भावात् । विंशत्यब्दैरपि दुर्लभत्वात् । तथाच । एकस्मात् मलमासात् तृतीयवर्षे मलमासान्तरपातस्य नियतत्वात् यत्र यत्र मलमासस्तत्र तत्रैव संक्रान्त्या अमावास्यासामान्यवर्जितत्वं न सम्भवति इति भावः । दर्शद्वयातिक्रमणमात्रं दर्शद्वयान्त्यक्षणद्वयातिक्रमणमात्रम् । तस्य मलमासस्य । चान्द्रमासस्यापि चान्द्रमासस्यैव न तु खाव्यवहितपूर्व्वामावास्यान्त्यक्षणसहितस्य । प्रत्यब्दं भावात् केवलचान्द्रमासोल्लङ्घनस्य तु प्रायेण प्रतिवर्षसम्भवादित्यर्थः । अतो वि-

सम्प्रति देवशयनादीनि चिन्त्यते ।

उत्कर्षानुत्कर्षचिन्ता तु पश्चात् भविष्यति ।

तत्र भविष्यपुराणम् ।

"मैत्राद्यपादे स्वपितीह विष्णु-
र्वैष्णव्यमध्ये परिवर्त्तते च ।
पौष्णावसाने च सुरारिहन्ता
प्रबुध्यते मासचतुष्टयेन ॥
आभाकासितपक्षेषु मैत्रश्रवणरेवती ।
आदिमध्यावसानेषु प्रस्तापावर्त्तनोत्सवाः ॥"

अत्र यथासंख्यमन्वयः । तेन आषाढ़ीयानुराधाद्यपादे भाद्रीय-श्रवणामध्ये कार्त्तिकीयरेवत्यन्ते भगवतो वासुदेवस्य यथाक्रमं शयनपार्श्वपरिवर्त्तनोत्थानानि भवन्ति । अयञ्च द्वादश्यां प्राप्तौ मुख्यः कल्पः ।

यथा पुराणम् ।

---

श्लिनष्टि विशेषयति । अमावास्यापरिच्छिन्नं स्वाव्यवहितपूर्व्वतत्स्वघटकत्वोभयसम्बन्धेन अमावास्याद्यान्त्यक्षणद्वयविशिष्टं चान्द्रमासं सर्व्वकर्म्मसु गर्हितम् अधिमासं मलमासं जानीयात् इत्यन्वयः । प्रतिपदुपक्रान्तं शुक्लप्रतिपत्प्राक्क्षणसारब्धापराभावास्यान्त्यक्षणपर्य्यन्तं रवि-वर्জ্জितश्चेत् मलमासः ज्ञेय इत्यर्थः । उपलक्षणं लक्षणम् । अव्यवस्थितवादात् अनियत-लक्षणत्वेन निर्णयाभावात्, नार्थो न यथार्थार्थो व्यवतिष्ठते व्यवस्थितो भवति । अन्यच्च सिथुनभिन्ने ।

"आभाकात्येषु मासेषु मथुरा माधवस्य च।
द्वादश्यामेव कुर्वीत शयनावर्त्तनादिकम्॥"

तथा।

"निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनम्।
अन्यत्र पादयोगेऽपि द्वादश्यामेव कारयेत्॥"

तथा विष्णुधर्मोत्तरे।

"विष्णुर्दिवा न स्वपिति न च रात्रौ प्रबुध्यते।
द्वादश्यामृक्षसंयोगे पादयोगो न कारणम्॥"

तदेव स्पष्टयति।

"अप्राप्ते द्वादशीमृक्षे उत्थानशयने हरेः।
पादयोगेन* कर्त्तव्ये नाहोरात्रं विचिन्तयेत्॥"

द्वादशीनक्षत्रयोगमात्रेण यथाक्रमेण निशासन्ध्यादिवसेषु शयनावर्त्तनोत्थानानि कर्त्तव्यानि। अस्य पुनरभावे तिथ्यन्तरेऽपि पाद-

---

* देवशयनादीनि हरिशयनादीनि चिन्यते निरूप्यते मयेति शेषः। उत्कर्षांतुत्कर्षचिन्ता सौरचान्द्रविवेचनम्। तत्र शयनादिनिरूपणप्रसङ्गे। वैष्णवमध्ये श्रवणमध्यपादे परिवर्त्तते पार्श्वेन परिवर्त्तते। मासचतुष्टयेन इति विशेषणे तृतीया। आषाढशुक्लपक्षमारभ्य कार्त्तिकशुक्लपक्षपर्य्यन्तमासचतुष्टयविशिष्टः सन् इत्यर्थः। आभाकार्त्तिकशुक्लपक्षेषु आषाढभाद्रकार्त्तिकशुक्लपक्षेषु। मैत्रश्रवणरेवती आदिमध्यावसानेषु इति सन्ध्याभाव आर्षः। उत्सव उत्थानम्। अन्यत्र पादयोगेऽपि स्वापादिविहितनिशादिरन्यत्र पादयोगेऽपि इत्यर्थः। द्वादश्यामेव कारयेत् तत्तन्नक्षत्रयुक्तद्वादश्यामेव कारयेदित्यर्थः। द्वादश्यामृक्षसंयोगे पादयोगो न कारणमिति द्वादश्यामृक्षयोगमात्रमेव शयनादौ हेतुः न पादविशेषयोगः। यद्वा द्वादश्यामृक्षयोगसत्त्वे अन्यतिथौ विहितनक्षत्रपादविशेषयोगः न शयनादेः कारणम् ऋक्षे मैत्रश्रवणरेवतीनक्षत्रे। पादयोगेन दशमीप्रतिपद्विद्धतिथौ पादविशेषयोगेन।

योगमात्रेण दिवाशयनं निशायामुत्थानं न तत्र निशाद्यादरः।

अतएव मत्स्यपुराणे सामान्येनैवोक्तम्।

"रेवतीऋक्षपर्य्यन्ते मेषादाववलोकिते।
उत्तिष्ठन्तं हृषीकेशं योगनिद्रा विमुञ्चति॥"

निशादिकं द्वादशीविशेषणम्।

यथा।

"निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनम्।
पादयोगादन्यतिथौ द्वादश्यामृक्षसङ्गमात्॥"

पूर्ब्बवचनेन द्वादश्यां नक्षत्राप्राप्तावहोरात्रानादरस्य प्रदर्शितत्वात्। अर्थाद्द्वादश्यान्तस्यादरः कार्य्य इत्युक्तम्। तेनानन्तरितवचनेऽपि निशि स्वापादिकं द्वादश्यामृक्षसङ्गमादित्यनेन सम्बुध्यते। पादयोगादन्यतिथाविति तु केवलमेव कारणम्।

एवम्।

"न दिवा स्वपिति गोविन्दो न रात्रौ प्रतिबुध्यते।" इति।

तदपि द्वादश्यामेव*। यत्तु निशि स्वाप इत्यस्य स्वल्पयोगो

---

* नाहोरात्रं विचिन्तयेदिति। निशि स्वापो दिवोत्थानमित्यादिविचारो नास्तीति भावः। यथाक्रममेषेत्यादि शयने निशा पार्श्वपरिवर्त्तने सन्ध्या उत्थाने दिवस आदरणीय इत्यर्थः। अस्य द्वादश्यामृक्षयोगस्य। तिथ्यन्तरे दशमीप्रतिपद्भिन्नैकादश्यादिपञ्चतिथिषु। पूर्ब्बवचनेन अप्राप्ते द्वादशीमृक्षे इत्यादिवचनेन। सम्बुध्यते गृह्यते। केवलमेव द्वादश्यामृक्षाभावे पादविशेषयोगमात्रमेव कारणं शयनादेरिति शेषः। द्वादश्यामेव नक्षत्रमात्रयोग एवेत्यर्थः। द्वादश्यामृक्षाभावे त्रयोदश्यादौ पादविशेषयोगात् परिवर्त्तनमात्रं कर्त्तव्यम् न तु शयनबोधने इति।

व्याख्यानं सन्ध्यायां परिवर्त्तनं पादयोगादन्यतिथौ त्रयोदश्यादौ कर्त्तव्यम्। न पुनः शयनप्रबोधावपि तिथ्यन्तरे। किन्तर्हि निशि स्वापो दिवोत्थानञ्च द्वादश्यास्त्रयोगमात्रेणेति तदसङ्गतम्।

"अप्राप्ते द्वादशीस्त्रे उत्थानशयने हरेः।
पादयोगेन कर्त्तव्ये नाहोरात्रं विचिन्तयेत्॥"

अनेन बृहद्योगग्रन्थलिखितेनैव द्वादशीनक्षत्रयोगाभावे पादयोगेन तिथ्यन्तरेऽपि शयनोत्थानविधानदर्शनात् एतद्वचनविरोधादेव पादयोगादन्यतिथावित्यत्रापि निशादेर्विशेषणत्वं निराकृतम्। "नाहोरात्रं विचिन्तये"दित्यस्य निर्विषयत्वापत्तेः। यतएव तिथ्यन्तरे दिवापि शयनं रात्रावप्युत्थानम्, अतएव तन्निमित्ता दोषश्रुतिः।

"रात्रौ प्रबोधो विनिहन्ति पौरान्
स्वापो दिवा राष्ट्रकुलं नृभर्त्तुः।
सन्ध्याद्वये स्वल्पफला धरित्री
भवेन्नराणामपि रोगमुग्रम्॥"

द्वादश्यां निशादिनियमात्तिथ्यन्तर एवैतद्वर्णनीयम्*।

---

* वादिमतमाह यत्तु इत्यादि। किन्त्वर्हि निशि स्वापो दिवोत्थानञ्च द्वादश्यास्त्रयोगमात्रेणेति द्वादश्यास्त्रसंयोगमात्रेण न तु परिवर्त्तनम् इति तस्य मतं दूषयति तदसङ्गतम् इत्यादि। निशादेर्विशेषणत्वं निराकृतमिति द्वादश्यास्त्राभावे नक्षत्रविशेषस्य पादविशेषयोगेन अन्यतिथौ शयनादेर्विधेयत्वे निशादेरन्यतिथिविशेषणत्वं नास्ति तथाच मैवाद्यपादयोगेन त्रयोदश्यादौ हरिशयने। यत्र दिवा पादयोगस्तत्रैव शयनं रात्रौ हरिशयनं न कर्त्तव्यम् इति भावः। द्वादश्यां निशादिनियमात् तिथ्यन्तर एवैतद्वर्णनीय-

तथा।

"किन्तन्मैत्राद्यपादेन दशम्यंशेन यो दिवा।
पौष्णशेषेण किन्तेन प्रतिपद्यथ यो निशि॥"

इदं विष्णुधर्म्मोत्तरे। दशम्यां दिवा मैत्राद्यपादेन किं प्रयोजनम्। प्रतिपदि वा पौष्णशेषेण द्वादश्यां वा निशागतेन कर्म्मानङ्गत्वादित्यर्थः। दशमीप्रतिपदोर्निषेधात् एकादश्यादिपौर्णमासीपर्य्यन्तानान्तिथीनामभ्यनुज्ञानं न चैवं चतुर्दशीपौर्णमास्योरन्यतरत्र रेवतीयोगे सत्याश्विनत्वादाभाका इत्यस्य बाधः स्यादिति वाच्यम्। यौगिकानामाषाढ़भाद्रकार्त्तिकानामपरिग्रहात्*। रूढ़िर्योगमपहरतीति रूढ़िपुरस्कारात् यौगिकत्वस्य च प्रतिबन्धेन निराकृतत्वात्। ननु तर्हि यदा रेवत्यन्तः तिथ्यन्तरे नास्ति किन्तु पूर्व्वपादत्रयम् अन्त्यपादस्तु द्वादश्यामेव रात्रौ तत् कथमुत्थानं देवस्य तावद्वादश्यां तत्र दिवानियमात् नापि तिथ्यन्तरे तत्राप्यन्त्यपादनियमात् उभयत्र चोभयाभावात्।

---

मिति पाठो दृश्यते स तु लिपिकरप्रमाद एव परन्तु तिथ्यन्तरे नैव वर्णनीयमित्येव पाठः साधुः। एतत् रात्रौ प्रबोधो विनिद्रन्ति पौरान् इत्यादिदोषश्रवणं तिथ्यन्तरे नैव वर्णनीयमित्यर्थः। अन्यथा द्वादश्यां निशादिनियमादित्यसंलग्नापत्तेः।

* दशम्यां दिवा मैत्राद्यपादेनेति। यौ मैत्राद्यपादः दशम्यां प्राप्तः तेन किं दिवा वा प्राप्तेन वा किम् इत्यर्थः। यौगिकानाम् आषाढ़युक्ता या पौर्णमासी आषाढ़ी सा अस्मिन् इत्यादि व्युत्पत्त्या सिद्धानामित्यर्थः। अपरिग्रहादिति। तथाच अन्त्यौपान्त्यौ विभौ ज्ञेयौ इत्यादिवचनात् रेवतीनक्षत्रयुक्तपौर्णमासीयोगेन आश्विनत्वेऽपि तुलास्थरव्यारब्धयुक्तप्रतिपदादिदर्शनान्तमासस्य रूढ्या चान्द्रकार्त्तिकतया बाधाप्रसक्तेरिति भावः।

व्याख्यानं सन्ध्यायां परिवर्त्तनं पादयोगादन्यतिथौ त्रयोदश्यादौ कर्त्तव्यम्। न पुनः शयनप्रबोधावपि तिथ्यन्तरे। किन्तर्हि निशि स्वापो दिवोत्थानञ्च द्वादश्यामृक्षयोगमाचेणेति तदसङ्गतम्।

"अप्राप्ते द्वादशीमृक्षे उत्थानशयने हरेः।
पादयोगेन कर्त्तव्ये नाहोरात्रं विचिन्तयेत्॥"

अनेन बृहद्योगग्रन्थलिखितेनैव द्वादशीनक्षत्रयोगाभावे पादयोगेन तिथ्यन्तरेऽपि शयनोत्थानविधानदर्शनात् एतद्वचनविरोधादेव पादयोगादन्यतिथावित्यत्रापि निशादेर्विशेषणत्वं निराकृतम्। "नाहोरात्रं विचिन्तये"दित्यस्य निर्विषयत्वापत्तेः। यतएव तिथ्यन्तरे दिवापि शयनं रात्रावप्युत्थानम्, अतएव तन्निमित्ता दोषश्रुतिः।

"रात्रौ प्रबोधो विनिहन्ति पौरान्
स्वापो दिवा राष्ट्रकुलं नृभर्त्तुः।
सन्ध्याद्वये स्वल्पफला धरित्री
भवेन्नराणामपि रोगमुग्रम्॥"

द्वादश्यां निशादिनियमात्तिथ्यन्तर एवैतद्वर्णनीयम्*।

---

* वादिमतमाह यत्तु इत्यादि। किन्तर्हि निशि स्वापो दिवोत्थानञ्च द्वादश्यामृक्षयोगमाचेणेति द्वादश्यामृक्षसंयोगमाचेण न तु परिवर्त्तनम् इति तस्य मतं दूषयति तदसङ्गतम् इत्यादि। निशादेर्विशेषणत्वं निराकृतमिति द्वादश्यामृक्षाभावे नक्षत्रविशेषस्य पादविशेषयोगेन अन्यतिथौ शयनादेर्विधेयत्वे निशादेरन्यतिथिविशेषणत्वं नास्ति तथाच मैवाद्यपादयोगेन त्रयोदश्यादौ हरिशयने। यत्र दिवा पादयोगस्तत्रैव शयनं रात्रौ हरिशयनं न कर्त्तव्यम् इति भावः। द्वादश्यां निशादिनियमात् तिथ्यन्तर एवैतद्वर्णनीय-

तथा।

"किन्तन्मैत्राद्यपादेन दशम्यंशेन यो दिवा।
पौष्णशेषेण किन्तेन प्रतिपद्यथ यो निशि॥"

इदं विष्णुधर्म्मोत्तरे। दशम्यां दिवा मैत्राद्यपादेन किं प्रयोजनम्। प्रतिपदि वा पौष्णशेषेण द्वादश्यां वा निशागतेन कर्म्मानङ्गत्वादित्यर्थः। दशमीप्रतिपदोर्निषेधात् एकादश्यादिपौर्णमासीपर्य्यन्तानान्तिथीनामभ्यनुज्ञानं न चैवं चतुर्दशीपौर्णमास्योरन्यतरत्र रेवतीयोगे सत्याश्विनत्वादाभाका इत्यस्य बाधः स्यादिति वाच्यम्। यौगिकानामाषाढ़भाद्रकार्त्तिकानामपरिग्रहात्*। रूढ़िर्योगमपहरतीति रूढ़िपुरस्कारात् यौगिकत्वस्य च प्रतिबन्धेन निराकृतत्वात्। ननु तर्हि यदा रेवत्यन्तः तिथ्यन्तरे नास्ति किन्तु पूर्व्वपादत्रयम् अन्त्यपादस्तु द्वादश्यामेव रात्रौ तत् कथमुत्थानं देवस्य तावद्वादश्यां तत्र दिवानियमात् नापि तिथ्यन्तरे तत्राप्यन्त्यपादनियमात् उभयत्र चोभयाभावात्।

---

मिति पाठो दृश्यते स तु लिपिकरप्रमाद एव परन्तु तिथ्यन्तरे नैव वर्णनीयमित्येव पाठः साधुः। एतत् रात्रौ प्रबोधो विनिहन्ति पौरान् इत्यादिदोषप्रवर्णं तिथ्यन्तरे नैव वर्णनीयमित्यर्थः। अन्यथा द्वादश्यां निशादिनियमादित्यसंगतापत्तेः।

* दशम्यां दिवा मैत्राद्यपादेनेति। यो मैत्राद्यपादः दशम्यां प्राप्तः तेन किं दिवा वा प्राप्तेन वा किम् इत्यर्थः। यौगिकानाम् आषाढ़युक्ता या पौर्णमासी आषाढ़ी सा अस्मिन् इत्यादि व्युत्पत्त्या सिद्धानामित्यर्थः। अपरिग्रहादिति। तथाच अन्त्योपान्त्यौ त्रिभौ ज्ञेयौ इत्यादिवचनात् रेवतीनक्षत्रयुक्तपौर्णमासीयोगेन आश्विनत्वेऽपि तुलास्थरव्यारब्धयुक्तप्रतिपदादिदर्शनमासस्य रूढ्या चान्द्रकार्त्तिकतया बाधाप्रसक्तेरिति भावः।

उच्यते अस्यामेवाप्रतिपत्तौ वचनम्* ।

"रेवत्यन्तो यदा रात्रौ द्वादश्या च समायुतः ।
तदा विबुध्यते विष्णुर्दिनान्ते प्राप्य रेवतीम् ॥"

एवंविधश्च कालो रेवतीपादत्रयस्यैकादशीव्याप्तत्वे भवति तदा चैकादशीरेवतीयोगस्य दिवावश्यभावात् तदनादरेण दिनान्तं विदधद्वचनमेकादश्यामपि त्रयोदश्यादिष्विव पादयोगादरं ज्ञापयति† । न तु द्वादश्यामिवैकादश्यामपि पादयोगस्यानादरः । अन्यथा दिवा रेवत्येकादशीयोगस्योत्थानकालतया प्राप्तस्य बाधो-

---

* ननु रुढ्यैकेऽपि योगबलेन आश्विनप्रतीतिर्भवतु इत्यत आह रुढ्यर्थोगमपहरतीति । तथाच भट्टवार्त्तिकम् । लक्ष्यात्मिका सती रुढिर्भवेद्दयोगापहारिणीति । इति हेतौ रुढ्युपरक्षारात् मासपदस्य रूढ्यर्थस्वीकारात् । यौगिकत्वस्य च मासपदस्य यौगिकार्थस्वीकारस्य च प्रतिबन्धेन व्यभिचारेण निराकृतत्वादित्यस्य यौगिकत्वस्य च इत्यनेन सम्बन्धः । निराकृतत्वात् खण्डितत्वात् । किन्तु पूर्व्वपादत्रयं तिथ्यन्तरे एकादश्यामेवेति शेषः । तत्र द्वादश्यां दिवानियमादिति निशि स्थापो दिवोत्थानमिति वचनेन रात्रौ प्रबोधो विनिहन्ति इति वचनेन चेति शेषः । तत्राप्यन्त्यपादनियमात् द्वादश्यामपि अन्त्यपादनियमात् । उभयत्र उभयाभावात् तिथ्यन्तरे पादयोगस्य द्वादश्यां दिवा नक्षत्रयोगस्य च अभावादित्यर्थः । वचनमिति उच्यते इत्यनेन सम्बन्धः ।

† तदेव वचनं दर्शयति रेवत्यन्त इत्यादि । एवंविधश्च कालः रात्रौ द्वादश्यां रेवत्यन्तः रेवत्यन्तपादसमायुतो भवति, एकादशीरेवतीयोगस्य एकादश्यां रेवतीप्रथमपादत्रययोगस्य । तदनादरेण दिवोत्थानमिति वचनात् एकादश्यां दिवा रेवतीप्रथमपादत्रययोगानादरेण इत्यर्थः । दिनान्तं विदधद्वचनं दिनान्ते प्राप्य रेवतीमिति विशेषवचने दिनान्ते बोधनं विदधद्वचनं विशेषवचनं पादयोगादरं ज्ञापयतीति । तथाच त्रयोदश्यादौ मैत्रादिनक्षत्रपादविशेषयोगेन यथा श्रय°आदिकं तथा एकादश्यामपि पादविशेषयोगेनैव न तु नक्षत्रमात्रयोगेनेति भावः ।

ऽनपेक्षितविधिश्च स्यात्। अतएव पादयोगादन्यतिथौ "द्वादश्यामृक्षयोगत" इति द्वादशीतोऽन्या एकादश्यभिहिता। तथा "द्वादशीऋक्षसंयोगे पादयोगो न कारणम्" इति वदन् द्वादशीव्यतिरिक्तैकादश्यादौ पादयोगकारणमाह "अप्राप्ते द्वादशीमृक्ष" इति। एतदपि द्वादश्यामेव ऋक्षयोगाभावे तिथ्यन्तरे एकादश्यादौ पादादरं दर्शयति।

तथा।

"शयने परिवर्त्ते च समुत्थाने तथा हरेः।
द्वादशीऋक्षसंयोगे पादयोगो न कारणम्॥"

इत्येतदपि द्वादश्यामेव पादयोगानादरं वदति। अन्यथा सर्व्ववचनेषु द्वादशीपदमुपलक्षणं स्यात्*। पादयोगादन्यतिथावित्यत्रापि उपात्तद्वादशीमात्रापेक्षयान्यत्वावगतिः। सामान्येनैकादश्यामपि भवन्तीति कथं पर्य्युदसनीयेत्यादिदूषणमापद्येत।

यत्तु।

---

* न तु द्वादश्यामिवेत्यादि। यथा शयनादौ द्वादश्यां नक्षत्रमात्रयोग आदरणीयः तथा एकादश्यां न त्वित्यर्थः। तथाच शयनादौ एकादश्यां नक्षत्रपादविशेषयोग एव आदरणीय इति भावः। अन्यथा द्वादश्यामिव एकादश्यामपि पादविशेषयोगमनादृत्य नक्षत्रमात्रयोगस्यादरणीयत्वे प्राप्तस्य स्वीकृतस्य। अनपेक्षितविधिश्चेति एतद्बाधविशेषणम् अनपेक्षितो विधिर्यत्र सः। द्वादश्यामेव एवकारात् न तु एकादश्यादौ। सर्व्ववचनेषु द्वादश्यामृक्षसंयोगे इति द्वादश्यामृक्षसङ्गमादिति द्वादशीऋक्षसंयोगे इत्यादिवचनेषु द्वादशीपदमुपलक्षणं स्यादिति एकादश्युपलक्षणापत्तिः स्यात् स्वप्रतिपादकत्वे सति स्वेतरप्रतिपादकत्वमुपलक्षणत्वम् इति तल्लक्षणात्।

"एकादश्यां द्वादश्यान्च नित्यं सन्निहितो हरिः ।
तत्र नक्षत्रयोगेन पादयोगो न कारणम् ॥"

तत्र पूर्व्वोक्तन्यायेन* रेवतीवचनविरोधादेकान्तप्रत्यासत्तेश्च ।
तत्रेति द्वादशीमात्रपरामर्शः† । यदपि नारदपुराणे वचनम् ।

"यदा चैकादशीं प्राप्य आदिपादो भवेन्निशि ।
तिथौ तस्यां भवेद्राजौ शयनन्तु हरेस्तदा ॥
ऋक्षादिपादयोगे च रजन्यान्तु तिथिद्वये ।
त्रयोदश्यां चतुर्दश्यामृक्षादेव तथा हरेः ।
निशि स्वापो भवेत्तस्य पादयोगस्य कारणात् ॥"

---

* अन्यत्वावगतिरिति । पादयोगादन्यतिथावित्यत्र द्वादशीभिन्नत्वावगतिः । सामान्येन साधारण्येन एकादश्यां भवन्तीति इति, भवन्तीति लिपिकरप्रमादः, भवत्येव पाठः साधुः । अतः अन्यत्वावगतिरित्यनेनास्य सम्बन्धः सङ्गच्छते, पर्य्युदसनीयेत्यादिदूषणं अन्यत्वावगतिरूपपर्य्युदसनीयपदार्थप्रदर्शनरूपदूषणम् । पूर्व्वोक्तन्यायेन पूर्व्वोक्तसिद्धान्तेन, सिद्धान्तश्च—"द्वादश्यामृक्षसंयोगे पादयोगो न कारणम्" । इति वचनात् पादयोगादन्यतिथावित्यादिवचनाच्च द्वादशीमात्रे नक्षत्रयोगे न पादयोगस्य कारणता । द्वादशीमात्रे नक्षत्रयोगाभावे च नक्षत्रविशेषस्य पादविशेषयोगात् शयनादिकञ्च ।

† रेवतीवचनविरोधादिति । एकादशीद्वादश्योरन्यतरस्मिन् नक्षत्रमात्रयोगे शयनादेर्विधेयतास्वीकारे तु "रेवत्यन्तो यदा रात्रौ द्वादश्या च समन्वितः । तदा विबुध्यते विष्णुर्दिनान्ते प्राप्य रेवतीमिति" वचनस्य-"रेवत्यन्तो यदा रात्रा"वित्यनेन रात्रौ रेवत्यन्तविधानादेव विहितकाले एकादश्यां नक्षत्रयोगस्य सुतरां सिद्धत्वात् दिनान्ते एकादश्यामुत्थानस्य प्राप्तेः विशेषवचनवैयर्थ्यरूपविरोधादित्यर्थः । एकान्तप्रत्यासत्तेश्चेति । द्वादश्यामित्यस्य पश्चान्निर्दिष्टत्वेन एकादश्यपेक्षया प्रत्यासत्यतिरेकाच्चेत्यर्थः । तत्रेति द्वादशीमात्रपरामर्श इत्यस्य हेतुद्वयमिदम् । अत्र मात्रपदेन एकादशीव्यवच्छेदः । तथा च—रात्रौ द्वादश्यां रेवत्यन्तपादयोगे दिनान्ते दिनशेषभागे रेवतीनक्षत्रयुक्तैकादश्यामुत्थानमात्रस्य

तत्तिथित्रयेऽपि पादयोगस्य कारणतामाह। अतो द्वादश्यामिव पादयोगस्यानादरो न त्वेकादश्यामपि। एवं शयनेऽपि यदा दिवा द्वादश्यां मैत्राद्यपादः त्रयोदश्याञ्च तदितरपादत्रयं तत्रापि सायंसन्ध्यायां विधानमुक्तम्। तथाप्युभयोरेकाङ्गविकलत्वादेव* शयनेऽपेक्षासद्भावात् सामान्येन वचनस्य तात्पर्य्यम्। यद्विहितकालद्वयाभावे विहितनक्षत्रमात्रमाद्दत्य सायंसन्ध्यायां देवशयनादिकमाचरणीयमिति। यदा पूर्व्वोक्तकालद्वयन्नास्ति सन्ध्यायाञ्च नक्षत्रस्याप्यलाभस्तदाषाढ़भाद्रकार्त्तिकमासीयशुक्लद्वादशीमात्रादरेण देवशयनादिकं करणीयम्(१)।

तदुक्तं वराहपुराणे।

"द्वादश्यां सन्धिसमये नक्षत्राणामसम्भवे।
आभाकासितपक्षेषु शयनावर्त्तनादिकम्॥"

आदिपदमुत्थानपादग्रहणार्थञ्च(२)। तेन पूर्व्वोक्तकालत्रयाभावे

---

(१) तथा पूर्व्वोक्तकालत्रयाभावे कल्पान्तरमाषाढ़भाद्रकार्त्तिकमासीयशुक्लद्वादशीमात्रादरेण देवशयनादि करणीयमिति क्वचिदादर्शे लिखितमस्ति।

(२) सन्धिसमय इति उभयत्रापि सम्बुध्यते। उक्तसन्धिसमये नक्षत्रसंयोगे द्वादशीभावे इति क्वचिदादर्शे लिखितमस्ति।

---

वाचनिकत्वात् सामान्यसुखप्रवृत्तस्य तत्र "नक्षत्रयोगेन पादयोगो न कारण"मित्यस्य उत्थानमात्रपरत्वेन सङ्कोचस्यान्याय्यत्वमिति भावः।

* पादयोगस्य कारणतामाह इति। अनेन निशि एकादशी-त्रयोदशी-चतुर्दशीरूपतिथित्रयेऽपि पादयोगे प्राशस्त्यमात्रमिति ग्रन्थकर्त्तुराशयः। उभयोरेकाङ्गविकलत्वादेवेति। तथाच दिवा द्वादश्यां मैत्राद्यपादयोगे निशि स्वाप इत्यादिवचनबोधितनिशा-

द्वादश्यां सन्ध्यायां नक्षत्रासम्भवे द्वादशीमात्रे सायंसन्ध्यायां शयनादिकं कुर्य्यादिति वैकल्पिकमिदं* माथुरमिति जल्पन्ति। तथेदमपि वचनमस्मिन्नेव विषये योजनीयम्।

"पौष्णशेषो यदा नाक्ष्नि मैत्राद्यमपि नो निशि।
द्वादश्यामेव तत्कुर्य्यादुत्थानं शयनं हरेः॥"

द्वादशीयुक्तो रेवतीशेषो निशि। दिवा अपरह्णे च द्वादशी। अनुराधाद्यपादोऽपि द्वादशीयुक्तो दिवा रात्रौ द्वादशी तदा द्वादशीमात्र एव नक्षत्रमन्तरेण शयनोत्थाने भवतः। तथेदमपि वचनमत्रैव बोद्धव्यम्†।

---

रूपैकाङ्गस्य विकलत्वम्। रात्रौ त्रयोदश्याम् इतरपादत्रययोगेऽपि मैत्राद्यपादे स्वपितीत्यादिवचनबोधितात्र्यपादयोगस्यैकाङ्गस्य विकलत्वमिति भावः।

* यद्विहितकालद्वयाभावे इति। निशादिविहितकाले द्वादशीमैत्रादिनक्षत्रयोग-द्वादशीतरैकादश्यादिविहितनक्षत्रपादयोगरूपविहितकालद्वयाभावे इत्यर्थः। आचरणीयमिति तथाच द्वादश्यां सन्धिसमये नक्षत्राणामसम्भवे इति वचने नक्षत्राणामसम्भवे सन्धिसमये द्वादश्यां शयनादिविधानात् नक्षत्रसम्भवे विहितनक्षत्र एव सन्धिसमये शयनादिकमर्थात् सिध्यति इत्यभिप्रेत्य विहितनक्षत्रमात्रमाहृत्य सायंसन्ध्यायां देवशयनादिकमाचरणीयमित्युक्तमिति भावः। आदिपदं शयनावर्त्तनादिकम् इत्यादिपदं पूर्व्वोक्तकालद्वयाभावे इति। निशादौ द्वादश्या नक्षत्रमात्रयोग एकः। निशाद्यनादरेण एकादश्यादि-पञ्चसु तिथिषु नक्षत्रविशेषपादविशेषयोगः द्वितीयः। सायंसन्ध्यायां द्वादश्यां विहितनक्षत्रयोगः तृतीयः एतद्रूपपूर्व्वोक्तकालद्वयाभावे इत्यर्थः। तदभावे सायंसन्ध्यायां द्वादशीमात्रयोगः इति कल्पचतुष्टयमिति व्यवस्थानिष्कर्षः। इत्येवंविधवैकल्पिकमिदमित्यर्थः।

† माथुरमिति मथुरामाधवसम्बन्धीत्यर्थः। इदमपि वचनं पौष्णशेष इति वक्ष्यमाणवचनम् अस्मिन् विषये द्वादशीमात्रे सायंसन्ध्याविषये। रेवत्यन्तपादो नाक्ष्नीति न दिवा

"आभाकासितपक्षेषु विष्णोरमिततेजसः।
स्वापात्तत्प्रबोधाश्च द्वादश्यां क्रमशो मताः॥"

देवशयनादिकर्त्तव्यता च तन्निमित्तपूजादिकर्म्माचरणम्। तदेव शयनादौ कालचतुष्टयम्। द्वादश्यां निशादौ नक्षत्रयोगः। तदभावे निशाद्यनादरेण तिथ्यन्तरे पादयोगः। तस्याप्यभावे सन्ध्यायां नक्षत्रमात्रेण। तस्याप्यभावे द्वादश्यामेव(१) विधानसम्भवात्*। होलाकाधिकरणे देशभेदेन कर्म्मव्यवस्थानिराकर-

---

(१) तस्याप्यभावे द्वादश्यामेव सन्ध्यायामिति अपराण्यपि केवलद्वादशीवचनानि अस्मिन्नेव विषये वर्णनीयानि। ननु माथुरकल्पोऽयं द्वादशीमात्रे पृथगेव नैवं पूर्व्वोक्तकालाभावे विधानात् इति पाठः क्वचिदादर्शपुस्तके दृश्यते।

---

इत्यर्थः। नौ निषेधे तथाच मैत्राद्यपादमपि निशि नास्तीत्यर्थः। रेवतीशेषः रेवत्यन्तपादः निशि इत्यन्वयः। परदिने द्वादशी केवलद्वादशी। अनुराधाद्यपादौ द्वादशीयुक्तौ दिवा इत्यादि। ननु दिवानुराधाद्यपादसम्बन्धे रात्रावपि अनुराधेतरपादयुक्ता द्वादशी सम्भवत्येव कथं रात्रौ केवलद्वादशी इत्युक्तं सङ्गच्छते इति चेदत्रायमाशयः अत्र दिवापदेन भात्रदिवा अरुणोदय उच्यते। रात्राविति रात्रिपदेनापि त्रियामा उच्यते। तथाच यत्र पूर्व्वारुणोदयस्य दण्डद्वयसत्त्वे अनुराधाद्यपादसमापनं परदिने च वाणद्वन्द्वे रसत्रय इति नियमात् षड्दण्डह्रासः सौराषाढस्य चरमदिनमानं चत्वारिंशत्पलाधिकत्रयस्त्रिंशद्दण्डाः सायंरूपभात्रदिवा च किञ्चिदधिकदण्डत्रयम्। ततश्च त्रियामात्मिकायां रात्रौ अनुराधानक्षत्रस्य मुहूर्त्तलाभाभावात् सा द्वादशी केवलैव न कर्म्मयोग्यनक्षत्रयुक्ता न क्वाप्यनुपपत्तिः। इदमपि वचनम् अनन्तरोक्तम् आभाकासितपक्षेषु इति वचनम्।

* कालचतुष्टयं दर्शयति द्वादश्यान्निशादाविति। शयनादौ कालचतुष्टयमुक्तम्। एतेन रात्रौ द्वादश्यां रेवत्यन्तपादयोगे दिनशेषभागे एकादश्यां रेवतीनक्षत्रयोगे उत्थानस्य

णात् न च पूर्वोक्तकालानाञ्चतुर्णामप्यसम्भवः सम्भवति आषाढ़-भाद्रकार्त्तिकानाञ्च चान्द्राणां पञ्चचतुष्टयेऽप्यपरित्यागात्* ।

---

स्वतन्त्रकालत्वेऽपि न चतुष्टयत्वव्याघातः तस्योत्थानमात्रविषयत्वात् । केवलद्वादशीवचनानि विहितनक्षत्रयोगाभावे द्वादश्यां शयनबोधनबोधकवचनानि ।

"पौष्णशैषी यदा नाड़ि मैत्राद्यमपि नो निशि ।
द्वादश्यामेव तत्कुर्य्यादुत्थानं शयनं हरेः ॥"

इत्यादीनि अस्मिन् विषये सायंसन्ध्याविषये । ननु माथुरकल्पोऽयम् । द्वादशीमात्रे पृथगेव इति ।

तथाच । आषाढ़ादिषु मासेषु मथुरामाधवस्य च ।
द्वादश्यामेव कुर्व्वीत शयनावर्त्तनादिकम् ॥

इति पृथग्वचनसामर्थ्यात् केवलद्वादश्यामेव मथुरामाधवस्य शयनबोधनादेः पृथग्-विधेः नैवम् । पूर्व्वोक्तकालाभावे इति पूर्व्वोक्तकालाभावे द्वादश्यामृक्षसंयोगाद्यभावे एव सायंसन्ध्यायां विहितनक्षत्रयोगतदभावाभ्यां व्यवस्थितवैकल्पिकेनेत्यर्थः । विधानात् द्वादश्यां सन्धिसमये नक्षत्राणामसम्भवे इत्यनेन वैकल्पिकविधानात् ।

* होलाकाधिकरणे चेत्यादि । होलाका वसन्तोत्सवः तदधिकृत्य यत्र विचार्य्यते तद्धोलाकाधिकरणं तत्र च देशभेदेन व्यक्तिभेदेन कर्म्मव्यवस्थानिराकरणात् तथाच सामान्यविधिनैवोपपत्तौ विशेषविधिर्नाङ्गीक्रियते गौरवात् अतएव तस्मात् यस्मादाचारात् स्मृतिवाक्याद्वा या श्रुतिरवश्यं कल्पनीया तयैव तद्गतस्याचारांशस्य च स्मृतिपदस्य च उपपत्तेर्न तत्राधिकल्पनेति होलाकाधिकरणार्थ इति दायभागः । तदधिकरणन्तु जैमिनिन्याय-मालायां माधवाचार्य्य आह स्म । अष्टमाधिकरणमारचयति ।

"होलाकादेर्व्यवस्था स्यात् साधारण्यस्मृताग्रिमः ।
देशभेदेन दृष्टत्वात् साम्यं मूलसमत्वतः ॥"

होलाकादिशिष्टाचाराणां हारीतादिस्मृतिविशेषाणां चानुष्ठातृपुरुषभेदेन व्यवस्थितं प्रामाण्यम् कुतः देशविशेषे तेषां दृष्टत्वात् । होलाकादयः प्राच्यैरेव क्रियन्ते । वसन्तोत्सवः होलाका । आङ्गीनैवुकादयो दाक्षिणात्यैः । स्वस्वकुलागतं करञ्जार्कादिस्थावरदेवता-

यत्तु वचनम्।

रेवत्यादिरथान्तो वा द्वादश्याश्च विना भवेत्।
उभयोरप्यभावे तु सन्ध्यायान्तु महोत्सवः॥

नक्षत्रयुक्ता द्वादशी दिवा न प्राप्ता न वान्याप्युक्ता रात्रौ द्वादशी न च रेवत्यन्तस्तेनोभयोरभावः। यदि हि द्वादशीं विना(१) रेवत्यन्तस्तदावश्यन्तिथ्यन्तरे तत्प्राप्तिः। तत्र दिनस्यानादरात् विहितकाललाभात् उत्थानं भवत्येवेति रात्रावेव क्रियाप्राप्तौ सन्ध्या कर्म्मानुष्ठानाय विधीयत इति न तस्यापि विरोधः। तथा पौर्णमास्यामपि शयनोत्थाने।

---

(१) दिवा यदा हि द्वादशीं विनेति क्वचिदादर्शपुस्तके पाठः।

---

पूजादिकमाङ्गीनैवुकश्चन्द्रेनीचते। उद्गयभयज्ञादय उदीच्यैः। ज्यैष्ठमासस्य पौर्णमास्यां वलीवर्द्दानभ्यर्च्य धावयन्ति। सोऽयमुद्गयभयज्ञः। एवं हारीतादिस्मृतिः काचित् क्वचिद्देशविशेषे दृश्यते। तस्माद्यवस्थितं प्रामाण्यमिति चेत् नैवम्। तन्मूलत्वेनानुमितस्य वेदस्य सर्व्वसाधारणत्वेन तेषामपि सर्व्वसाधारणत्वात्। अत्रैव गुरुमतमाह।

प्राच्यादिपदयुक्तायाः श्रुतेरनुमितौ पदैः।
अर्थावोधादभावे चेन्न सामान्यानुमानतः॥

पूर्व्वोक्तकालानां चतुर्णामपीति। द्वादश्यां निशादौ नक्षत्रसाचर्य्योगः तदसम्भवे निशाव्यनादरेण नक्षत्रपादविशेषयोगः तदसम्भवे सायंसन्ध्यायां नक्षत्रसाचर्य्योगः तदसम्भवे सायंसन्ध्यायां द्वादशीसाचर्य्योगः। सम्भवं दर्शयति आषाढभाद्रेत्यादि सौरपरत्वे सर्व्वदा योगाप्रसक्तेराह चान्द्राणामिति। पक्षचतुष्टये द्वादश्यां निशादौ नक्षत्रयोगादिरूपकल्पचतुष्टयेऽपीत्यर्थः। नक्षत्रयुक्ता रेवतीनक्षत्रयुक्ता दिवा न प्राप्ता इति उत्थानविषयमिति दिवोत्थानमिति स्मरणात्।

यथा विष्णुधर्मोत्तरे मार्कण्डेयः ।

आषाढ़शुक्लपक्षान्ते भगवान्मधुसूदनः ।
भोगिभोगासनो मायां योगनिद्रान्तमानयन्(१) ।
शेतेऽसौ चतुरो मासान् यावत् भवति कार्त्तिकी ॥

आषाढ़श्चान्द्रस्तस्य शुक्लपक्षान्तः पौर्णमासी ।

तथा यमः ।

क्षीराब्धौ शेषपर्य्यङ्के आषाढ्यां संविशेद्धरिः ।
निद्रां त्यजति कार्त्तिक्यां तयोस्तं पूजयेत् सदा ॥

अयञ्च कल्पोऽन्य एव वैकल्पिकः* न तु पक्षान्तशब्दः सामीप्यात् द्वादश्यादिलक्षणार्थः लक्षणाकारणाभावात् । पौर्णशेषेण किन्तेन प्रतिपदाथ यो निशीत्यनेन पौर्णमास्यामभ्यनुज्ञानादागमाविरोधात् पक्षान्तशब्द एव वा पक्षस्य त्रिभागैकादश्यादितिथिपञ्चकं पौर्णमासीपर्य्यन्तमन्तभागमाह तेन पञ्चतिथीनामन्य-

(१) भोगिभोगासनासीनो मायां निद्रान्तमानयन् इति क्वचिदादर्शे पाठः ।

* रेवत्यादिरयान्ती वा इति । रेवत्यादिरित्यस्य भावार्थं व्याचष्टे नक्षत्रयुक्ता द्वादशी दिवा न प्राप्ता इति न वाप्यन्याप्युक्ता रात्राविति च । अथान्ती वा इत्यस्य विवृतिमाह न च रेवत्यन्त इत्यादि । तेनोभयाभाव इति दिवा रेवतीयुक्ता द्वादशी नास्ति एवं तदन्तपादयुक्तातिथ्यन्तरमपि नास्तीत्युभयोरभाव इत्यर्थः । आषाढ्यां आषाढ़पौर्णमास्यां संविशेत् शयीत । तयोः आषाढ़ीकार्त्तिक्योः । तं हरिम् । अयञ्च कल्पः आषाढ़पौर्णमास्यादौ शयनादिकल्पः अन्यः द्वादश्यादिशयनादिकल्पभिन्नः । वैकल्पिकः त्रयोदश्यादिपादयोगेन सह व्यवस्थितविकल्पः । तथाच त्रयोदश्यादौ नक्षत्रपादयोगाभावे पौर्णमास्यामपि पादयोगेन यथासम्भवशयनादिर्भवितुमर्हतीति भावः ।

तमायां स्वपिति आषाढ़ीकार्त्तिकीपदमप्येतासामन्यतममाह। एतेन किन्तन्मैत्राद्यपादेनेत्यनेन पञ्चतिथीनामभ्यनुज्ञानं सुव्यक्तम्।

सम्मति मिथुनस्थे अधिमासे मुख्यद्विराषाढ़े चिन्त्यते। तत्र कर्कटे देवशयनम्।

यथाह।

सम्पूर्णे मिथुनेऽधिको यदि भवेन्मासस्तदा कर्कटे
शेते बुध्यति वृश्चिके स भगवान्मासैश्चतुर्भिर्हरिः।
कन्यायान्तु शचीपतिः सुरगणैर्वन्द्यस्तदोत्तिष्ठते
दुर्गा चैव तुलाधरे समधिके शेषास्तथान्ये सुराः॥

तुलाधरे समधिके वृश्चिकेऽप्येवं धनदादयो देवा उत्तिष्ठन्तीत्यर्थः। तथा मिथुनस्थो यदा भानुः तथा अमावास्यामतिक्रम्येत्यादिवचनैर्मुख्यो द्विराषाढ़ उक्तः। तन्निमित्तं तु देवशयनं कर्कटे। कन्यायां शक्रोत्सवपार्श्वपरिवर्त्तौ तुलायां दुर्गोत्सवः।

तथा गर्ग्यपरिशिष्टम्।

द्विराषाढ़े समुत्पन्ने(१) कर्कटे शयिते हरौ।
आखण्डलस्तु कन्यायां तुलायां पार्व्वती तथा।
अनन्तो वृश्चिके चैव कुम्भे चैव हुताशनः॥*

(१) अधिमासे समुत्पन्ने इति क्वचिदादर्शे पाठः।

* मिथुनादौ मलमासे हरिशयनं निरूप्य मिथुनमासे मलमासे मुख्यद्विराषाढ़े हरिशयनादिकं निरूपयितुं प्रतिजानीते सम्मतीति। अधिको मासः अधिमासो मलमासः इत्यर्थः। कर्कटे सौरश्रावणे वृश्चिके सौरमार्गे। मासैश्चतुर्भिरिति आषाढ़शुक्लपक्षमारभ्य कार्त्तिकशुक्लपक्षान्तम् अष्टसंख्यकपक्षेण इत्यर्थः। कन्यायां सौराश्विने शचीपतिः शक्रोत्थानम्।

समुत्पन्ने सम्यगुत्पन्ने मुख्ये हिराषाढ़ इत्यर्थः। तदा हरिशयनार्थं शक्रदुर्गोत्सवहरिहुताशनानां चोत्थानं चान्द्राणामाषाढ़भाद्राश्विनकार्त्तिकमाघानां कर्कटकन्यातुलावृश्चिककुम्भेष्वेव प्रतिलम्भात्। यद्यपि च

वङ्गोत्सवः सिते पक्षे माघे मास्यार्द्रभे दिवा।
द्वादश्यामथवा पौर्णमास्यां स्यात्सुमहोत्सवः॥

इति सौरवचनमाघद्युतिरुत्थानेऽस्ति तथापि माघपदोल्लेखविहितान् वरचतुर्थीश्रीपञ्चमीप्रभृतीन् चैत्रविहिताशोकाष्टमीमदनत्रयोदशीचैत्रावलीमदनभञ्जिकाचतुर्दशीप्रभृतीन् परभूतांश्च परिहाय मध्यवर्त्तिनो हुताशनोत्थानमात्रस्य* कुम्भे चैव हुताशन इत्युत्कर्षं ब्रुवाणो यत्रोत्कर्षः श्रूयते तत्रैव अनेकश्रुतिकल्पनापरि-

---

दुर्गा चैवेति दुर्गोत्सवः तुलाधरे सौरकार्त्तिके। आखण्डल इन्द्रः। अनन्तो विष्णुः। कुम्भे सौरफाल्गुने। हुताशनः वङ्गोत्सवः।

* चान्द्राणामित्यादि। तथाच चान्द्राषाढ़स्य कर्कटे चान्द्रभाद्रस्य कन्यायां चान्द्राश्विनस्य तुलायां चान्द्रकार्त्तिकस्य वृश्चिके चान्द्रमाघस्य कुम्भे च प्रतिलम्भात् अवश्यम्भावात्। माघे मास्यार्द्रभे दिवा इति दिवेति भात्रादिवा इत्यर्थः वङ्गोत्सवस्य रात्रिकर्त्तव्यत्वात्। अतएव हेमाद्रौ माघे मास्यार्द्रभे निशि इत्युक्तम्। शेषार्द्धन्तु द्वादश्यामथ कर्त्तव्यः पौर्णमास्यां महोत्सव इति विशेषः। सौरवचनमाघद्युतिरिति सौरवचनेन सह चान्द्रमाघद्युतिरित्यर्थः। तथाच कुम्भे चैव हुताशन इत्यनेन क्वचिद्वचने सौरद्युतिः माघे मास्यार्द्रभे दिवा इति वचनेन चान्द्रमाघद्युतिश्च उत्थाने हुताशनोत्थाने वङ्गोत्सवे अस्ति इत्यर्थः। वरचतुर्थी वरदाचतुर्थी। परभूतान् इति वङ्गोत्सवस्य परभूतान् चैत्रविहिताशोकाष्टम्यादिर्विशेषणम्। मध्यवर्त्तिन इति वरचतुर्थीत्यादेः परभूतस्य-चैत्रविहिताशोकाष्टम्यादेः पूर्ववर्त्तिन इत्यर्थः। हुताशनोत्थानमात्रस्य वङ्गोत्सवस्य।

हाराय गौणस्य चान्द्रस्य शास्त्रार्थता अन्यत्र तु निरपवादो मुख्यः सौर एव वचनार्थ इति दर्शयति तस्मादशोकाष्टमी-प्रभृतीनामुत्कर्षमनुत्कर्षं माघीसप्तमीप्रभृतीनां विशेषकारणमन्तरेण ब्रुवाणा अवधीरणीया एव मनीषिभिः।

तथा ज्योतिःशास्त्रम्।

कर्किण्यर्के हरौ सुप्ते शक्रध्वजक्रियाखिले।
तुलायां बोधयेद्देवीं वृश्चिके तु जनार्दनम्॥

तथा वैशाखज्यैष्ठयोरप्यधिमासपात एवमेव सर्व्वं कार्य्यम्। प्राप्ते आषाढ इत्यादिकमभिधाय पतिते चेति क्त्वाप्रत्ययात् आषाढात् पूर्व्वं भूतत्वप्रतीतेः मेषे वृषे वा पतित इत्यवगतेः। यदा तूत्तरत्रिके अधिमासस्तदा मिथुन एव देवशयनं नियतं किन्तु कर्कटे सिंहे अधिमासे शक्रदुर्गाविष्णुसमुत्थानानि कन्यातुला-वृश्चिकेष्वेव यथाक्रमम्। कन्यायामधिमासपाते शक्रोत्सवः सिंहे एव। दुर्गाविष्णूत्थाने तुलावृश्चिकयोः। तुलायाञ्च वक्रातिचाराभ्यामधिमासपाते वृश्चिके विष्णूत्थानम्।

अतएव सत्यः।

शक्रध्वजस्थापनञ्च(१) विष्णोश्च परिवर्त्तनम्।
मासद्वयेन निर्दिष्टं शयनादाद्यकोविदैः॥
दुर्गायाश्च त्रिभिर्मासैरधिमासं विनैव तु।
अधिमासनिपाते तु क्रमादिन्द्राम्बिकाहरीन्।
कन्यातुलावृश्चिकेषु नृप उत्थापयेद्ध्रुवम्॥

(१) शक्रध्वजोत्थानञ्चेति क्वचिदादर्शे पाठः।

अनेनैतदुक्तमधिमासं विना शक्रध्वजोत्थानविष्णुपार्श्वपरिवर्त्तने विष्णुशयनान्मासद्वयेन* कर्त्तव्ये दुर्गोत्थानञ्च मासत्रयेणैव। एवकारोऽत्रैव सम्बध्यते अन्यथा अनर्थकत्वात्। सति त्वधिमासे अन्यथेति तुशब्दार्थं दर्शयति। अधिमासपाते पुनरन्यथा कन्यायां शक्रोत्सवपार्श्वपरिवर्त्तौ तुलायां दुर्गोत्थानं वृश्चिके देवोत्थानमिति। अनेनैतदुक्तं शयनाब्धिभिर्मासैः शक्रोत्सवः चतुर्भिर्दुर्गायाः पञ्चभिर्देवोत्थानम्। एवं मासचतुष्टयेनेत्यस्योत्तरत्रिकाधिमासेऽपवादो दर्शितः अन्यथा भावानुपपत्तेः। उत्तरत्रिकाधिमासे मिथुने देवशयने सत्ययमर्थः सिध्यति। अतोऽधिमासपाते तु क्रमादिति सम्बन्धो† न तु क्रमादिन्द्राब्धिकाहरीन्

---

* यत्रोत्कर्षः श्रूयते इति। उत्कर्षश्रुतिस्तु चान्द्रत्वेन सौरत्वेनोभयथा श्रुतिरित्यर्थः। गौणस्य गौणस्यापि दर्शयतीत्यस्य ब्रुवाणा इत्यनेन सम्बन्धः। उत्कर्षं चान्द्रपरताम् अशीकाष्टमीप्रभृतीनामित्यनेन सम्बन्धः। अनुत्कर्षं सौरपरतां माघीसप्तमीप्रभृतीनामित्यनेन सम्बन्धः अवधीरणीया निन्दनीयाः। एवमेव सर्व्वं कर्कटादौ हरिशयनादिकमेव सर्व्वम्। उत्तरत्रिके श्रावणादिमासत्रये। मिथुन एव हरिशयनं श्रावणादौ मलमासे मिथुन एव आषाढ़शुक्लपक्षसमापनात्। वक्रातिचाराभ्यां मन्दशीघ्रगतिभ्याम्। वृश्चिके विष्णूत्थानमिति शुद्धकार्त्तिकशुक्लपक्षीयद्वादश्यादेर्वृश्चिके अवश्यम्भावात्। विष्णुशयनान्मासद्वयेन विष्णुशयनादूर्द्धं मासद्वयेनेत्यर्थः। मिथुनार्कगताषाढ़ादूर्द्धं मासद्वयं भाद्र एव भवति।

† त्रिभिर्मासैरित्यस्यार्थमाह मासत्रयेणेति। तदपेक्षया आश्विन एव भवति। इन्द्राब्धिकाहरीन् शक्रोत्थानदुर्गोत्सवविष्णूत्थानानि। अधिमासनिपाते तु अधिमासं विनैव तु इत्यनेन व्यवस्थामुक्त्वा अधिमासनिपाते तु इत्यत्र व्यवच्छेदार्थक-तुशब्दार्थमाह अन्यथेति। तुशब्दार्थं दर्शयति इति अधिमासे पुनरन्यथा अधिमासाभावे शक्रोत्थानादिकं सिंहे उक्तम् अधिमासे तु कन्यायामिति सुतरामन्यथात्वम्। शयनाब्धिभिर्मासैरिति

कन्यादिष्विति इन्द्रादीनाञ्च कन्यादीनाञ्च समसंख्यत्वेन समास-निर्देशेन समत्वम्। यथासङ्ख्यमन्वयस्य सिद्धत्वात् क्रमादिति वैयर्थापत्तेः। तेनोत्तरचिकाधिमासोऽपि यदि कर्कटसिंहयो-र्भवति तदा कन्यातुलावृश्चिकेषु "इन्द्राम्बिकाहरीन्" अथ कन्यायां तदा तुलावृश्चिकयोरम्बिकाहरीन् तुलायाञ्च वृश्चिके हरिमुत्थापयेत् इत्यधिमासनिपातक्रमात्। क्रमेण इन्द्रादीना-मुत्थानमिति तस्यार्थः। तत्रैव चान्द्रलाभादित्यभिप्रायः। तस्मात् शयनपार्श्वपरिवर्त्तनशक्रदुर्गाविष्णूत्थानानि चान्द्रेष्वेवा-षाढ़ादिकेषु। ननु यद्याभाका इत्यादिपरिग्रहस्तदेतन्मूलभूतासु श्रुतिषु आषाढ़ादिपदानि चान्द्रेष्वेष्टव्यानि न केवलं वैशाखपदं नैतत् मिथुनसिंहकन्यातुलोपक्रान्तेषु* प्रतिपदादिमासेषु देव-

---

श्रावणादौ अधिमासे इत्यर्थः। तथाच श्रावणादौ मलमासे मिथुन एव हरिशयनं भवति तदूर्द्ध त्रिभिर्मासैः सुतरां कन्यायामेव शक्रोत्सवः भवति। उत्तरचिकाधिमासे श्रावणादि-चिकाधिमासे। अपवादो विशेषः। अन्यथाभावानुपपत्तेः अन्यथाभावोऽन्यथात्वं तद-नुपपत्तेरित्यर्थः। अयमर्थः शयनात् त्रिभिर्मासैः शक्रोत्थानं चतुर्भिर्मासैर्दुर्गोत्थानं पञ्चभि-र्मासैर्देवोत्थानम् एवंरूपोऽर्थः सिध्यतीत्यर्थः। अतोऽधिमासपाते तु उत्तरचिकाधिमासेषु क्रमादिति सम्बन्धः इति क्रमादधिमासपातक्रमादित्यर्थः।

* कन्यातुलावृश्चिकेषु क्रमादिन्द्राम्बिकाहरीन् उत्थापयेदित्यन्वये क्रमादिति पदस्य वैयर्थ्यं दर्शयति ननु क्रमादिन्द्राम्बिकाहरीन् इत्यस्य कन्यातुलावृश्चिकेषु इत्यस्य च समास-निर्देशेन। यथासंख्यमन्वयस्य सिद्धत्वात् इति संख्यासमतिक्रम्य यथासंख्यं सिद्धत्वादिति तथाच इन्द्वात्परं श्रूयमाणः प्रत्येकेन सम्बध्यते इत्यनुशासनादिति भावः। विशेषयति तेनो-त्तरचिकाधिमासेऽपीति। यदि कर्कटसिंहयोर्भवति अधिमास इति शेषः उत्तरचिकाधि-मासोऽपीति पाठे तु प्रथमान्तत्वाद्भवतीत्यनेन सम्बन्धः। कन्यायाम् अधिमासे शक्रोत्थानस्य

शयनादिकं कुर्यादिति श्रुतयः कन्यागा न पुनराषाढ़ादिपदवत्यो-ऽनुपयोगात् अतो नास्ति विरोधः कश्चित्। लक्ष्मीप्रबोधः तुलायामेवेति अलमतिविस्तरेणेति सर्व्वं सुस्थम्*। ननु भवन्मते सौरेष्वेवाषाढ़ादिशब्दानां मुख्यत्वात् चान्द्रे तु गौणत्वादाभाकेत्यादिषु सौरग्रहणमेव युक्तम्। यथा वा योग्लोको मन्यते मिथुनाद्युपक्रान्तेषु चान्द्रेषु सौरेषु मिथुनादिषु राशिभोगात्मकेष्वाषाढ़ादिपदानां रूढ़िरेव वाचकत्वे सत्यपि शयनादिषु "मिथुनस्थ" इत्यादिनिर्देशादाभाकौ इत्यादिष्वपि सौरपरत्वमेव निर्णीयते। अतः कथं चान्द्रेषु शयनादिविधिः।

तथाहि।

"मिथुनस्थे सहस्रांशौ स्नापयेन्मधुसूदनम्।
तुलाराशिगते तस्मिन् पुनरुत्थापयेच्च तम्॥

---

सिंहे विधानात् आह अथ कन्यायां तदित्यादि। तुलायाम् अधिमासपाते तु कन्यायां दुर्गोत्सवस्य समापनादाह तुलायाञ्चेति अधिमासपाते इति शेषः। मिथुनसिंहकन्यातुलोपक्रान्तेषु मिथुनस्थसिंहस्थकन्यास्थतुलास्थरव्यारब्धेष्वित्यर्थः।

* श्रुतयः कन्यया इति। मिथुनस्थरव्यारब्धचान्द्रमासे हरिशयनं सिंहस्थरव्यारब्धभाद्रे शक्रोत्थानपार्श्वपरिवर्त्तने कन्यास्थरव्यारब्धाश्विने दुर्गोत्सवं तुलास्थरव्यारब्धकार्त्तिके हरेरुत्थानञ्च कुर्य्यादिति विधयः। न पुनराषाढ़ादिपदवत्यः इति तथाच यत्यक्तन्मते निरूपपदाषाढ़ादिपदानां सौरशक्रेः सौराषाढ़ादौ कदाचित्तत्तिथेरप्राप्तौ शेते विष्णुः सदाषाढ़े इत्यादेः वर्षे वर्षे विधातव्यं स्नापनञ्च विसर्জ্জनमित्यादेश्च बाधः स्यादिति भावः। यतो हरिशयनादौ चान्द्रग्रहणम् अतो विरोधो नास्ति कश्चित्। तथाच सौरग्रहणे कदाचित् तत्तिथेरप्राप्तौ शेते विष्णुः सदाषाढ़े इत्यादिनियमबाधरूपविरोधो भवेदिति भावः। सर्व्वं सुस्थं निर्बाधमित्यर्थः।

"अधिमासेऽपि पतिते एष एव विधिः स्मृतः।
नान्यथा स्थापयेद्देवं न चैवोत्थापयेद्धरिम्॥" भविष्यपुराणे।

सौरस्य निर्देशात् मिथुन एव देवशयनमुत्थानञ्च तुलायां कार्य्यम्। तन्मध्यपतितं पार्श्वपरिवर्त्तनमपि सौर एव भाद्रे 'आभाका' इति साहचर्य्यात्। नन्वधिमासपातेऽपि मिथुनतुलयोः शयनोत्थानविधानं कर्कटादावुत्कर्षविधिविरुद्धं, तत्राह—"अधिमासेऽपि पतिते" इत्यस्य सूर्य्यलङ्घितदर्शान्तमासेतर*गणितगम्याधिमासान्तरस्य मिथुनादौ पातेऽपि शयनाद्युत्कर्षो नास्तीत्येतदर्थत्वात् अतएवोत्कर्षवचनेष्वपि सौरमेव निर्दिशति। यथा—"विष्णुः स्वपिति कर्कटे।"

तथा।

"अधिमासनिपाते तु क्रमादिन्द्राम्बिकाहरीन्।
कन्यातुलावृश्चिकेषु नृप उत्थापयेद्ध्रुवम्॥"

---

* ननु चान्द्रे सौरे वा आषाढादिपदानां शक्तिरस्तु आभां परन्तु विशेषवचने मिथुनस्थादिपदश्रवणात् आभाकादीनां सौरपरत्वमिति योल्लीकमतमपाकर्तुमवतारयति यथा वा योल्लीको मन्यते इत्यादि। योल्लीकः तन्नामा निबन्धकारः। तन्मध्यपतितमित्यादि तथाच मिथुनस्थे शयनविधानेन तुलायां बोधनविधानेन एतदेकवाक्यतायाम् आभाका इति वचने मध्यपठितस्य भाद्रपदस्य पार्श्वपरिवर्त्तनेऽपि सौरभाद्रपरत्वं सुतरामेवेति भावः। शयनोत्थानविधानं मलमासेऽपि पतिते एष एव विधिः स्मृत इत्यनेनेति शेषः। कर्कटादावुत्कर्षविधिविरुद्धमिति तथाच एष एव विधिः स्मृतः इत्यनेन यदि अधिमासपातेऽपि मिथुनादौ हरिशयनं स्यात् तदा हिराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे इत्यादिवचनविहितः कर्कटे शयनोत्कर्षविधिर्विरुध्येत इति। तत्र समाधानमाह तत्राहेत्यादि सूर्य्यलङ्घितदर्शान्तरप्रकृतमलीमूतमुख्यचान्द्रमासेतरस्येत्यर्थः।

एवमादिवचनैश्च पूर्वचिकाधिमासे सत्युत्कर्षः* शयनादीनां क्रियते। कर्कटे त्वधिमासे सति शयनादीनां मिथुनसिंहकन्यातुलास्थेव क्रिया नोत्कर्षः कस्यचित्। सिंहे त्वधिमासपाते तस्य मलिम्लुचत्वात् शक्रोत्सवपार्श्वपरिवर्त्तौ कन्यायाम्। दुर्गोत्सवः कन्यायामेव सौर एव दुर्गोत्थानविधानात् तस्य चादुष्टत्वात्। विष्णूत्थानं तुलायामेव। कन्यायाञ्च मलिम्लुचे सिंह एव शक्रोत्सवः, दुर्गोत्सवस्तु तुलायां, देवोत्थानमपि तुलायामेव। तदयमर्थः। उत्तरचिकेऽधिमासे मिथुनस्थलयोरेव देवशयनोत्थाने न तु तयोरुत्कर्षः। शयनोत्कर्षहेतोरधिमासस्यापतितत्वात् उत्थाने च कर्कटशयनोत्कर्षहेतोरभावात्।

अतएव माण्डव्यः।

"अमावास्यां तुलादित्ये लक्ष्मीर्निद्रां विमुञ्चति।
तस्मिन् शुक्ले सदा विष्णुस्तुलायामथ वृश्चिके॥"

---

* गणितगम्याधिमासान्तरस्थेति। तथाच यत्र पूर्वं माधवादिचिके अधिमासस्तत्र पश्चाद्भाद्रे तु पश्चिमिति वचनात् पश्चाद्भाद्रे श्रावणादिचिके अधिमासस्य शास्त्रीयतया यत्र पश्चाद्भाद्रे मिथुने अधिमासपातः कन्यायां पुनरधिमासान्तरं तत्र कन्यायामधिमासस्य प्रकृततया मिथुने पुनर्गणितगम्यमाचमधिमाससमानं न तु प्रकृतमधिमासान्तरं तत्र तत्सत्त्वेऽपि मिथुन एव हरिशयनं मिथुन एव प्रकृताषाढ़समापनात् न तु कर्कटे तस्योत्कर्षः तस्य प्रकृताषाढ़ाधिमासविषयत्वमिति भावः। यत एव प्रकृतमलमासे शुद्धाषाढ़स्य कर्कटगतत्वम् अतएवेत्यर्थः। पूर्वचिकाधिमासे वैशाखादिचिके प्रकृताधिमासे सतीत्यर्थः। उत्कर्ष इति तत्र शुद्धाषाढ़स्य कर्कटगतत्वात् कर्कट एव शयनोत्कर्षः। भाद्रस्य आश्विनगतत्वात् कार्त्तिकस्य वृश्चिकगतत्वाच्च यथाक्रमं पार्श्वपरिवर्त्तनोत्थानयोरुत्कर्षः।

"शुक्लपक्षे यदा भानुस्तुलां समधिरोहति।
उत्तिष्ठत्यग्रतो विष्णुः पश्चात् कृष्णचतुर्दशी॥"

अस्य वचनद्वयस्यार्थस्तावदुत्सर्गापवादन्यायेनावधारितः। तुलायामादित्ये लक्ष्मीप्रबोधो नियतः, तदनन्तरञ्च देवस्य सदेति वचनात्तस्यापि नियतम्। अथ शुक्लपक्षे तुलासंक्रान्तौ चापवादः। शुक्लपक्षे च संक्रान्तिर्द्विधा मेषादिर्विकेऽधिमासपाताद् वा उत्तरर्विके वा। तत्र मेषादिर्विकेऽधिमासीयद्विराषाढे कर्कटे हरिशयनात्—

"कर्किण्यर्के हरौ सुप्ते शक्रध्वजक्रियाश्विने।
तुलायां बोधयेद्देवीं द्वयृर्विके तु जनार्दनम्॥"

इति द्वयृर्विके देवोत्थानस्य उत्कर्षात्तद्विषयत्वम् तावन्नास्य वचनस्य। यदप्युत्तरर्विकाधिमासेन शुक्लपक्षे तुलासंक्रान्तौ चापि चान्द्रं कार्त्तिकं परिभाव्य* द्वयृर्विक एव देवोत्थानमिति वर्णयन्ति

---

* कर्कटे त्वधिमासपाते सतीति। तथाच अधिमासनिपाते तत्र तद्वचनस्य पूर्वर्विकाधिमासमात्रविषयता तदैव दर्शयति शयनादीनामित्यादि। तथाच कर्कटे अधिमासे मिथुन एव हरिशयनस्य वास्तविकत्वात् कर्किण्यर्के हरौ सुप्ते इति वक्ष्यमाणवचनात् कर्कटहरिशयनस्यैव आश्विनादौ शक्रोत्थानादिनियम इति स्वयं वक्ष्यति। शयनोत्कर्षहेतोरधिमासस्येत्यादि तथाच यत्र पूर्वर्विकाधिमासः तत्रैव कर्कटेहरिशयनादुत्कर्षात् कर्किण्यर्के इति वचनाच्च तत्रत्यमलमासस्य शयनोत्कर्षहेतुता नोत्तरर्विकमलमासस्य शयनोत्कर्षहेतुत्वमिति भावः। अस्य वचनद्वयस्य अमावास्यां तुलादित्ये इति वचनस्य शुक्लपक्षे यदा भानुरिति वचनस्य च। उत्सर्गापवादन्यायेन सामान्यविशेषन्यायेन। अथ शुक्लपक्षे तुलासंक्रान्तौ चापवाद इति तथा च यत्र वैशाखादिचित्रयान्यतमाधिमासस्तत्रैव कृष्णपक्षे तुलासंक्रान्तिसम्भवात् कर्कटे हरिशयनेन कर्किण्यर्के इति वचनविषयसङ्गावाच्च हरिशयना-

सूरयः। तदेतत् दुर्भिक्षकालायाचितवृत्तिब्राह्मणवदनर्थकवचनमिदम्(१)। तस्मादवश्यं* तुलासंक्रान्त्यनन्तरमेव देवोत्थानमभिधेयं, तदनन्तरिते कृष्णपक्षे च तुलायामेव कृष्णचतुर्दशी। तत्परभूताऽमावास्यायाञ्च लक्ष्मीप्रबोधः, सा च सुखरात्रिरित्युच्यते। इत्युपपन्नमुत्तिष्ठत्यग्रत इति। उत्तरत्रिकाधिमासे चागामिवत्सरे शुक्लद्वादशीतः पूर्वं मिथुनसंक्रान्तौ यदि मिथुनादौ तदन्ते चानुराधाद्वादशीप्राप्तिः, तदा मासि संवत्सरे चैव तिथिद्वैध-

(१) दुर्भिक्षकालायाचितवृत्तिब्राह्मणवदनर्थकं वचनमिदं विपश्चित इति क्वचित् आदर्शे पाठः।

दैरुत्कर्षात् लक्ष्मीप्रबोधानन्तरमेव हृषिक एव हरेरुत्थानम्। यत्र तु श्रावणादितियान्यतममासे अधिमासपातः तत्र शुक्लपक्षे तुलासंक्रान्तिसम्भवात् कर्कटे हरिशयनाभावेन कर्किण्यर्कं इत्येतद्वचनाविषयत्वात् शयनादेरुत्कर्षाभावेन शुक्लपक्षे यदा भानुरित्यादिवचनात् हरेरुत्थानानन्तरमेव लक्ष्मीप्रबोधरूपसुखरात्रिका इति अपवादः विशेष इत्यर्थः। तद्विषयत्वं कर्किण्यर्कं हरौ सुप्ते इत्येतद्वचनविषयत्वम् तावदास्य वचनस्य इत्यन्वयः अत्र नास्य वचनस्येति पाठः प्रामादिकः विपर्ययकरप्रमादमात्रम्। विपर्ययपरत्वात्तावन्नास्य वचनस्येति पाठे व्यक्त एवार्थः। उत्तरत्रिकाधिमासेन श्रावणादितियान्यतममासाधिमासपातेन। शुक्लपक्षे तुलासंक्रान्तौ चापि तुलासंक्रान्तिसम्भवेऽपि। परिभाव्य परिकल्प्य।

* दुर्भिक्षकालायाचितेत्यादि। दुर्भिक्षकाले अयाचितवृत्तिर्यस्य स चासौ ब्राह्मणश्चेति स दुर्भिक्षकालायाचितवृत्तिब्राह्मणः तद्वदनर्थकवचनमिदम्। तथाच दुर्भिक्षकालायाचितवृत्तिब्राह्मणो यथा अनर्थकः अर्थशून्यः धनशून्यः श्लिष्टपदमिदं तथा इदं वचनं शुक्लपक्षे यदा भानुरिति वचनम् अनर्थकं निरर्थकं तात्पर्यशून्यं भवेत्। तथाहि उत्तिष्ठत्यग्रतो विष्णुरित्यादुपादानात् उत्तरत्रिकाधिमासपाते शुक्लपक्षे तुलासंक्रान्तौ यदि विष्णूत्थापनात् पूर्वं लक्ष्मीप्रबोधरूपसुखरात्रिका भवेत् तदा अग्रत इत्यस्य पश्चादित्यस्य च पदद्वयस्य वैयर्थ्यापातात् वचनमिदम् अनर्थकं भवेदिति भावः। तस्माच्च वचनानर्थक्यात् इत्यर्थः।

मित्युत्तरप्राशस्त्यान्मिथुनान्त एव शयनविधिः*। अथ मिथुने तत्प्राप्तिः। कर्कटादौ च तथाविधकालप्राप्तिः, तदा कर्कट एव शयनं वचनात्तदाह सत्यः।

"हृषं त्यक्त्वा चतुर्थ्यूर्ध्वं षड़शीतिः सिते यदा।
तदा दैवविदा चिन्त्यं हिराषाढ़प्रकल्पनम्॥"

कीदृशं तस्य कल्पनमित्यत्राह ज्योतिःशास्त्रे।

"शुक्लचतुर्थीमतिक्रम्य यदा संक्रमते रविः।
हिराषाढ़ं प्रकल्प्यैवं कर्कटादौ स्वपेद्धरिः॥"

एतदेवाह ऋष्यशृङ्गः।

"प्रथमेऽङ्गि द्वितीये वा शुक्ले मेषमियाद्रविः।
हिराषाढ़ऋते विष्णुः परं कर्कटके स्वपेत्॥"†

---

* तुलासंक्रान्त्यनन्तरमेवेति। रेवतीनक्षत्रयुक्तद्वादश्यादिरूपविहितकाले इति शेषः उत्तिष्ठत्यत्र इत्युपलक्षणं पश्चात् कृष्णचतुर्दशीत्यप्युपपन्नं मिथुनादाविति। मिथुनस्थे रवौ सति प्रथमे न तु मिथुनस्यादौ तथात्वे द्वादशीतः पूर्वं मिथुनसंक्रान्तावित्यनुपपत्तेः। मासि संवत्सरे चैव तिथिर्वैधमिति सत्यव्रतवचनम्।

तथाच। मासि संवत्सरे चैव तिथिर्वैधं यदा भवेत्।
तत्तीत्तरोत्तमा ज्ञेया पूर्वा तु स्यान्मलिम्लुचः॥

† हृषं त्यक्त्वेति। हृषस्यारभ्यशुक्लप्रतिपदादिदर्शान्तं मुख्यचान्द्रमासं त्यक्त्वा इत्यर्थः। चतुर्थ्यूर्ध्वं पञ्चम्यादौ षड़शीतिरिति। धनुर्मिथुनकन्यासु भौमे च षड़शीतय इति वचनात् हिराषाढ़ं गौणहिराषाढ़म्। अस्य हिराषाढ़स्य शुक्लचतुर्थीमतिक्रम्येति तत्पूर्वशुक्लप्रतिपदादिदर्शान्तमुख्यचान्द्रमाससहितशुक्लचतुर्थीपर्यन्तमतिक्रम्येत्यर्थः। हिराषाढ़ं गौणहिराषाढ़ं कर्कटादौ आदिना सिंहतुलयोः परिग्रहः अतएव स्वपेदित्युपलक्षणं पार्श्वेन परिवर्त्तयेत् उत्थापयेच्च इत्यपि बोध्यम्। प्रथमेऽङ्गि शुक्लप्रतिपदि द्वितीये शुक्लद्वितीयायां मेष-

एतद्व्याख्यातम्। विष्णुः परं कर्कटके स्वपिति शेषन्तु शक्रोत्सवादि यथाकालमेव कार्य्यम्।

तं कालमाह।

"द्विराषाढ़विकल्पोऽयं वैकुण्ठशयनं प्रति।
ध्वजस्तु शतयज्ञस्य सिंह एव विधीयते॥"

यदा च सिंहादौ तदन्ते च श्रवणद्वयलाभस्तदा कर्त्तव्यमाह*।

"द्विराषाढ़े तु सम्प्राप्ते यदि सिंहे हरिद्वयम्।
पर उत्थापयेच्छक्रं कन्यायान्तु विसर्জ্জयेत्॥"

कन्यायां पुनरन्ते च श्रवणप्राप्तौ कर्त्तव्यमाह।

"सैंहे कान्येऽथ पक्षौ चेत् स्यातां हर्य्यब्धसंयुतौ।
सैंहे परे शक्रमहः कन्यायामिन्द्रदुर्गयोः॥"

कन्यायां श्रवणद्वये प्रथमे शक्रोत्थानं द्वितीये तु दुर्गाया इति योगीश्वरेण व्याख्यातो द्विराषाढ़विकल्पः, स पुनरनुपपन्न इति

मित्यात्रविः मेषराशिस्थरवौ द्विराषाढ़ऋते मलमासं विनापीत्यर्थः। तथाच शुक्लप्रतिपदादौ रवेर्मेषादिसञ्चारे तत्शुक्लप्रतिपदादिदर्शान्तमासस्य चान्द्रवैचित्र्यात् तस्य च सौरवैशाखे मेषशेषे समापनात् तदुत्तरवृषराशौ चान्द्रवैशाखसमापनात् तदुत्तरमिथुनराशौ चान्द्रज्यैष्ठसमापनाच्च कर्कट एव चान्द्राषाढ़ीयद्वादशी सम्भवति। तत्र हरिशयनादिति भावः।

* द्विराषाढ़विकल्पोऽयं द्विराषाढ़परिकल्पनं वैकुण्ठशयनं प्रति मिथुनकर्कटकालभेदेन हरिशयनज्ञापनार्थं तथाच माधवादिचिके द्विराषाढ़े मलमासे सति कर्कट एव हरिशयनं, श्रावणादिचिके द्विराषाढ़े मलमासे मिथुन एव हरिशयनम्, आगामिवत्सरे तु कर्कट एव हरिशयनमिति भेदः। ध्वजस्तु शतयज्ञस्य शक्रोत्थानम्। सिंहे सिंहादौ मलीभूतभाद्रशुक्लपक्षे तदन्ते च सिंहस्थरव्यारब्धशुद्धभाद्रशुक्लपक्षे च श्रवणद्वयलाभः श्रवणनक्षत्रयुक्तशुक्लद्वादशीलाभः सिंहस्थरव्यारब्धचान्द्रमासद्वये इत्यर्थः।

मन्यामहे । तत्र प्रथमतस्तावदनेकाभिधायकमाषाढ़ादिपदं रूढ्यैवेत्यसङ्गतं वचनम् । स्तोकशक्त्युपपन्नेऽर्थे बहुशक्तिरप्रामाणिकीति न्यायात् । एक एव कल्पनायां सौरे विनिगमनाप्रमाणं प्रदर्शितमेव प्राक् । यदपि देवशयनादौ सौरमासग्रहणार्थं वचनमुपन्यस्तं, 'मिथुनस्थे सहस्रांशावित्यादि,' तदपि तदर्थानवबोधादेव सौरपरिग्रहेऽधिमासेऽपि पतित इति नियमविरोधात् । कर्कटवृश्चिकयोरपि शयनोत्थानोत्कर्षदर्शनात् । न च गणितमात्रगम्योत्कर्षानुपयुक्ताधिमासान्तराभिप्रायवर्णनया विरोधपरिहारो वाच्यः । तस्य शास्त्रतो वैदिककर्म्मोत्कर्षनिमित्तत्वेनापरिज्ञातस्य शयनादावुत्कर्षहेतुभावाप्रसक्तौ प्रतिप्रसववचनत्वानुपपत्तेः ।* तस्मान्मिथुनस्थे सहस्रांशाविति वचनस्यायमर्थः ।

---

* हरिशयनमिति । तथाच भाद्रमलमासे यदा मलभाद्रसम्बन्धि-श्रवणनक्षत्रयुक्तद्वादशी शुद्धभाद्रसम्बन्धि-श्रवणनक्षत्रयुक्तशुक्लद्वादशी चेत्यर्थः । परे शुद्धभाद्रसम्बन्धि-श्रवणनक्षत्रयुक्तशुक्लद्वादश्यां कन्यायान्तु विसर्ज्जयेदिति भरण्यन्तपाद इति शेषः ।

तथाच कालिकापुराणे ।

अथातः शृणु राजेन्द्र शक्रोत्थानध्वजोत्सवम् ।
यत् कृत्वा नृपतिर्याति नो कदाचित् पराभवम् ॥
रवौ हरिस्थे द्वादश्यां श्रवणे सितपक्षके ।
आराधयेत् नृपः सम्यक्सर्व्वविघ्नोपशान्तये ॥
श्रवणर्क्षयुतायान्तु द्वादश्यां पार्थिवः स्वयम् ।
अन्तपादे भरण्यान्तु निशि शक्रं विसर्ज्जयेत् ॥

कन्यायां पुनरन्ते चेति आदावन्ते च इत्यर्थः । शक्रमहः शक्रोत्थानम् । सैंहे सिंह एव सैंहं तस्मिन् सौरभाद्र इत्यर्थः । कान्ये कन्या एव कान्यः तस्मिन् सौराश्विन इत्यर्थः,

मिथुनस्थसूर्य्यप्रारम्भे चान्द्रे मासि प्रतिपदादिदर्शान्ते मधुसूदनं स्नापयेत्। तुलास्थसूर्य्यप्रारम्भे चान्द्रेषूत्थापयेत्। अधिमासे पतितेऽपि यदा कर्कटे देवशयनं, वृश्चिके उत्थापनं, तदापि मिथुनतुलोपक्रान्तयोरेव चान्द्राषाढ़कार्त्तिकयोः शयनोत्थाने 'एष एव विधिः सदा,' न पुनरेतस्मादन्यथा कदाचिदपि स्नापः प्रबोधो वा सर्व्वथायमर्थो न व्यभिचरतीत्यर्थः। सौरे तुलाद्यर्थं गण्यमाणेऽधिमासे कर्कटवृश्चिकयोः शयनोत्थानोत्कर्षादधिमासे-

---

पत्ती शुक्लपक्षद्वयम्। परे परभूतश्रवणनक्षत्रयुक्तहादश्याम्। कन्यायामिन्द्रदुर्गयोरित्यत्र व्यवस्थामाह कन्यायां श्रवणद्वये इत्यादि। द्वितीये कन्यासम्बन्धि-द्वितीयश्रवणनक्षत्रे। दुर्गाया इति विसर्জ্জनमिति शेषः श्रवणेन विसर्জ্জयेदित्येकवाक्यत्वात्। योगीश्वरेण तन्नाम्ना निबन्धकारेण। व्याख्यात इत्यनेन द्विराषाढ़विकल्प इत्यनेन सम्बन्धः। अनेकाभिधायकम् अनेकार्थाभिधायकं रूढ्या रूढ़िशक्त्या। लोकशक्त्युपपन्नेऽर्थे एकत्र शक्तिस्वीकारेणोपपत्तिसम्भवे बहुशक्तिः नानाशक्तिस्वीकारः अप्रामाणिकीति गौरवादिति शेषः। विनिगमनाप्रमाणं तपस्तपस्यादित्यादिश्रुतिरेवेति शेषः। तदर्थानवबोधनादेव स्मृतिवचनतात्पर्य्यापरिज्ञानादेव सौरपरिग्रहे हरिशयनादाविति शेषः। अधिमासे पतिते माधवादिचिके मलमासपाते नियमविरोधादिति तथाच माधवादिचिके मलमासपाते कर्कटे हरिशयनोत्कर्षात् मिथुनस्थे सहस्रांशाविति वचनेन हरिशयनस्य मिथुनस्थत्वबाधापत्तेरिति भावः। गणितमात्रगम्यः गणितशास्त्रमात्रबोध्यः उत्कर्षानुपयुक्ताधिमासान्तराभिप्रायवर्णनया मासतद्व्रताद्यप्रयोजकीभूतभानुलङ्घितरूपमलमासान्तराभिप्रायवर्णनया विरोधपरिहार इति। तथाच मिथुनादौ हरिशयनादिस्वीकारे कर्कटादौ हरिशयनादीनामुत्कर्षविधायकवचनेन सह यो विरोधः तस्य परिहारः अनया वर्णनया करणीय इति भावः। तस्य गणितमात्रगम्यस्य हेतुभावाप्रसक्तौ हेतुताप्रसक्तौ प्रतिप्रसववचनत्वानुपपत्तेः गणितमात्रगम्यत्वेन प्रतिप्रसवविधानानुपपत्तेः।

ऽप्येष एव विधिर्नान्यथेत्यादिकं वाच्येत। सकलपदानुरोधेन वाचार्थवचनं युक्तम्। ततश्च मिथुनस्थे सहस्रांशावित्यत्रोपक्रान्ते चान्द्रे इत्यत्राध्याहार्थ्यम्। * सौरपरिग्रहे कल्पनागौरवमिति तथाहि "आभाका" इत्यस्य तावन्मूलभूतचान्द्रसौरयोरन्यतरत्र शयनादिविधानार्थं श्रुतित्रयम्। मतद्वयेऽपि शक्रदुर्गोत्सवार्थमपि श्रुतिद्वयं निर्विवादम्†। सौरवादिना त्वपरा अप्यधिकाः

---

* ननु यदि शयनादौ न सौरपरत्वं तदा मिथुनस्थसहस्रांशाविति वचनस्य का गतिरित्यत आह तस्मादित्यादि। अयमर्थः वक्ष्यमाणोऽर्थः। मिथुनस्थ इत्यादिवचनस्य चान्द्रपरतया व्याचष्टे मिथुनस्थसूर्य्यप्रारम्भ इत्यादि। मिथुनस्थे सहस्रांशौ इत्यत्र लक्षणया व्याकरोति मिथुनस्थसूर्य्यप्रारम्भे चान्द्र मासि इत्यादि। मिथुनतुलोपक्रान्तयोरेव मिथुनस्थतुलास्थरव्यारम्भयोरेव एष एव चान्द्रनियम एव। सदा एतस्मात् चान्द्रात् अन्यथा अन्यप्रकारं कदाचिदपीत्यस्य नेति इत्यनेन सम्बन्धः। अयमर्थः चान्द्रमासग्रहणरूपोऽर्थः। तुलास्थमित्यादिना मिथुनपरिग्रहः। तथाच मिथुने चान्द्राषाढे अधिमासे तुलायां चान्द्रकार्त्तिके च अधिमासे कर्कटहरिशयनयोः शयनोत्थानादिति। तथाच मिथुने चान्द्राषाढे अधिमासे मिथुनगतचान्द्राषाढस्य मलमासत्वेन कर्म्मानर्हतया कर्कटगतशुद्धचान्द्राषाढ एव हरिशयनम्। एवं तुलागतचान्द्रकार्त्तिके मलमासे तत्कार्त्तिकस्य कर्म्मानर्हतया वृश्चिकगतशुद्धकार्त्तिक एव हरेरुत्थानम्। एष एव विधिः कर्कटादिगते शुद्धचान्द्राषाढादौ शयनाद्युत्कर्ष एव विधिः नान्यथा नाधिमासं विना। सकलपदानुरोधेन आषाढादिपदकर्कटादिपदसार्थक्यानुरोधेन वाचार्थवचनं पदानां शक्यार्थनिरूपणम्। इत्यत्र एतद्वचने उपक्रान्तचान्द्रे इति मिथुनस्थे सहस्रांशौ इत्यत्र मिथुनस्थरव्यारभ्य इत्यधिकं चान्द्रार्थग्राहकं पदमध्याहार्थ्यम्।

† सौरपरिग्रहे हरिशयनादौ सौरमाससमाश्रयणे कल्पनागौरवमिति वाचनिकत्वकल्पनागौरवमित्यर्थः तदेव दर्शयति तथाहीति। चान्द्रसौरयोरेकतरत्र चान्द्रे सौरे वा एकतरस्मिन् शयनादिविधानार्थं शयनपरिवर्त्तनप्रबोधविधानार्थं मूलभूतं श्रुतित्रयमिति तथाच चान्द्रे शयनादिस्वीकारे चान्द्राषाढे शयनं भाद्रे परिवर्त्तनं कार्त्तिके उत्थानमिति

पञ्चदश श्रुतयः कल्पनीयाः। तथाहि पूर्व्वचिकाधिमासे शयनादित्रयस्य शक्रदुर्गोत्सवयोरुत्कर्षार्थम्। एवं पञ्चसिंहे चाधिमासे शक्रोत्सवार्थम्। कन्याधिमासे च दुर्गोत्कर्षार्थम्। तुलाधिमासे च देवोत्थानोत्कर्षार्थम्। तथोत्तरचिकेऽधिमासे आगामिवत्सरे कर्कटस्यादौ द्वादशीलाभे तत्र देवशयनार्थम्। मिथुनान्ते च तत्प्राप्तौ तत्रैव शयनार्थम्।*

---

विधित्रयम्। सौरपरत्वेऽपि मिथुने शयनं सिंहे परिवर्त्तनं तुलायामुत्थानञ्चेति विधित्रयम्। मतद्वयेऽपि चान्द्रवादिसौरवाद्युभयमतेऽपि विधित्रयं समानं तथाच चान्द्रवादिमते भाद्रे शक्रोत्थानं कुर्य्यात् आश्विने दुर्गोत्सवं कुर्य्यादिति विधित्रयं सौरपक्षेऽपि सिंहे शक्रोत्थानं कन्यायां दुर्गोत्सवं कुर्य्यादिति विधित्रयम्। निर्विवादम् उभयमतेऽपि विधिकल्पने लाघवगौरवविरहेण विनिगमनाप्रमाणशून्यम्।

* सौरवादिमते विधिगौरवं दर्शयति सौरवादिना इत्यादि। पञ्चदशप्रकारं विधिकल्पनप्रकारं दर्शयति तथाहीत्यादि। पूर्व्वचिकाधिमासे माधवादिचिकाधिमासे शयनादित्रयस्य शयनपार्श्वपरिवर्त्तनोत्थानरूपविधित्रयस्य उत्कर्षार्थमित्यग्रिमेन सम्बन्धः; शक्रदुर्गोत्सवयोरुत्कर्षार्थम् उत्कर्षार्थञ्च एवं पञ्च पञ्च विधयः कल्पनीया भवन्तीति शेषः। सिंहे अधिमासे शक्रोत्सवार्थं शक्रोत्सवोत्कर्षार्थं विधिरेकः कल्पनीय इति शेषः। कन्यायामधिमासे दुर्गोत्सवार्थं दुर्गोत्सवोत्कर्षार्थमपरो विधिः कल्पनीयः। एवं तुलायामधिमासे च देवोत्थानोत्कर्षार्थम् अन्यो वा विधिः कल्पनीय इति विधित्रयं मिलितान्यौ विधयौ भवन्ति। उत्तरचिकाधिमासे श्रावणादिचिकाधिमासे कर्कटादौ शयनादिपञ्चकं कर्कटे हरिशयनं कन्यायां शक्रध्वजपार्श्वपरिवर्त्तौ तुलायां दुर्गोत्सवः वृश्चिके हरिरुत्थानञ्च, तेन त्रयोदश विधयौ भवन्ति। कन्याया आदौ अन्ते च श्रवणद्वयलाभे प्रथमे शक्रोत्थानं द्वितीये श्रवणनक्षत्रे देवीविसर्জ্জनं श्रवणेन विसर्জ্জयेदिति श्रवणेन दशम्यान्तु प्रणिपत्य विसर्জ্জयेदिति वचनाभ्यामेकवाक्यत्वात्, तेन पञ्चदश विधयौ भवन्तीति व्यवस्थानिष्कर्षः।

"कर्किण्यर्के हरौ सुप्ते शक्रध्वजक्रियाश्विने।
तुलायां बोधयेद्देवीं वृश्चिके तु जनार्दन"मित्यस्यापवादकम्। "ध्वजस्तु शतयज्ञस्य सिंह एव विधीयत" इत्यस्य मूलम्। तथा।

"हरिहयं भाद्रपदे यदि स्याद्-
यद्यच्युतः कर्कटके प्रसुप्तः।
तदा परस्मिं खलु वज्रपाणि-
रुत्तिष्ठते प्राणभृतां शिवाय॥"*

इति व्यवस्यार्थम्।

तथा।

"सैंहे कान्येऽथ पत्नौ चेत् स्यातां हर्य्याद्यसंयुतौ।
सैंहे परे शक्रमहः कन्यायान्त्विन्द्रदुर्गयोः॥
शुक्लपक्षद्वये पूजा कल्पोऽयमपरः स्मृतः।
द्विराषाढस्य विद्विद्भिस्तत्समाप्तिश्च तावते"ति व्यवस्थावचनद्वयम्। द्विराषाढसमाप्तिवचनञ्चेति सौरपरिग्रहेऽधिकाः पञ्चदश श्रुतयः कल्पनीयाः। चान्द्रे तु नैतावती कल्पनीया।

---

* अत्र प्रमाणं क्रमेण दर्शयति कर्किण्यर्के इत्यादि। इत्यस्यापवादकं विशेषकं "ध्वजस्तु शतयज्ञस्य" इति वचनम्। तथाच, "शक्रध्वजक्रियाश्विने" इति पूर्ववचने आश्विने शक्रध्वजविधिरुक्तः। "ध्वजस्तु शतयज्ञस्य सिंह एव विधीयते" इत्यनेन सिंहे पुनरपवाद उक्त इति भावः। "अस्य मूलमिति" अस्य अपवादस्य मूलमित्यर्थः, तदेव दर्शयति, "हरिहयमित्यादि," यदा सौरभाद्रस्यादौ अन्ते च श्रवणद्वयप्राप्तिः तदापरस्मिन् श्रवणनक्षत्रे शक्रध्वजविधिरित्यपवादः।

तथाहि मेषादित्रिकेऽधिमासपाते मिथुनोपक्रान्तः* कर्कटावधि-संक्रान्तिचिह्नितः कर्म्मार्हश्चान्द्र आषाढः कर्कट एव भवति। मिथुनाधिमासे तु मिथुनोपक्रान्तो मलिम्लुचः संक्रान्तिविवर्जितः। कर्म्मानर्हो द्वितीयोऽप्याषाढ़ो भवति। तेन मिथुनान्तत्रिकाधिमासे कर्कटगामिन आषाढ़स्य मिथुनोपक्रान्तस्य मिथुनोपक्रान्तः कर्कटसमापनीयः शुक्लपक्षः। सकलदेवशयनार्थो विष्णुश्च कर्कटे स्वपिति। तदा सिंहकन्यातुलारब्धमासानां शुक्लपक्षाः सिंहकन्यातुलारब्धास्वेषु यथाक्रमं शक्रदुर्गाविष्णूत्थानानि चान्द्रेषु भाद्राश्विनकार्त्तिकेषु भवन्ति। कन्यातुलाद्वयिकत्वमप्रयोजकम्। अतएव† मेषेऽधिमासपाते प्रति-

---

* ननु तथात्वे "शक्रध्वजक्रियाश्विने" इत्यनर्थकं स्यादित्यत आह व्यवस्थार्थं "सिंहे कान्ये" इत्यादि। तथाच यदा सौरभाद्रस्यादौ अन्ते च श्रवणद्वयलाभः तदापरस्मिन् श्रवणनक्षत्रे शक्रध्वजविधिरपवादकः। यदा पुनर्भाद्रे न श्रवणनक्षत्रप्राप्तिः कन्यायाः पुनरादावन्ते च श्रवणद्वयप्राप्तिस्तदा पूर्व्वस्मिन् श्रवणनक्षत्रे शक्रध्वजविधिः। "शक्रध्वजक्रियाश्विने" अस्याप्यत्र विषयः इति व्यवस्था। परस्मिन् पुनः श्रवणनक्षत्रे देवीविसर्জ্জनविधिरिति न कश्चिद्विरोधः। व्यवस्थावचनद्वयं व्यवस्थापरवचनद्वयमित्यर्थः। द्विराषाढ़समाप्तिवचनञ्च मुख्यगौणद्विराषाढ़निमित्तकशयनादिविधायकवचनञ्च सौरपरित्यहे शयनादौ सौरमासघटितत्वेन विधायकत्वेत् तदा अधिका पञ्चदश श्रुतयः कल्पनीया भवेयुरित्यर्थः। चान्द्रे तु शयनादीनां चान्द्रमासविषयत्वे तु। न एतावती न पञ्चदश श्रुतयः। तदेव दर्शयति तथाहि इत्यादि। मिथुनोपक्रान्तः मिथुनस्थरव्यारब्धः।

† कर्कटावधिसंक्रान्तिचिह्नित इत्यादि। तथाच यदा पूर्व्वामावास्यान्त्यक्षणप्राक्क्षणादौ मिथुनसंक्रान्तिः कर्कटसंक्रान्तिस्तु शुक्लप्रतिपदि तदा तच्छुक्लप्रतिपदादिदर्शान्तस्य मुख्यचान्द्रस्य कर्कटगतस्य मिथुनस्थरव्यारब्धतया चान्द्राषाढ़त्वम्, अपिच—"आद्यो मलिम्लुचः

यदि हृषप्रवेशे तृतीयायां मिथुनगमने पञ्चम्यां कर्कटसंक्रान्तौ सप्तम्यां सिंहाधिरोहणे नवम्याञ्च कन्यागमने एकादश्यां तुलास्थे चयोदश्याञ्चातिचारेण वृश्चिकसंयोगे कर्कटे हरौ सुप्ते कन्यायां प्रथमं शक्रोत्सवो भवति। कन्याशेषे तु दुर्गायास्तुलायाञ्च विष्णु-महोत्सवः कथं स्यात्? * यदि चान्द्रमच प्रयोजकम् अन्यथा

"कर्किण्यर्के हरौ सुप्ते शक्रध्वजक्रियाखिने।
तुलायां बोधयेद्देवीं वृश्चिके तु जनार्दन"मिति वचनात्

---

ज्ञेयो द्वितीयः प्रकृतः स्मृत" इत्यादिस्मरणात् कर्म्मार्हता च शुद्धत्वमिति भावः। कर्म्मानर्हः द्वितीयः प्रकृतभिन्नः अशुद्ध इत्यर्थः। मिथुनान्तचिकाधिमासे मेषऽषमिथुनान्यतमाधि-मासे। मिथुनोपक्रान्तस्य मिथुनस्यरव्यारब्धस्य। सिंहकन्यातुलारब्धाः सिंहकन्या-तुलास्थरव्यारब्धाः, चान्द्रेषु भाद्राश्विनकार्त्तिकेषु भवन्ति। चान्द्रभाद्रे शक्रोत्थानम्। चान्द्राश्विने दुर्गोत्सवः। चान्द्रकार्त्तिके हरिरुत्थानञ्च। अप्रयोजकं शयनादेरप्रयोजक-मित्यर्थः। अतएव कन्यादेरप्रयोजकत्वादेव।

* तृतीयायां मिथुनगमने इत्यादि। एतत्तु प्रदर्शनमात्रपरं न तु मिथुनसंक्रान्त्यादौ तत्तत्तिथेर्नियतत्वम्। कर्कटे हरौ सुप्ते इति तथाच वैशाखादौ मलमासे शुद्धाषाढस्य कर्कटगतत्वात् कर्कट एव हरिशयनस्य नियतत्वमिति भावः। कन्यायां प्रथमिति। अत्र कन्यायामित्यपपाठः, कन्याया इत्येव पाठः साधुः, कन्याया इति पञ्चमी। तथाच,— "कन्यायाः प्रथमं सिंहे" इत्यर्थः। भाद्रे तद्विधानात्। यथा—

"शुक्लाष्टम्यां भाद्रपदे कैतुं वेदीं प्रवेशयेदिति।"

अत्र उत्तरत्रचान्द्रमप्रयोजकमित्यनेन सौरविधिः स्पष्टमवगम्यते। "कन्याशेषे त्विति," एतन्मते आश्विनपदस्य सौरपरत्वात् विष्णुमहोत्सव इति। तथाच—

"मिथुनस्थे सहस्रांशौ स्नापयेन्मधुसूदनम्।
तुलाराशिगते तस्मिन् पुनरुत्थापयेच्च तम्॥"

कथमित्यपपाठः आशङ्कायां अभावात्।

तुलाशेषे सुखरात्रेः परस्ताद्-दुर्गोत्थानं स्यात् वृश्चिकशेषे च वासुदेवोत्थानमिति। "तस्मिन् शुक्ले सदा विष्णुरिति" बाधितं स्यात्। उत्तरवृश्चिकाधिमासे सिंहोपक्रान्तो भाद्रः कन्योपक्रान्त आश्विनः तुलोपक्रान्तः कार्त्तिकश्चान्द्रः, तेषां शुक्लपक्षाः कन्यातुलावृश्चिकेषु समाप्यन्ते, तेषु शक्रध्वजदुर्गोत्थानानि भवन्तीत्येतदपि वचनपञ्चकानतिरिक्तमूलम्।* आगामिवत्सरे मिथुनोपक्रान्तस्य शुक्लपक्षद्वादशीमिथुनान्ते वा कर्कटादौ संक्रान्तिदिन एव वा तत्रैव शयनम्। तदपि चान्द्राषाढ़मूलम्। तदनन्तरं

---

* अन्यथा प्रयोजकत्वे प्रतिबन्धं दर्शयति "कर्किण्यर्के" इत्यादि। परत्वादूर्ध्वम्। दुर्गोत्थानमिति लिपिकरप्रमादः। कन्याशेषे दुर्गोत्था इति प्राङ्लिखितेन विरोधात्। वस्तुतस्तु विष्णूत्थानमित्येव पाठः। तथाच वैशाखमलमासे वृश्चिक एव सुखरात्रेः परतो विष्णूत्थानमिति व्यवस्था, तच्च यदि सौरघटितशयनादिविधिः स्यात्, तदा तुलाशेष एव सुखरात्रेः परत उत्थानं स्यादित्यापत्तिः पुनर्वृश्चिके शास्त्रसिद्धमुत्थानमपि बाधितमित्यापत्तिद्वयं दर्शितमिति भावः। सिंहोपक्रान्तः सिंहस्थरव्यारभ्यचान्द्रभाद्र इत्यर्थः। कन्योपक्रान्तः कन्यास्थरव्यारभ्यः। तुलोपक्रान्तः तुलास्थरव्यारभ्यः। एतदपि कन्यादिषु यथाक्रमं शक्रध्वजदुर्गोत्सवविष्णूत्थानरूपकर्म्मापि च वचनपञ्चकानतिरिक्तमूलमिति। वचनपञ्चकानतिरिक्तं मूलं यस्य तत् वचनपञ्चकमूलमित्यर्थः। वचनपञ्चकं यथा—

"कर्किण्यर्के हरौ सुप्ते" इति।

"अधिमासनिपाते तु क्रमादिन्द्राम्बिकाहरीन्।

कन्यातुलावृश्चिके तु हृषीकोत्थापयेद्ध्रुवम्॥"

"हरिदिनं भाद्रपदे यदि स्यात् यद्यच्युतः कर्कट एव सुप्तः।

तदा परार्द्धे खलु वज्रपाणिरुत्तिष्ठते प्राणभृतां हिताय॥" इति चयम्।

"आभाका" इत्यादि साधारणं वचनद्वयमिति पञ्च।

सिंहशेषे कन्यादौ वा श्रवणालाभे यद्वचनं, तदपि सिंहोपक्रान्त-भाद्रस्य चान्द्रस्य परिग्रहादेव, कन्याशेषे च कन्योपक्रान्तस्य चान्द्राश्विनस्यासौ शुक्लपक्षः। कन्योपक्रान्तौ दुर्गोत्थानाय चान्द्राश्विनपरिग्रहादेव कन्यान्तगतैव च तदाष्टमी तुलोपक्रान्तस्य च द्वादशी तुलायामिति द्विराषाढ़समाप्तिवचनमपि न मूलान्तरमाहरतीति सर्व्वथा कल्पनागौरवाय। यदि 'आभाके'-त्यादिपदानि चान्द्रे गौण्या लाक्षणिक्या वाहत्या वर्त्तन्ते, तदपि न दोषाय।* उक्तं हि भाष्यकारेण—'लक्षणापि हि लौकिक्ये

---

* आगामिवत्सरे इति। एतत्तु श्रावणादिचिकाधिमासे। मिथुनोपक्रान्तस्य मिथुनस्थरव्यारब्धचान्द्राषाढ़स्य शुक्लद्वादशी। मिथुनान्ते वा इति वाच चार्थे। मिथुनान्ते कर्कटादाविति, कर्कटस्य आदिसम्बन्धे। तदैव विद्वणीति, संक्रान्तिदिने। वाकारात् तत्परतो वा इति कल्पान्तरं पूर्व्ववाकारेण समुच्चितम्। यद्वचनं—"सिंहे कान्ये च पक्षौ चे"दिति वचनम्। सिंहोपक्रान्तस्य सिंहस्थरव्यारब्धस्य। कन्योपक्रान्तस्य कन्यास्थरव्यारब्धस्य। दुर्गोत्थानाय दुर्गोत्सवार्थं चान्द्राश्विनपरिग्रहादिति। तथाच—

"अष्टम्यामश्विने षष्ठ्यां सायाह्ने बोधयाम्यतः" इति।

"प्रतिसंवत्सरं कुर्य्यात् स्थापनञ्च विसर्ज्जनम्" इत्यादि नानावचनेषु प्रतिसंवत्सरकर्त्तव्यत्वश्रुतेः सौरपरत्वे कदाचित्तत्तिथेरप्राप्तौ बाधः स्यादिति भावः। न मूलान्तरमाहरतीति तथाच सौरपरिग्रहे गौरवदोषोऽच गरीयानिति भावः। गौण्या लाक्षणिक्येति। शक्यस्य सादृश्यात्मकः सम्बन्धी गुणः, तदधीना या लक्षणा सा गौणी तया गौण्येति। पदपदार्थसम्बन्धी इत्तिः। तथाच भट्टाचार्य्यः—"सङ्केतो लक्षणा चार्थे पदइत्तिः"। ननु चान्द्रपरत्वे लक्षणा स्यादित्यत आह तदपि न दोषाय इति। तथाच—

"शेते विष्णुः सदाषाढ़े" इत्यादि।

"प्रतिसंवत्सरञ्चैव स्थापनञ्च विसर्ज्जन"मित्यादि नानावचनानुपपत्तिमूलत्वादियं लक्षणा न दूषणावहा इति भावः।

बहवोऽप्रसिद्धकल्पने'ति(१)। अतएव 'वेदमधीत्य स्नायात्' न मुख्य-स्नानपदानुरोधेन इदमदृष्टार्थं स्नानं विधीयते कल्पनागौरवात्। किन्त्वर्घ्यस्नानादिसकलब्रह्मचारिधर्मनिवृत्तिमेव लक्षणा ब्रवीति पूर्वपक्षन्यायमूलत्वमुक्तम्, अदृष्टकल्पनाभयादेव, 'धान्यमसी'त्यत्र धान्यपदस्य लक्षणया तण्डुलपरत्वं वर्णितम्। तस्मादमुख्यत्वेऽपि चान्द्रेष्वेवाषाढ़ादि'ष्वाभाका' इति वचनेन शयनपार्श्वपरिवृत्तिदेवोत्थानानि विधीयन्ते। एतद्विधिमूलान्येवापराणि पञ्चदशवचनान्यनुष्ठानं सृष्टीकर्त्तुं न पुनरन्यमूलानि। एवं 'सिंहगते दिनकरे' इत्यादिना सिंहस्थभास्करोपक्रान्ते प्रतिपदादिके चान्द्रे भाद्रे शक्रोत्सवः। दीक्षितेन उक्तं, सिंहगते सति यः सितपक्षे श्रवणाद्यपादः तत्र तदुत्थानं स च कन्यास्थे यः सितपक्षीयः श्रवणाद्यपादः सोऽपि भणितुं शक्यते। तस्यापि तदगमनोत्तरत्वादिति तदयुक्तं सोऽपि भणितुमित्यन्योऽपीत्यविशेषकं स्यात्। राश्यन्तरश्रुतेश्चावगतस्य सिंहस्य बाध एव स्यात्।

तथा।

"ऋक्षत्रये तु मूलादौ नवम्यामाश्विने सिते।
चण्डिकामुपहारैस्तु पूजयेद्राष्ट्रवृद्धये॥"

अत्राप्याश्विनपदं चान्द्रपरम्। * अतो लाघवार्थं "मिथुनस्थे

(१) लौकिकी हि लक्षणा दृष्टोऽप्रसिद्धकल्पनेति मूलपुस्तकपाठः।

* अत्र लक्षणाया अदुष्टत्वे भाष्यकारसंवादमाह—"उक्तं हीति" "लक्षणापि हीति" इत्यादि। यत एव प्रामाणिकी लक्षणा न दूषणावहा अतएव इत्यर्थः। "वेदमधीत्य

स्नायात्" इत्यादि। मुख्यस्नानपदानुरोधेन स्नायादित्यस्य मुख्यार्थानुरोधेन इत्यर्थः। अदृष्टार्थस्नानं वैधस्नानम्। कल्पनागौरवादिति। वेदमधीत्य इत्यनेन प्राप्तसमावर्त्तन-स्नानमपहाय वैधस्नानकल्पने गौरवमेवेति भावः। लक्षणाफलमाह, "किन्वर्घ्यस्नानादी"-त्यादि, ब्रह्मचारिधर्म्मनिवृत्तिमेव लक्षणा ब्रवीतीति। तथाच गोभिलः—अथाप्लवनम्। अथ व्रतानन्तरम् आप्लवनं स्नानं कुर्य्यादिति शेषः। उत्तरतः पुरस्तादाचार्य्यकुलस्य परिव्रतं भवति। आचार्य्यगृहादुत्तरस्यां वा स्नानार्थमाहृतं स्नानं कुर्य्यात्। अत्र प्रागग्रेषु दर्भेषु उदगाचार्य्य उपविशति। तत्राहृते उदक् उदङ्मुखः। प्राक् ब्रह्मचार्य्युदगग्रेषु। प्राक् प्राङ्मुखः उपविशतीत्यन्वयः। सर्व्वौषधिविकौंखाभिरङ्गिरसवतीभिः शीतीष्णाभिराचार्य्यो-ऽभिषिञ्चेत्। सर्व्वौषधयश्च—व्रीहयः शालयो मुद्गा गोधूमाः सर्षपास्तिलाः। यवाश्चौषधयः सप्त विपदो घ्नन्ति धारिताः इति छन्दोगपरिशिष्टोक्ताभिः सह या आपो विकौंखा विपक्वा उष्णीकृतास्ताः सर्व्वौषधिविकौंखास्ताभिरङ्गिरसवतीभिश्चन्दनादिगन्धद्रव्ययुक्ताभिः शीतोदकमिश्रिताभिरिति भट्टभाष्यम्। उपयातायार्य्यमिति कौहनीयाः। उपयातायाचार्य्यसमीपमागतायार्य्यं देयमिति कौहनीया आचार्या आहुः। तथाच यथा—"गङ्गायां घोष" इत्यादौ सत्यपावनेत्यादिगङ्गाधर्म्मप्राप्त्यर्थं लक्षणा, तद्वत् अचापीति भावः। अपराधीति अक्रध्वजदुर्गोत्सवादीनि इत्यर्थः। पञ्चदश वचनानि पञ्चदश विधयः। ते प्रागुक्ताः। न पुनरन्यमूलानि सौरार्थवीधमूलानि। सिंहस्थभास्करीपक्रान्ते सिंहस्थरविप्रारम्भे। मूलादौ मूलापूर्व्वाषाढोत्तराषाढासु, ऋक्षत्रये त्रिषु नक्षत्रेषु। सिते शुक्लपक्षे। नवम्यां महा-नवमीपर्य्यन्तेषु। तथाच—

"अक्रध्वजात् पञ्चयुते दशाहे मूलर्क्षयुक्ता सितसप्तमी या।
आरभ्य तस्यां दशमीञ्च यावत्पूजयेत् पर्व्वतराजपुत्रीम्।" इति।

सप्तम्यां मूलयुक्तायां पत्रिकायाः प्रवेशनम्।
पूर्व्वाषाढायुतायाष्टम्यां पूजाहोमाद्युपोषणम्।
उत्तरैण नवम्यान्तु बलिभिः पूजयेच्छिवाम्॥

अत्र यावच्छब्दः सीमार्थे नाभिविधौ, तेन नवमीपर्य्यन्तं पूजा। चान्द्रपरं शुक्ल-प्रतिपदादिदर्शपर्य्यन्तमुख्यचान्द्रपरम्।

सहस्रांशौ स्नापये"दित्यादिषूपक्रान्ते चान्द्रे मासीत्यध्याहार एव न्याय्यः। "अधिमासेऽपि पतिते" इत्युत्कर्षनिमित्ते सत्यप्येष एवेति। नान्यथा इति* एतद्वचनान्नियमद्वयाविरोधाच्च "तस्मिन् शुक्ले सदेति" नियमोपपत्तिः। किञ्च सौराषाढ़ादिषु शयनादिकमिति वादिनो मेषवृषयोरधिमासे कथं शयनोत्कर्षः, मिथुने शयनस्य विहितत्वात् तस्य चामलिम्लुचत्वात्, "पतिते चाधिमास" इति वचनाच्चेत् न तदा कर्कटेऽप्यधिमासे कथं शक्रादीनामुत्कर्षं ब्रूषे? पतित इत्यविशेषात् माधवाद्येषु षट्स्विति वचनाच्चेत्† न उत्तरत्रिकाधिमासेऽपि शयनोत्कर्षापत्तेः। कर्कटा-

---

* उपक्रान्ते चान्द्रे इति। तथाच "मिथुनस्थे सहस्रांशौ" इत्यत्र यथाश्रुतार्थमादाय सौरावगतिसत्त्वेऽपि नानावचनविरोधात् "मिथुनस्थे सहस्रांशौ" इत्यस्य मिथुनस्थरव्यारब्धचान्द्रे मासि इत्यध्याहारेण चान्द्रमासप्रतीतेर्न कुत्रापि विरोधः सम्भवतीति भावः। अधिमासनिपातेऽपीत्यादि न केवलं मलमासशून्यस्थले शयनादौ उत्कर्षनियमः। मलमासस्थलेऽपि एष एव शयनादौ उत्कर्षनियम एव। सत्यपि उत्कर्षनिमित्ते। तथाच यच्च यत्रैव —

"विष्णुः स्वपिति कर्कटे" इति।

"आगामिनि तदा वर्षे कुलीरे माधवः स्वपेदिति।"

"कर्किण्यर्के हरौ सुप्ते शक्रध्वजक्रियास्विने।

तुलायां बोधयेद्देवीं वृश्चिके तु जनार्दनम्॥"

इत्यादि विशेषवचनमात्रे, तत्रैव उत्कर्षनिमित्तता, नान्यत्रेति भावः।

† नियमद्वयाविरोधाच्चेति। माधवादिवृश्चिकाधिमासे, कर्कटादौ हरिशयनादिनियमस्य उत्तरवृश्चिकाधिमासे आगामिवर्षे कर्कटादौ हरिशयनादिनियमस्य चेति नियमद्वयस्य अविरोधाच्चेत्यर्थः।

धिमासे शयनोत्कर्षे मलिम्लुचशयनापत्तेरपेक्षितत्वात्, मलिम्लुचे शयनमापद्येत इति चेत् न, वचनाददोषत्वात्। सिंहकन्ययो-स्त्राधिमासे सति शयनोत्कर्षे मलिम्लुचशयनापत्तेः परिहृत-त्वाच्च,* "माधवाद्येषु षट्स्विति" "कृष्णपक्षे त्रयोदश्या"-

---

एतच्च—"तस्मिन् शुक्ले सदैत्यच" हेतुः।

कथं शयनोत्कर्षम्? शयनोत्कर्षे न सम्भवतीत्यर्थः। उत्कर्षप्राप्तिस्तु "शेते विष्णुः सदा-षाढ़े" इत्यादिवचनात्। तदेवोपपादयति मिथुने शयनस्य विहितत्वात्। तथाच सौर-वादिना "मिथुनस्थे सहस्रांशावित्यादि" विशेषवचनेन सौरघटितविधेः मेषद्वयान्यतरमल-मासे मिथुनगतचान्द्रमासस्य ज्यैष्ठत्वात् शयनादौ कल्पनीयतया उत्कर्षनिमित्तताप्रसक्तेरिति भावः। तस्य चामलिम्लुचत्वात् मेषद्वयेरन्यतरस्य मलमासत्वस्वीकारपक्षे तस्य मिथुनस्थ च मलमासाप्रसक्तेः। "पतिते चाधिमासके इति," "प्राप्ते आषाढ़मासे तु सिनीवाल्यैदृयं यदा। द्विराषाढ़ः स विज्ञेयः पतिते चाधिमासके॥" इति वचनादित्यर्थः। शक्रा-दीनां शक्रोत्थानादीनाम्। उत्कर्षमिति भाट्टे तद्विधानात् पतिते इत्यविशेषात् पतिते चाधिमासके इत्यविशेषात्। "माधवाद्येषु षट्स्वेकमासि दर्शद्वयं यदा। द्विराषाढ़ः स विज्ञेयः शेतेऽत्र श्रावणेऽच्युतः॥" इति वचनादित्यर्थः। तथाच माधवादिषण्मासमध्ये अधिमासपाते श्रावणे हरिशयनविधानात् श्रावणे हरिशयने च कर्किस्थर्के इति वचनात् आश्विने शक्रोत्थानविधानादेव उत्कर्षसम्भव इति भावः।

† दूषयति उत्तरत्रिकाधिमासे श्रावणत्रिकाधिमासे इत्यर्थः। शयनोत्कर्षापत्तेरिति माधवाद्येषु षट्स्वेक इति वचनस्य यथाश्रुतार्थमादायेति शेषः। तथाच श्रावणमलमासे आषाढ़स्य मिथुनगतत्वात् शयने उत्कर्षाप्रसक्तेरिति भावः। कर्कटाधिमासे शयनोत्कर्षे इत्यादि तथाच माधवादिषण्मासमध्ये अधिमासपाते माधवाद्येषु षट्स्वेक इति वचनस्य यथाश्रुतार्थमादाय माधवादिषण्मासमध्ये अधिमासपाते श्रावणे हरिशयनरूपोत्कर्षस्वीकारे विष्णुः स्वपिति कर्कटे इति वचनात् मलीयश्रावणे शयनापत्तेरपेक्षासम्भव इति भावः। वचनाददोषत्वादिति माधवाद्येषु षट्स्वेक इति वचने सामान्यतो माधवादिषण्मासे मलमासे

मित्यादिवचनानां सामान्येन कर्कटशयनमुपदिशतामव्दान्तरीय-कर्कटाभिप्रायेणाप्युपपत्तेः। न प्रथमवर्षीयकर्कटशयनविधाय-कत्वं वचनविरुद्धं युज्येत इति चेत् न। "मिथुनस्थे सहस्रांशौ" "अधिमासेऽपि पतित" इति अनयोर्विरोधस्य मेषवृषाधिमास-पातेऽप्यविशेषात्* एतन्निमित्तस्य शयनोत्कर्षस्याव्दान्तरेऽपि सम्भ-वात्. अत्रापि न विरोधो विशिष्यत इति† चेत् न, उत्तरत्रि-

---

कर्कटे हरिशयनविधानेन वाचनिकत्वात् मलमासे हरिशयनेऽपि दोषाभावादित्यर्थः। सिंहकन्ययोरित्यादि सिंहकन्ययोरन्यतरस्थ मलमासत्वे विष्णुः स्वपिति कर्कटे इति वचनात् शयनोत्कर्षेऽपि श्रावणस्य मलमासत्वाभावादेव मलमासशयनाप्रसक्तिरित्यर्थः।

* ननु उत्तरत्रिकाधिमासे हरिशयनोत्कर्षः सकलशिष्टाचारविरुद्धः कथं श्रावणादौ मलमासे शयनोत्कर्षः ब्रूषे इत्यत आह माधवाद्येषु षट्सु इति। "माधवाद्येषु षट्स्वेक-मासि दर्शनयं यदा। द्विराषाढः स विज्ञेयः विष्णुः स्वपिति कर्कटे॥" इति कृष्णपक्षे चयोदश्यामित्यादि। कृष्णपक्षे चयोदश्यां कर्कटं याति भास्करः। द्विराषाढः स विज्ञेयः कुलीरे माधवः स्वपेदित्यादिनानावचनानां कर्कटे शयनमुपदिशतामिति तु नानावचनानां विशेषणम् अव्दान्तरीयकर्कटाभिप्रायेणाप्युपपत्तेरिति। "कन्यासिंहकुलीरेषु यदा दर्शनयं भवेत्। आगामिनि तदा वर्षे कुलीरे माधवः स्वपेत्॥" इति वचनात् वचनविरुद्धम्। आगामिनि तदा वर्षे इति वचनविरुद्धम्। मिथुनस्थे सहस्रांशाविति "मिथुनस्थे सह-स्रांशौ स्नापयेन्मधुसूदनम्। तुलाराशिगते तस्मिन् पुनरुत्थापयेच्च तम्॥" इति एकं वचनम्। "अधिमासेऽपि पतिते एष एव विधिः स्मृतः। नान्यथा स्नापयेद्देवं न चैवोत्था-पयेद्धरिम्॥" इत्यपरम् इत्यनयोर्विरोधस्येति। तथाच अधिमासनिपातेऽपि मिथुने हरिशयनविधानात् मेषवृषयोरन्यतरमासे मलमासपातेऽपि अधिमासाविशेषात् मिथुने हरिशयनप्रसक्तिः सम्भवतीति भावः।

† ननु मेषवृषान्यतरमासमलमासपातेऽपि, यदि मिथुनहरिशयनं स्यात्, तदा—

"माधवाद्येषु षट्स्वेकमासि दर्शनयं यदा।
द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे॥" इति वचन-

काधिमासेऽप्यविशेषात्। कर्कटशयनविधेरानर्थक्यादवश्यं तद्बाध इति चेत् समानमितरत्रापि अन्यत्राभिनिवेशात्। अथोच्यते।

"प्रथमेऽह्नि द्वितीये वा शुक्ले मेषमियाद्रविः।
द्विराषाढ़ऋते विष्णुः परं कर्कटके स्वपेत्॥"

इति ऋष्यशृङ्गवचनं तस्य न्यायतया मेषपदमुपलक्षणीकृत्य वृषमिथुनसंक्रान्तिरपि यदि प्रथमद्वितीययोरङ्कोरित्यर्थः। प्रथमम्महः प्रतिपत्*। द्वितीयम्महः द्वितीया। तदा मेषे वृषे चाधि-

---

बोधितो माधवाद्यधिमासनिमित्तककर्कटहरिशयनरूपोत्कर्षः कथं सङ्गच्छते? इत्यत आह, एतन्निमित्तस्य शयनोत्कर्षस्य अब्दान्तरे सम्भवादिति। एतन्निमित्तस्य मेषवृषाद्यधिमासनिमित्तस्य अब्दान्तरे आगामिवर्षे, 'आगामिनि तदा वर्षे कुलीरे माधवः स्वपे'दित्येकवाक्यत्वात्। तथा च, 'अधिमासेऽपि पतिते एष एव विधिः स्मृतः' इति विशेषोक्त्या मेषवृषान्यतरमासाधिमासेऽपि तदब्द एव मिथुनहरिशयनस्यावश्यम्भावितया 'माधवाद्येषु षट्स्वेक' इति वचनबोधितस्य शयनोत्कर्षस्य अगत्या अब्दान्तरविषयत्वमिति भावः। एतच्च परत्र अषाढीत्यादौ हेतुः। तथाच कर्कटहरिशयनोत्कर्षस्य आगामिवर्षे चरितार्थत्वात्, अत्रापि मेषवृषान्यतरमासाधिमासेऽपि विरोधः। 'मिथुनस्थे सहस्रांशाविति' वचनबोधितमिथुनहरिशयनस्वीकारे कर्कटहरिशयनोत्कर्षेण सह यो विरोध इत्यर्थः, स न विशिष्यते न प्राप्यते इत्यर्थः।

* निषेधयति 'चेन्नेति'। उत्तरत्रिकाधिमासेऽप्यविशेषादिति विशेषाभावादित्यर्थः। तथाच यदि सामान्यत एव माधवादिमलमासे आगामिवर्षे कर्कटे हरिशयनोत्कर्षः स्वीक्रियते, तदा 'कन्यासिंहकुलीरेषु' इति विशेषवचनं व्यर्थं स्यादिति भावः। कर्कटशयनविधेः, 'अमावस्याद्यं यत्र' इत्यादिनानावचनबोधितकर्कटशयनोत्कर्षविधेरित्यर्थः। 'तद्बाधः' श्रावणादिमलमासे, 'मिथुनस्थे सहस्रांशा'विति वचनस्य विषयसम्भवेन माधवादिमलमासे मिथुनहरिशयनस्यावश्यं बाधः स्वीकर्त्तव्यः। 'समानमितरत्रापि अन्यत्राभिनिवेशा'दिति इतरत्रापि समानम्। तथाच, यथा कर्कटशयन-

मासपातात् कर्कटे शयनविधिः। अतएव मेषेऽधिमासे मिथुनसंक्रान्तिः षड़शीतिपदवाच्या चतुर्थ्याश्चतुर्थ्यूर्ध्वं वा भवति। तेन;—

"वृषं त्यक्त्वा चतुर्थ्यूर्ध्वं षड़शीतिः सिते यदा।
तदा दैवविदा चिन्त्यं द्विराषाढ़प्रकल्पनम्॥" *

कर्कटे शयनकल्पनमित्यर्थः तदेतदसङ्गतम्, उपलक्षणतानिमित्तस्य न्यायस्याभावात्। भवता चानुपन्यासात् उपलक्षणत्वानुपपत्तेः। तस्मात् प्रथमे द्वितीये वेति गताब्दिनेऽधिमासे तदा भवतीति तन्निमित्तं कर्कटशयनं ज्ञापयतीति। मेषपदस्य मुख्यानुरोधात् "वृषं त्यक्त्वा चतुर्थ्यूर्ध्वं" पञ्चम्यादिष्वित्यर्थः। तदपि गतवर्षास्वधिमासपात एवेति तदभिप्रायमूर्ध्वग्रहणञ्च पञ्चम्यादितिथिग्रहणार्थं, न च मेषवृषयोरधिमासे कदापि पञ्च-

---

विधेरानर्थक्यात् तद्बाधः, तथा तद्बाधात् कर्कटशयनविधेरानर्थक्यम् इति समानं तुल्यदोषकरमित्यर्थः। अन्यच एकत्रापि अभिनिवेशात् विनिगमनाभावादित्यर्थः। तुल्यन्यायतयेति मेषपदस्य वृषोपलक्षणबीजं तुल्यन्यायता च यथा मेषमलमासे कर्कटहरिशयनं, तथा वृषमलमासेऽपीति। द्विराषाढ़ऋते मलमासं विनापीत्यर्थः। 'प्रथमेऽह्नि' इत्यत्राहः पदश्रवणादाह, प्रथमद्वितीययोरक्लोरित्यर्थः। अह्नःपदस्य तिथिपरतामाह, प्रथमाहः प्रतिपदित्यादि।

* तदाचेति। यदा प्रतिपदि द्वितीयायां वा शुक्लायां मेषादिसंक्रान्तिसम्भवः तदैवेत्यर्थः। यत एव कर्कटे हरिशयनविधिरतएवेत्यर्थः। मेष इति वृषोपलक्षणार्थः। तथाच—'धनुर्मिथुनकन्यासु मीने च षड़शीतय' इति वचनात् शुक्लप्रतिपदि द्वितीयायां वा मेषवृषान्यतरसंक्रान्त्या अन्यतरमलमासे सति षड़शीतिपदवाच्या मिथुनसंक्रान्तिः, चतुर्थ्यां तदूर्ध्वपञ्चम्यां सम्भवतीत्यर्थः। द्विराषाढ़ः गौणद्विराषाढ़ इत्यर्थः। कर्कटे हरिशयनकल्पनमित्यर्थः। इति द्विराषाढ़निबन्धनकर्कटहरिशयनकल्पनमित्यर्थः।

म्यादिषु मिथुनसंक्रान्तिसभवः। भवति तु प्रतिपदूर्ङमिति तथैव वक्तुमुचितम्, अतश्चतुर्थ्यूर्ङमिति वदन्* गतोत्तरचिकाधिमासमेव दर्शयति। किञ्च मेषवृषाधिमासविषयत्वेन वचनद्वयवर्णने,† "द्विराषाढ़ऋते विष्णु"रित्यनुपपन्नं स्यात्। योग्लौकिन

---

* अथेत्यादि। कर्कटे हरिशयनकल्पनमित्यर्थः, इत्यन्तं यदुक्तं तदेतदसङ्गतम् अयौक्तिकमित्यर्थः। तुल्यन्यायसाभावात् तुल्यन्यायतया इत्यनेनोक्तस्य न्यायस्याप्रसक्तेरित्यर्थः। तथाच वचने 'द्विराषाढ़ऋते' मलमासं विना प्रथमे द्वितीये अङ्गि, शुक्ले शुक्लपक्षे, रविः यदि मेषं मेषराशिमियात् सञ्चरेत्, तदा विष्णुः कर्कटे सौरश्रावणे स्वपेदित्यन्वयो वाच्यः, सम्भवति च। अत्र यदि आदौ मलमासस्योपस्थितिर्भवेत्तदा, यथा,—मेषे वैशाखमलमासे कर्कटे हरिशयनं तत्तुल्यन्यायतया वृषे ज्यैष्ठमलमासेऽपि 'तथेति' तुल्यन्यायपदस्य सार्थक्यं भवेत्। स एव असिद्धः, मलमासस्य उल्लेखाभावात्। प्रत्युत 'द्विराषाढ़ऋते' इत्यनेन मलमासाभाव एवोपस्थितः। गताश्विने आश्विनान्ते पूर्व्वाब्दीयोत्तरचिकाधिमासे इत्यर्थः। तथाच पूर्व्वाब्दे उत्तरचिकाधिमासे सति तदुत्तरशुक्लप्रतिपदादौ रवेर्मेषगमनक्रमेण आषाढ़शुक्लपक्षस्य कर्कटे प्रवेशात् तत्रैव हरिशयनं निष्पद्यूर्ङमेवेति भावः। 'चतुर्थ्यूर्ङ'मिति वचनं 'वृषं त्यक्त्वा चतुर्थ्यूर्ङ'मिति वचनम्।

† गतोत्तरचिकाधिमासमेव दर्शयति गताब्दीयोत्तरचिकाधिमासमेव दर्शयति। तथाच पूर्व्वाब्दे उत्तरचिकाधिमासे सति तदुत्तरं मिथुनसंक्रान्तिः षड़शीतिपदवाच्या चतुर्थ्यूर्ङमेव सम्भवति। इदन्तु न सम्यक्, कदाचित्तिथेर्ह्रासतः सौरमासस्य च ज्यैष्ठमलमासेऽपि शुक्लपक्षस्यां मिथुनसंक्रान्तिः सम्भवितुमर्हति। तथाहि यत्र पूर्व्वामावास्यान्त्यक्षणप्राक्क्षणे च वृषसंक्रान्तिः, ततः सौरज्यैष्ठस्योनत्रिंशद्दिवसे चाहस्पर्शवशात् किञ्चिदमावास्या, ततः शुक्लप्रतिपत् रात्रिशेषे द्वितीया च, ततस्त्रिंशद्दिवसे द्वितीयारात्रौ तृतीयारम्भश्च, तत एकत्रिंशद्दिवसे तृतीया, रात्रौ चतुर्थ्यारम्भः, ततो द्वात्रिंशद्दिवसे पञ्चमीक्षणे षड़शीतिपदवाच्या मिथुनसंक्रान्तिश्च, अतो ज्यैष्ठमलमासे शुक्लपक्षस्यां मिथुनसंक्रान्तिर्नानुचितेति। वचनद्वयवर्णने, 'वृषं त्यक्त्वा चतुर्थ्यूर्ङमित्यस्य,' 'प्रथमेऽङ्गि द्वितीये च' इत्यस्य च वचनद्वयस्य वर्णने।

किल द्विराषाढ़ो व्याहृतः। एकः सौरो मिथुनराशिभोगात्मा मुख्य आषाढ़ः, द्वितीयस्तु कर्कटभोग्योऽप्याषाढ़ो देवशयनगुण-योगात्*। यद्वा कर्कटसंक्रान्तिचिह्नितश्चान्द्रो द्वितीयो मुख्य आषाढ़ इति द्विराषाढ़ः। स च यद्यपि प्रतिसंवत्सरं भवति, तथाप्यधिमासे सत्येव देवशयनार्थं गृह्यमाणो द्वितीयोऽसावाषाढ़ इति। एवञ्चेत् पञ्चद्वयेऽपि† द्विराषाढ़ं विनेति न स्यात् कर्कटे शयने तद्गुणयोगेन कर्कटस्याप्याषाढ़त्वात् कर्कटसंक्रान्ति-चिह्नितत्वे चान्द्र एव वा शयनमित्युभयथापि द्विराषाढ़त्वमेवेति तद्विनैवेति न स्यात्। अतएव "द्विराषाढ़प्रकल्पन"मित्येतदप्य-नुपपन्नं, तद्वत्सरेऽपि तद्रूपत्वादेव द्विराषाढ़स्य कल्पनाभावात्

---

* अनुपपन्नं स्यादिति। तथाच 'द्विराषाढ़ऋते' इत्यनेन प्रतीतौ मलमासाभावो न सङ्गच्छते इति भावः। कर्कटभोग्योऽपि कर्कटगतोऽपि। देवशयनगुणयोगादिति। तथाच—'मिथुनस्थे सहस्रांशौ स्थापयेन्मधुसूदन'मिति वचनेन योग्यौकमते मिथुनस्थ-रविस्थेन सौराषाढ़त्वेन सामान्यतो हरिशयनविधिः। मुख्यद्विराषाढ़स्थले तु—

"मिथुनस्थो यदा भानुरभावास्याद्दयं स्पृशेत्।
द्विराषाढ़ः स विज्ञेयो विष्णुः स्वपिति कर्कटे॥" इति विशेषविधि-महिम्ना कर्कटभोग्योऽपि मिथुनभोग्यत्वाभावेऽपि हरिशयनगुणयोगाद्गौण आषाढ़ इति भावः।

† हरिशयनादिगुणयोगाद्गौणताङ्गीकारे गौरवादाह यद्वेति। कर्कटसंक्रान्ति-चिह्नितः कर्कटसंक्रान्त्युत्तरकर्कटस्थरविगतश्चान्द्राषाढ़ः, द्वितीयः मुख्याषाढ़ः सौराषाढ़ः। द्वितीयः कर्कटगतश्चान्द्राषाढ़ः। एवञ्चेत् हरिशयनार्थं कर्कटगतचान्द्राषाढ़स्य ग्रहणञ्चेत् पञ्चद्वये हरिशयनगुणयोगयुक्त-कर्कटभोग्यगौणाषाढ़-कर्कटसंक्रान्तिचिह्नितचान्द्राषाढ़-रूप-पञ्चद्वये इत्यर्थः।

अधिमासं विनेति वचनार्थस्तस्मिन् सत्येव प्रथमे द्वितीये चेति व्यवस्थितत्वात् द्विराषाढ़पदस्य चानर्थत्वापत्तेः*। अस्मन्मते तु मिथुनाधिमासे मुख्यो द्विराषाढ़ः द्वयोरेव चान्द्रयोः मिथुनोपक्रान्तत्वात् तस्मृतेपि कर्कटे चान्द्राषाढ़े शयनम्। तेनैव कार्य्येण द्विराषाढ़कल्पनमिति सर्व्वमुपपन्नम्†। किञ्च—

"द्विराषाढ़ः स विज्ञेयो विष्णुः स्वपिति कर्कटे।"

---

* द्विराषाढं विना मलमासं विना न स्यादिति। द्वितीयमासे हरिशयनमिति शेषः। कर्कटस्याषाढ़त्वात् गौणाषाढ़त्वात्। चान्द्र एव वा कर्कटगतचान्द्राषाढ़ एव। उभयथापि पक्षद्वयस्वीकारेऽपि द्विराषाढ़प्रकल्पनमित्यनुपपन्नमिति। तथाच यदि भवन्मते 'हृषं त्यक्त्वा' इति वचनं मलमासाभिप्रायकं भवेत्, तदा—

"हृषं त्यक्त्वा चतुर्थ्यूर्द्धं षड़शीतिः सिते यदा।

तदा दैवविदा चिन्त्यं द्विराषाढ़प्रकल्पन"मिति प्रकल्पनपदं न सङ्गच्छते। ज्यैष्ठमलमासे द्विराषाढ़स्य वास्तविकत्वादिति भावः। प्रकल्पनाभावात् द्विराषाढ़स्य वास्तविकत्वेन प्रकल्पनासम्भवादित्यर्थः। अधिमासं विनेति वचनार्थः। 'द्विराषाढ़स्मृते' इत्यर्थस्येति शेषः। तस्मिन् वचनार्थे सत्येव प्रथमे प्रतिपदि, द्वितीये च द्वितीयायाञ्च, द्विराषाढ़पदस्य व्यवस्थापितत्वात्।

'प्रथमेऽह्नि द्वितीये च शुक्ले मेषमियाद्रविं'रित्यनेन मलमासव्यवस्थापनात्। अन्यार्थत्वापत्तेः अन्यार्थकल्पनापत्तेश्चेत्यर्थः।

† स्वमतमाह, अस्मन्मते तु द्वयोरेव चान्द्रयोः एकस्य मिथुनगतस्य मलीभूतस्य, द्वितीयस्य कर्कटगतस्य शुद्धस्य चान्द्राषाढ़स्य च। मिथुनोपक्रान्तत्वात् मिथुनस्थरव्यारब्धत्वात्। तस्मृतेऽपि तदब्दीयमलमासं विनापि पूर्व्वाब्दीयोत्तरर्त्तिकाधिमासपातेऽपि कर्कटे कर्कटगतचान्द्राषाढ़े द्विराषाढ़कल्पनं गौणद्विराषाढ़कल्पनं, 'हृषं त्यक्त्वा' इति वचने इति शेषः। सर्व्वमुपपन्नं द्विराषाढ़प्रकल्पनमिति 'द्विराषाढ़स्मृते' इति चोपपन्नम्।

इति द्विराषाढ़त्वं विष्णोः कर्कटस्थापनिमित्तमवगम्यते। कर्कट-शयने द्विराषाढ़त्वे विपरीतो हेतुसद्भावः स्यात्, तदा च प्रति-वचनं द्विराषाढ़कीर्त्तनं मुनीनामफलं स्यात्। अस्माभिस्तु मुख्यद्विराषाढ़ात् कर्कटे चान्द्राषाढ़प्राप्तेस्तच्च शयनम्। एवं मेष-वृषयोरप्यधिमासे तदनन्तरितकर्कटे चान्द्राषाढ़प्राप्तिः। उत्तर-त्रिके चाधिमासे तदादिवत्सरशेषे कर्कटे चान्द्राषाढ़प्राप्तिरिति तद्गुणयोगेन मिथुनेतराधिमासे गौणद्विराषाढ़स्तेन मुख्यस्य गौणस्य च कर्कटे चान्द्राषाढ़प्राप्तिमुखेन कर्कटशयनहेतुत्वात् तत्कीर्त्तनमुपयोगि, यस्मात् कर्कटे चान्द्राषाढ़प्राप्त्या द्विराषाढ़-स्तस्मात् विष्णुः कर्कटे स्वपितीत्यर्थः। किञ्च सिंहे चाधिमासपाते योग्लोकमतेऽपि मिथुन एव देवस्य सुप्तत्वात्।

"कर्किण्यर्के हरौ सुप्ते शक्रध्वजक्रियाखिने।"

इत्यस्याप्रवृत्तेरन्यस्य शक्रोत्सवरचनस्यादर्शनात् कथं तदुत्कर्षः। न च सिंहस्य मलिम्लुचत्वे सकलकर्म्मानर्हत्वादुत्कर्ष इति वाच्यम्। यतः—

"सूर्य्येण लङ्घितो मासश्चान्द्रः ख्यातो मलिम्लुचः।
तत्र यद्विहितं कर्म्म उत्तरे मासि कारयेत्॥"

इत्यादि वचनानाच्चान्द्रमासविहितस्य कर्म्मणः पूर्व्वचान्द्रमलिम्लुच-तयोत्तरचान्द्रे व्यवस्थितिपरत्वात्, तत्रेति पूर्व्वोक्तचान्द्रपरा-मर्शात्। सौरे तु विहितस्यानवगतचान्द्रसम्बन्धस्य सोऽपि विधा-तव्यो व्यवस्था चोत्तरत्र कर्त्तव्येति तद्विकल्पः स्यात्। तस्मा-त्तुलाधिमासे सुखरात्रिरिव उत्कर्षः सिंहाधिमासे शक्रस्य युक्तः

एवं कन्यायामधिमासे दुर्गायास्तुलाधिमासे च देवोत्थानस्य कथमुत्कर्षः। यद्येतानि नित्यानि तदा "नित्यनैमित्तिकं कुर्य्या"दिति वचनान्मलिम्लुचेऽपि कार्य्याणि काम्यानि चेत् "काम्या इष्टीर्विवर्जयेत्" इति लोप एव स्यात् न तूत्तर एतत्क्रियावचनाभावात्। अतएव स्वल्प एव ग्रन्थे योग्लौकिनोक्तं सिंहाधिमासेऽपि न शक्रक्रियानिवृत्तिः*नैमित्तिकत्वेन मलिम्लुचेऽपि तत्प्राप्तिरित्यादि एवञ्च ग्रन्थभेदेन शक्रस्यैवोत्कर्षाभिधानं परस्परविरुद्धत्वाभिधानमपि योग्लौकस्य यदपि—

"अधिमासनिपाते तु क्रमादिन्द्राम्बिकाहरीन्।
कन्यातुलाद्वश्चिकेषु नृप उत्थापयेद्ध्रुवम्॥" इति वचनं

तदपि तन्मते पूर्व्वत्रिकाधिमासे "कर्कटे शयने हृत्ते"

"कर्किण्यर्के हरौ सुप्ते शक्रध्वजक्रियाखिने"

---

* दीपान्तरमाह किञ्चेति। हिराषाढ़ः स विज्ञेय इति, मिथुनस्थो यदा भानुरमावास्याद्वयं स्पृशेत्। हिराषाढ़ः स विज्ञेयो विष्णुः स्वपिति कर्कटे इति, कर्कटशयने हिराषाढ़त्वे कर्कटशयनमाचार्थं हिराषाढ़त्वकल्पने हेतुहेतुमद्भावः कार्य्यकारणभावः। तदेव दर्शयति तदाच इत्यादि। तद्गुणयोगेन आषाढ़ाद्यवच्छिन्नौत्तरत्वविशिष्टकर्कटगतचान्द्राषाढ़त्वावच्छिन्नशक्रस्य कर्कटगतचान्द्राषाढ़त्वगुणयोगेनेत्यर्थः। सुखेन द्वारेण तदुत्कर्षः सिंहाधिमासे आश्विनशक्रध्वजोत्कर्षः। सौरे तु विहितस्य सौरवादिमते सौरमासविहितस्य अनवगतचान्द्रसम्बन्धस्य अप्राप्तचान्द्रसम्बन्धस्य सोऽपि उत्कर्षोऽपि। तद्विकल्पः स्यात् वचनं विनेति शेषः। एतानि देवशयनादीनि नैमित्तिकत्वेनेति नित्यनैमित्तिकं कुर्य्यात् प्रयतः सन् मलिम्लुचे इति वचनात्। लोप एव स्यादिति काम्यकर्म्मणां मलमासे लोप एव स्यादित्यर्थः। उत्तरत्र उत्तरमासे एतत्क्रिया एतेषां काम्यकर्म्मणां करणम्। न शक्रक्रियानिवृत्तिः न शक्रोत्थानकर्म्मलोपः।

इत्यनेन समानविषयम्। अन्यथैतद्वचनबलात् कर्कटेऽप्यधिमास-पाते शक्रोत्सवादीनामुत्कर्षं कुतो न भणसि? सिंहे चाधिमास-पाते दुर्गोत्सवादीनां कन्यायां वाधिमासे देवोत्थानोत्कर्षं कुतो न कुरुषे? न ह्येतद्वचनं सिंहाधिमासे शक्रस्यैव न दुर्गाया: कन्याधिमासे दुर्गाया एव न देवोत्थानस्य कर्कटाधिमासे न कस्यचिदुत्कर्ष इत्याह। अतोऽविशेषात् सर्व्वमेवोत्कर्षेत। न वा किञ्चिदपीति "कर्किण्यर्कें हरौ सुप्ते" इत्यनेन समानविषयत्व-मप्यस्य भवतैव वाच्यं मूलशुल्यन्तरकल्पनापत्तेश्च। किञ्च सिंहा-धिमासपाते शक्रोत्सवपार्श्वपरिवर्त्तनयो: कन्यायामुत्कर्षे प्रथम-मष्टम्यां दुर्गोत्सव:। तदनन्तरं द्वादश्यां शक्रोत्सवादिकमिति विपरीतक्रमापत्ति:। कन्यायामधिमासे दुर्गात: प्रागेव सप्तमी-पर्य्यन्ते सूर्य्यान्तानामुत्थानम्। ततो दुर्गायास्तदनन्तरं द्वादश्यां तुलायां विष्णूत्थानमिति सर्व्वत्र क्रमलोप: स्यात्*। स्वयमेव

---

* नैमित्तिकत्वेनेति नित्यनैमित्तिकं कुर्य्यात् प्रयत: सन् मलिम्लुचे इति वचनादिति शेष:। उत्कर्षानुत्कर्षाभिधानादिति तथाच चान्द्रवादिग्रन्थकारमते उत्कर्ष: सौरवादिग्रन्थ-कारमते अनुत्कर्ष इति भाव:। समानविषयं समानविषयत्वं अनयोरिति शेष: तथाच क्रमादिन्द्राग्निकाहरीन् कन्यातुलाद्वयस्थिकेषु उत्थापयेत् कर्किण्यर्कें इति वचनेनापि शक्रध्वज-क्रिया आश्विने तुलायां दैवीधीवनं द्वयस्थिके देवस्योत्थानं सुतरां समानविषयत्वमिति भाव:। अन्यथा समानविषयत्वास्वीकारे। एतद्वचनबलात् अधिमासनिपाते तु क्रमादिन्द्राग्निकाहरी-निति कन्यातुलाद्वयस्थिकेषु नृप उत्थापयेद्ध्रुवमिति वचनबलात् नह्येति एतद्वचनं नह्यि इत्याह इत्यन्वय:। सर्व्वं शक्रदुर्गादिकम्। न वा किञ्चिदपि न किमपीत्यर्थ:। अस्य अधिमास-निपाते तु इत्यादिवचनस्य भवतैव वाच्यम् अवश्यं वाच्यम्। विपरीतक्रमापत्तिरिति तथाच दुर्गोत्सवात् पूर्व्वं शक्रोत्सवपार्श्वपरिवर्त्तौ सर्व्वतन्त्रसिद्धाविति भाव:। दुर्गात: प्राक् दुर्गो-

योग्लौकिनोक्तं हरिशयनशक्रोत्सवपार्श्वपरिवर्त्तनदुर्गोत्थानविष्णूत्थानानां पौर्व्वापर्य्यनियतत्वात् इत्यन्तस्तदपि स्मृतं वचनावगतश्च क्रमः।

"शक्रध्वजोत्थापनञ्च विष्णोश्च परिवर्त्तनम्।
मासद्वयेन निर्दिष्टं शयनादाद्यकोविदैः।
दुर्गायाश्च त्रिभिर्मासैरधिमासं विनैव तु॥"

अनेन शक्रोत्थानात् परतो मासेन दुर्गोत्थानं दर्शितम्। तथा—

"अधिमासनिपाते तु क्रमादिन्द्राग्निकाहरीन्।
कन्यातुलाहस्थिकेषु नृप उत्थापयेद्ध्रुवम्॥"

इत्यत्रापि कन्यातुलयोः शक्रदुर्गयोरुत्थानप्रतिपादनात् शक्रान्मासेनैव दुर्गोत्थानमवगम्यते। तस्य बाधः। तथा—

"आश्विने पौर्णमास्यान्तु चरेज्जागरणं निशि।
कौमुदी सा समाख्याता कार्य्या लोकविभूतये॥"

अस्यार्थः। सौराश्विने भवन्मते विहितत्वात् कन्यायामधिमासपाते कथमुत्कर्षो वचनाभावात्। न च दुर्गोत्कर्षात् परभूतायाः कौमुद्या अपि तदादिन्यायादुत्कर्षोऽग्निमारुताद्वूर्द्धमनुयाजैश्चरन्तीतिवत्। यतो दुर्गोत्सवकौमुदीकन्यायाः पृथक्फलसम्बन्धेन भिन्नप्रयोगत्वात् क्रमापेक्षाविरहात् अन्योन्यक्रमकल्पनानुपपत्तेः। अतएव काम्यासु नानेष्टिष्वङ्गवत् क्रतू-

---

त्वात् पूर्व्वं सूर्य्योत्थानम् इति सप्तमी भास्करस्योक्ता इति वचनात् तदनन्तरं सूर्य्योत्थानानन्तरं दुर्गाया उत्सव इति शेषः। क्रमलोपः स्यात् पूर्व्वापर्य्यक्रमलोपः स्यादित्यर्थः।

नामानुपूर्व्या*मिति क्रमकल्पनामाशङ्क्य न वाऽसम्बन्धादिति सूत्रेण जैमिनिना निराकृतम्। तथापि यदि स्यादिति भणसि

---

* शक्रीत्यानादीनां क्रमनियतत्वं वचनेनाऽपि साधयति शक्रध्वजस्थापनश्चेत्यादि। अत्र मासद्वयेन त्रिभिर्मासैरित्यादुपादानात् पौर्वापर्यक्रमनियतत्वं स्पष्टमवगम्यते। विहितत्वात् कौमुद्या विहितत्वात् कथमिति तथाच वचनाभावात् विशेषवचनाभावात् कथम् उत्कर्षः शुद्धाश्विनकर्त्तव्यता इति भावः। दुर्गोत्कर्षात् आश्विनमलमासे शुद्धाश्विनकर्त्तव्यतारूपदुर्गोत्सवोत्कर्षात्। परभूतायां दुर्गोत्सवात् परभूतायां कौमुद्यां कोजागरपूर्णिमायां तदादित्यायात् स आदिर्यस्य तदादिः स एव न्यायः तदादित्यायः तस्मात्। अग्निमारुतादूर्द्धमनुयाजैश्चरन्तीतिवदिति सीमांसादर्शनस्य चतुर्थाध्यायीयद्वतीयपादे। अनुयाजादीनामग्निमारुतीर्द्धकालताधिकरणं निर्णीतम्। अनुत्पत्तौ तु कालः स्यात् प्रयोजनेन सम्बन्धात् (३६)। ज्योतिष्टोमे श्रूयते अग्निमारुतादूर्द्धम् अनुयाजैश्चरन्ति। प्रहृत्य परिधीन् जुहोति हारियोजनम् इति। तत्र सन्देहः किम् अङ्गं विधीयते उत कालः इति। अङ्गविधाने श्रुतिः, कालविधाने लक्षणा, तस्मादङ्गविधानमिति प्राप्ते ब्रूमः अनुत्पत्तिवाक्ये कालः स्यात् अग्निमारुतं सोमाङ्गम् अनुयाजाः पशवङ्गं, तत्र न तयोः परस्परेण सम्बन्धः। तथा परिधयः पशवङ्गं हारियोजनम् अन्यदेवप्रधानम्। अनुयाजः आग्निमारुतश्च प्राप्तम्, आनन्तर्यमेव तयोर्न प्राप्तं तत् विधीयते। तथा हारियोजनस्य परिधिप्रहरणस्य च। एवञ्च सति न हारियोजनस्य परिधिप्रहरणेन कश्चित् उपकारः क्रियते हारियोजने न वा परिधिप्रहरणस्य। ननु परिधिप्रहरणस्य उपरिष्टाद्भावेन तस्य उपक्रियेत इति। उच्यते न हि उपरिभावार्थं परिधिप्रहरणम् अनुष्ठेयं विद्यते एव एतत्पश्वर्थं तस्मिंश्च सति तस्य उपरिभावो विद्यते एव इति तस्मात् कालार्थः सम्बन्ध इति। ४। ३। १५ अं। ३६ स्त्री.। पृ. ५०९। पृथक्फलसम्बन्धेन विभिन्नफलतया तयोः विभिन्नफलकामाधिकारिणा क्रियमाणत्वेन। भिन्नप्रयोगत्वात् अपूर्वभेदेन पृथङ्नियोज्यानुष्ठेयत्वात्। अन्योन्यक्रमकल्पनानुपपत्तेः परस्परक्रमाभिधानानुपपत्तेः। यत एव पृथक्फलसम्बन्धेन भिन्नप्रयोगत्वेन क्रमकल्पना अतएवेत्यर्थः काम्यासु नानेष्टिषु अङ्गवदिति क्रतूनां सोमरससाध्ययज्ञविशेषाणाम् आनुपूर्व्यं पूर्वमनुक्रम्य इत्यर्थः।

तदा सिंहाधिमासे शक्रोत्कर्षाद्दुर्गोत्थानोत्कर्षं कुतो न भणसि? कन्याधिमासे दुर्गोत्कर्षाद्देवोत्थानोत्कर्षं कथं न स्वीकुरुषे? कुतः प्रतीतक्रमबाधः?* किञ्च,—

"प्रतिपद्दनदस्योक्ता पवित्रारोहणे तिथिः।
श्रिया देव्या द्वितीया तु तिथीनामुत्तमा स्मृता॥
तृतीया तु भवान्याश्च चतुर्थी तत्सुतस्य च।
पञ्चमी सोमराजस्य षष्ठी प्रोक्ता गुहस्य च॥
सप्तमी भास्करस्योक्ता दुर्गायाश्चाष्टमी मता।
मातृणान्नवमी प्रोक्ता दशमी वासुकेः स्मृता॥
एकादशी ऋषीणान्तु द्वादशी चक्रपाणिनः।
त्रयोदशी त्वनङ्गस्य शिवस्योक्ता चतुर्दशी।
मम चैव मुनिश्रेष्ठ पौर्णमासी तिथिः स्मृता॥"

एतैर्वचनैः पवित्रारोहणे यास्तिथयस्तत्तद्देवसम्बन्ध्योऽवगतास्तासु शयनादि।

"यस्य यस्य तु देवस्य यच्चत्वं तिथिश्च याः।
तस्य देवस्य तस्मिंस्तु शयनावर्त्तनादिकम्॥"

---

* क्रमकल्पनाम् आशङ्क्य निषेधयति नवेति। निषेधकल्पने हेतुं दर्शयति असम्बन्धादिति सूत्रेणेति। तथाच जैमिनिसूत्रं पञ्चमाध्यायस्य प्रथमपादीयसूत्रं यथा,—'असम्बन्धात्तु नोत्कर्षेत'। ३२। अत्र भाष्यम्। न अग्निहोत्रस्य सान्नपनीया अङ्गं न सान्नपनीयाया वा अग्निहोत्रम्। तेन नासावग्निहोत्रस्य परस्तात् कर्त्तव्या। अतो न अग्निहोत्रं उत्कृष्टव्यम्। तथाच पृथक्फलसम्बन्धे क्रमनियमो नास्तीति सूत्रस्य तात्पर्य्यम्। प्रतीतक्रमबाध इति, तथाच शक्रोत्थानेन दुर्गोत्थानमवगम्यते इत्यनेन यः प्रतीतक्रमः तस्य बाध इति भावः।

पद्मपुराणवचनेन नियमाच्चान्द्रसौरयोरन्यतरस्यापि मासविशेष-स्येतरदेवशयनाद्यर्थमनिर्देशान्मासविशेषापेक्षायां "स्नापयेन्मधु-सूदन"मित्यादिषु मधुसूदनादिपदमुपलक्षणीकृत्य देवमात्रस्य शयनादौ मिथुनादिमासविधिर्वाच्यः*। उत्कर्षेऽप्येवं ततश्च मेषवृषयोरधिमासे विष्णुशयनस्योत्कर्षादन्येषामपि कर्कटे शयनं वाच्यं तदा चतुर्थीपञ्चम्योरन्यतरतिथौ प्रथमं वृश्चिके द्वादश्यादि-लाभात्(१) विष्णुप्रभृतीनामुत्थानं वृश्चिकशेषपक्षे च सूर्य्यान्ता-मुत्थानमिति देवशयनपक्ष उत्थानपक्ष इत्यादिषु प्रसिद्धिरपि यथोक्तयुक्त्या बाध्यते। तस्मात् सर्व्वमाकुलितं कालज्ञमन्येन। किञ्च प्रतिवचनं मुनीनां हिराषाढ़पदप्रयोगोऽपि शयनादौ चान्द्र-परिग्रहान्न एव प्रयोजनान्तरानुपलम्भात्† सौराषाढ़स्य चानाद्दत्त-

(१) तदाच चतुर्थीपञ्चम्योरन्यतरतिथौ कर्कटसंक्रान्तौ कर्कटसंक्रान्तिः षष्ठीसप्तम्यो-रन्यतरचेति पाठ आदर्शद्वये दृश्यते वस्तुतस्तु तदा च चतुर्थीपञ्चम्योरन्यतरतिथौ मिथुन-संक्रान्तौ कर्कटसंक्रान्तिः षष्ठीसप्तम्योरन्यतरचेति पाठो युक्तः निरुक्तपाठद्वयं भ्रमादिकम्।

* धनदस्य कुबेरस्य। श्रियाः लक्ष्म्याः। तृतीया तु भवान्यास्येति तृतीयायां यजे-द्देवीं शङ्करेण समन्वितामित्यादि। तासु तिथिषु। तस्मिन् नक्षत्रे तिथौ च। इतरदेव-शयनाद्यर्थं धनदादिदेवशयनाद्यर्थम्। अनिर्देशात् मासविशेषस्य निर्देशाभावात्। मास-विशेषापेक्षायां धनदादीनां शयनादिकं कदा कर्त्तव्यमिति मासविशेषाकाङ्क्षायाम्। स्नापयेन्मधुसूदनमित्यादिषु मिथुनस्थे सहस्रांशौ स्नापयेन्मधुसूदनमित्यादिषु। देवमात्रस्य धनदादिदेवमात्रस्य।

† उत्कर्षेऽप्येवमिति मधुसूदनपदमुपलक्षणीकृत्य अन्येषामपि देवानां शयनादि-कल्पनम्। उत्कर्षस्थलं दर्शयति ततश्चेति। तदा चतुर्थीपञ्चम्योरन्यतरतिथौ प्रथमं वृश्चिके द्वादश्यादिलाभात् विष्णुप्रभृतीनामुत्थानमिति एकस्मिन् आदर्शपुस्तके पाठो दृश्यते। एतत्-

त्वात् हेतुमन्निगदोऽयं(१) यस्माद्धिराषाढ्यत्त आषाढस्तस्मात् पूर्वो मलिम्लुचः। पूर्वमलिम्लुचत्वमन्तरेणाभावात्। तेन कर्कटस्य चान्द्राषाढस्य प्रशस्तत्वात्तत्रैव देवशयनमिति वाच्यम्। "विष्णुः स्वपिति कर्कट" इति कर्कटपदेन मुनयो निर्दिशन्ति। न हि "द्विराषाढः स विज्ञेयो विष्णुः स्वपित्या"षाढ इत्युक्तेः कर्कटगत-चान्द्राषाढावगतिर्भवतीति कर्कट इत्युक्तं सुव्यक्तीकरणाय तेनाय-

(१) हेतुमन्निगद इति लिपिकरप्रमादपाठः वस्तुतो हेतुवन्निगद इत्येव पाठः साधुः।

पाठस्वीकारे अन्यतरतिथौ इत्यंशस्य कुत्रापि अन्वयो न भवितुमर्हति। अपरादर्शद्वये तु तदाच चतुर्थीपञ्चम्योरन्यतरतिथौ कर्कटसंक्रान्तौ कर्कटसंक्रान्तिः षष्ठीसप्तम्योरन्यतरत्रेति प्रतिपदादितिथिषु विहितं धनदादीनां शयनं कर्कटशेषपक्षे स्यात्। तदा शुक्लाष्टमी-मतिक्रम्य हस्तिकसंक्रान्तौ प्रथमं हस्तिके द्वादश्यादिलाभात् विष्णुप्रभृतीनामुत्थानमिति पाठो दृश्यते। अत्रापि चतुर्थीपञ्चम्योरन्यतरतिथौ कर्कटसंक्रान्तौ कर्कटसंक्रान्तिः षष्ठीसप्तम्यो-रन्यत्रेति इत्यन्वयो नोपपद्यते अतोऽन्यतरतिथौ मिथुनसंक्रान्तौ कर्कटसंक्रान्तिः षष्ठी-सप्तम्योरन्यतरत्रेति इत्येव पाठः साधुः निरुक्तपाठस्तु प्रामादिकः। धनदादीनां कुबेरादीनां कर्कटशेषपक्षे कर्कटगतदेवशयनपक्षोत्तरपक्षे प्रतिपद् धनदस्योक्ता इत्यादिवचनादिति शेषः। तदा शुक्लाष्टमीमतिक्रम्येति शुक्लनवम्यादावित्यर्थः। हस्तिकसंक्रान्तौ सत्याम्। हस्तिके सौरमार्गे। द्वादश्यादिलाभात् रेवतीनक्षत्रयुक्तद्वादश्यादिवाप्तौ तत्रैव देवोत्थानं तदसम्भवे दिवाव्यवधानेन द्वादशीभिन्नैकादश्यादिपौर्णमास्यन्ततिथिषु रेवतीशेषपादयोगेनोत्थानम्। हस्तिकशेषपक्षे च सूर्य्यान्यानामुत्थानमिति प्रसिद्धिरपि बाध्यते अप्रसिद्ध एवेत्यर्थः। तथाच सौरे कदाचितिथेरप्राप्त्या शेते विष्णुः सदाषाढे इति प्रसिद्धिबाधः सुघट एवेति भावः। कालज्ञमन्येन कालं जानाति कालज्ञं मन्यते इति कालज्ञमन्येन। सर्व्वमाकुलितं नावधारितम्। प्रतिवचनं वचनं वचनं प्रति प्रतिवचनम्। शयनादौ चान्द्रपरिग्रहार्थमेव चान्द्राषाढादौ शयनादिविधानार्थमेव। प्रयोजनान्तरानुपलम्भात् अन्यत् प्रयोजनं प्रयो-जनान्तरं तदनुपलम्भात् अदर्शनात्।

मस्यार्थः। कर्कटे योऽयमाषाढश्चान्द्रस्तत्र विष्णुः स्वपिति कन्यातुलावृश्चिकेष्वित्येवमादिष्वपीत्यमेव योजना कार्या। अत्र कर्कटादिभिरमलिम्लुचानामाषाढादीनामुपलक्षितत्वात् मिथुनादिष्वपि तन्मासीयैकदेशतिथिषु शयनादिकमविरुद्धमेवं न कल्पनागौरवं न व्यतिक्रमो* न च देवशयनादिपक्षप्रसिद्धिबाधः।

---

* सौराषाढस्य चानाद्यत्वादिति तथाच सौरमासस्य रव्येकराश्यभोगात्मकक्रान्तितया द्विरासम्भवात् द्विराषाढत्वं न सम्भवतीति भावः। हेतुवन्निगदोऽयमिति हेतुवन्निगद्यते इति हेतुवन्निगदः। तदधिकरणन्तु प्रमाणलक्षणे यथा शूर्पेण जुहोति तेन स्रुवं क्रियते इत्यादि। भट्टवार्त्तिकेऽपि हेतुवन्निगदन्ति हि शब्दादिभिर्न तु परमार्थहेतव इत्युक्तम्। अत्र यन्मतुब्लिखितं तत्प्रमादकृतमिति मलमासतत्त्वे रघुनन्दन आह स्म। तदुपपादयति यस्मादित्यादि। तेन कर्कटस्य चान्द्राषाढस्य कर्कटगतस्य चान्द्राषाढस्य प्रथमत्वात् पूर्वो मलिम्लुचो ज्ञेयो द्वितीयश्चोत्तमः शुद्ध इत्यनेनोत्तमत्वेन शुद्धत्वाभिधानात्। कार्कटपदेन सूनयो निर्दिशन्ति कर्कटगतचान्द्राषाढमिति शेषः। आषाढ इत्युक्तेः इति द्विराषाढपदेन आषाढ इत्युक्तेऽपि। कर्कटगतचान्द्राषाढावगतिर्न भवतीति नहि इत्यनेन सम्बन्धः तथाच 'द्विराषाढः स विज्ञेयः' इत्यनेन आषाढावगतिमात्रं नहि कर्कटगताषाढावगतिर्भवति इति हेतोः कर्कट इत्युक्तम्। सुव्यक्तीकरणाय कर्कटगतचान्द्राषाढव्यक्तीकरणाय। अयं वक्ष्यमाणो अर्थः कर्कटे योऽयमाषाढः चान्द्रः कर्कटगतो योऽयं चान्द्राषाढस्तत्र विष्णुः स्वपिति। इत्यमेव योजना कार्या चान्द्रमासे योजना कार्या। तथाच कन्यागतचान्द्रभाद्रे शुक्लोत्थानं तुलागतचान्द्राश्विने दुर्गोत्सवः वृश्चिकगतचान्द्रकार्त्तिके हरेरुत्थानञ्च। अत्र कर्कटादिभिः विष्णुः स्वपिति कर्कटे इत्यादिकर्कटादिपदैः। अमलिम्लुचानां शुद्धानाम् आषाढादीनामुपलक्षितत्वात् बोधितत्वात्। मिथुनादिष्वपि तन्मासीयैकदेशतिथिषु मिथुनस्थे सहस्रांशाविति आदिवचनबोधितमिथुनादिष्वपि तच्चान्द्रमासीयशुक्लादिरूपसप्तम्यादितिथिषु इत्यर्थः। न व्यतिक्रम इति तथाच शयनादेः सौरघटितत्वे कदाचित्तत्तिथेरप्राप्तौ व्यतिक्रमो भवतीति भावः।

तत्र सङ्गृहश्लोकाः आषाढादिपदानां यद्यपि रविमासमात्रवचनत्वं चान्द्रेषु गौणत्वं सौरो न तथापि शयनादौ गौणस्य हि सौम्यस्य ग्रहणे सति मूलकल्पना लघ्वी सौरे पुनरतिगुर्व्वी श्रेयान् गौणस्ततो मुख्यात्। सौरे शयनादिविधौ कल्प्या विधयो भवन्ति पञ्चदश। चान्द्रमतादप्यधिका इति शयनादौ न सौरः स्यात्। धनदादीनां प्रतिपत्प्रभृतिषु नियतक्रमं हि शयनादि। सौरे तद्बाधः स्यात्। प्रसिद्धिबाधश्च पक्षस्य। चान्द्रे शयनाद्यर्थं सुरपतिदुर्गोत्सवार्थमिति पञ्च श्रुतयः सौरसमाना नापरमेकं किमप्यधिकम्*। चान्द्रे न क्रमबाधः। प्रसिद्धिबाधो न

---

* न च देवशयनादिपक्षप्रसिद्धिबाध इति तथाच चान्द्राषाढादौ सर्व्वदैव शयनादितिथेः प्राप्तिसम्भवात् सौर इव कदाचिदप्यप्राप्तिशङ्काविरहात् शेते विष्णुः सदाषाढ़े इत्यादेः प्रसिद्धिबाधो न घटते इति भावः। सूर्य्योत्थानासुत्थानमिति देवशयनपक्ष उत्थानपक्ष इत्यादिषु प्रसिद्धिरपि यथोक्तयुक्त्या बाध्यते इति प्रागुक्तम् इदानीन्तु चान्द्रपक्षे न च देवशयनादिप्रसिद्धिबाध इत्युक्तम्। रविमासमात्रवचनत्वं सौरमासमात्रवाचकत्वम्। सौरे न इति पाठेः सौरे न गौणत्वं सौरो न इति पाठे तु सौरो न गौण इत्यर्थः। गौणस्य हि सौम्यस्य ग्रहणे गौणस्य हि सौम्यस्य सोमसम्बन्धिनः चान्द्रस्य ग्रहणे सति। सौरे पुनरतिगुर्व्वीति पञ्चदशश्रुतिकल्पनापत्तेरित्युक्तं प्राक् पश्चादपि। चान्द्रमतादप्यधिका इति शयनादौ न सौरः स्यादिति चान्द्रे शयनादिविधिकल्पनादपि अधिका श्रुतिकल्पना सौरे इति शेषः। इति हेतौ अस्मात् कारणात् शयनादौ न सौरः कल्पनीयः स्यादित्यर्थः। धनदादीनां कुबेरादीनाम्। प्रतिपत्प्रभृतिषु तिथिषु नियतक्रमं हि शयनादि हि यतः शयनादि नियतक्रमं चान्द्रमासे शयनादिविधौ सर्व्वदा तिथिप्राप्त्या क्रमबाधो नास्तीति भावः। सौरे तद्बाधः स्यात् तथाच सौरे मिथुनादौ शयनादिविधौ कदाचित्तिथेरप्राप्तौ क्रमबाधः स्यात्। क्रमस्तु मैथनशुक्लाषाढ़ादश्यां शयनं ततः श्रवणशुक्लभाद्रदश्यां पार्श्वपरिवर्त्तनं ततः रेवतीनक्षत्रयुक्तकार्त्तिकादश्याम् उत्थानञ्च। सौरविधौ तु

देवपचस्य इत्यविरोधाच्चान्द्रो गौणोऽपि हि मुख्यतो बलवान्। ये पुनरुभयं वाचं ब्रूते चान्द्रोऽथ केवलस्तेषाम् सुतरां सौम्यग्रहणं मुख्यत्वात् कल्पनाल्पत्वात्। तदयमर्थः सम्पद्यते यस्मिन्मासेऽधिमासस्तत्प्रभृत्येवोत्तरसौरेषु पूर्व्वपूर्व्वचान्द्रप्राप्तेस्तत्रैव चान्द्रमासविहितानि कार्य्याणि,* तेन पूर्व्वत्रिकाधिमासे शयना-

---

मिथुनादित्ये मैत्रनक्षत्रयुक्तशुक्लद्वादश्यां शयनं ततः सिंहादित्ये श्रवणनक्षत्रयुक्तशुक्लद्वादश्यां पार्श्वपरिवर्त्तनम् ततः तुलादित्ये रेवतीनक्षत्रयुक्तशुक्लद्वादश्याम् उत्थानञ्च। अत्र यदि रविगतिवशात् न्यूनदिने सौरमाससमाप्तौ कदाचित् शुक्लद्वादशी न लभ्यते तदा शयनादेरभावात् क्रमबाधः स्यात्। क्रमबाधादेव कदाचिच्छयनादेरभावात् पचस्य देवपचस्य प्रसिद्धिबाधः सुतरामेव यथाक्रमेण शयनादेरभावे कुत्रापि देवपचस्य प्रसिद्धिर्न भवितुमर्हति। चान्द्रे शयनार्थं शयनपार्श्वपरिवर्त्तनोत्थानार्थमिति चितयार्थम्। सुरपतिदुर्गोत्सवार्थं शक्रोत्थानदुर्गापूजाहयार्थमिति पञ्च श्रुतयः सौरसमानाः इति चान्द्रे यथा पञ्च श्रुतयः सौरेऽपि तथा इत्यर्थः। नापरमेकं किमप्यधिकमिति तथाच शयनपार्श्वपरिवर्त्तनोत्थानेषु शक्रोत्थानदुर्गोत्सवयोश्च चान्द्रेण सौरेण वा विधिकल्पने समानाः पञ्चैव विधयो भवन्ति नापरं किमप्यधिकं न्यूनं वेति भावः।

* चान्द्रे न क्रमबाध इत्यादि तथाच चान्द्रस्य त्रिंशत्तिथिघटितत्वेन सर्व्वदैव शयनादौ तिथिसम्भवात् क्रमबाधो न घटते क्रमबाधाभावादेव प्रसिद्धिबाधोऽपि नास्तीति भावः। ये पुनरुभयं वाचं ब्रुवते सौरशक्यत्वचान्द्रशक्यत्वमित्युभयं ब्रुवते मासादिपदस्येति शेषः। चान्द्रोऽथ केवल इति अथवा केवलचान्द्रशक्यत्वं ब्रुवते इति पूर्व्वेणानुषङ्गः। तेषां मते सौम्यग्रहणं चान्द्रशक्तिवादिनां मते इति शेषः। कल्पनाल्पत्वात् मासपदस्य चान्द्रे शक्तिकल्पनायां लघुत्वात्। तदयमर्थः अयं वक्ष्यमाणोऽर्थः। तत्प्रभृत्येव मलमासप्रभृत्येव उत्तरसौरेषु तन्मलमासोत्तरसौरमासेषु। पूर्व्वपूर्व्वचान्द्रप्राप्तेरिति तथाच यत्र आषाढे मलमासस्तदुत्तरसौरेषु मलीयाषाढोत्तरकर्कटे चान्द्रशुद्धाषाढस्य गतत्वात्। तत्रैव कर्कटगतशुद्धाषाढ एव चान्द्रमासविहितानि हरिशयनादीनि कार्य्याणि कर्त्तव्यानीत्यर्थः।

त्थानान्तं कर्कटादिवृश्चिकान्तेषु कार्य्यमुत्तरवृश्चिकाधिमासे तु शयनं मिथुन एव अधिमासाग्रभूत्युत्कर्षः यत्पुनरमोघास्त्रबुद्ध्या तेन पूर्ववृश्चिकाधिमासे—

"अमावास्यां तुलादित्ये लक्ष्मीर्निद्रां विमुञ्चति।
तस्मिन् शुक्ले सदा विष्णुस्तुलायामथ वृश्चिके॥
शुक्लपक्षे यदा भानुस्तुलां समधिरोहति।
उत्तिष्ठत्यथतो विष्णुः पश्चात् कृष्णचतुर्दशी॥"

तदपि स्वविरोधिप्रथमवचनेन लक्ष्मीप्रबोधार्थममावास्यानन्तरित-शुक्लपक्षे तुलां गते रवौ वृश्चिकगते वा विष्णुर्निद्रां सदैव विमुञ्चतीति नियमात् कथं सदापदार्थस्य बाधः नियमे सति सदापदार्थोपपत्तिः न च शुक्लपक्ष इत्यस्य तर्हि का गतिरिति वाच्यं कृष्णपक्षचतुर्दश्युत्कर्षविधानार्थत्वादवचनस्य न ह्येतद्वचनं देवोत्थानपरभावितां सुखरात्रेराचष्टे। येन विरोधः स्यात्। अतो विभिन्नविषयत्वान्नोत्सर्गापवादन्यायः* प्राथमिकस्य सुखरात्रिदेवोत्थानयोः

---

* तदेव स्पष्टयति तेनेत्यादि। पूर्ववृश्चिकाधिमासे वैशाखाद्याषाढपर्य्यन्ताधिमासे। कर्कटादिवृश्चिकान्तेषु कर्कटे हरिशयनं कन्यायां पार्श्वपरिवर्त्तनं वृश्चिके उत्थानञ्च। उत्तरवृश्चिकाधिमासे तु श्रावणाद्याश्विनपर्य्यन्ताधिमासेषु हरिशयनं मिथुन एवेति श्रावणादिमलमासे मिथुन एव चान्द्राषाढसमापनादिति भावः। अधिमासाग्रभूत्युत्कर्षः मलमासोत्तरक्रियमाणपार्श्वपरिवर्त्तनादीनाम् उत्कर्ष एव चान्द्रभाद्रादौ विधानात्। अमोघास्त्रबुद्ध्या अव्यर्थयुक्त्या तेन यौल्लौकेन पूर्ववृश्चिकाधिमासे वैशाखादिवृश्चिकमलमासे। तस्मिन् शुक्ले लक्ष्मीप्रबोधाधिकरणीभूतामावास्यायां अव्यवहितोत्तरशुक्लपक्षे। स्वविरोधिप्रथमवचनेन शुक्लपक्षे यदा भानुरित्यादुत्तरवचनविरोधिना प्रथमवचनेन अमावास्यां तुलादित्ये इत्यादि-

पौर्व्वापर्य्यनियमप्रतिपादकत्वात्। द्वितीयस्य च विष्णूत्थानाच्चतुर्दश्यां नैमित्तिकपरभावप्रतिपादकत्वाद्बाधकाभावात्। अतो विल्वफलं वर्त्तुलं वंशो दीर्घतर इत्येतत्समानो विरोधः। न च क्षणचतुर्दश्युत्कर्षात् सुखरात्रेरप्युत्कर्षो नियतक्रमत्वादेतयोरिति वाच्यं; शास्त्रेण क्रमनियमाभावात्। आर्थस्त्वसौ स च 'तस्मिन् शुक्ले सदा विष्णुरिति' वचनेन सुखरात्रिपरभूतशुक्लपक्षे देवोत्थानस्य नियमाद्बाध्यः। बाधं विना तावदस्य वर्णनमशक्यम्*।

---

प्रथमवचनेन। तुलां गते रवौ सौरकार्त्तिके ह्यश्विकगते रवौ सौरमार्गे। तर्हीति सदापदार्थस्य सार्थक्याय लक्ष्मीप्रबोधानन्तरितशुक्लपक्षस्य विष्णूत्थाननियमपरत्वे शुक्लपक्ष इत्यस्य शुक्लपक्षे यदा भानुरिति वचनबोधितस्य हरेरुत्थानानन्तरं लक्ष्मीप्रबोधकथनस्य का गतिः कुत्र सार्थक्यम्। वचनस्य 'शुक्लपक्षे यदा भानुरिति' वचनस्य; एतद्वचनं 'शुक्लपक्षे यदा भानुरिति' वचनम्। देवोत्थानपरभावितां हरेरुत्थानानन्तरभावितां। तथाच एतद्वचनं सुखरात्रेः हरेरुत्थानानन्तरभावितां नाचष्टे न कथयतीत्यर्थः। विभिन्नविषयत्वात् अमावास्या तुलादित्ये इत्यादिप्रथमवचनेन लक्ष्मीप्रबोधानन्तरशुक्लपक्षे विष्णुप्रबोधस्योक्तत्वेन शुक्लपक्षे यदा भानुरिति' द्वितीयवचनेन क्षणचतुर्दश्या विष्णुप्रबोधानन्तरभावित्वकथनेन च विभिन्नविषयत्वात्। नोत्सर्गापवादन्यायः तथाच एकविषय एव सामान्यविशेषन्यायावसरः यथा निराहारपदमुपवासपरम्।

* प्राथमिकस्य अमावास्यां तुलादित्ये इति प्रथमवचनस्य। सुखरात्रिदेवोत्थानयोः लक्ष्मीप्रबोधतदुत्तरं शुक्लपक्षनियतविष्णूत्थानञ्च तयोः पौर्व्वापर्य्यनियमप्रतिपादकत्वादित्यस्य प्राथमिकस्य इत्यनेन सम्बन्धः। द्वितीयस्य शुक्लपक्षे यदा भानुरित्यादि द्वितीयवचनस्य च विष्णूत्थानात् चतुर्दश्यां नैमित्तिकपरभावप्रतिपादकत्वादिति उत्तिष्ठत्यग्रतो विष्णः पश्चात् क्षणचतुर्दशीत्यनेन विष्णूत्थानादूर्द्धं चतुर्दश्यां क्षणचतुर्दश्याम्। नैमित्तिकपरभावप्रतिपादकत्वात् नैमित्तिक उत्तिष्ठत्यग्रतो विष्णः पश्चात् क्षणचतुर्दशीत्यनेन प्रतिपादितः यः परभावः परत्वं क्षणचतुर्दशीद्युत्तिविष्णूत्थानोत्तरवर्त्तित्वं तत्प्रतिपादकत्वादित्यस्य द्वितीयस्य चेति

तत्र सदेति शब्दयन्वितं नियमं न बाधितुं शक्यते प्रमाणबाधापत्तेः। न चार्थोऽपि नियमः कथं बाध्यतामस्यापि प्रमाणप्रतीतत्वादिति वाच्यं शब्दमूलत्वादर्थस्य शब्देन हि कार्त्तिकक्रष्णचतुर्दश्यां तत्कार्य्यविधानात् तुलादित्यामावास्यायां सुखरात्रिविधानाच्चतुर्दश्यमावास्याकर्म्मणोरर्थोऽयं क्रमो न शाब्दः। यदा पुनः शुक्लपक्षे तुलासंक्रान्तिनिमित्तेन चान्द्रकार्त्तिकचतुर्दश्यां तद्विहितं कर्म्म तदार्थप्रमाणस्याप्रवृत्तेः कस्य बाधः। प्रायिकमेव हि पौर्व्वापर्य्यमर्थरूपप्रमाणात् सिध्यति न च तस्यास्ति बाधः।

---

सम्बन्धः। बाधकाभावादिति पूर्ववचनस्य लक्ष्मीप्रबोधविष्णूत्थानयोः पौर्व्वापर्य्यनियामकत्वेन द्वितीयवचनस्य च क्रष्णचतुर्दशीमात्रस्य विष्णूत्थानात्पश्चाद्वर्त्तित्वमात्रप्रदर्शनेन च एकविषयत्वाभावेन पूर्व्वापरयोर्बाध्यबाधकत्वाभावादित्यर्थः। विभिन्नविषयतां दृष्टान्तेन दृढ़यति; अत इति। समानो विरोध इति तथाच वर्त्तुलत्वस्य दीर्घतरत्वस्य च विरोधिपदार्थत्वेऽपि वर्त्तुलत्वस्य विल्वफलगतत्वेन दीर्घतरत्वस्य च वंशगतत्वेन च विभिन्नविषयतया यथा न विरोधस्तथा प्रकृतेऽपीति भावः। क्रष्णचतुर्दश्युत्कर्षात् विष्णूत्थानोत्तरकर्त्तव्यतारूपोत्कर्षात्। सुखरात्रेरप्युत्कर्ष इति तथाच चतुर्दश्युत्तरतिथौ अमावास्यायां सुखरात्रेः कर्त्तव्यतया चतुर्दश्या उत्कर्षे सुखरात्रेरपि विष्णूत्थानोत्तरकर्त्तव्यतारूपोत्कर्षः सुतरां सिद्ध इति भावः। एतयोः चतुर्दश्यमावास्ययोरिति क्रमनियमाभावादिति पश्चात् क्रष्णचतुर्दशीत्यनेन विष्णूत्थानादुत्तरवर्त्तित्वेन प्राप्तायाः क्रष्णचतुर्दश्याः अमावास्यां तुलादित्ये लक्ष्मीर्निद्रां विमुञ्चतीति वचनबोधितामावास्यायाश्च शास्त्रेण केनापि शास्त्रेण पौर्व्वापर्य्यक्रमनियमस्यादर्शनादित्यर्थः। आर्थस्त्वसाविति अयतः पश्चादिति शब्दद्वयस्वरसलभ्यः असौ आर्थः विष्णूत्थानात् परकर्त्तव्यः सुखरात्युत्कर्षरूपः स च बाध्य इत्यग्रिमेनास्य सम्बन्धः। बाधं विनेति द्वितीयवचनबोधितस्य विष्णूत्थानात् परतः लक्ष्मीप्रबोधरूपसुखरात्युत्कर्षरूपार्थस्य बाधं विनेत्यर्थः। अस्य वर्णनं प्रथमवचनबोधितलक्ष्मीप्रबोधानन्तरविष्णूत्थानरूपनियमितार्थस्य निर्णय इत्यर्थः।

ततश्च यदि तुलास्थ एव चतुर्दश्यीविहितं तस्यापि नैमित्तिकोत्कर्षवचनदर्शनान्नैमित्तिकेतरविषयत्वेन सामान्यशब्दस्योपसंहारः*। "सदेति" पदस्य नियमप्रतिपादकत्वात् सर्व्वथैव बाधः स्यात्। बाधाच्चोपसंहारः श्रेयान्। किञ्च सिंहेऽधिमासे शक्रस्य दुर्गानन्तरद्वादश्यामुत्थानं भणसि? कन्याधिमासे तुलायां दुर्गाष्टमीपूर्व्वसप्तम्यामेव सूर्य्योत्थानमित्यादिव्युत्क्रमाभि-

---

* तत्र सदेति तस्मिन् शुक्ले सदा विष्णुरिति शब्दयन्वितं साक्षाच्छब्दसाधितं नियमं लक्ष्मीप्रबोधानन्तरमेव विष्णूत्थानं कुर्य्यादित्येवंरूपम्। प्रमाणबाधापत्तेरिति तथाच प्रमाणसिद्धस्य बाधोऽन्याय्य इति भावः। ननु यथा तस्मिन् शुक्ले सदा विष्णुरित्यत्र सदापदात् लक्ष्मीप्रबोधानन्तरं शुक्लपक्षे विष्णूत्थाननियमः तथा उत्तिष्ठत्यत्रतः पश्चात् कृष्णचतुर्दश्यीति शब्दश्रवणरसलभ्य आर्थो नियम एव तत्रार्थं बाध्यताम् इत्याशङ्क्यते नचेति। प्रमाणप्रतीतत्वात् प्रमाणसापेक्षत्वात्। शब्दमूलत्वात् शब्दाधीनत्वात्। शब्देन हीति पश्चात् कृष्णचतुर्दश्यीति शब्देन हीत्यर्थः। कार्त्तिककृष्णचतुर्दश्यां कृष्णचतुर्दश्यीयुक्तामावास्यायाम्।

"अमावास्या यदा रात्रौ दिवा कृष्णचतुर्दशी।
पूजनीया तदा लक्ष्मीर्विज्ञेया सुखरात्रिका॥"

इति वचनात्। एतदेव स्पष्टयति तुलादित्ये सुखरात्रिविधानात्। चतुर्दश्यमावास्याकर्म्मणोरर्थोऽयं क्रमः, चतुर्दश्यीयुक्तामावास्याकर्म्मणोरर्थोऽयं पश्चात् कृष्णचतुर्दश्यीति शब्दतात्पर्य्यार्थक्रमो न शाब्दः न शाब्दक्रमोऽयम्। 'उत्तिष्ठत्यत्रतो विष्णु'रितिवत् विष्णुप्रबोधात् परतो लक्ष्मीप्रबोधस्य स्पष्टशब्दतोऽनवगतेः। चान्द्रकार्त्तिकचतुर्दश्यां चान्द्रकार्त्तिकसम्बन्धिचतुर्दश्यीयुक्तामावास्यायाम्। तद्विहितं कर्म्म लक्ष्मीप्रबोधरूपकर्म्म विहितम्। तदा अर्थप्रमाणस्य पश्चात् कृष्णचतुर्दश्यीयुक्तामावास्या-लक्ष्मीप्रबोधरूपार्थप्रमाणस्य। अप्रवृत्तेरिति तथाच यदा शुक्लपक्षे तुलासंक्रान्तिः तदा आदौ लक्ष्मीप्रबोधः, पश्चात् हरिकोत्थानम्। पश्चात् कृष्णचतुर्दश्यीत्यर्थक्रमस्य सुतरामप्रवृत्तिरिति भावः। पौर्व्वापर्य्यं लक्ष्मीप्रबोधानन्तरं हरेः प्रबोधस्य हरेः प्रबोधानन्तरं लक्ष्मीप्रबोधस्य च पौर्व्वापर्य्यम्। तस्य पौर्व्वापर्य्यस्य।

धायिनः* कथं कृष्णचतुर्दशीकर्म्मलक्ष्मीप्रबोधयोः पौर्व्वापौर्य्येऽर्थग्रहः? सर्व्वेषामर्थसिद्धत्वेनाविशेषात्। किञ्च "शुक्लपक्षे यदा भानु"रित्यस्य सामान्यप्रवृत्तत्वात् मेषवृषयोरधिमासेऽपि तुलासंक्रान्तेः शुक्लपक्ष एव भावात् तद्विषयत्वमेवास्य कुतो नेष्यते? तयोरधिमासे कर्कटे देवशयने—

"कर्किण्यर्के हरौ सुप्ते शक्रध्वजक्रियाखिने।
तुलायां बोधयेद्देवीं वृश्चिके तु जनार्दनम्॥"

इति वचनेन वृश्चिके देवोत्थानस्य विधानात् सौरकार्त्तिकचतुर्दश्यां तत्कर्म्मविधानान्नास्यस्य विषय इति चेत् नाविधित्वादस्य वचनस्य उत्तरत्रिकेष्वधिमासे मिथुन एव शयने सति भवन्मते कर्कटशयनस्य वृश्चिकोत्थाननिमित्तस्याभावात् तुलायामेव

---

तुलास्थ एव तुलास्थसूर्य्य एव सौरकार्त्तिक एवेत्यर्थः। तस्यापि चतुर्दशीयुक्तामावास्याकरणीयलक्ष्मीप्रबोधरूपकर्म्मणोऽपि नैमित्तिकोत्कर्षवचनदर्शनात् विष्णुप्रबोधोत्तरकर्त्तव्यरूपवाचनिकोत्कर्षदर्शनात्। नैमित्तिकेतरविषयत्वेन वाचनिकेतरविषयत्वेन। सामान्यशब्दस्य 'तस्मिन् शुक्ले सदा विष्णु'रिति सामान्यशब्दस्य। उपसंहारः यस्मात् कृष्णचतुर्दश्यसन्वपक्ष एव लक्ष्मीप्रबोधानन्तरशुक्लपक्षनियतत्वेन हरेरुत्थानस्य सङ्गीचः।

* सदापदस्य नियमपरत्वे प्रतिबन्धिं दर्शयति सर्व्वथैव बाधः स्यात्। बाधाच्चोपसंहारः श्रेयान् इति तथाच बाधस्वीकारे "उत्तिष्ठत्यग्रतो विष्णु"रित्यादिमुनिवचनान्तरवैयर्थं स्यात् तदपेक्षया सामान्यशब्दस्य निरुक्तविशेषपरत्वेन सङ्गीच इति भावः। शक्रस्य शक्रध्वजस्य दुर्गानन्तरद्वादश्यां दुर्गोत्सवात् परतो द्वादश्याम्। व्युत्क्रमाभिधायिनः यथार्थक्रममन्यथाकृत्याभिधायिनः। तथाच शक्रोत्थानात् परतो दुर्गोत्सवः दुर्गोत्सवात् परतः सप्तम्यां सूर्य्योत्थानचेति यथार्थक्रमः वृश्चिकशेषपक्षे सूर्य्योत्थानासुत्थानमिति प्रागुक्तेरिति भावः।

देवोत्थानात्तत्परभूता चतुर्दशी प्राप्ता एव किमनेन विधीयते ? द्वेधा हि विधित्वमस्य भवति*। दृश्यिके देवोत्थानस्य प्राप्तस्य

---

* कृष्णचतुर्दशीकर्म्मलक्ष्मीप्रबोधयोरिति। कृष्णचतुर्दशीकर्म्म, शिवालये दीपदानं जाङ्घवीस्नानं चतुर्दशशाकभोजनादि च। यथा कृत्यचिन्तामणौ—

"तथा कृष्णचतुर्दश्यां तुलायां संस्थिते रवौ।
दीपं दत्त्वा महेशाय महेन्द्रत्वं प्रजायते॥
कुत्र चित्रगता भूता असिता या तु कार्त्तिके।
तस्यान्तु जाङ्घवीस्नानात् सर्व्वं तरति दुष्कृतम्॥
शुक्लपक्षे यदा भानुस्तुलां समधिरोहति।
उत्तिष्ठत्यग्रतो विष्णुः पश्चात् कृष्णचतुर्दशीत्यादि॥"

पौर्व्वापर्य्ये अनुग्रहः, कृष्णचतुर्दशीकर्म्मलक्ष्मीप्रबोधयोः पौर्व्वापर्य्यस्वीकारः। तथाच—

"अमावास्या यदा रात्रौ दिवाभागे चतुर्दशी।
पूजनीया तदा लक्ष्मीर्विज्ञेया सुखरात्रिका॥"

इति वचने दिवाऽवत्तिचतुर्दशीयुक्तामावास्यायां रात्रौ सुखरात्रिकाविधानात् चतुर्दशीकर्म्म-शिवालयदीपदानादिलक्ष्मीप्रबोधरूपसुखरात्रिकयोः पौर्व्वापर्य्यं सुतरां सिद्धमिति भावः। "शुक्लपक्षे यदा भानुरित्यस्य," "शुक्लपक्षे यदा भानुस्तुलां समधिरोहति। उत्तिष्ठत्यग्रतो विष्णुः पश्चात् कृष्णचतुर्दशीति" वचनस्य सामान्यप्रवृत्तत्वात्, शुक्लपक्षे तु रवेस्तुलारोहण-मात्रेण प्रवृत्तत्वात्। भावात् सत्त्वात्। तद्विषयत्वमेव मेषवृषयोरधिमासविषयत्वमेव। अस्य वचनस्य। तत्कर्म्मविधानात् विष्णूत्थानानन्तरितकृष्णचतुर्दशीकर्म्मविधानात्। नास्यस्य विषयत्वं "शुक्लपक्षे यदा भानु"रित्यस्य वचनस्य विषयत्वं नास्तीत्यन्वयः। अविधित्वात् विधिप्रत्ययाभावेन विधेयत्वाभावात्। तथाच 'अधिरोहति,' 'उत्तिष्ठती'त्यादर्थ-वादघटितत्वेन विधिर्न सम्भवतीति भावः। उत्तरत्रिकेऽधिमासे श्रावणादित्रिकाधिमासे। मिथुन एव अयने सति मिथुने चान्द्रमाससमापनात् द्वयिकीत्थाननिमित्तस्य इति कर्कट-अयनस्य विशेषणम्। तथाच—

तुलायामपकर्षविधानात्तुलायां वा प्राप्तायाश्चतुर्दश्या उत्कर्ष-विधानात् । तत्र योगीश्वरमते वृश्चिके चोत्थानप्रसक्तेः नापकर्ष-विधिः नापि चतुर्दश्युत्कर्षविधिः । शुक्लपक्षे तुलासंक्रान्तौ तस्मिन्नेव देवोत्थानाभिधानात् । अस्मन्मते तूत्तरत्रिकाधिमासे तुलोपक्रान्तचान्द्रकार्त्तिकशुक्लपक्षे वृश्चिकसमापनीये प्रहरति तन्मत एव दुर्भिक्षकालायाचितवृत्तिब्राह्मणवदनर्थकं वचनम् । तत्यश्चाङ्गावेन चतुर्दश्याः प्राप्तत्वात् सोऽयमान्मीय एव वाणो भवन्तं प्रहरति । अस्मन्मते उत्तरत्रिकाधिमासे तुलोपक्रान्त-चान्द्रकार्त्तिकशुक्लपक्षे वृश्चिकसमापनीये "आभाका"वचनेन देवोत्थानस्य प्राप्तौ तस्यापकर्षो विधातुं न शक्यते, "आभाका" इत्यस्य बाधात् ।

"नान्यथा स्वापयेद्देवं न चैवोत्थापयेद्धरि"मिति "तस्मिन् शुक्ले सदेति" नियमस्य बाधापत्तेः । कोजागरपर-भावेन देवोत्थानावगतस्य पूर्व्वभावः स्यात् । दुर्गातश्च परभावे-नागतस्य सूर्य्योत्थानस्य पूर्व्वभावः स्यात् इत्यादिबहुतराणां शब्दादर्थतश्च प्रतिपन्नानां बाधापत्तेः चतुर्दश्या एवोत्कर्षविधिः । अतो योग्लौकीयममोघास्त्रं तमेव विनिहन्ति। यत्तु दीक्षितस्याच समाधानं यद्यपि चतुर्दश्याः परत एव वृश्चिके देवोत्थानं तथाप्य-

---

"कर्किण्यर्के हरौ सुप्ते शक्रध्वजक्रियास्थिते ।

तुलायां बोधयेद्देवौं वृश्चिके तु जनार्द्दन"मिति वचनेन कर्कटहरि-शयनमेव वृश्चिके हरेरुत्थाने निमित्तं, मिथुने शयने सति वृश्चिके विष्णूत्थाननिमित्तत्वं न सम्भवतीति भावः ।

यत इति वर्द्धित्वादेव प्रबोधः ततः पृष्ठेकानीत्यर्थः। अयं ग्रामः पश्चादग्रतोऽसावित्यादेरिव चरमार्थस्यैव प्रतीतेस्तस्यैव न्यायावगतेः तदयुक्तम्। नित्यत्वादेवंविधाग्रपश्चाद्भावस्य "शुक्लपक्षे सदेति" कादाचित्कावगतिविरोधात्* तस्माच्चतुर्दश्युत्कर्ष एवात्र समाधिः। तुलागतचतुर्दशीवचनमात्रस्य निमित्तवशादुपसंहार इति अनुवादः पुनरनर्थक एव स्यात्। ततश्चास्मात्तरत्रिकाधिमासे विषयत्वं किन्तु षट्स्वेवाधिमासपाते शुक्लपक्षे तुलासंक्रान्तौ वृश्चिके देवोत्थानाच्चतुर्दशी सौरकार्त्तिकगतत्वेन

---

* इत्था हि विधित्वमस्य भवतीति यदुक्तं तदेव दर्शयति, वृश्चिके देवोत्थानस्येत्यादीति। तस्मिन्नेव तुलास्थरवावेव। तुलोपक्रान्तचान्द्रकार्त्तिकशुक्लपक्षे तुलास्थरव्यारब्धचान्द्रकार्त्तिकशुक्लपक्षे। कोजागरपरभावेन कोजागरोत्तरकर्त्तव्यत्वेन पूर्वभावः स्यात्। कोजागरात् प्राक् देवोत्थानं स्यात् अतो बाधापत्तेः योग्यौकीयमसीधास्त्रं तं विनिहन्ति इत्यस्य चतुर्दश्या एवोत्कर्षविधिरित्यनेन सम्बन्धः। असीधास्त्रम् अत्यर्थप्रमाणं विनिहन्ति दूरीकरोति। दीक्षितमतमपाकर्तुमाह यत्त्वित्यादि। क्षणचतुर्दश्याः परतः, क्षणचतुर्दशीयुक्तामावास्यामित्यमाणलक्ष्मीप्रबोधरूपसुखरात्रिकायाः परतः। पृष्ठेकानी पश्चाद्वर्त्तिनी। अयं ग्रामः पश्चात् पश्चाद्वर्त्ती, असौ अग्रतः पूर्ववर्त्ती। चरमार्थस्य प्रतीतेरिति पश्चाच्छब्देन चरमार्थस्य उत्तरवर्त्तित्वार्थस्य प्रतीतेः। नित्यत्वात् विष्णुप्रबोधस्य नित्यत्वात्। एवंविधाग्रपश्चाद्भावस्य उत्तिष्ठत्यग्रतो विष्णुः पश्चात् क्षणचतुर्दशीति वचनबोधितविष्णुप्रबोधलक्ष्मीप्रबोधयोरग्रपश्चाद्भावस्य। शुक्लपक्षे सदेति लक्ष्मीप्रबोधमभिधाय तस्मिन् शुक्ले सदा विष्णुरिति वचनेन विष्णुप्रबोधस्य लक्ष्मीप्रबोधानन्तरशुक्लपक्षनियतत्वेन। कादाचित्कावगतिविरोधादिति तथाच तस्मिन् शुक्ले सदा विष्णुरित्यत्र सदापदश्रुतेः लक्ष्मीप्रबोधानन्तरशुक्लपक्षनियतत्वेन कदाचित् लक्ष्मीप्रबोधात् पूर्वं कदाचिदा तत्परत इति कादाचित्कावगतिविरोध इति भावः।

पूर्व्वतया प्राप्तापि निमित्तविशेषेण चान्द्राधिकर्त्तव्यतया पश्चाद्विधीयत इतीत्थमेव सार्थकवचनं यथा भवन्मते सौराषाढ़ादिविहितानामेव शयनादीनान्नैमित्तिकचान्द्रे विधिः। एवं "शुक्लपक्षे यदा भानुरिति" सामान्येनावगतेरप्यनुग्रहो भवति। अन्यथोत्तरत्रिकाधिमासविषयत्वं सामान्यावगतिबाधेन वर्णनीयम्‡। यद्वा योग्लौकमतेऽपि चेत् पूर्व्वोक्तन्यायेन विधित्वमस्य न सम्भवत्येव तदानीं दीक्षितव्याख्यानेन चानुवादतास्य भवतु। यदेति पद-

---

‡ तस्मात् कादाचित्कावगतिविरोधात् चतुर्दश्युत्कर्ष एवाचेति अत्र चतुर्दशीपदेन प्रबोधात् परतः सम्भाव्यमानक्षणचतुर्दश्युत्कर्ष एवोच्यते न तु लक्ष्मीप्रबोधाधिकरणीभूतामावास्यायाः अव्यवहितपूर्व्ववर्त्तिक्षणचतुर्दश्युत्कर्षः तत्परभूतशुक्लपक्षे विष्णुप्रबोधस्य नियमितत्वेन पश्चात्पदवैयर्थ्यापत्तेरिति भावः। निमित्तवशादुपसंहार इति कालविशेष निमित्तत्वेन सामान्यविधेः सङ्कोचः, तथाच यदा मार्गशीर्षोऽधिमासस्तदैव प्रबोधात् परतः क्षणचतुर्दश्यानुलागतत्वेनोत्कर्षसम्भव इति भावः। पूर्व्वतया विष्णुप्रबोधस्य पूर्व्वतया, तथाच द्वयोके विष्णुप्रबोधविधानात् चतुर्दश्याः सौरकार्त्तिकगतत्वेन सुतरां पूर्व्वत्वम्। निमित्तविशेषेण लक्ष्मीप्रबोधभिन्नचान्द्रकार्त्तिकक्षणपचकरणीयकर्म्मविशेषनिमित्तत्वेनेत्यर्थः। पश्चात् विष्णुप्रबोधादूर्द्धम्। नैमित्तिकश्चान्द्रे विधिरिति चान्द्रे नैमित्तिकविधिरित्यन्वयः। तथाच प्रीते विष्णुः सदाषाढ़े इति वचने शयने सदापदश्रुतेः सौरपरत्वे कदाचिच्छयननिमित्ततिथेरप्राप्तौ कर्म्मलोपः स्यादतश्चान्द्रे नैमित्तिकविधिरित्युक्तम्। एवमित्यादि, तथाच यथा चान्द्रे नैमित्तिकविधिः तथा 'शुक्लपक्षे यदा भानुकुलां समधिरोहति। उत्थितश्चयतो विष्णुः पश्चात् क्षणचतुर्दशी'ति वचने शुक्लपक्षे तुलासंक्रान्तिमात्रे सामान्यतोऽये विष्णोरुत्थानविधिः पश्चात् क्षणचतुर्दशीविधिरिति, ननु उत्तरत्रिकाधिमासमात्रे उक्तविधिरिति भावः। ननु उत्तरत्रिकाधिमासविषयत्वसिद्धौ व्याहन्येत इत्यत आह अन्यथेत्यादि, तथाच सामान्यावगतिबाधेन उत्तरत्रिकाधिमासविषयत्वम् अन्यथा वर्णनीयमिति आसत्तिक्रमेणान्वयः।

स्याप्यनुवादता। यदा शुक्लपक्षे तुलासंक्रान्तिस्तदा विष्णूत्थानस्य परभावमनुवदति। अन्यदापि परभाव एवेति चेत् विधित्वे ह्यन्यनिवृत्तावनर्थवत्त्व(१)मनुवादे तु नायन्दोषः। तस्मादयोग्यत्वेनोपदर्शितो द्विराषाढ़ोऽवगाढ़न्यायापोढ़तयाऽनतिदृढ़(मूढ़)स्यैवेति प्रतिभाति।

सम्प्रति सभ्रमभट्टकल्पितो द्विराषाढ़ उपन्यस्यते।

तद्यथा।

"माधवाद्येषु षट्ष्वेकमासि दर्शद्वयं यदा।
द्विराषाढ़ः स विज्ञेयो विष्णुः स्वपिति कर्कटे॥"

अत्र षट्ष्विति वचनात् कर्कटादिद्विकेऽप्यधिमासे कर्कट एव देवशयनं कार्य्यं, न चागामिकर्कटापेक्षं वचनवर्णनम् उक्तम्, अधिमासपाततत्कार्य्ययोः समानसंवत्सरगोचरावगतेः।

"द्विराषाढ़विकल्पोऽयं वैकुण्ठशयनं प्रति।"

इत्यादिवचनैश्चागामिवत्सरकर्कटशयनस्य विहितत्वात्।

तथाच स्मृतिः;—

"सिनीवालीमतिक्रम्य यदा सञ्चरते रविः।
युक्तः शेषैस्तदा मासैः कालस्तचोत्तरः स्मृतः॥"

"सर्व्वमज्ञानतिमिरमज्ञनेन हत"मित्यभिधायोक्तं "युक्तः शेषैस्तदा मासैरिति।" येऽपि मासाः पूर्व्वं गतास्तेऽपि काल-

---

(१) विधित्वेऽन्यस्य निमित्तमनुवत्त्वमिति क्वचिदादर्शे पाठः।

द्वडिमग्ये भाविनीं वीच्य उत्तरा एव ग्राह्या इत्यर्थः। तेनैव-मादिवचनपर्य्यालोचनया दक्षिणायनात् पूर्व्वं परेण वा दर्शद्वये द्विराषाढ़ एव स्यात्*। तस्मादुत्तरचिंकाधिमासेऽपि प्राक्तन-शयनमुत्क्रष्टव्यम्। कर्कटे चाधिमासे देवशयनं मलिम्लुचेऽपि, "विष्णुः स्वपिति कर्कट" इति वचनात् नास्ति वचनस्यातिभार इति न्यायविदां व्यवहारात्, आश्विने चाधिमासे कर्कट एव हरेः सुप्तत्वात्,

"कर्किण्यर्के हरौ सुप्ते शक्रध्वजक्रियाश्विन" इति वचना-न्मलिम्लुचेऽपि शक्रोत्सवः। तुलायाञ्चाधिमासे तत्रैव दुर्गोत्सवः। तदेवमुत्तरचिकाधिमासे वत्सरद्वये कर्कट एव देवशयनम्।

---

* सम्प्रमभट्टमतमपाकर्त्तुं तन्मतमुपन्यस्यति सम्मतीत्यादि। माधवाद्येषु षट्सु वैशाखाद्याश्विनान्तषण्मासमध्येषु इत्यर्थः। एकमासि एकसौरमासि। अत्र षट्स्विति वचनात् माधवादिषण्मासमध्ये अधिमासे सामान्यतः कर्कटे हरिशयनविधानादित्यर्थः, नच आगामिकर्कटापेक्षायामिति।

"कन्यासिंहकुलीरेषु यदा दर्शद्वयं भवेत्।
आगामिनि तदा वर्षे कुलीरे माधवः स्वपेत्॥"

इति वचनात् श्रावणादिचिकमलमासे आगामिवर्षीयकर्कटमापेक्षं हरिशयने सामान्य-वचनवर्णनं नच युक्तमित्यर्थः। अधिमासपाते तत्कार्य्यौ; अधिमासपातजन्यद्विराषाढ़-कुलीरविष्णुशयनयोः समानसंवत्सरगोचरत्वावगतेः यस्मिन् संवत्सरे अधिमासपातः तस्मिन्नेव संवत्सरे सामानाधिकरण्येन विषयत्वावगतेः, न त्वागामिसंवत्सरमाचगोचरत्वेनेत्यर्थः। द्वि-राषाढ़विकल्पोऽयं वैकुण्ठशयनस्मृतिं इत्यादिवचनैरिति। आदिपदेन "ध्वजस्तु शतयज्ञस्य सिंह एव विधीयते" इत्युत्तरप्रतीकपरिग्रहः।

भाविनि चोत्तरचिकाधिमासे यदि मिथुन एव देवशयनं तदो-त्तिष्ठते मासचतुष्टयेनेति बाध्येत, तदत्तरे हृश्चिकोत्थानस्य निर्वि-वादत्वात्*। तदेतदतिगहनाज्ञानतिमिराक्रान्तान्तःकरणतया प्रज्ञाप्रदीपकप्रकाशप्रत्यस्तमयेन सम्यग्भ्रान्तस्य सम्भ्रमस्याभि-धानम्। तथा "आभाकासितपक्षेष्विति" चान्द्राषाढ़परत्वस्य महता प्रबन्धेन पूर्व्वप्रतिपादितत्वात् न चोत्तरचिकाधिमासे कर्कटे चान्द्राषाढ़: सम्भवति। न च तस्य बाधो न्याय्य:,

* उपसंहरति तस्मादिति। उत्तरचिकाधिमासे श्रावणादिचिकाधिमासे, प्राक्तन-शयनं मिथुनकरणीयहरिशयनम्, उत्कृष्टव्यं कर्कटे कर्त्तव्यम्। वचनादिति, तथाच वाचनिकत्वात् मलमासोऽपि न दूषणावह इति भाव:। तदेव प्रमाणयति नास्ति वचन-स्येत्यादि। कर्कटे हरे: सुप्तत्वादिति माधवाद्येषु षट्स्वेक इत्यादिप्रागुक्तवचनादिति शेष:। तत्रैव दुर्गोत्सव: मलमासेऽपि तुलायामिव। कर्किस्थकर्के इति प्रागुक्तवचनादिति शेष:। विशेषाभिधानाय पुनरुपसंहरति तदेव इत्यादि, वत्सरद्वये कर्कटे एव देवशयनमिति। तथाच "माधवाद्येषु षट्स्वेक इत्यादिप्रागुक्तवचनात् श्रावणादिचिकाधिमासे कर्कटे हरिशयनं वाचनिकम्। एवम्—

"कन्यासिंहकुलीरेषु मलमासो यदा भवेत्।
आगामिनि तदा वर्षे कुलीरे माधव: स्वपेत्॥"

इति वचनात् आगामिवर्षीयकर्कटेऽपि देवशयनं वाचनिकमिति भाव:। उत्तरचिकाधि-मासे कर्कटहरिशयनानङ्गीकारे वचनान्तरविरोधं दर्शयति, भाविनि चोत्तराधिमासे इत्यादि। उत्तिष्ठते मासचतुष्टयेनेत्युपलक्षणम्, 'पञ्चमासान् हरौ सुप्ते देशे तत्र भयं भवेत्' इत्येतद्वचनविरोधोऽपि द्रष्टव्य:। तथाच श्रावणादिमलमासे मिथुनहरिशयनस्वीकारे हृश्चिके हरेरुत्थाने च पञ्चमासहरिशयनात् मासचतुष्टयेनेति वचनविरोध:, देशे तत्र भयं भवेदित्यादिदोषश्च स्यादिति भाव:।

अबाधेनाप्युपपत्तेः। न च वाच्यमधिमासस्य शयनाद्युत्कर्षहेतुत्वात्, तस्य च तद्वत्सरे पातात् कथमनुत्कर्षः? यतो नायमुत्कर्षस्य हेतुरसिद्धस्य पश्चाद्भाविनो हेतुत्वाभावात्, तस्मात् "माधवाद्येषु षट्स्विति" वचनेन यदुत्तरचिकाधिमासस्य कर्कटशयनहेतुत्वमुक्तं तदागामिशयनोत्कर्षाभिप्रायम्, न च निमित्तनैमित्तिकयोरेकवत्सरगोचरत्वावगमबाधः*। कर्कटाधिमासेऽपि चान्द्रश्रावणाधिमासगणनयागामिकर्कटगतचान्द्राषाढ़पर्य्यन्तेनैव द्वा-

---

* इदानीं सम्भ्रमभङ्गमतमपाकर्तुमुपक्रमते तदेतदित्यादि। अतिगहनाज्ञानतिमिराक्रान्तान्तःकरणतया अतिदुरवगाहाज्ञानान्धकाराच्छन्नहृदयतया। प्रज्ञा एव प्रदीपकः प्रदीपः तस्य यः प्रकाशः ज्योतिः तस्य प्रत्यक्षसंवेन निर्व्यापदेन। सम्भ्रमशब्दस्य सम्यक् भ्रमो भान्तिर्यस्येति व्युत्पत्तिमङ्गीकृत्याह सम्यग्भ्रान्तस्येत्यादि। महता प्रबन्धेन अतिविस्तृतसन्दर्भेण, नचेति नङ्गीत्यर्थः। चान्द्राषाढ़ इति, तथाच श्रुतेः विष्णुः सदाषाढ़े इत्यादिवचने सदापदसमभिव्याहृताषाढ़पदाच्चान्द्राषाढ़ एव प्रतीयते। अन्यथा सौरपरत्वे कदाचिद्रवेः शीघ्रगत्या न्यूनकालं मासस्समाप्तौ शयनतिथेरलाभात् सदा शेते इत्यनुपपन्नं स्यादिति भावः। अबाधेनाप्युपपत्तेरिति, तथाच शयने चान्द्राषाढ़स्वीकारे सर्व्वदैवाबाधेनोपपत्तिः सम्भवतीति भावः। अधिमासस्य उत्कर्षहेतुत्वात् शयनोत्कर्षहेतुत्वात् इत्यर्थः कथमन्यथा मिथुनमलमासपाते कर्कटे हरिशयनं स्यात्। नच वाच्यमिति, कथम् अनुत्कर्ष इति वाच्यं न च इत्यर्थः। अत्र हेतुमाह यतो नायमित्यादि, यतो यस्मात् अयं मलमासो न हेतुः। अहेतुत्वे हेतुमाह असिद्धस्य पश्चाद्भाविनो हेतुत्वाभावादिति। तथाच—"अन्यथासिद्धिशून्यस्य नियता पूर्व्ववर्त्तिता। कारणत्वं भवेत्तस्य" इत्यादिस्मरणात् कार्य्यान्यवहितपूर्व्ववर्त्तिन एव कारणत्वनियमात् मलमासस्य पश्चाद्भाविनासिद्धतया अकारणत्वमिति भावः। यद्यपि मलमासे आरब्धे सति तदीयहादश्याद्यौ हरिशयनविधानेन तस्य पूर्व्ववर्त्तित्वमस्ति, तथापि दर्शद्वयातिक्रमणाभावेन असम्पूर्य्या असिद्धत्वमुक्तं सङ्गच्छते। तस्मात् असिद्धस्य तस्य कारणत्वाभावात्। निमित्तनैमित्तिकयोः कार्य्यकारणयोः।

दशभिर्मासैः संवत्सरनिष्पत्तेरेकवत्सरगोचरत्वाविरोधात्। न च वत्सरगणनया मासं प्रति नियमोऽस्ति वर्षत्रद्वादावनियमात्, न च समानवत्सरगोचरत्वमप्यनयोरवगम्यते तद्वाचकशब्दाभावात्, न च "द्विराषाढ़ः स विज्ञेय" इति वत्सरे द्विराषाढ़ इति वचनार्थः। द्विराषाढ़वचनत्वात् पदस्य दर्शद्वयोपलक्षिताधिमासस्यैवाषाढ़स्य 'स' इति निर्देशात् द्विराषाढ़स्यैव* द्विर्वैशाखद्विःश्रावणादेरपि शयनाद्युत्कर्षहेतुत्वात् गौणः। स द्विराषाढ़ो विज्ञेय इत्यभिधानान्न तु संवत्सर इति। तस्मात् पूर्वसिद्धस्य हेतुत्वात् परभाविनश्च हेतुमत्त्वात् "पतिते चाधिमासके" इति भूतनिर्देशाच्च स्वपरभूतकर्कटशयननिमित्तमेवाधिमासानाम्। अतएव—

"यदाधिमासः पतति तदा पूर्वौ मलिम्लुचः।
कार्य्यन्नात्राभिषेकादि द्विराषाढ़ो भवेत्तदा॥"

यदा पतति तदा द्विराषाढ़ो न तु पतिष्यतीत्याह।

तथा—

"उत्तरमयनमायाते सवितरि पतनं यदाधिमासस्य।
भवति तदा द्विराषाढ़ः शेते कर्किणि सुरारातिः॥"

---

* ननु माधवादीषु षट्स्वेक इत्यादिवचने एकवर्षमध्ये हरिशयनोपपत्तिरिति चेत् तदुपपादयति कर्कटाधिमासे इत्यादि। श्रावणाधिमासगणनया इति तथाच चान्द्रमासस्य मलमासत्वात् तस्य शुद्धाशुद्धत्वभेदेन मासद्वयत्वेऽपि षष्ठ्यादिदिवसैर्मासः कथितो बादरायणैरिति वचनेन श्रावणत्वेनैक्यात् तमादाय गणनया चान्द्राषाढ़पर्य्यन्तस्य एकवर्षत्वसिद्धिरत्नुसैवेति भावः। अनयोरधिमासहरिशयनयोः, द्विराषाढ़स्यैव मुख्यद्विराषाढ़स्यैव।

यदा पतनं सम्भवति तदा द्वाषाढो नतु पूर्व्वमेव*। किञ्च शयनाद्युत्कर्षनिमित्तस्य सकृदुपनिपातान्नैमित्तिकानामपि सकृदेव युक्तं तत्र च पूर्व्वत्रिकाधिमासस्य परभूतकर्कटे शयननिमित्तत्वात् उत्तरत्रिकाधिमासस्यापि तथात्वमेव युक्तं "माधवाद्येषु षट्स्विति" षण्णामेवाधिमासानां, "विष्णुः स्वपिति कर्कट" इति तुल्यरूपनिमित्ताभिधानात्। अतएव क्वचिद्भाविनोऽधिमासस्य क्वचिद्भूतस्य निमित्तत्वं नैकं वचनमवगमयितुं प्रभवति वैरूप्यात्। अथ कथमुत्तरत्रिकाधिमासे भाविनि भूते च कर्कटे शयनं, कथञ्च देवशयनकर्म्मण्येव कदाचिद्भावितया कदाचिच्च भूततयोत्कर्षनिमित्ततावर्णनं, मेषादित्रिकाधिमासस्य भूतत्वेनैव निमित्तत्वविधानादुत्तरत्रिकाधिमासस्यापि भूतत्वेनैव युक्तम्। "उत्तिष्ठते मासचतुष्टयेनेति" तु प्रायिकानुवादमात्रम्। विधित्वे तु किमनेन विधीयते? न तावच्चतुर्थश्चान्द्रो मासः। द्वादश्यां हि शयने तत्तिथ्यारब्धानाञ्चतुर्णां मासानामेकादश्यां पूरणात् द्वादशी पञ्चमास्येति तत्रोत्थानं न स्यात्। अथ चतुष्टयेन समाप्तेन तेन पञ्चम इत्यर्थः। तन्निष्पत्तिश्चैकादश्यन्ते तत्र

---

* उपसंहरति तस्मादिति। परभाविनश्च हेतुमत्त्वात् कार्य्यत्वात्। स्वपरभूतकर्कटशयननिमित्तमेवेति अत्र स्वपदेनाधिमास उच्यते। स्वस्य परभूतं स्वपरभूतं स्वपरभूतञ्च तत् कर्कटशयनञ्चेति स्वपरभूतकर्कटशयनं तस्य निमित्तत्वं परभूततादृशकार्य्यं प्रत्येव स्वस्य कारणत्वमित्यर्थः। उत्तरायणम् आयाते सवितरि सवितरि सूर्य्ये उत्तरायणम् आयाति गते सति दक्षिणायने इत्यर्थः। तदा तदैव पतनसमानकालीन एव नतु पूर्व्वमेव पतनात् पूर्व्वमेव [illegible]र्णपतनसमानकालीन एवेत्यर्थः।

निष्पन्नस्य द्वादश्यां समुत्थानकारणतेति नैतदस्वार्थपरतापत्तेः। द्वादशीप्रथमक्षण एवोत्थानं स्यात्,* न नक्षत्रमपेक्षते, त्रयोदश्यादौ

---

* पूर्वचिकाधिमासस्य वैशाखादिचिकाधिमासस्य। परभूतकर्कटे शयननिमित्तत्वात् स्वोत्तरवर्त्तिकर्कटगतचान्द्राषाढसम्बन्धि शयनं प्रति निमित्तत्वात् निमित्तत्वदर्शनात्। उत्तरचिकाधिमासस्य श्रावणादिचिकाधिमासस्यापि तथात्वमेव स्वोत्तरवर्त्तिकर्कटगतशुक्लाषाढसम्बन्धि शयनं प्रति निमित्तत्वमेव युक्तं, ननु कर्कटाधिमासे भवीयश्रावणशुक्लद्वादश्यामसम्पूर्णत्वेन तदाधिमासस्य निमित्तत्वासम्भवात् "शेते विष्णुः सदाषाढे" इति सदापदबोधितनियमबाधापत्तेश्च। क्वचित् भाविन इति क्वचित् कर्कटाधिमासे भवीयश्रावणसम्बन्धिशुक्लद्वादश्यां वाचनिकशयनस्वीकारे। एकं वचनमिति अवगमयितुं बोधयितुं न प्रभवति इत्यन्वयः। वैरूप्यात् पूर्वचिकाधिमासस्येव एकरूपत्वाभावात्। प्रायिकानुवादमात्रमिति अत्र प्रायिकत्वं मलमासप्रतान्निभिन्नत्वेन बोद्धव्यम्। अनुवादमात्रमिति तु अत्रायमाशयः मासविशेषमनुल्लेख्य सामान्यतो मासचतुष्टयेन इत्युक्तौ किमपेक्षया मासचतुष्टयत्वमित्यनध्यवसायः स्यात् विशेषतस्तु कस्मिन् मासे कस्मिन् पक्षादौ मैत्राद्यपादयोगेन शयनं वैष्णव्यमश्वेन पार्श्वपरिवर्त्तनं पौष्णशैषेण उत्थानञ्चेति पुनरनध्यवसायः स्यात्। अतः "आभाकासितपक्षेषु मैत्रश्रवणरेवती। आदिमध्यावसानेषु प्रस्थापोद्वर्त्तनोत्सवाः॥" इति वचनेन सामान्यतोऽभिधाय मैत्राद्यपादे स्वपितीह इत्यादिना मासचतुष्टयत्वेनानुद्य विशिष्यते इति सुतरामनुवादमात्रं सिध्यति। विधित्वे तु नियमविधित्वे तु किमनेन मैत्राद्यपादे स्वपितीत्यादिना विधीयते नियम्यते। चतुर्थः मासचतुष्टयेन इत्यनेन प्राप्तश्चतुर्थो मासः चान्द्रः एका तिथिः कापि तदादिभूता इत्यादिवचनबोधिततिथिचान्द्र इत्यर्थः। एकादश्यां पूरणात् शयनाद्यारभ्यकद्वादशीमादाय गणनया एकादश्यास्त्रिंशत्तिथित्वेन तिथिचान्द्रमाससमापनात्। सुतरां द्वादशी पञ्चमासस्येति एकादश्यां तिथिचान्द्रमाससमापनात् सुतरां द्वादशी पञ्चममाससम्बन्धिनी भवति। तत्रोत्थानं न स्यादिति मासचतुष्टयनियमात्। चतुष्टयेन समाप्तेन तेन पञ्चम इत्यर्थ इति चतुष्टयसमाप्त्युत्तरत्वविशिष्टेन पञ्चमेनेत्यर्थः। अस्वार्थपरत्वापत्तेः स्वार्थहान्या अन्यार्थकल्पनापत्ते-

सर्व्वथा न स्यादेव मासचतुष्टयस्य चिरातीतत्वादेकादश्याञ्च नोत्थानं स्यात्। चतुर्थमासस्यानिष्पन्नस्य कारणत्वानुपपत्तेः एकादश्यन्ते च तत्समाप्तिः। तथाच पादयोगादन्यतिथावित्यादिकमपहस्तितं भवेत्*। नाचचमासचतुष्टयमिति चेत् नैतदप्यनुराधानचत्रमादिभूतमादाय चतुर्थमासीयरेवतीगणने नैकोनविंशत्युत्तरशतेन मासचतुष्टयस्य एकोनस्यापत्तेरभिजिद्गणने रेवत्युत्तरस्येति कथं मासचतुष्टयेनेति विधिः विधेयस्यापरिज्ञाने विधानासम्भवात्। न च रेवत्यामपि नियतमुत्थानम्, उभयोरप्यभावे त्विति, द्वादशीमात्रस्यापि विधेः। न च सौरापेक्षं चतुर्थत्वमाषाढ़ात्. कार्त्तिकस्य पञ्चमात्, प्रतिपदादिदर्शान्तश्चान्द्रोऽपि पञ्चम एवेति। यथाकथञ्चिदेवानुवादतया वर्णनं प्राप्तिपरतन्त्रत्वादनुवादानामतएव मैत्राद्यपादादिभिर्व्यभिचरितैः सहचरितं व्यभिचार्य्येव युक्तम्। "शक्रध्वजोत्थापनञ्च विष्णोश्च परिवर्त्तन"मित्यादिना च पञ्चभिरपि मासैरुत्थानस्य

---

रित्यर्थः। द्वादशीप्रथमचरण एवोत्थानं स्यादिति एकादश्यां चान्द्रमाससमापनेऽपि द्वादशीप्रथमचरणे उत्थानारम्भे एकादश्यन्तरूपकारणस्य प्राक् सत्त्वात्।

* ननु रेवतीनचत्रयुक्तद्वादश्यामुत्थानविधानात् द्वादश्याद्यचरणे तदृयोगस्य कादाचित्कत्वात् कथमुपपत्तिरित्याशङ्क्याह न नचत्रमपेक्षते। चिरातीतत्वादिति चयोदश्यादौ उत्थाने द्वादश्यादिव्यवधानेन एकादश्यन्तरूपकारणस्य प्राक् सत्त्वासम्भवात्। अपहस्तितं भवेदिति पादयोगादन्यतिथौ इति वचनं व्यर्थं स्यात् तथाच द्वादश्यां नचत्रयोगाभावे पादविशेषयोगेन अन्यतिथौ उत्थानव्यवस्था न स्यादिति भावः।

दर्शितत्वात्* । तस्मादुत्तरत्रिकाधिमासव्यतिरेकेण यथाकथञ्चित्-

---

* नाक्षत्रमासचतुष्टयमिति पादयोगादत्यतिथावित्यादिवचनस्य सार्थक्याय सप्त-विंशतिनक्षत्रैः नक्षत्रयुक्तमासचतुष्टयमिति चेदित्यर्थः। अनुराधानक्षत्रमादिभूतमादा-येति "मैत्राद्यपादे खपितोऽह विष्णुर्वैष्णव्यमध्ये परिवर्त्तते च। पौष्णावसाने च सुरारि-र्हत्वा प्रबुध्यते मासचतुष्टयेने"ति वचनादिति शेषः। अत्र यद्यपि नाक्षत्रतिथिचान्द्रमासस्य विंशत्तिथिनक्षत्रात्मकतया तच्चतुष्टयस्य विंशत्युत्तरशतेन समापनमुचितं, तथापि पौष्णाव-सानेन सुरारिहत्वा प्रबुध्यते मासचतुष्टयेनेत्यनेन पौष्णावसानमासचतुष्टयीः सामानाधि-करण्यदर्शनेन पौष्णावसानरूपरेवतीशेषभागस्यापि अनुराधामादाय गणने एकोनविंशत्यु-त्तरशतेन समापनात् तादृशमासचतुष्टयस्यापि एकोनविंशत्युत्तरशतेन समापनापत्तिः सुतरामेव सिध्यति। तथाहि, अनुराधामादाय गणने विंशत्पूरणीभूतमूलनक्षत्रेण प्रथम-स्तादृशतिथिचान्द्रमासः समाप्तः। ततः पूर्वाषाढ़ामादाय गणने विंशत्पूरणीभूतश्रवण-नक्षत्रेण द्वितीयस्तादृशमासः समाप्तः। ततः धनिष्ठामादाय गणने विंशत्पूरणीभूतपूर्व्व-भाद्रपन्नक्षत्रेण तादृशतृतीयो मासः समाप्तः। तथाच उत्तरभाद्रपन्नक्षत्रमादाय विंशत्पूरणी-भूताश्विनीनक्षत्रेण चतुर्थो मासः समाप्यते च। ततश्च रेवतीनक्षत्रे प्रवीधे एकोनत्वं सुतरामेव सिद्धम्। द्वादशीमात्रस्यापि विधेः "द्वादश्यां सन्धिसमये नक्षत्राणामसम्भवे। आभाकासित-पक्षेषु शयनावर्त्तनादिक"मिति वचनात्। न च सौरापेक्षं चतुर्थत्वमिति मासचतुष्टयेनेति मासचतुष्टयस्य सौरमासचतुष्टयत्वं न च नष्टीत्यर्थः। प्रतिपदादिदर्शान्तस्यान्द्रोऽपीति मुख्यचान्द्रोऽपीत्यर्थः। पञ्चम एव उत्तरत्रिकमलमासे सति श्रावणादेर्द्वित्वात्। अनुवाद-तयेति स्वयमेव वक्ष्यति। प्राप्तिपरतन्त्रत्वादनुवादानामिति प्राप्तेः पुनःकथनमनुवाद इति स्मरणात्। मैत्राद्यपादादिभिर्व्यभिचरितैरित्यादि तथाच "मैत्राद्यपादे खपितोऽह विष्णुः वैष्णव्यमध्ये परिवर्त्तते च, पौष्णावसाने च सुरारिहत्वा प्रबुध्यते मासचतुष्टयेने"ति, "द्वादश्या-मृक्षसंयोगे पादयोगो न कारण"मिति, "द्वादश्यां सन्धिसमये नक्षत्राणामसम्भवे। आभा-कासितपक्षे"ष्वित्यादि-व्यभिचरितैः प्राक्तनादाचिल्कसम्बन्धैः मैत्राद्यपादादिभिः सहचरितं तदयोगेन व्यवस्थापितम्। इत्यादिना इति आदिना तु मासद्वयेन निर्द्दिष्टम्। "शयना-दाद्यकीर्विदैः। दुर्गायाश्च त्रिभिर्मासैः अधिमासं विनैव तु। अधिमासनिपाते तु क्रमा-

प्राप्तस्य चतुष्टयस्य चतुष्टयेनेत्यनुवाद इति यत्किञ्चिदेतत्। एतच्चाधिमासस्य शयनोत्कर्षनिमित्ततामभ्युपगम्योक्तम्। परमार्थतस्त्वधिमासे पतिते एकस्य द्विराहृत्तत्वात् ततः प्रभृत्युत्तरोत्तरसौरमासेषु प्राप्तिरिति(१) चान्द्रमासोत्कर्षनिमित्तमधिमास इत्यर्थः। यत्तु अज्ञानतिमिरदहनार्थमञ्जनवर्त्तिरूपवचनमुपन्यस्तम्।

"सिनीवालीमतिक्रम्य यदा संक्रमते रविः।
युक्तः शेषैस्तदा मासैः कालस्तत्रोत्तरः स्मृतः॥"

इति व्याख्यातञ्च, सर्व्वमज्ञानतिमिराञ्जनेनानेनोपहतं तत्र काल उत्तरो योऽसौ परिदृष्टः स एव ग्राह्यः। अथ किं यत्र मासे द्वन्द्विदर्शनं तदधिक एव उत्तरः कालो ग्राह्यः पूर्व्वस्तु यथावस्थित एव गृहीतव्य इत्यत्राह "युक्तः शेषैस्तदा मासैरिति"। येऽपि पूर्व्वं गतास्तेऽपि कालद्वन्द्विमग्रे भाविनीं वीप्योत्तरा एव ग्राह्या इत्यर्थः। तस्मादेवमादिवचनपर्य्यालोचनया दक्षिणायनात् पूर्व्वं परेण वा दर्शद्वये द्विराषाढ एव बुध्यत इत्यन्तम्। तत्र जनीगतान्धव्याधिप्रशमनार्थपृष्टकुवैद्यकथितविपरीतफलौषधप्रयोगात् दिवापि न पश्यतीतिवदाभाणकोऽयम्। अस्यापि विपरी-

(१) एव पूर्व्वपूर्व्वचान्द्रप्राप्तेः तत्र तत्र विहिता क्रिया उत्तरोत्तरेष्वेव क्रियते इति प्राप्तं वचनैः खण्ड्यतिक्रियते। एतदुक्तं भवति यत्राधिमासः पतितः तदादिचान्द्राणामुत्तरोत्तर इति क्वचिदादर्शे पाठः।

दिन्द्राग्निकाहरीन्। कन्यातुलाहश्चिकेषु नृप उत्थापयेद्ध्रुवमिति प्रतीकपरिग्रहः। पञ्चभिर्मासैरिति अस्मिन् वचने मलमासे सति हश्चिके उत्थानविधानेन चान्द्रकार्त्तिकपञ्चक हश्चिकप्रवेशेऽपि आषाढापेक्षया चान्द्रकार्त्तिकस्य पञ्चमत्वात्।

तार्थप्रसाधकत्वात्। तथाहि यदाधिमासः पतति तदैकनामानौ चान्द्रौ भवतः तत्र चान्द्राषाढविहितकर्मानुष्ठानाय को ग्राह्यः इत्यपेक्षाया "मुत्तरः स्मृत" इति विधिः। तत्परभाविनोऽपि चान्द्रमासाः परमासेष्वेव प्राप्यन्त इति परभूतैर्मासैर्युक्तः स्मृतः न तु पूर्व्वैरिति, तेषां शेषपदानभिधेयत्वात्, वयःशेषे पुत्रपौत्रमायुःशेषे यच्छेषन्दशरात्रस्येत्यादिषु परभूत एव काले शेषपदप्रयोगनियमात्*। कर्कटाधिमासे च देवशयने तत्र चान्द्रे न वा सौराषाढे शयनं स्यात्। तदानीं द्विःश्रावणत्वाच्चान्द्राषाढस्यापि कर्कटप्रथमदिन एव समाप्तत्वात् "आभाका" इति "मिथुनस्थेऽपि सहस्रांशा"वित्यादिचान्द्रविधिपरं वा सौरपरं वा

---

* परमार्थतः यथार्थतः। एकस्य द्विराव्रत्तत्वात् अधिमासरूपस्य आषाढादिनामकत्वेन द्वित्वात्। ततः मलमासात्। तत्र तत्र मलमासमध्ये। अज्ञानेन ज्ञानाज्ञानेन, उपहृतं नष्टम्। तत्र मलमासे सति योऽसौ उत्तरकालः परिदृष्टः शुद्धत्वेन विहितः। जनीगतान्स्व्याधिप्रशमनार्थमिति अत्र जनीगतान्स इत्यपपाठः, रजनीगतान्स इत्येव पाठः साधुः। तथाच रात्रान्स्तारोगप्रशमनार्थमित्यर्थः पृष्टः जिज्ञासितः। विपरीतफलम् उद्देश्यविरोधिफलम्, एतद्दौषधविशेषणम्। दिवापि न पश्यतीति, तथाच रात्रान्स्तारोगनिवृत्तिर्दूरे आस्तां, प्रत्युत पुनर्दिवान्धोऽपि भवतीति भावः। आभासलोकोऽयमित्यपपाठः, आभाषकोऽयं विपरीतार्थप्रकाशकोऽयमित्यर्थः। तत्सदृशत्वे हेतुमाह तस्यापीत्यादि। परमासेष्वेव परसौरमासेष्वेव। शेषैर्मासैरिति दर्शयति परभूतैरित्यादि। तेषां पूर्व्वेषां, शेषपदानभिधेयत्वात् शेषपदवाच्यत्वाभावात् परभूतमास एव। शेषपदाभिधेयतां दृष्टान्तेन दर्शयति वयःशेषे इत्यादि, शेषे वयसि इत्यर्थः। पुत्रपौत्रं पुत्रश्च पौत्रश्च द्वयोः समाहारः पुत्रपौत्रं समाहारे क्लीवलिङ्गत्वम्। आयुःशेषे आयुषोऽवसाने यच्छेषं दशरात्रस्येति तावदेवायुर्भवेदित्युत्तरप्रतीकम्। दशरात्रस्य यः शेषः अन्तोऽवसानो वा तं प्राप्य तावत्कालपर्य्यन्तम् अशुचिर्भवेदिति। शेषशब्दस्य पुंलिङ्गत्वेऽपि न क्षतिः।

सर्व्वथा बाधितं स्यात्*। किञ्च मेषैरित्यधिमासस्य पाते पूर्व्वकालाभिप्रायेण वर्णने पूर्व्वावधेरनिर्देशात् पूर्व्वाषाढ़ादिविहितानामपि शयनादीनामुत्कर्षः स्यात्, तेषां वत्सरान्तरगोचरत्वान्नोत्कर्ष इति चेत् न समानवत्सरग्रहणप्रमाणाभावात्। अव्यवस्थितग्रहणे सर्व्वदैव शयनादुत्कर्षापत्तेराषाढ़ादिविधेर्निर्विषयत्वं स्यादिति। समानवत्सरग्रहणमिति चेत् समानवत्सरग्रहणेऽपि वत्सरादिमासापरिज्ञानाद्दूषणस्य तदवस्थत्वात्, अधिमासावधिवत्सरगणने उत्तरत्रिकाधिमासे तत्पूर्व्वाषाढ़स्य तद्वत्सरानन्तःप्रविष्टत्वात् कथं तत्र कर्त्तव्यशयनोत्कर्षः। तदन्तवत्सरगणने मेषद्वयोरधिमासे(१) तत्पूर्व्वभूतैराषाढ़ादिभिरेकवत्सरत्वात् प्राक्तनमेव शयनादिकमुत्कथ्येत, नतु परभूतमिति विपरीतापत्तेः। पूर्व्वोक्ताभाणकसिद्धिः मासान्तरस्य चाद्यन्तग्रहणे विनि-

(१) तदन्तप्रवेशेन वत्सरगणने उत्तरत्रिकाधिमासे तत्पूर्व्वाषाढ़स्य तु मेषद्वयोरधिमासे च इति क्वचिदादर्शे पाठः।

* तदानीं कर्कटमलमासे। कर्कटप्रथमदिन एव कर्कटप्रथमदिनसम्बन्धितिथावेव। चान्द्रमासस्य तिथिघटितत्वेन सौरदिने तदसम्भवात् 'अमावास्याद्यं यत्र' इति वचनस्यामावास्याद्ययस्य यथाश्रुतसाकल्यामावास्यापरत्वमभिप्रेत्योक्तं, तथाच चतुर्द्दश्यां कर्कटसंक्रान्तौ अमावास्यायाः कर्कटप्रथमदिने विद्यमानत्वात् तत्र चान्द्राषाढ़समाप्तिः सुलभेति भावः। सर्व्वथा बाधितं स्यादिति, तथाच 'आभाकासितपक्षे तु मैत्रश्रवणरेवती। आदिमध्यावसाने तु प्रस्थापोद्वर्त्तनोत्सवा' इति वचने शयनादौ आषाढ़भाद्रकार्त्तिकनियमात् कर्कटमलमासे यदि मलीयश्रावणे हरिशयनं स्यात् तदा आभाकासितपदबोधिताषाढ़ादेः चान्द्रत्वे सौरत्वे वा उभयथापि बाधः स्यात्।

गमनाप्रमाणाभावात्*। तस्माच्छयनादौ चान्द्राषाढादिपरिग्रहमूलानि वचनानि, अतएवोत्कर्षस्य पूर्व्वोऽवधिर्न केनाप्युक्तः। अधिमासात् प्रभृत्येव परस्मिन् सौरे पूर्व्वचान्द्रमासप्राप्तेस्तदाद्योत्कर्षस्य प्राप्तत्वात्। यदा तु चान्द्राषाढभाद्रकार्त्तिकादयः सौराषाढभाद्रकार्त्तिकादिष्वेव प्राप्यन्ते ततःप्रभृत्यनुत्कर्षोऽपि प्राप्त एव। चान्द्रसौरयोर्मेलके प्रायशः क्रियमाणस्य परस्मिन् सौरे पूर्व्वचान्द्रप्राप्तयादिक्रियमाणतयोत्कर्ष इत्युच्यते। उभयमेलके त्वनुत्कर्ष इति। परमार्थस्तु चान्द्रे विहितानां चान्द्र एव सदा करणान्नोत्कर्षापकर्षौ मलिम्लुचापेक्षयापि नोत्कर्षः, तत्पर्य्युदस्त एव चान्द्रे विधानात्। अतएव शयनाद्यर्थञ्चान्द्राषाढपरिग्रहेऽधिमासे सत्यसति वा 'आभाका' इत्यादेः न कस्यचिदपि वचनस्य

---

* दोषान्तरमाह किञ्चेति। शैषैरिति, 'युक्तः शैषैस्तदा मासैरिति' वचनस्थशैषपदैः, इति इत्यस्य, मलमासपाते पूर्व्वावधेरनिर्देशात् अनियतत्वात्। वत्सरान्तरगोचरत्वात् अन्यो वत्सरः वत्सरान्तरं तद्गोचरत्वात्। वत्सरादिमासापरिज्ञानात् वत्सरस्य आदिभूतमासस्य अपरिज्ञानात्। अधिमासावधिवत्सरगणने अधिमासम् आदिभूतं परिकल्प्य वत्सरगणने। तद्वत्सरानन्तःप्रविष्टत्वात् तद्वत्सरमध्यप्रविष्टत्वाभावात्। तदन्तवत्सरगणने अधिमासान्तवत्सरगणने। मेषवृषयोरधिमासे तत्पूर्व्वभूतैः अधिमासाक्रान्तमेषवृषान्यतरगतवैशाखज्यैष्ठान्यतरमासपूर्व्वभूतैरित्यर्थः। एकवत्सरत्वादिति तथाच मेषाधिमासे पूर्व्वज्यैष्ठमासमादाय गणने मेषगतमलीयचान्द्रवैशाखपर्य्यन्तस्य वृषाधिमासे पूर्व्वाषाढ़मादाय गणने वृषगतमलीयचान्द्रज्यैष्ठपर्य्यन्तस्य चैकवत्सरत्वमिति भावः। प्राक्तनमेव शयनादिकं मलमासात् पूर्व्वाषाढ़ादिविहितशयनादिकमेव। न तु परभूतमिति मलमासोत्तराषाढ़ादिविहितशयनादिकं न तु इत्यन्वयः मलमासान्तस्य तन्मते एकवत्सरत्वात्। आभाणकसिद्धिः विपरीतार्थप्रकाशकतासिद्धिरित्यर्थः।

बाधः। तस्मात् सम्भवादोऽपि सम्भवाद एव निरर्थकं विन्दु-दानम्(१)।

जितेन्द्रियस्तु मन्यते।

"मिथुनस्थो यदा भानुरमावास्याद्वयं स्पृशेत्।"

तथा।

"प्राप्ते आषाढ़मासे तु सिनीवालीद्वयं यदा।
द्विराषाढ़ः स विज्ञेयः पतिते चाधिमासके॥"

तथा।

"अमावास्यामतिक्रम्य यदार्कः कर्कटं व्रजेत्।
द्विराषाढ़ं तदा प्राहुः पतिते चाधिमासके॥"

तथा।

"सम्पूर्णे मिथुनेऽधिको यदि भवेन्मासस्तदा कर्कटे शेते" इति वचनैर्मिथुनाधिमासोऽयमेव द्विराषाढ़स्तदैव कर्कटे देव-शयनं नान्यदा। तद्वत्सरे च कन्यायां शक्रोत्सवः, तुलायां दुर्गो-त्सवः, वृश्चिके च देवोत्थानम्। 'सम्पूर्णे मिथुनाधिक' इति वचनात्, एवंविधश्च संसर्गश्चिरतरकालं विना न भवतीति चिरेणैव च द्विराषाढ़ोऽधिमासः। मायुरैश्चायमेव द्विराषाढ़ोऽनुष्ठीयते। यत्तु संवत्सरमध्ये षट्सु मासेषु रविचन्द्रभोगवद्वया प्रतिमासं दिनद्वया-धिक्यात् सार्द्धवर्षद्वये त्रिंशद्दिनवद्वयाधिमासः पतति। तथा च गणितविदः 'गतेऽब्दे द्वितय' इति, स यत्रैव पतति स एव

(१) विज्ञानमिति क्वचिदादर्शे पाठः।

द्विरित्युच्यते। तेन सिंहाधिमासे कन्यायां शक्रोत्थानपार्श्वपरिवर्त्तने। कन्याधिमासे तुलायां दुर्गोत्थानम्। द्विराषाढ़त्वञ्च सौरमानेन न सम्भवति*। एकस्मिन् वत्सरे मिथुनभोगाद्वृत्तेरभावात् स्वरूपतश्च कार्य्यतश्च वाच्यम्। सृष्ट्यादौ हि मधुमासः प्रथमं प्रवृत्तः प्रतिपदादिरिति, तथैव तस्या इज्या विहिता, तत्क्रियानुरोधाच्च मासान्तराणामपि इज्या प्रतिपदुपक्रमविधिबलादेव। तत्र यदि मिथुन एव रवौ प्रतिपद्वयं भवति, तदा "मासि संवत्सरे चैव तिथिर्द्वैधं यदा भवेत्" इति वचनेनोत्तरप्रतिपदः प्राग्-

---

* सम्भ्रमवादीऽपि सम्भ्रमभट्टकल्पितशास्त्रार्थोऽपि सम्भ्रमवाद एव सम्भ्रमो भ्रान्तियुक्तो वादी यत्र सः। विन्दुदानम् अञ्जनशलाकादानं निरर्थकमिति पूर्व्वेणान्वयः। तथाच सर्व्वमज्ञानतिमिरमञ्जनेनानेनोपहतमिति सम्भ्रमभट्टेन प्रागुक्तं तस्योपरि कटाक्षोऽयमिति भावः। जितेन्द्रियमतमुपन्यस्यति जितेन्द्रियस्तु मन्यते इत्यादि। अमावास्याद्वयं अमावास्यान्त्यक्षणद्वयम्। आषाढ़मासे तु सौराषाढ़मासे तु। सिनीवालीद्वयमिह पूर्व्वापरामावास्यान्त्यक्षणद्वयोपलक्षणार्थमेव गृह्यते, न तु चतुर्दशीयुक्तामावास्यामात्रम्। द्विराषाढ़त्वथा प्राञ्च इति आहेति क्रियाध्याहारेणान्वयः। मिथुनाधिमासः मिथुनस्थरव्यारब्धचान्द्राषाढ़ाधिमासः। अयमेव द्विराषाढ़ः द्विराषाढ़प्रयोजक इत्यर्थः। तत्रैव आषाढ़ाधिमास एव। कर्कटे देवशयनं कर्कटगतशुक्लचान्द्राषाढ़ एव देवशयनम्, नान्यदा। कन्यायां कन्यागतचान्द्रभाद्रे। तुलायां तुलागतचान्द्राश्विने। वृश्चिके वृश्चिकगतचान्द्रकार्त्तिके। एवंविधः संसर्गः आषाढ़ाधिमासरूपः। द्विराषाढ़ोऽधिमासः द्विराषाढ़प्रयोजकोऽधिमासः। माथुरैः मथुरावासिपण्डितैः। गतेऽब्दे द्वितये इति, 'गतेऽब्दे द्वितये सार्द्धे पञ्चपञ्चे दिनद्वये। दिवसस्याष्टमे भागे पतत्येकोऽधिमासकः॥' स यत्रैव पतति यस्य मलमासत्वं स द्विश्चान्द्रचैत्रादिर्मलमासत्वं स द्विश्चान्द्रचैत्रादिर्भवतीति भावः। तेन मलमासस्यैकनामकमासद्वयात्मकत्वेन। द्विराषाढ़त्वञ्च सौरमानेन न सम्भवतीति सौरमासस्य द्विरावृत्त्या द्विराषाढ़त्वं न सम्भवतीत्यर्थः।

स्येनाषाढ्यागार्थं ग्रहणात्तस्य त्रिंशत्तिथिसमाप्तत्वात् आषाढ़शेषा-रब्धस्य कर्कटशेषेणैव समापनात् तत्कार्य्यानुवृत्तिपर्य्यन्तं कार्य्यत आषाढ़ इत्येकः, स्वरूपतोऽपरश्च कार्य्यत इति भवति द्विराषाढ़ः। अत एवंविधस्य मासस्य षष्टिदिनत्वं परिशिष्टेन निर्दिष्टम् 'षष्ट्या तु दिवसैर्मास' इत्यादिना। तदेवंविधशास्त्रपौर्व्वापर्य्यालोचनानवहितैरभियुक्तंमन्यैर्माधवाद्येत्यादि कथमुपनिबद्धम् ? अन्यान्यप्येवंविधानि सभ्रमभट्टकल्पितान्युपेक्षणीयानि इत्येतदन्तं, तदयमतिमन्दतमो वादः कथं सुन्दरमतिना जितेन्द्रियेणाभिनन्दितः ? * तथा 'ह्यामावास्यामतिक्रम्येति' स्वोपन्यस्तवचनैरेव पूर्व्वार्द्धेन द्विराषाढ़मेकमभिधाय, पुनः 'पतिते चाधिमासके' इत्यनेनापि क्त्रप्रयोगेन द्विराषाढ़ान्तरस्य मेषवृषयोरप्यधिमास-

---

* तदेवोपपादयति एकस्मिन्नित्यादि। स्वरूपतश्च स्वभावसिद्धः, कार्य्यतश्च कार्य्यानुरोधात्। सृष्ट्यादाविति, मधुमासः प्रथमं प्रवृत्तः प्रतिपदादिरिति, तथाच "चैत्रसितादेरुदयाद्यानोर्दिनमासवर्षयुगकल्पाः। सृष्ट्यादौ लङ्कायां सर्वं प्रवृत्ता दिनेऽर्कस्य॥" तस्य प्रतिपदादेः। इज्या यागविशेषः।

'मासि संवत्सरे चैव तिथिर्द्वैधं यदा भवेत्।
तत्रोत्तरोत्तमो ज्ञेयो पूर्व्वा तु स्यान्मलिम्लुचः॥'

इति सत्यव्रतवचनेन, आषाढ़यागार्थम् आषाढ़त्वेन विहितयागार्थं, तस्य च आषाढ़स्य च। आषाढ़शेषारब्धस्य सौराषाढ़शेषारब्धस्य। कार्य्यानुवृत्तिपर्य्यन्तं कार्य्यसमाप्तिपर्य्यन्तम्। पौर्व्वापर्य्यालोचनानवहितैः पौर्व्वापर्य्यालोचनरहितैः। अभियुक्तंमन्यैः आत्मानं पण्डितं मन्यमानैः। इत्येतदन्तमित्यस्य जितेन्द्रियस्तु मन्यते इत्यनेन प्राक्तनेन सम्बन्धः। अतिमन्दतमो वादः अतिनिकृष्टव्याख्या, मिथुनाधिमास एव द्विराषाढ़स्तदैव कर्कटे देवशयनं नान्यदा इत्येवंरूपः। अभिनन्दितः पुरस्कृतः।

निमित्तस्याभिधानात् कथन्तस्यानादरः ? 'पतिते चाधिमासके' इत्येतावत् एवानर्थकत्वापत्तेः। कथञ्च बह्वनामेव द्विराषाढ-प्रक्रमलिखितानामुत्तरत्रिकाधिमासेऽपि वत्सरान्तरीयशयनादुत्कर्षवचनानां, 'प्रथमेऽङ्गि द्वितीये वेति,' 'उत्तरमयने याते सवितरि' इत्यादीनां सकलप्रामाणिकपरिगृहीतानां सम्भ्रमकल्पितत्वं युक्तमुत्पश्यामहे। किञ्च मिथुनाधिमासे शयनादीनामुत्कर्षो भवतामपि निर्विवाद एव। तदा च किं सौरे शयनादिविधायिकां श्रुतिं परिकल्प्याधिमासनिमित्तोत्कर्षार्था अपरापि* परिकल्प्यतामाहोस्विदाषाढादिपदस्य लाक्षणिकत्वं कल्पनालाघवा-

---

* आषाढमासं यद्विराषाढत्वमुक्तं तद्दूषयितुमुपक्रमते तथाहीत्यादि। पूर्वार्द्धेन इति, 'प्राप्ते आषाढमासे तु सिनीवालीहयं यदा। द्विराषाढः स विज्ञेयः' इति, 'अमावास्यामतिक्रम्य यदार्कः कर्कटं व्रजेत्। द्विराषाढस्तदा प्राज्ञ' इति पूर्वार्द्धेन। क्त्रप्रयोगेण अतीतार्थक्त्रप्रत्ययसाधितपतिते इति शब्देन। द्विराषाढान्तरस्य अन्यो द्विराषाढः द्विराषाढान्तरम्। अधिमासनिमित्तस्य अधिमासः निमित्तं यस्य, एतद्विराषाढान्तरस्य विशेषणम्। एतावत एव पतिते चाधिमासके एतद्भागस्यैव। वत्सरान्तरीयशयनादुत्कर्षवचनानां, 'कन्यासिंहकुलीरेषु मलमासौ यदा भवेत्। आगामिनि तदा वर्षे कुलीरे माधवः स्वपेत्' इत्यादिवचनानाम्। प्रथमेऽङ्गि द्वितीये चेति, 'प्रथमेऽङ्गि द्वितीये वा शुक्ले मेषमियाद्रविः। द्विराषाढस्ते विष्णुः परं कर्कटके स्वपे'दिति। उत्तरमयने याते सवितरि इति, 'उत्तरमयने याते सवितरि पतनं यदाधिमासस्य। भवति तदा द्विराषाढः शेते कर्किणि सुरारातिः' इति। सम्भ्रमकल्पितत्वं युक्तमुत्पश्यामहे सम्भ्रमभङ्गसम्भवद्विराषाढत्वमपि युक्तम्, उत्पश्यामहे स्वीकुर्मह इति। निर्विवादः अवश्यं स्वीकार्यः। तदा च सौरे शयनादिविधायिकां श्रुतिं परिकल्प्येति, तथाच तदैव कर्कटे देवशयनं नान्यदेति स्वयमुक्तत्वादिति भावः। अपरापीति अपरा श्रुतिरपीत्यर्थः।

दङ्गीक्रियताम् । तच्च कल्पनातो लक्षणैव श्रेयसी । तेन शक्रोत्सवादिषु चान्द्रपरिग्रहे सति न्यायमूलान्येव वचनानि कथमन्यथा क्रियन्ते ? यच्च द्विराषाढत्वसमाधानमुक्तं स्वरूपतः कार्य्यतश्चेति तदयुक्तम् । मिथुने अधिमासपाते उत्तरप्रतिपदाषाढेज्यायाः प्रवृत्त्यनुपपत्तेः । सूत्र्यादौ हि चैत्रेज्यायाः प्रतिपदि प्रवृत्तत्वादाषाढेज्यायाः प्रतिपदि प्रवृत्तिं प्रामाणिको वदति* । तत्रासौ प्रष्टव्यः चैत्रेज्यायाः प्रतिपदि प्रवृत्तिः किं चैत्रादित्वात् प्रतिपद्रूपत्वाद्वा ? चैत्रादिप्रतिपद्रूपत्वाद्वा ? तत्र यदि प्रथमस्तदा प्रतिपदोऽविधिसंस्पर्शात्, अर्थसिद्धत्वात्तिथ्यन्तरस्यापि चैत्रादित्वे तत्र कर्म्मणः कार्य्यत्वात् कथमाषाढीयद्वितीयप्रतिपद्यनादिभूतायां तदिज्यारम्भसम्भावना ? यथा त्रिः प्रथमामन्वाहेति, निरुक्तमामन्वाहेति स्थानधर्म्मत्वाद्दविशेषस्यानादरो-

---

* स्वमतमाह आह्नीखित् उत वा इत्यादि । आषाढादिपदस्य द्विराषाढान्तर्गताषाढादिपदस्य, लाक्षणिकत्वकल्पना गौणमुख्यत्वेन श्रावणादिसाधारण्येन लाक्षणिकत्वकल्पनालाघवात् अङ्गीक्रियतामित्यन्वयः । तच्च कल्पनातः श्रुतिद्वयकल्पनातः श्रेयसी लघुतरा। दूषयति तदयुक्तमिति । उत्तरप्रतिपदि शुद्धाषाढप्रतिपदि, आषाढेज्या आषाढविहितयागविशेषः । तच्च प्रवृत्त्यनुपपत्तेरिति, तथाच मिथुन एव रवौ शुक्लप्रतिपद्वयं भवतीत्यादिना कार्य्यानुवृत्तिपर्य्यन्तः कार्य्यत आषाढ इत्येकः इति जितेन्द्रियेण प्राक् उक्तं, ततश्चास्य प्रकृताषाढत्वास्वीकारे कार्य्यमाचार्यं स्वीकारेऽपि प्रकृताषाढ एव पुरुषस्य प्रवृत्त्या कार्य्यानुपयोग्याषाढे स्वतः प्रवृत्तिर्न भवितुमर्हतीत्याशय इति भावः । सूत्र्यादौ हीति चैत्रसितादिरुदयाद्गतीरित्यादिवचने चैत्रसम्बन्धिशुक्लप्रतिपदि युगाद्यारम्भात् । इज्याया अपि तत्रैवाकाङ्क्षितत्वेनाह, चैत्रेज्यायाः प्रतिपदि प्रवृत्तत्वादित्यादि ।

र्थसिद्धत्वात्*। प्रतिपद्रूपत्वाच्चेत् तदा चैत्रत्वस्याप्रयोजकत्वात्;

---

* तत्र चैत्रेज्यादौ प्रष्टव्यविषयं व्याकरोति चैत्रेज्याया: प्रतिपदि प्रवृत्तिरिति। तत्र त्रिधा विकल्प्यति चैत्रादित्वादित्यादि। तत्राद्य चैत्रादित्वेन विधि: उत प्रतिपत्त्वेन किंवा चैत्रादिसम्बन्धिप्रतिपत्त्वेन। प्रथम: यदि चैत्रादित्वेन विधि:। अविधिरप्राप्तं विधिरप्राप्तभावात् अविधेयत्वादित्यर्थ:। अर्थसिद्धत्वात् चैत्रादिसम्बन्धित्वेन प्रयोजनसिद्धत्वात्। तत्र तिथ्यन्तरेऽपि कर्मण: इज्यादिकर्मण: कार्यत्वात् करणीयत्वात्। कथमाषाढ्यादीयेत्यादि, तथाच चैत्रादित्वादित्यनेनाषाढ्यादिरूपेऽपि तदीयप्रथमप्रतिपद्ग्रहणमेव संसुचितमेव प्रथमीपस्थितपरित्यागे प्रमाणाभावादिति भाव:। अत्र दृष्टान्तं दर्शयति, यथा चि: प्रथमामित्यादि। अन्वाह अध्यसेत, स्थानधर्मत्वात् प्राथम्यधर्मत्वात्।

'चि: प्रथमामन्वाह' इत्यादिषु स्थानधर्मताधिकरणम्।

सू. अभ्यास: सामिधेनीनां प्राथम्यात् स्थानधर्म: स्यात्॥ ३३॥

भा. स्त्री दर्शपूर्णमासौ, तत्र सामिधेनी: प्रकृत्योच्यते, 'चि: प्रथमामन्वाह' चिरुत्तमामन्वाह इति। तत्रैषोऽर्थ: सांशयिक:,—किम् ऋग्धर्म एष:,—यत्र-तत्रस्था 'प्र वो वाजा' चिरभ्यसितव्या, उत स्थानधर्म:,—या अन्याऽपि प्रथमसुच्यते, सा चिरभ्यसितव्या? इति। कुत: संशय:? उभयथोपपत्ते:,—यद्येवम् अभिसम्बन्ध: क्रियते,—या असौ उच्चारितानां सामिधेनीनां प्रथमसुच्चारिता, सा चिरभ्यसितव्येति, तत: प्र वो वाजाया ऋचो धर्म:? अथैवं विज्ञायते प्राथम्य संयुक्तं चि: ब्रूयादिति ततो वचनस्य स्थानधर्मता, किन्नावत् प्राप्तम्? ऋचो धर्म इति। कुत:? प्राथम्यस्य व्यक्त्या सम्बन्धात्, व्यक्तेरभ्यासेन। कथमवगम्यते? स्त्रीलिङ्गनिर्देशात्, व्यक्तिविशेषो हि स्त्री नाम, यदि तद्विशेषणं प्राथम्यं स्यात्, ततो लिङ्गविशेषनिर्देशोऽवकल्पते, साऽपि स्त्री अभ्यासेन सम्बध्यते; अथ प्रथममनुब्रुवता चिरभ्यसितव्यमिति ततो व्यक्तिविशेषो न विवक्ष्येत, तत्र स्त्रीलिङ्गविशेषनिर्देशो नोपपद्यते। अपि च वाक्यभेद: प्रसज्येत। प्रथमसुक्तं चिरभ्यसितव्यं, प्रथमसुक्ता ऋक् चिरभ्यसितव्येति; सत्यञ्चे पुन: प्राथम्यलक्षिताया ऋचो धर्म उच्यते, तत्रैककार्यविधाने न भवेद्वाक्यभेद:। अपिच श्रुत्या प्राथम्येन स्त्री सम्बध्यते, वाक्येनाभ्यास:; तस्मात् ऋग्धर्मो यत्र-तत्रस्था 'प्र वो वाजा' चिरभ्यसितव्येति। एवं

मासान्तरीयप्रतिपद्यपि मासान्तरेज्याप्रसक्तेस्तन्मासेज्यात्वव्या-

---

प्राप्ते ब्रूमः,—योऽयं सामिधेनीनां प्रथमायास्त्रिरभ्यास उच्यते, स प्रथमस्थाननिमित्तः धर्मः, न ऋचः कस्याश्चित् जातिनिमित्तः। कुतः? न हि कृत्स्नेऽपि ऋग्वेदे प्रथमा नाम काचित् ऋक् विद्यते, या त्रिरभ्यस्येत, तत्र प्राथम्यम् ऋग्लक्षणार्थं स्यात्, इतरस्मिन् पक्षे युतिर्न लक्षणा, युतिश्च व्याप्यसी लक्षणायाः, तस्मात् अस्मत्पक्षः। अथ यदुक्तं—स्त्रीलिङ्गसम्बन्धादन्यत्र एव युतिः, वाक्यं च न भिद्यते, स्त्रीलिङ्गोपपत्तेश्चेति। अत्रोच्यते, गुणवचनानां हि शब्दानामाश्रयतो लिङ्गवचनानि भवन्तीति अविशिष्यमाणायामपि व्याप्तौ यदवश्यं प्राप्तं लिङ्गं, तत् आश्रयभूतं गुणस्य भवति; अविधिस्थितेऽपि तस्मिन् लिङ्गविशेषनिर्देशोऽनुवादभूतो भवत्येव; यथा, शुक्लः पुमान्, शुक्ला स्त्री, शुक्लं नपुंसकं; शुक्ल एकः, शुक्लौ द्वौ, शुक्ला बहव इति; शुक्लां शाटीमानयेति; यद्यपि शाट्याद्यानयनं न विधीयते, शुक्लसम्बन्धमात्रविधित्सा भवति, न तत्र लिङ्गेन विशेषणं क्रियते, तथापि अनुवादभूतः स्त्रीलिङ्गनिर्देशो भवत्येव,—शुक्लामानयेति अनुवादभूतत्वाच्च न वाक्यभेदो भविष्यति। एवं च सति, यद्यपि प्राथम्यस्य स्त्रीलिङ्गसम्बन्धः श्रौतस्तथापि प्राथम्यस्यैवाभ्यासेन सम्बन्धो न लिङ्गस्य; यदि लिङ्गस्यैतेन सम्बन्धोऽभिधीयते, प्राथम्यस्यानुवादता कल्प्येत। प्राथम्यसम्बन्धेऽप्यभिधीयमाने वाक्यं भिद्येत। अपिच, नैवात्र विवदितव्यं, प्रातिपदिकविशेषणं हि स्त्रीशब्दः, स्त्रियां यत् प्रातिपदिकं वर्त्तते, ततः टाबादय इति, न विशेषणस्य पदान्तरेण सम्बन्धो भवति, यथा राजपुरुषो गच्छतीति। यदा तु प्राथम्यस्याभ्यासेन सम्बन्धः, तत्र प्राप्तमनुवदते स्त्रीत्वं, यानि सामिधेनीषु वचनानि, ऋचत्वाः, स्त्रीलिङ्गश्च ऋक्शब्दः, तत्र यत् प्रथमं वचनं, तस्याश्चयऋक्, गुणवचनानाञ्च शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति, इत्यविशेषितायामपि स्त्रीलिङ्गं भविष्यतीति यत्प्रथमवचनं, तत् चिराइति, स्त्री च सा ऋक् सामिधेनी; तस्मात् 'चिः प्रथमामन्वाह' इति प्राप्तस्य लिङ्गस्यानुवादः,—'चिः प्रथमामन्वाह चिरुत्तमाभाः पञ्चदश सम्पद्यन्ते' इति पञ्चदशानां सामिधेनीनां सम्पत्तये चिर्वचनम् उच्यमानं परिपूर्णाया ऋचो भवति, न ऋगवयवस्य, परिपूर्णा च समिध्यनवती न ऋगवयवः। तस्मात् प्राप्तानुवादो लिङ्गस्येति प्राथम्यस्य धर्मो न ऋचः। (६।२।६ अं।)

इति:*। चैत्रे हि क्रियमाणा चैत्रेज्या भवति। चैत्रादिप्रतिपदूपत्वाच्चेत् नैतदपि तिथ्यन्तरस्य चैत्रादित्वे क्रियालोपापत्तेः, यथैव हि फाल्गुनेऽधिमासस्तदैव चैत्रादिः प्रतिपद्यते, तेन पूर्वमधिमासे सति परमासेज्या प्रतिपदि प्रवर्त्तत इति। मिथुनाधिमासे श्रावणेज्याया: प्रतिपदि प्रवृत्तिरिति। न तत्राषाढेज्याप्रसक्तिस्तदादित्वाभावात्। न चैवंविधो विधिरप्यस्ति अनुपन्यासात्। अथ चैत्रे या प्रतिपत् तत्रारब्धा इति चेत् ततः चान्द्रचैत्रारब्धा तत्रैव च समापनीयेति तदिज्यैव स्यान्न सौरे, चैत्रेज्या सौर एव हि मासे प्रारम्भसमाप्तिभ्यां कर्म्मणस्तन्मासीयत्वं भवति नान्यथा† सूर्य्यग्रहादिनिमित्तस्यैव कर्म्मणः।

---

* द्वितीयकल्पं दूषयति प्रतिपदूपत्वादित्यादि। चैत्रस्याप्रयोजकत्वादिति, तथाच प्रतिपदूपत्वेन इज्याविधौ चैत्रपदाश्रवणात् सुतरामप्रयोजकत्वमिति भावः। सूत्र्यादौ प्रथमप्रवृत्तचैत्रस्य इज्याधिधावप्रवेशे दोषं दर्शयति, मासान्तरीयेत्यादि। व्याकृतिः व्याघातः।

† तृतीयकल्पं दूषयति चैत्रादिप्रतिपदूपत्वाच्चेदित्यादि। तथाच यदि चैत्रस्य प्रथमदिनजातप्रतिपत्त्वेन विधिः स्यात्, तदा तिथ्यन्तरस्य चैत्रप्रथमदिनजातत्वे चैत्रेज्या न स्यादित्याह तिथ्यन्तरस्येत्यादि। चैत्रादिप्रतिपद्यते चैत्रस्य प्रथमदिने प्रतिपत् सम्भवति। पूर्व्वाधिमासे सति अव्यवहितपूर्व्वमासस्याधिमासत्वे सतीत्यर्थः। प्रतिपदि वर्त्तते तन्मासीयप्रथमदिनजातप्रतिपदि वर्त्तते इत्यर्थः। अनुपन्यासात् एतद्रूपत्वेन विधिवाक्याश्रवणात्। चैत्रे या प्रतिपत् तत्रैवारब्धा इति, तथाच प्रथमप्राप्तिर्न विवक्षितेति भावः। चैत्रे या प्रतिपत् चैत्रसम्बन्धिनी या प्रतिपत् तत्र प्रतिपदि आरब्धा इज्येति चेन्न तत्रैव चान्द्रचैत्र एव समापनीय इति, समापनीया इति चेत् तदिज्यैव स्यात्। तदैव चान्द्रचैत्रेज्या न सौरचैत्रेज्या न सा सौरचैत्रेज्या। तन्मासीयत्वं सौरचैत्रमासीयत्वं नान्यथा, तथाच चान्द्रचैत्रारब्धा सौरचैत्रसमापनीया सौरचैत्रेज्या न भवतीत्यर्थः।

यच्च, मासि संवत्सरे चैवेति वचनं तत्तिथिविशेषविहिते कर्म्मणि तिथिद्वैधे उत्तरग्रहणार्थमस्य च सौरमासयागत्वात् नान्तरीयकः प्रतिपत्सम्बन्धो न विवक्षितः। यत्र तु चिःपरिवृत्तत्र्यनीकाविधौ भागकर्म्मत्वपक्षे ऐन्द्रवायवाग्रं प्रथममाहुरिति श्रुतमप्यहो न विवक्षितं कथं तत्रायुतैव प्रतिपत्तिथिर्विवक्ष्यताम्*। किञ्च प्रतिपद्द्वैधे भवदुत्तरग्रहणं तिथ्यन्तराणान्तन्मासे द्वैधाभावात् मिथुनस्थानामेव ग्रहणात् कर्कटे कथं तिथिकार्य्याणि ? न च प्रतिपदुत्कर्षात् तिथ्यन्तरकार्य्याणामुत्कर्ष इति वाच्यं, क्रमानुरोधेन कालबाधापत्तेः। प्रतिपन्मात्रानुरोधेन च सकलतिथि-

---

* अत्र दृष्टान्तं दर्शयति सूर्य्यग्रहादीत्यादि, आदिना चन्द्रग्रहणपरिग्रहः। तथाच ग्रहणनिमित्तकर्म्मणः ग्रहणेतरकाले समापनमनुचितमेवेति भावः। सौरमासयागत्वात् सौरमासकरणीययागत्वात्। नान्तरीयकः उद्दिश्यतासम्बन्धेन प्रकृत्यभावत्वे सति प्रकृतिजन्यफलशालित्वं, यथा ओदनं पक्तुकामस्योदनसहभावपाकः। प्रकृतेः दृष्टान्तार्थमाह, चिःपरिवृत्तत्र्यनीकाविधौ भागकर्म्मत्वपक्षे ऐन्द्रवायवाग्रं प्रथममहरिति। त्र्यनीकाधिकरणं विस्तरं मीमांसादर्शनस्य दशमाध्यायस्य पञ्चमपादे उक्तं संक्षिप्य प्रकृतोपयोगिमात्रमभिधीयते चिः परिवृत्त इति। अथेतरेषां नवानामङ्गानैन्द्रवायवाग्रं प्रथममहः। अथ शुक्रायम् अथायुयणायम् अथैन्द्रवायवायम्, अथ शुक्रायम् अथायुयणायम् अथैन्द्रवायवायम्, अथ शुक्रायम् अथायुयणायम् अथैन्द्रवायवाग्निमित्यनेन चिः परिवृत्त इत्यर्थः। त्र्यनीकाविधौ त्रीणि अनीकानि अङ्गानि ऐन्द्रवायवशुक्रायुयणरूपाणि यस्यां सा त्र्यनीका तत्र विधौ विधित्वस्वीकारे। भागकर्म्मत्वपक्षे ऐन्द्रवायवाग्रं प्रथममहः अथ शुक्रायम् अथायुयणायमित्यादिना कर्म्मणो विभागकल्पने। श्रुतमप्यहः प्रथममहः न विवक्षितमिति अन्यथा कर्म्मविभागानुपपत्तेरिति भावः। कथं तत्रैवेत्यादि तत्र अयुतैव प्रतिपत्तिथिः कथं विवक्षितेत्यन्वयः। तथाच मासि संवत्सरे चैव तिथिद्वैधमित्यादिवचने तिथित्वेन सामान्यतः श्रुतापि विशेषरूपेण प्रतिपत्तिथिरयुतैव इति भावः।

कार्य्याणां कालबाधः स्यात्। 'अग्निमारुतादूर्ङ्मनुयाजैश्चरन्ती'ति* तत्रापि कालबाधेनैव क्रमानुरोधानुत्कर्षः। न त्वनङ्क्रमानुरोधेनाङ्गकालबाधः। अङ्गत्वपक्षेऽपि क्रमस्य कालाज्जघन्यत्वात्। वचनस्थैकतिथिकार्य्यमात्रगोचरतयाप्युपपत्तेः।

* ननु तिथिदैधमित्यनेन सामान्यतः श्रुतापि प्रथमोपस्थितत्वात् श्रुतैव कथमश्रुतैवेत्युक्तं सङ्गच्छते इत्यत आह किञ्चेति। उत्तरग्रहणम् उत्तरप्रतिपदग्रहणं भवतु इत्यन्वयः। तिथ्यन्तराणां प्रतिपन्निशीथानां तन्मासे मिथुनसंज्ञमासे मिथुनस्थानां तिथीनां तिथ्यन्तरकार्य्याणामुत्कर्ष इति भावः। सांदृष्टिकन्यायादिति शेषः। सकलतिथिकार्य्याणां कालबाधः स्यादिति तथाच केवलप्रतिपदनुरोधेन सकलतिथिकालबाधोऽन्याय्य इति भावः। अत्र दृष्टान्तं दर्शयति अग्निमारुतादूर्ङ्मनुयाजैश्चरन्तीत्यादि। तथाच तदधिकरणं मीमांसादर्शनस्य चतुर्थाध्यायीयद्वतीयपादे उक्तं यथा—

अनुयाजादीनामाग्निमारुतीर्ङ्कालताधिकरणम्।

सू.—अनुत्पत्तौ तु कालः स्यात्प्रयोजनेन सम्बन्धात्।

भा.—ज्योतिष्टोमे श्रूयते—"आग्निमारुतात् ऊर्ङ्मनुयाजैश्चरन्ति," "प्रहृत्य परिधीन् जुहोति ह्वारियोजनम्" इति। तत्र सन्देहः—किम् अङ्गम् विधीयते, उतः कालः? इति। अङ्गविधाने श्रुतिः कालविधानेन लक्षणा, तस्मात् अङ्गविधानम् इति प्राप्ते

भा.—ब्रूमः, अनुत्पत्तिवाक्ये "कालः स्यात्," अग्निमारुतं सोमाङ्गम् अनुयाजाः पशवङ्गं, तत्र न तयोः परस्परेण सम्बन्धः। तथा परिधयः पशवङ्गं ह्वारियोजनम् अन्यदेव प्रधानम्। अनुयाजः आग्निमारुतश्च प्राप्तम्। आनन्तर्य्यमेव तयोर्न प्राप्तं, तत् विधीयते; तथा ह्वारियोजनस्य परिधिप्रहरणस्य च। एवञ्च सति, न ह्वारियोजनस्य परिधिप्रहरणेन कश्चिदुपकारः क्रियते, ह्वारियोजनेन वा परिधिप्रहरणस्य। ननु परिधिप्रहरणस्य उपरिष्टाद्भावेन तस्य उपक्रियते इति। उच्यते, न हि उपरिभावार्थं परिधिप्रहरणम् अनुष्ठेयम् विद्यते एव, एतत् पशवर्थं, तस्मिंश्च सति तस्य उपरिभावो विद्यते एव इति। तस्मात् कालार्थः सम्बन्धः इति। (४।३।१५ अ.)

तस्मात् कथं प्रतिपद्द्वये द्वितीयप्रतिपदो ग्रहणम्? न च शयनादेरिव मासेज्यायाः पूर्व्वस्य मलमासत्वादुत्तरक्रिया तथाविधविधानाभावात् लक्ष्मीप्रबोधादीनामिव मलिम्लुचेऽपि तत्क्रिया स्यात्। अननुष्ठानमेव प्रतिष्ठादेरिव, तस्मान्न कार्य्यतो द्वितीय आषाढ़ः। न च शयनादिकार्य्यसम्बन्धादेरिव द्विराषाढ़ता। सति द्विराषाढ़े तद्विधानात् अन्योन्याश्रयापत्तेः*। किञ्च यदामावास्यामतिक्रम्य रात्रौ प्रतिपदि कर्कटसंक्रान्तिस्तदा परदिनप्रतिपदः कर्कटसम्बन्धा'न्मासि संवत्सरे चैवे'त्येतद्विषयत्वाभावान्मिथुन एवाशुचौ शुचिमासेज्येति। अमावास्यातिक्रमेऽपि द्विराषाढ़त्वाभावात्† स्वापावर्त्तप्रबोधानाञ्च सङ्कल्प-

---

* अत्र यथा कालबाधो न स्वीक्रियते तथा प्रकृतेऽपीति दृष्टान्ते कालबाधेनेत्यादि। न चेति न ह्यौत्यर्थः, अस्य तु उत्तरक्रियायामन्वयः; तथाच शयनादीनां मलमासे निषेधात् यथा उत्तरमासे कर्त्तव्यता नाच मासेज्यायां तथा। अत्र हेतुमाह तथाविधविधानाभावादित्यादि। लक्ष्मीप्रबोधादीनामिव—'अमावास्यां तुलादित्ये लक्ष्मीर्निद्रां विमुञ्चति' इति वचने तुलादित्यगतामावास्यायां प्रबोधश्रुतेः यथा लक्ष्मीप्रबोधस्य मलमासे कर्त्तव्यता तद्वन्मासेज्याया अपि मलमासे कर्त्तव्यता; किंवा प्रतिष्ठादेरिव अननुष्ठानं, तथाच—'मासि मलिम्लुचेऽप्येवं यजेद्देवीं सशङ्कराम्। किन्तु नीढ्यापनं कार्य्यमित्याह भगवान् शिवः॥' न चेति न ह्यौत्यर्थः। अन्योन्याश्रयापत्तेरिति, तथाच—'द्विराषाढ़ः स विज्ञेयः विष्णुः स्वपिति कर्कटे' इत्यादिवचनेन कर्कटादौ हरेः शयनादिविधानादेव द्विराषाढ़ो वा स्यात्। तदा सत्येव द्विराषाढ़े तद्विधानमुपपद्यते इति शयनादिविधानज्ञानसापेक्ष्यद्विराषाढ़ज्ञानं, द्विराषाढ़ज्ञानसापेक्ष्यशयनादिविधानमित्यन्योन्याश्रयापत्तिरिति भावः।

† दोषान्तरमाह किञ्चेति। 'अमावास्यामतिक्रम्येत्यादि'; 'मासि संवत्सरे चैव'

रूपत्वेन मलिम्लुचेऽपि निषेधात्। उत्तरत्र द्विराषाढ़त्वे सति विधानाद्देवशयनं लुप्येत। यच्च सरूपकार्य्याभ्यां द्विराषाढ़मभिधाय षष्टिदिनत्वमुक्तं तदसम्बद्धम्; षष्ट्या तु दिवसैर्मास इत्यनेनाहोरात्रपरो वा दिवसशब्दस्तिथिपरो वेत्युभयथापि न षष्टिसंख्यतानियमः। चान्द्रस्य नियतत्रिंशत्तिथिसंख्यत्वेऽपि सौरस्य तदूनाधिकाहोरात्रसंख्यस्य सम्भवात्। वैशाखादिषु द्वात्रिंशत्तिथिभिरहोरात्रैर्वा प्रायशः सौरमासदर्शनात्। तस्माज्जितेन्द्रियोक्तोऽपि द्विराषाढ़ोऽसुन्दरतया मन्दैरिवाभिनन्दनीयः। विद्वद्भिस्तु यथोक्तसकलपर्य्यालोचनेनास्मदुपदर्शितद्विराषाढ़कल्पो निर्विकल्पमादरणीयः। अयमेवार्थो दीक्षितधवलैरप्युक्त इति *।

---

इत्येतद्विषयत्वादिति। तथा चायमाशयः—रात्रौ प्रतिपदि कर्कटसंक्रान्तिरित्यनेन, 'आसुरी रात्रिरत्यच' इत्यादिवचनेन विशेषविहितेतरकर्म्मणि रात्रेः पर्य्युदस्ततया रात्रिवृत्तिप्रतिपदः कर्म्मयोग्यता नास्तीति प्रतिपादितम्। तथाच—

'मासि संवत्सरे चैव तिथिद्वैधं यदा भवेत्।

तत्रोत्तरोत्तमा ग्रेया' इति वचने यत्तिथिद्वैधमुक्तं तद्विविधं, शुद्धाशुद्धभेदेनैकविधं, खण्डद्वयेनापरविधञ्च। खण्डद्वयमभिप्रेत्य निषेधयति एतद्विषयत्वाभावादिति। रात्रिवृत्तिप्रतिपदः कर्म्मायोग्यतया द्वैधानुदयात्। मिथुन एवाशुचौ मिथुनमलमास एवेत्यर्थः, शुचिमासेज्या आषाढ़मासेज्या, 'ज्यैष्ठ शुक्लः शुचिस्त्वयमाषाढ़े' इति कोषात्। द्विराषाढ़त्वाभावादिति। तथाच कार्य्यत एव जितेन्द्रियेण द्विराषाढ़त्वाङ्गीकारात् सौरमासेज्यायाः मलमासे निषेधाभावेन उत्तरमासि कर्त्तव्यत्वाभावात् मलमासे सत्यपि तत्कर्म्मणि द्विराषाढ़त्वाभावः सुतरामेवेति भावः।

* द्विराषाढ़त्वाभावे चापरमपि दोषं दर्शयति 'स्नापावर्त्तप्रबोधादीनाञ्चेत्यादि'। सदृत्यरूपत्वेन वैधरूपत्वेन। देवशयनं लुप्येत इति, द्विराषाढ़त्वाभावादिति, प्रागुक्त-

रूपत्वेन मलिम्लुचेऽपि निषेधात्। उत्तरत्र द्विराषाढ़त्वे सति विधानाद्देवशयनं लुप्येत। यच्च सरूपकार्य्याभ्यां द्विराषाढ़मभिधाय षष्टिदिनत्वमुक्तं तदसम्बद्धम्; षष्ट्या तु दिवसैर्मास इत्यनेनाहोरात्रपरो वा दिवसशब्दस्तिथिपरो वेत्युभयथापि न षष्टिसंख्यतानियमः। चान्द्रस्य नियतत्रिंशत्तिथिसंख्यत्वेऽपि सौरस्य तदूनाधिकाहोरात्रसंख्यस्य सम्भवात्। वैशाखादिषु द्वात्रिंशत्तिथिभिरहोरात्रैर्वा प्रायशः सौरमासदर्शनात्। तस्माज्जितेन्द्रियोक्तोऽपि द्विराषाढ़ोऽसुन्दरतया मन्दैरिवाभिनन्दनीयः। विद्वद्भिस्तु यथोक्तसकलपर्य्यालोचनेनास्मदुपदर्शितद्विराषाढ़कल्पो निर्विकल्पमादरणीयः। अयमेवार्थो दीक्षितधवलैरप्युक्त इति *।

---

इत्येतद्विषयत्वादिति। तथा चायमाशयः—रात्रौ प्रतिपदि कर्कटसंक्रान्तिरित्यनेन, 'आसुरी रात्रिरत्यच' इत्यादिवचनेन विशेषविहितेतरकर्म्मणि रात्रेः पर्य्युदस्ततया रात्रिवृत्तिप्रतिपदः कर्म्मयोग्यता नास्तीति प्रतिपादितम्। तथाच—

'मासि संवत्सरे चैव तिथिद्वैधं यदा भवेत्।

तत्रोत्तरोत्तमा ग्रेया' इति वचने यत्तिथिद्वैधमुक्तं तद्विविधं, शुद्धाशुद्धभेदेनैकविधं, खण्डद्वयेनापरविधञ्च। खण्डद्वयमभिप्रेत्य निषेधयति एतद्विषयत्वाभावादिति। रात्रिवृत्तिप्रतिपदः कर्म्मायोग्यतया द्वैधानुदयात्। मिथुन एवाशुचौ मिथुनमलमास एवेत्यर्थः, शुचिमासेज्या आषाढ़मासेज्या, 'ज्यैष्ठ शुक्लः शुचिस्त्वयमाषाढ़े' इति कोषात्। द्विराषाढ़त्वाभावादिति। तथाच कार्य्यत एव जितेन्द्रियेण द्विराषाढ़त्वाङ्गीकारात् सौरमासेज्यायाः मलमासे निषेधाभावेन उत्तरमासि कर्त्तव्यत्वाभावात् मलमासे सत्यपि तत्कर्म्मणि द्विराषाढ़त्वाभावः सुतरामेवेति भावः।

* द्विराषाढ़त्वाभावे चापरमपि दोषं दर्शयति 'स्नापावर्त्तप्रबोधादीनाञ्चेत्यादि'। सदृत्यरूपत्वेन वैधरूपत्वेन। देवशयनं लुप्येत इति, द्विराषाढ़त्वाभावादिति, प्रागुक्त-

रूपत्वेन मलिम्लुचेऽपि निषेधात्। उत्तरत्र द्विराषाढ़त्वे सति विधानाद्देवशयनं लुप्येत। यच्च सरूपकार्य्याभ्यां द्विराषाढ़मभिधाय षष्टिदिनत्वमुक्तं तदसम्बद्धम्; षष्ट्या तु दिवसैर्मास इत्यनेनाहोरात्रपरो वा दिवसशब्दस्तिथिपरो वेत्युभयथापि न षष्टिसंख्यतानियमः। चान्द्रस्य नियतत्रिंशत्तिथिसंख्यत्वेऽपि सौरस्य तदूनाधिकाहोरात्रसंख्यस्य सम्भवात्। वैशाखादिषु द्वात्रिंशत्तिथिभिरहोरात्रैर्वा प्रायशः सौरमासदर्शनात्। तस्माज्जितेन्द्रियोक्तोऽपि द्विराषाढ़ोऽसुन्दरतया मन्दैरिवाभिनन्दनीयः। विद्वद्भिस्तु यथोक्तसकलपर्य्यालोचनेनास्मदुपदर्शितद्विराषाढ़कल्पो निर्विकल्पमादरणीयः। अयमेवार्थो दीक्षितधवलैरप्युक्त इति *।

---

इत्येतद्विषयत्वादिति। तथा चायमाशयः—रात्रौ प्रतिपदि कर्कटसंक्रान्तिरित्यनेन, 'आसुरी रात्रिरत्यच' इत्यादिवचनेन विशेषविहितेतरकर्म्मणि रात्रेः पर्य्युदस्ततया रात्रिवृत्तिप्रतिपदः कर्म्मयोग्यता नास्तीति प्रतिपादितम्। तथाच—

'मासि संवत्सरे चैव तिथिद्वैधं यदा भवेत्।

तत्रोत्तरोत्तमा ग्रेया' इति वचने यत्तिथिद्वैधमुक्तं तद्विविधं, शुद्धाशुद्धभेदेनैकविधं, खण्डद्वयेनापरविधञ्च। खण्डद्वयमभिप्रेत्य निषेधयति एतद्विषयत्वाभावादिति। रात्रिवृत्तिप्रतिपदः कर्म्मायोग्यतया द्वैधानुदयात्। मिथुन एवाशुचौ मिथुनमलमास एवेत्यर्थः, शुचिमासेज्या आषाढ़मासेज्या, 'ज्यैष्ठ शुक्लः शुचिस्त्वयमाषाढ़े' इति कोषात्। द्विराषाढ़त्वाभावादिति। तथाच कार्य्यत एव जितेन्द्रियेण द्विराषाढ़त्वाङ्गीकारात् सौरमासेज्यायाः मलमासे निषेधाभावेन उत्तरमासि कर्त्तव्यत्वाभावात् मलमासे सत्यपि तत्कर्म्मणि द्विराषाढ़त्वाभावः सुतरामेवेति भावः।

* द्विराषाढ़त्वाभावे चापरमपि दोषं दर्शयति 'स्नापावर्त्तप्रबोधादीनाञ्चेत्यादि'। सदृत्यरूपत्वेन वैधरूपत्वेन। देवशयनं लुप्येत इति, द्विराषाढ़त्वाभावादिति, प्रागुक्त-

रूपत्वेन मलिम्लुचेऽपि निषेधात्। उत्तरत्र द्विराषाढ़त्वे सति विधानाद्देवशयनं लुप्येत। यच्च सरूपकार्य्याभ्यां द्विराषाढ़मभिधाय षष्टिदिनत्वमुक्तं तदसम्बद्धम्; षष्ट्या तु दिवसैर्मास इत्यनेनाहोरात्रपरो वा दिवसशब्दस्तिथिपरो वेत्युभयथापि न षष्टिसंख्यतानियमः। चान्द्रस्य नियतत्रिंशत्तिथिसंख्यत्वेऽपि सौरस्य तदूनाधिकाहोरात्रसंख्यस्य सम्भवात्। वैशाखादिषु द्वात्रिंशत्तिथिभिरहोरात्रैर्वा प्रायशः सौरमासदर्शनात्। तस्माज्जितेन्द्रियोक्तोऽपि द्विराषाढ़ोऽसुन्दरतया मन्दैरिवाभिनन्दनीयः। विद्वद्भिस्तु यथोक्तसकलपर्य्यालोचनेनास्मदुपदर्शितद्विराषाढ़कल्पो निर्विकल्पमादरणीयः। अयमेवार्थो दीक्षितधवलैरप्युक्त इति *।

---

इत्येतद्विषयत्वादिति। तथा चायमाशयः—रात्रौ प्रतिपदि कर्कटसंक्रान्तिरित्यनेन, 'आसुरी रात्रिरत्यच' इत्यादिवचनेन विशेषविहितेतरकर्म्मणि रात्रेः पर्य्युदस्ततया रात्रिवृत्तिप्रतिपदः कर्म्मयोग्यता नास्तीति प्रतिपादितम्। तथाच—

'मासि संवत्सरे चैव तिथिद्वैधं यदा भवेत्।

तत्रोत्तरोत्तमा ग्रेया' इति वचने यत्तिथिद्वैधमुक्तं तद्विविधं, शुद्धाशुद्धभेदेनैकविधं, खण्डद्वयेनापरविधञ्च। खण्डद्वयमभिप्रेत्य निषेधयति एतद्विषयत्वाभावादिति। रात्रिवृत्तिप्रतिपदः कर्म्मायोग्यतया द्वैधानुदयात्। मिथुन एवाशुचौ मिथुनमलमास एवेत्यर्थः, शुचिमासेज्या आषाढ़मासेज्या, 'ज्यैष्ठ शुक्लः शुचिस्त्वयमाषाढ़े' इति कोषात्। द्विराषाढ़त्वाभावादिति। तथाच कार्य्यत एव जितेन्द्रियेण द्विराषाढ़त्वाङ्गीकारात् सौरमासेज्यायाः मलमासे निषेधाभावेन उत्तरमासि कर्त्तव्यत्वाभावात् मलमासे सत्यपि तत्कर्म्मणि द्विराषाढ़त्वाभावः सुतरामेवेति भावः।

* द्विराषाढ़त्वाभावे चापरमपि दोषं दर्शयति 'स्नापावर्त्तप्रबोधादीनाञ्चेत्यादि'। सदृत्यरूपत्वेन वैधरूपत्वेन। देवशयनं लुप्येत इति, द्विराषाढ़त्वाभावादिति, प्रागुक्त-

रूपत्वेन मलिम्लुचेऽपि निषेधात्। उत्तरत्र द्विराषाढ़त्वे सति विधानाद्देवशयनं लुप्येत। यच्च सरूपकार्य्याभ्यां द्विराषाढ़मभिधाय षष्टिदिनत्वमुक्तं तदसम्बद्धम्; षष्ट्या तु दिवसैर्मास इत्यनेनाहोरात्रपरो वा दिवसशब्दस्तिथिपरो वेत्युभयथापि न षष्टिसंख्यतानियमः। चान्द्रस्य नियतत्रिंशत्तिथिसंख्यत्वेऽपि सौरस्य तदूनाधिकाहोरात्रसंख्यस्य सम्भवात्। वैशाखादिषु द्वात्रिंशत्तिथिभिरहोरात्रैर्वा प्रायशः सौरमासदर्शनात्। तस्माज्जितेन्द्रियोक्तोऽपि द्विराषाढ़ोऽसुन्दरतया मन्दैरिवाभिनन्दनीयः। विद्वद्भिस्तु यथोक्तसकलपर्य्यालोचनेनास्मदुपदर्शितद्विराषाढ़कल्पो निर्विकल्पमादरणीयः। अयमेवार्थो दीक्षितधवलैरप्युक्त इति *।

---

इत्येतद्विषयत्वादिति। तथा चायमाशयः—रात्रौ प्रतिपदि कर्कटसंक्रान्तिरित्यनेन, 'आसुरी रात्रिरत्यच' इत्यादिवचनेन विशेषविहितेतरकर्म्मणि रात्रेः पर्य्युदस्ततया रात्रिवृत्तिप्रतिपदः कर्म्मयोग्यता नास्तीति प्रतिपादितम्। तथाच—

'मासि संवत्सरे चैव तिथिद्वैधं यदा भवेत्।

तत्रोत्तरोत्तमा ग्रेया' इति वचने यत्तिथिद्वैधमुक्तं तद्विविधं, शुद्धाशुद्धभेदेनैकविधं, खण्डद्वयेनापरविधञ्च। खण्डद्वयमभिप्रेत्य निषेधयति एतद्विषयत्वाभावादिति। रात्रिवृत्तिप्रतिपदः कर्म्मायोग्यतया द्वैधानुदयात्। मिथुन एवाशुचौ मिथुनमलमास एवेत्यर्थः, शुचिमासेज्या आषाढ़मासेज्या, 'ज्यैष्ठ शुक्लः शुचिस्त्वयमाषाढ़े' इति कोषात्। द्विराषाढ़त्वाभावादिति। तथाच कार्य्यत एव जितेन्द्रियेण द्विराषाढ़त्वाङ्गीकारात् सौरमासेज्यायाः मलमासे निषेधाभावेन उत्तरमासि कर्त्तव्यत्वाभावात् मलमासे सत्यपि तत्कर्म्मणि द्विराषाढ़त्वाभावः सुतरामेवेति भावः।

* द्विराषाढ़त्वाभावे चापरमपि दोषं दर्शयति 'स्नापावर्त्तप्रबोधादीनाञ्चेत्यादि'। सदृत्यरूपत्वेन वैधरूपत्वेन। देवशयनं लुप्येत इति, द्विराषाढ़त्वाभावादिति, प्रागुक्त-

रूपत्वेन मलिम्लुचेऽपि निषेधात्। उत्तरत्र द्विराषाढ़त्वे सति विधानाद्देवशयनं लुप्येत। यच्च सरूपकार्य्याभ्यां द्विराषाढ़मभिधाय षष्टिदिनत्वमुक्तं तदसम्बद्धम्; षष्ट्या तु दिवसैर्मास इत्यनेनाहोरात्रपरो वा दिवसशब्दस्तिथिपरो वेत्युभयथापि न षष्टिसंख्यतानियमः। चान्द्रस्य नियतत्रिंशत्तिथिसंख्यत्वेऽपि सौरस्य तदूनाधिकाहोरात्रसंख्यस्य सम्भवात्। वैशाखादिषु द्वात्रिंशत्तिथिभिरहोरात्रैर्वा प्रायशः सौरमासदर्शनात्। तस्माज्जितेन्द्रियोक्तोऽपि द्विराषाढ़ोऽसुन्दरतया मन्दैरिवाभिनन्दनीयः। विद्वद्भिस्तु यथोक्तसकलपर्य्यालोचनेनास्मदुपदर्शितद्विराषाढ़कल्पो निर्विकल्पमादरणीयः। अयमेवार्थो दीक्षितधवलैरप्युक्त इति *।

---

इत्येतद्विषयत्वादिति। तथा चायमाशयः—रात्रौ प्रतिपदि कर्कटसंक्रान्तिरित्यनेन, 'आसुरी रात्रिरत्यच' इत्यादिवचनेन विशेषविहितेतरकर्म्मणि रात्रेः पर्य्युदस्ततया रात्रिवृत्तिप्रतिपदः कर्म्मयोग्यता नास्तीति प्रतिपादितम्। तथाच—

'मासि संवत्सरे चैव तिथिद्वैधं यदा भवेत्।

तत्रोत्तरोत्तमा ग्रेया' इति वचने यत्तिथिद्वैधमुक्तं तद्विविधं, शुद्धाशुद्धभेदेनैकविधं, खण्डद्वयेनापरविधञ्च। खण्डद्वयमभिप्रेत्य निषेधयति एतद्विषयत्वाभावादिति। रात्रिवृत्तिप्रतिपदः कर्म्मायोग्यतया द्वैधानुदयात्। मिथुन एवाशुचौ मिथुनमलमास एवेत्यर्थः, शुचिमासेज्या आषाढ़मासेज्या, 'ज्यैष्ठ शुक्लः शुचिस्त्वयमाषाढ़े' इति कोषात्। द्विराषाढ़त्वाभावादिति। तथाच कार्य्यत एव जितेन्द्रियेण द्विराषाढ़त्वाङ्गीकारात् सौरमासेज्यायाः मलमासे निषेधाभावेन उत्तरमासि कर्त्तव्यत्वाभावात् मलमासे सत्यपि तत्कर्म्मणि द्विराषाढ़त्वाभावः सुतरामेवेति भावः।

* द्विराषाढ़त्वाभावे चापरमपि दोषं दर्शयति 'स्नापावर्त्तप्रबोधादीनाञ्चेत्यादि'। सदृत्यरूपत्वेन वैधरूपत्वेन। देवशयनं लुप्येत इति, द्विराषाढ़त्वाभावादिति, प्रागुक्त-

रूपत्वेन मलिम्लुचेऽपि निषेधात्। उत्तरत्र द्विराषाढ़त्वे सति विधानाद्देवशयनं लुप्येत। यच्च सरूपकार्य्याभ्यां द्विराषाढ़मभिधाय षष्टिदिनत्वमुक्तं तदसम्बद्धम्; षष्ट्या तु दिवसैर्मास इत्यनेनाहोरात्रपरो वा दिवसशब्दस्तिथिपरो वेत्युभयथापि न षष्टिसंख्यतानियमः। चान्द्रस्य नियतत्रिंशत्तिथिसंख्यत्वेऽपि सौरस्य तदूनाधिकाहोरात्रसंख्यस्य सम्भवात्। वैशाखादिषु द्वात्रिंशत्तिथिभिरहोरात्रैर्वा प्रायशः सौरमासदर्शनात्। तस्माज्जितेन्द्रियोक्तोऽपि द्विराषाढ़ोऽसुन्दरतया मन्दैरिवाभिनन्दनीयः। विद्वद्भिस्तु यथोक्तसकलपर्य्यालोचनेनास्मदुपदर्शितद्विराषाढ़कल्पो निर्विकल्पमादरणीयः। अयमेवार्थो दीक्षितधवलैरप्युक्त इति *।

---

इत्येतद्विषयत्वादिति। तथा चायमाशयः—रात्रौ प्रतिपदि कर्कटसंक्रान्तिरित्यनेन, 'आसुरी रात्रिरत्यच' इत्यादिवचनेन विशेषविहितेतरकर्म्मणि रात्रेः पर्य्युदस्ततया रात्रिवृत्तिप्रतिपदः कर्म्मयोग्यता नास्तीति प्रतिपादितम्। तथाच—

'मासि संवत्सरे चैव तिथिद्वैधं यदा भवेत्।

तत्रोत्तरोत्तमा ग्रेया' इति वचने यत्तिथिद्वैधमुक्तं तद्विविधं, शुद्धाशुद्धभेदेनैकविधं, खण्डद्वयेनापरविधञ्च। खण्डद्वयमभिप्रेत्य निषेधयति एतद्विषयत्वाभावादिति। रात्रिवृत्तिप्रतिपदः कर्म्मायोग्यतया द्वैधानुदयात्। मिथुन एवाशुचौ मिथुनमलमास एवेत्यर्थः, शुचिमासेज्या आषाढ़मासेज्या, 'ज्यैष्ठ शुक्लः शुचिस्त्वयमाषाढ़े' इति कोषात्। द्विराषाढ़त्वाभावादिति। तथाच कार्य्यत एव जितेन्द्रियेण द्विराषाढ़त्वाङ्गीकारात् सौरमासेज्यायाः मलमासे निषेधाभावेन उत्तरमासि कर्त्तव्यत्वाभावात् मलमासे सत्यपि तत्कर्म्मणि द्विराषाढ़त्वाभावः सुतरामेवेति भावः।

* द्विराषाढ़त्वाभावे चापरमपि दोषं दर्शयति 'स्नापावर्त्तप्रबोधादीनाञ्चेत्यादि'। सदृत्यरूपत्वेन वैधरूपत्वेन। देवशयनं लुप्येत इति, द्विराषाढ़त्वाभावादिति, प्रागुक्त-

रूपत्वेन मलिम्लुचेऽपि निषेधात्। उत्तरत्र द्विराषाढ़त्वे सति विधानाद्देवशयनं लुप्येत। यच्च सरूपकार्य्याभ्यां द्विराषाढ़मभिधाय षष्टिदिनत्वमुक्तं तदसम्बद्धम्; षष्ट्या तु दिवसैर्मास इत्यनेनाहोरात्रपरो वा दिवसशब्दस्तिथिपरो वेत्युभयथापि न षष्टिसंख्यतानियमः। चान्द्रस्य नियतत्रिंशत्तिथिसंख्यत्वेऽपि सौरस्य तदूनाधिकाहोरात्रसंख्यस्य सम्भवात्। वैशाखादिषु द्वात्रिंशत्तिथिभिरहोरात्रैर्वा प्रायशः सौरमासदर्शनात्। तस्माज्जितेन्द्रियोक्तोऽपि द्विराषाढ़ोऽसुन्दरतया मन्दैरिवाभिनन्दनीयः। विद्वद्भिस्तु यथोक्तसकलपर्य्यालोचनेनास्मदुपदर्शितद्विराषाढ़कल्पो निर्विकल्पमादरणीयः। अयमेवार्थो दीक्षितधवलैरप्युक्त इति *।

---

इत्येतद्विषयत्वादिति। तथा चायमाशयः—रात्रौ प्रतिपदि कर्कटसंक्रान्तिरित्यनेन, 'आसुरी रात्रिरत्यच' इत्यादिवचनेन विशेषविहितेतरकर्म्मणि रात्रेः पर्य्युदस्ततया रात्रिवृत्तिप्रतिपदः कर्म्मयोग्यता नास्तीति प्रतिपादितम्। तथाच—

'मासि संवत्सरे चैव तिथिद्वैधं यदा भवेत्।

तत्रोत्तरोत्तमा ग्रेया' इति वचने यत्तिथिद्वैधमुक्तं तद्विविधं, शुद्धाशुद्धभेदेनैकविधं, खण्डद्वयेनापरविधञ्च। खण्डद्वयमभिप्रेत्य निषेधयति एतद्विषयत्वाभावादिति। रात्रिवृत्तिप्रतिपदः कर्म्मायोग्यतया द्वैधानुदयात्। मिथुन एवाशुचौ मिथुनमलमास एवेत्यर्थः, शुचिमासेज्या आषाढ़मासेज्या, 'ज्यैष्ठ शुक्लः शुचिस्त्वयमाषाढ़े' इति कोषात्। द्विराषाढ़त्वाभावादिति। तथाच कार्य्यत एव जितेन्द्रियेण द्विराषाढ़त्वाङ्गीकारात् सौरमासेज्यायाः मलमासे निषेधाभावेन उत्तरमासि कर्त्तव्यत्वाभावात् मलमासे सत्यपि तत्कर्म्मणि द्विराषाढ़त्वाभावः सुतरामेवेति भावः।

* द्विराषाढ़त्वाभावे चापरमपि दोषं दर्शयति 'स्नापावर्त्तप्रबोधादीनाञ्चेत्यादि'। सदृत्यरूपत्वेन वैधरूपत्वेन। देवशयनं लुप्येत इति, द्विराषाढ़त्वाभावादिति, प्रागुक्त-

रूपत्वेन मलिम्लुचेऽपि निषेधात्। उत्तरत्र द्विराषाढ़त्वे सति विधानाद्देवशयनं लुप्येत। यच्च सरूपकार्य्याभ्यां द्विराषाढ़मभिधाय षष्टिदिनत्वमुक्तं तदसम्बद्धम्; षष्ट्या तु दिवसैर्मास इत्यनेनाहोरात्रपरो वा दिवसशब्दस्तिथिपरो वेत्युभयथापि न षष्टिसंख्यतानियमः। चान्द्रस्य नियतत्रिंशत्तिथिसंख्यत्वेऽपि सौरस्य तदूनाधिकाहोरात्रसंख्यस्य सम्भवात्। वैशाखादिषु द्वात्रिंशत्तिथिभिरहोरात्रैर्वा प्रायशः सौरमासदर्शनात्। तस्माज्जितेन्द्रियोक्तोऽपि द्विराषाढ़ोऽसुन्दरतया मन्दैरिवाभिनन्दनीयः। विद्वद्भिस्तु यथोक्तसकलपर्य्यालोचनेनास्मदुपदर्शितद्विराषाढ़कल्पो निर्विकल्पमादरणीयः। अयमेवार्थो दीक्षितधवलैरप्युक्त इति *।

---

इत्येतद्विषयत्वादिति। तथा चायमाशयः—रात्रौ प्रतिपदि कर्कटसंक्रान्तिरित्यनेन, 'आसुरी रात्रिरत्यच' इत्यादिवचनेन विशेषविहितेतरकर्म्मणि रात्रेः पर्य्युदस्ततया रात्रिवृत्तिप्रतिपदः कर्म्मयोग्यता नास्तीति प्रतिपादितम्। तथाच—

'मासि संवत्सरे चैव तिथिद्वैधं यदा भवेत्।

तत्रोत्तरोत्तमा ग्रेया' इति वचने यत्तिथिद्वैधमुक्तं तद्विविधं, शुद्धाशुद्धभेदेनैकविधं, खण्डद्वयेनापरविधञ्च। खण्डद्वयमभिप्रेत्य निषेधयति एतद्विषयत्वाभावादिति। रात्रिवृत्तिप्रतिपदः कर्म्मायोग्यतया द्वैधानुदयात्। मिथुन एवाशुचौ मिथुनमलमास एवेत्यर्थः, शुचिमासेज्या आषाढ़मासेज्या, 'ज्यैष्ठ शुक्लः शुचिस्त्वयमाषाढ़े' इति कोषात्। द्विराषाढ़त्वाभावादिति। तथाच कार्य्यत एव जितेन्द्रियेण द्विराषाढ़त्वाङ्गीकारात् सौरमासेज्यायाः मलमासे निषेधाभावेन उत्तरमासि कर्त्तव्यत्वाभावात् मलमासे सत्यपि तत्कर्म्मणि द्विराषाढ़त्वाभावः सुतरामेवेति भावः।

* द्विराषाढ़त्वाभावे चापरमपि दोषं दर्शयति 'स्नापावर्त्तप्रबोधादीनाञ्चेत्यादि'। सदृत्यरूपत्वेन वैधरूपत्वेन। देवशयनं लुप्येत इति, द्विराषाढ़त्वाभावादिति, प्रागुक्त-

रूपत्वेन मलिम्लुचेऽपि निषेधात्। उत्तरत्र द्विराषाढ़त्वे सति विधानाद्देवशयनं लुप्येत। यच्च सरूपकार्य्याभ्यां द्विराषाढ़मभिधाय षष्टिदिनत्वमुक्तं तदसम्बद्धम्; षष्ट्या तु दिवसैर्मास इत्यनेनाहोरात्रपरो वा दिवसशब्दस्तिथिपरो वेत्युभयथापि न षष्टिसंख्यतानियमः। चान्द्रस्य नियतत्रिंशत्तिथिसंख्यत्वेऽपि सौरस्य तदूनाधिकाहोरात्रसंख्यस्य सम्भवात्। वैशाखादिषु द्वात्रिंशत्तिथिभिरहोरात्रैर्वा प्रायशः सौरमासदर्शनात्। तस्माज्जितेन्द्रियोक्तोऽपि द्विराषाढ़ोऽसुन्दरतया मन्दैरिवाभिनन्दनीयः। विद्वद्भिस्तु यथोक्तसकलपर्य्यालोचनेनास्मदुपदर्शितद्विराषाढ़कल्पो निर्विकल्पमादरणीयः। अयमेवार्थो दीक्षितधवलैरप्युक्त इति *।

---

इत्येतद्विषयत्वादिति। तथा चायमाशयः—रात्रौ प्रतिपदि कर्कटसंक्रान्तिरित्यनेन, 'आसुरी रात्रिरत्यच' इत्यादिवचनेन विशेषविहितेतरकर्म्मणि रात्रेः पर्य्युदस्ततया रात्रिवृत्तिप्रतिपदः कर्म्मयोग्यता नास्तीति प्रतिपादितम्। तथाच—

'मासि संवत्सरे चैव तिथिद्वैधं यदा भवेत्।

तत्रोत्तरोत्तमा ग्रेया' इति वचने यत्तिथिद्वैधमुक्तं तद्विविधं, शुद्धाशुद्धभेदेनैकविधं, खण्डद्वयेनापरविधञ्च। खण्डद्वयमभिप्रेत्य निषेधयति एतद्विषयत्वाभावादिति। रात्रिवृत्तिप्रतिपदः कर्म्मायोग्यतया द्वैधानुदयात्। मिथुन एवाशुचौ मिथुनमलमास एवेत्यर्थः, शुचिमासेज्या आषाढ़मासेज्या, 'ज्यैष्ठ शुक्लः शुचिस्त्वयमाषाढ़े' इति कोषात्। द्विराषाढ़त्वाभावादिति। तथाच कार्य्यत एव जितेन्द्रियेण द्विराषाढ़त्वाङ्गीकारात् सौरमासेज्यायाः मलमासे निषेधाभावेन उत्तरमासि कर्त्तव्यत्वाभावात् मलमासे सत्यपि तत्कर्म्मणि द्विराषाढ़त्वाभावः सुतरामेवेति भावः।

* द्विराषाढ़त्वाभावे चापरमपि दोषं दर्शयति 'स्नापावर्त्तप्रबोधादीनाञ्चेत्यादि'। सदृत्यरूपत्वेन वैधरूपत्वेन। देवशयनं लुप्येत इति, द्विराषाढ़त्वाभावादिति, प्रागुक्त-

रूपत्वेन मलिम्लुचेऽपि निषेधात्। उत्तरत्र द्विराषाढ़त्वे सति विधानाद्देवशयनं लुप्येत। यच्च सरूपकार्य्याभ्यां द्विराषाढ़मभिधाय षष्टिदिनत्वमुक्तं तदसम्बद्धम्; षष्ट्या तु दिवसैर्मास इत्यनेनाहोरात्रपरो वा दिवसशब्दस्तिथिपरो वेत्युभयथापि न षष्टिसंख्यतानियमः। चान्द्रस्य नियतत्रिंशत्तिथिसंख्यत्वेऽपि सौरस्य तदूनाधिकाहोरात्रसंख्यस्य सम्भवात्। वैशाखादिषु द्वात्रिंशत्तिथिभिरहोरात्रैर्वा प्रायशः सौरमासदर्शनात्। तस्माज्जितेन्द्रियोक्तोऽपि द्विराषाढ़ोऽसुन्दरतया मन्दैरिवाभिनन्दनीयः। विद्वद्भिस्तु यथोक्तसकलपर्य्यालोचनेनास्मदुपदर्शितद्विराषाढ़कल्पो निर्विकल्पमादरणीयः। अयमेवार्थो दीक्षितधवलैरप्युक्त इति *।

---

इत्येतद्विषयत्वादिति। तथा चायमाशयः—रात्रौ प्रतिपदि कर्कटसंक्रान्तिरित्यनेन, 'आसुरी रात्रिरत्यच' इत्यादिवचनेन विशेषविहितेतरकर्म्मणि रात्रेः पर्य्युदस्ततया रात्रिवृत्तिप्रतिपदः कर्म्मयोग्यता नास्तीति प्रतिपादितम्। तथाच—

'मासि संवत्सरे चैव तिथिद्वैधं यदा भवेत्।

तत्रोत्तरोत्तमा ग्रेया' इति वचने यत्तिथिद्वैधमुक्तं तद्विविधं, शुद्धाशुद्धभेदेनैकविधं, खण्डद्वयेनापरविधञ्च। खण्डद्वयमभिप्रेत्य निषेधयति एतद्विषयत्वाभावादिति। रात्रिवृत्तिप्रतिपदः कर्म्मायोग्यतया द्वैधानुदयात्। मिथुन एवाशुचौ मिथुनमलमास एवेत्यर्थः, शुचिमासेज्या आषाढ़मासेज्या, 'ज्यैष्ठ शुक्लः शुचिस्त्वयमाषाढ़े' इति कोषात्। द्विराषाढ़त्वाभावादिति। तथाच कार्य्यत एव जितेन्द्रियेण द्विराषाढ़त्वाङ्गीकारात् सौरमासेज्यायाः मलमासे निषेधाभावेन उत्तरमासि कर्त्तव्यत्वाभावात् मलमासे सत्यपि तत्कर्म्मणि द्विराषाढ़त्वाभावः सुतरामेवेति भावः।

* द्विराषाढ़त्वाभावे चापरमपि दोषं दर्शयति 'स्नापावर्त्तप्रबोधादीनाञ्चेत्यादि'। सदृत्यरूपत्वेन वैधरूपत्वेन। देवशयनं लुप्येत इति, द्विराषाढ़त्वाभावादिति, प्रागुक्त-

रूपत्वेन मलिम्लुचेऽपि निषेधात्। उत्तरत्र द्विराषाढ़त्वे सति विधानाद्देवशयनं लुप्येत। यच्च सरूपकार्य्याभ्यां द्विराषाढ़मभिधाय षष्टिदिनत्वमुक्तं तदसम्बद्धम्; षष्ट्या तु दिवसैर्मास इत्यनेनाहोरात्रपरो वा दिवसशब्दस्तिथिपरो वेत्युभयथापि न षष्टिसंख्यतानियमः। चान्द्रस्य नियतत्रिंशत्तिथिसंख्यत्वेऽपि सौरस्य तदूनाधिकाहोरात्रसंख्यस्य सम्भवात्। वैशाखादिषु द्वात्रिंशत्तिथिभिरहोरात्रैर्वा प्रायशः सौरमासदर्शनात्। तस्माज्जितेन्द्रियोक्तोऽपि द्विराषाढ़ोऽसुन्दरतया मन्दैरिवाभिनन्दनीयः। विद्वद्भिस्तु यथोक्तसकलपर्य्यालोचनेनास्मदुपदर्शितद्विराषाढ़कल्पो निर्विकल्पमादरणीयः। अयमेवार्थो दीक्षितधवलैरप्युक्त इति *।

---

इत्येतद्विषयत्वादिति। तथा चायमाशयः—रात्रौ प्रतिपदि कर्कटसंक्रान्तिरित्यनेन, 'आसुरी रात्रिरत्यच' इत्यादिवचनेन विशेषविहितेतरकर्म्मणि रात्रेः पर्य्युदस्ततया रात्रिवृत्तिप्रतिपदः कर्म्मयोग्यता नास्तीति प्रतिपादितम्। तथाच—

'मासि संवत्सरे चैव तिथिद्वैधं यदा भवेत्।

तत्रोत्तरोत्तमा ग्रेया' इति वचने यत्तिथिद्वैधमुक्तं तद्विविधं, शुद्धाशुद्धभेदेनैकविधं, खण्डद्वयेनापरविधञ्च। खण्डद्वयमभिप्रेत्य निषेधयति एतद्विषयत्वाभावादिति। रात्रिवृत्तिप्रतिपदः कर्म्मायोग्यतया द्वैधानुदयात्। मिथुन एवाशुचौ मिथुनमलमास एवेत्यर्थः, शुचिमासेज्या आषाढ़मासेज्या, 'ज्यैष्ठ शुक्लः शुचिस्त्वयमाषाढ़े' इति कोषात्। द्विराषाढ़त्वाभावादिति। तथाच कार्य्यत एव जितेन्द्रियेण द्विराषाढ़त्वाङ्गीकारात् सौरमासेज्यायाः मलमासे निषेधाभावेन उत्तरमासि कर्त्तव्यत्वाभावात् मलमासे सत्यपि तत्कर्म्मणि द्विराषाढ़त्वाभावः सुतरामेवेति भावः।

* द्विराषाढ़त्वाभावे चापरमपि दोषं दर्शयति 'स्नापावर्त्तप्रबोधादीनाञ्चेत्यादि'। सदृत्यरूपत्वेन वैधरूपत्वेन। देवशयनं लुप्येत इति, द्विराषाढ़त्वाभावादिति, प्रागुक्त-

रूपत्वेन मलिम्लुचेऽपि निषेधात्। उत्तरत्र द्विराषाढ़त्वे सति विधानाद्देवशयनं लुप्येत। यच्च सरूपकार्य्याभ्यां द्विराषाढ़मभिधाय षष्टिदिनत्वमुक्तं तदसम्बद्धम्; षष्ट्या तु दिवसैर्मास इत्यनेनाहोरात्रपरो वा दिवसशब्दस्तिथिपरो वेत्युभयथापि न षष्टिसंख्यतानियमः। चान्द्रस्य नियतत्रिंशत्तिथिसंख्यत्वेऽपि सौरस्य तदूनाधिकाहोरात्रसंख्यस्य सम्भवात्। वैशाखादिषु द्वात्रिंशत्तिथिभिरहोरात्रैर्वा प्रायशः सौरमासदर्शनात्। तस्माज्जितेन्द्रियोक्तोऽपि द्विराषाढ़ोऽसुन्दरतया मन्दैरिवाभिनन्दनीयः। विद्वद्भिस्तु यथोक्तसकलपर्य्यालोचनेनास्मदुपदर्शितद्विराषाढ़कल्पो निर्विकल्पमादरणीयः। अयमेवार्थो दीक्षितधवलैरप्युक्त इति *।

---

इत्येतद्विषयत्वादिति। तथा चायमाशयः—रात्रौ प्रतिपदि कर्कटसंक्रान्तिरित्यनेन, 'आसुरी रात्रिरत्यच' इत्यादिवचनेन विशेषविहितेतरकर्म्मणि रात्रेः पर्य्युदस्ततया रात्रिवृत्तिप्रतिपदः कर्म्मयोग्यता नास्तीति प्रतिपादितम्। तथाच—

'मासि संवत्सरे चैव तिथिद्वैधं यदा भवेत्।

तत्रोत्तरोत्तमा ग्रेया' इति वचने यत्तिथिद्वैधमुक्तं तद्विविधं, शुद्धाशुद्धभेदेनैकविधं, खण्डद्वयेनापरविधञ्च। खण्डद्वयमभिप्रेत्य निषेधयति एतद्विषयत्वाभावादिति। रात्रिवृत्तिप्रतिपदः कर्म्मायोग्यतया द्वैधानुदयात्। मिथुन एवाशुचौ मिथुनमलमास एवेत्यर्थः, शुचिमासेज्या आषाढ़मासेज्या, 'ज्यैष्ठ शुक्लः शुचिस्त्वयमाषाढ़े' इति कोषात्। द्विराषाढ़त्वाभावादिति। तथाच कार्य्यत एव जितेन्द्रियेण द्विराषाढ़त्वाङ्गीकारात् सौरमासेज्यायाः मलमासे निषेधाभावेन उत्तरमासि कर्त्तव्यत्वाभावात् मलमासे सत्यपि तत्कर्म्मणि द्विराषाढ़त्वाभावः सुतरामेवेति भावः।

* द्विराषाढ़त्वाभावे चापरमपि दोषं दर्शयति 'स्नापावर्त्तप्रबोधादीनाञ्चेत्यादि'। सदृत्यरूपत्वेन वैधरूपत्वेन। देवशयनं लुप्येत इति, द्विराषाढ़त्वाभावादिति, प्रागुक्त-

रूपत्वेन मलिम्लुचेऽपि निषेधात्। उत्तरत्र द्विराषाढ़त्वे सति विधानाद्देवशयनं लुप्येत। यच्च सरूपकार्य्याभ्यां द्विराषाढ़मभिधाय षष्टिदिनत्वमुक्तं तदसम्बद्धम्; षष्ट्या तु दिवसैर्मास इत्यनेनाहोरात्रपरो वा दिवसशब्दस्तिथिपरो वेत्युभयथापि न षष्टिसंख्यतानियमः। चान्द्रस्य नियतत्रिंशत्तिथिसंख्यत्वेऽपि सौरस्य तदूनाधिकाहोरात्रसंख्यस्य सम्भवात्। वैशाखादिषु द्वात्रिंशत्तिथिभिरहोरात्रैर्वा प्रायशः सौरमासदर्शनात्। तस्माज्जितेन्द्रियोक्तोऽपि द्विराषाढ़ोऽसुन्दरतया मन्दैरिवाभिनन्दनीयः। विद्वद्भिस्तु यथोक्तसकलपर्य्यालोचनेनास्मदुपदर्शितद्विराषाढ़कल्पो निर्विकल्पमादरणीयः। अयमेवार्थो दीक्षितधवलैरप्युक्त इति *।

---

इत्येतद्विषयत्वादिति। तथा चायमाशयः—रात्रौ प्रतिपदि कर्कटसंक्रान्तिरित्यनेन, 'आसुरी रात्रिरत्यच' इत्यादिवचनेन विशेषविहितेतरकर्म्मणि रात्रेः पर्य्युदस्ततया रात्रिवृत्तिप्रतिपदः कर्म्मयोग्यता नास्तीति प्रतिपादितम्। तथाच—

'मासि संवत्सरे चैव तिथिद्वैधं यदा भवेत्।

तत्रोत्तरोत्तमा ग्रेया' इति वचने यत्तिथिद्वैधमुक्तं तद्विविधं, शुद्धाशुद्धभेदेनैकविधं, खण्डद्वयेनापरविधञ्च। खण्डद्वयमभिप्रेत्य निषेधयति एतद्विषयत्वाभावादिति। रात्रिवृत्तिप्रतिपदः कर्म्मायोग्यतया द्वैधानुदयात्। मिथुन एवाशुचौ मिथुनमलमास एवेत्यर्थः, शुचिमासेज्या आषाढ़मासेज्या, 'ज्यैष्ठ शुक्लः शुचिस्त्वयमाषाढ़े' इति कोषात्। द्विराषाढ़त्वाभावादिति। तथाच कार्य्यत एव जितेन्द्रियेण द्विराषाढ़त्वाङ्गीकारात् सौरमासेज्यायाः मलमासे निषेधाभावेन उत्तरमासि कर्त्तव्यत्वाभावात् मलमासे सत्यपि तत्कर्म्मणि द्विराषाढ़त्वाभावः सुतरामेवेति भावः।

* द्विराषाढ़त्वाभावे चापरमपि दोषं दर्शयति 'स्नापावर्त्तप्रबोधादीनाञ्चेत्यादि'। सदृत्यरूपत्वेन वैधरूपत्वेन। देवशयनं लुप्येत इति, द्विराषाढ़त्वाभावादिति, प्रागुक्त-

रूपत्वेन मलिम्लुचेऽपि निषेधात्। उत्तरत्र द्विराषाढ़त्वे सति विधानाद्देवशयनं लुप्येत। यच्च सरूपकार्य्याभ्यां द्विराषाढ़मभिधाय षष्टिदिनत्वमुक्तं तदसम्बद्धम्; षष्ट्या तु दिवसैर्मास इत्यनेनाहोरात्रपरो वा दिवसशब्दस्तिथिपरो वेत्युभयथापि न षष्टिसंख्यतानियमः। चान्द्रस्य नियतत्रिंशत्तिथिसंख्यत्वेऽपि सौरस्य तदूनाधिकाहोरात्रसंख्यस्य सम्भवात्। वैशाखादिषु द्वात्रिंशत्तिथिभिरहोरात्रैर्वा प्रायशः सौरमासदर्शनात्। तस्माज्जितेन्द्रियोक्तोऽपि द्विराषाढ़ोऽसुन्दरतया मन्दैरिवाभिनन्दनीयः। विद्वद्भिस्तु यथोक्तसकलपर्य्यालोचनेनास्मदुपदर्शितद्विराषाढ़कल्पो निर्विकल्पमादरणीयः। अयमेवार्थो दीक्षितधवलैरप्युक्त इति *।

---

इत्येतद्विषयत्वादिति। तथा चायमाशयः—रात्रौ प्रतिपदि कर्कटसंक्रान्तिरित्यनेन, 'आसुरी रात्रिरत्यच' इत्यादिवचनेन विशेषविहितेतरकर्म्मणि रात्रेः पर्य्युदस्ततया रात्रिवृत्तिप्रतिपदः कर्म्मयोग्यता नास्तीति प्रतिपादितम्। तथाच—

'मासि संवत्सरे चैव तिथिद्वैधं यदा भवेत्।

तत्रोत्तरोत्तमा ग्रेया' इति वचने यत्तिथिद्वैधमुक्तं तद्विविधं, शुद्धाशुद्धभेदेनैकविधं, खण्डद्वयेनापरविधञ्च। खण्डद्वयमभिप्रेत्य निषेधयति एतद्विषयत्वाभावादिति। रात्रिवृत्तिप्रतिपदः कर्म्मायोग्यतया द्वैधानुदयात्। मिथुन एवाशुचौ मिथुनमलमास एवेत्यर्थः, शुचिमासेज्या आषाढ़मासेज्या, 'ज्यैष्ठ शुक्लः शुचिस्त्वयमाषाढ़े' इति कोषात्। द्विराषाढ़त्वाभावादिति। तथाच कार्य्यत एव जितेन्द्रियेण द्विराषाढ़त्वाङ्गीकारात् सौरमासेज्यायाः मलमासे निषेधाभावेन उत्तरमासि कर्त्तव्यत्वाभावात् मलमासे सत्यपि तत्कर्म्मणि द्विराषाढ़त्वाभावः सुतरामेवेति भावः।

* द्विराषाढ़त्वाभावे चापरमपि दोषं दर्शयति 'स्नापावर्त्तप्रबोधादीनाञ्चेत्यादि'। सदृत्यरूपत्वेन वैधरूपत्वेन। देवशयनं लुप्येत इति, द्विराषाढ़त्वाभावादिति, प्रागुक्त-

रूपत्वेन मलिम्लुचेऽपि निषेधात्। उत्तरत्र द्विराषाढ़त्वे सति विधानाद्देवशयनं लुप्येत। यच्च सरूपकार्य्याभ्यां द्विराषाढ़मभिधाय षष्टिदिनत्वमुक्तं तदसम्बद्धम्; षष्ट्या तु दिवसैर्मास इत्यनेनाहोरात्रपरो वा दिवसशब्दस्तिथिपरो वेत्युभयथापि न षष्टिसंख्यतानियमः। चान्द्रस्य नियतत्रिंशत्तिथिसंख्यत्वेऽपि सौरस्य तदूनाधिकाहोरात्रसंख्यस्य सम्भवात्। वैशाखादिषु द्वात्रिंशत्तिथिभिरहोरात्रैर्वा प्रायशः सौरमासदर्शनात्। तस्माज्जितेन्द्रियोक्तोऽपि द्विराषाढ़ोऽसुन्दरतया मन्दैरिवाभिनन्दनीयः। विद्वद्भिस्तु यथोक्तसकलपर्य्यालोचनेनास्मदुपदर्शितद्विराषाढ़कल्पो निर्विकल्पमादरणीयः। अयमेवार्थो दीक्षितधवलैरप्युक्त इति *।

---

इत्येतद्विषयत्वादिति। तथा चायमाशयः—रात्रौ प्रतिपदि कर्कटसंक्रान्तिरित्यनेन, 'आसुरी रात्रिरत्यच' इत्यादिवचनेन विशेषविहितेतरकर्म्मणि रात्रेः पर्य्युदस्ततया रात्रिवृत्तिप्रतिपदः कर्म्मयोग्यता नास्तीति प्रतिपादितम्। तथाच—

'मासि संवत्सरे चैव तिथिद्वैधं यदा भवेत्।

तत्रोत्तरोत्तमा ग्रेया' इति वचने यत्तिथिद्वैधमुक्तं तद्विविधं, शुद्धाशुद्धभेदेनैकविधं, खण्डद्वयेनापरविधञ्च। खण्डद्वयमभिप्रेत्य निषेधयति एतद्विषयत्वाभावादिति। रात्रिवृत्तिप्रतिपदः कर्म्मायोग्यतया द्वैधानुदयात्। मिथुन एवाशुचौ मिथुनमलमास एवेत्यर्थः, शुचिमासेज्या आषाढ़मासेज्या, 'ज्यैष्ठ शुक्लः शुचिस्त्वयमाषाढ़े' इति कोषात्। द्विराषाढ़त्वाभावादिति। तथाच कार्य्यत एव जितेन्द्रियेण द्विराषाढ़त्वाङ्गीकारात् सौरमासेज्यायाः मलमासे निषेधाभावेन उत्तरमासि कर्त्तव्यत्वाभावात् मलमासे सत्यपि तत्कर्म्मणि द्विराषाढ़त्वाभावः सुतरामेवेति भावः।

* द्विराषाढ़त्वाभावे चापरमपि दोषं दर्शयति 'स्नापावर्त्तप्रबोधादीनाञ्चेत्यादि'। सदृत्यरूपत्वेन वैधरूपत्वेन। देवशयनं लुप्येत इति, द्विराषाढ़त्वाभावादिति, प्रागुक्त-

रूपत्वेन मलिम्लुचेऽपि निषेधात्। उत्तरत्र द्विराषाढ़त्वे सति विधानाद्देवशयनं लुप्येत। यच्च सरूपकार्य्याभ्यां द्विराषाढ़मभिधाय षष्टिदिनत्वमुक्तं तदसम्बद्धम्; षष्ट्या तु दिवसैर्मास इत्यनेनाहोरात्रपरो वा दिवसशब्दस्तिथिपरो वेत्युभयथापि न षष्टिसंख्यतानियमः। चान्द्रस्य नियतत्रिंशत्तिथिसंख्यत्वेऽपि सौरस्य तदूनाधिकाहोरात्रसंख्यस्य सम्भवात्। वैशाखादिषु द्वात्रिंशत्तिथिभिरहोरात्रैर्वा प्रायशः सौरमासदर्शनात्। तस्माज्जितेन्द्रियोक्तोऽपि द्विराषाढ़ोऽसुन्दरतया मन्दैरिवाभिनन्दनीयः। विद्वद्भिस्तु यथोक्तसकलपर्य्यालोचनेनास्मदुपदर्शितद्विराषाढ़कल्पो निर्विकल्पमादरणीयः। अयमेवार्थो दीक्षितधवलैरप्युक्त इति *।

---

इत्येतद्विषयत्वादिति। तथा चायमाशयः—रात्रौ प्रतिपदि कर्कटसंक्रान्तिरित्यनेन, 'आसुरी रात्रिरत्यच' इत्यादिवचनेन विशेषविहितेतरकर्म्मणि रात्रेः पर्य्युदस्ततया रात्रिवृत्तिप्रतिपदः कर्म्मयोग्यता नास्तीति प्रतिपादितम्। तथाच—

'मासि संवत्सरे चैव तिथिद्वैधं यदा भवेत्।

तत्रोत्तरोत्तमा ग्रेया' इति वचने यत्तिथिद्वैधमुक्तं तद्विविधं, शुद्धाशुद्धभेदेनैकविधं, खण्डद्वयेनापरविधञ्च। खण्डद्वयमभिप्रेत्य निषेधयति एतद्विषयत्वाभावादिति। रात्रिवृत्तिप्रतिपदः कर्म्मायोग्यतया द्वैधानुदयात्। मिथुन एवाशुचौ मिथुनमलमास एवेत्यर्थः, शुचिमासेज्या आषाढ़मासेज्या, 'ज्यैष्ठ शुक्लः शुचिस्त्वयमाषाढ़े' इति कोषात्। द्विराषाढ़त्वाभावादिति। तथाच कार्य्यत एव जितेन्द्रियेण द्विराषाढ़त्वाङ्गीकारात् सौरमासेज्यायाः मलमासे निषेधाभावेन उत्तरमासि कर्त्तव्यत्वाभावात् मलमासे सत्यपि तत्कर्म्मणि द्विराषाढ़त्वाभावः सुतरामेवेति भावः।

* द्विराषाढ़त्वाभावे चापरमपि दोषं दर्शयति 'स्नापावर्त्तप्रबोधादीनाञ्चेत्यादि'। सदृत्यरूपत्वेन वैधरूपत्वेन। देवशयनं लुप्येत इति, द्विराषाढ़त्वाभावादिति, प्रागुक्त-

रूपत्वेन मलिम्लुचेऽपि निषेधात्। उत्तरत्र द्विराषाढ़त्वे सति विधानाद्देवशयनं लुप्येत। यच्च सरूपकार्य्याभ्यां द्विराषाढ़मभिधाय षष्टिदिनत्वमुक्तं तदसम्बद्धम्; षष्ट्या तु दिवसैर्मास इत्यनेनाहोरात्रपरो वा दिवसशब्दस्तिथिपरो वेत्युभयथापि न षष्टिसंख्यतानियमः। चान्द्रस्य नियतत्रिंशत्तिथिसंख्यत्वेऽपि सौरस्य तदूनाधिकाहोरात्रसंख्यस्य सम्भवात्। वैशाखादिषु द्वात्रिंशत्तिथिभिरहोरात्रैर्वा प्रायशः सौरमासदर्शनात्। तस्माज्जितेन्द्रियोक्तोऽपि द्विराषाढ़ोऽसुन्दरतया मन्दैरिवाभिनन्दनीयः। विद्वद्भिस्तु यथोक्तसकलपर्य्यालोचनेनास्मदुपदर्शितद्विराषाढ़कल्पो निर्विकल्पमादरणीयः। अयमेवार्थो दीक्षितधवलैरप्युक्त इति *।

---

इत्येतद्विषयत्वादिति। तथा चायमाशयः—रात्रौ प्रतिपदि कर्कटसंक्रान्तिरित्यनेन, 'आसुरी रात्रिरत्यच' इत्यादिवचनेन विशेषविहितेतरकर्म्मणि रात्रेः पर्य्युदस्ततया रात्रिवृत्तिप्रतिपदः कर्म्मयोग्यता नास्तीति प्रतिपादितम्। तथाच—

'मासि संवत्सरे चैव तिथिद्वैधं यदा भवेत्।

तत्रोत्तरोत्तमा ग्रेया' इति वचने यत्तिथिद्वैधमुक्तं तद्विविधं, शुद्धाशुद्धभेदेनैकविधं, खण्डद्वयेनापरविधञ्च। खण्डद्वयमभिप्रेत्य निषेधयति एतद्विषयत्वाभावादिति। रात्रिवृत्तिप्रतिपदः कर्म्मायोग्यतया द्वैधानुदयात्। मिथुन एवाशुचौ मिथुनमलमास एवेत्यर्थः, शुचिमासेज्या आषाढ़मासेज्या, 'ज्यैष्ठ शुक्लः शुचिस्त्वयमाषाढ़े' इति कोषात्। द्विराषाढ़त्वाभावादिति। तथाच कार्य्यत एव जितेन्द्रियेण द्विराषाढ़त्वाङ्गीकारात् सौरमासेज्यायाः मलमासे निषेधाभावेन उत्तरमासि कर्त्तव्यत्वाभावात् मलमासे सत्यपि तत्कर्म्मणि द्विराषाढ़त्वाभावः सुतरामेवेति भावः।

* द्विराषाढ़त्वाभावे चापरमपि दोषं दर्शयति 'स्नापावर्त्तप्रबोधादीनाञ्चेत्यादि'। सदृत्यरूपत्वेन वैधरूपत्वेन। देवशयनं लुप्येत इति, द्विराषाढ़त्वाभावादिति, प्रागुक्त-

रूपत्वेन मलिम्लुचेऽपि निषेधात्। उत्तरत्र द्विराषाढ़त्वे सति विधानाद्देवशयनं लुप्येत। यच्च सरूपकार्य्याभ्यां द्विराषाढ़मभिधाय षष्टिदिनत्वमुक्तं तदसम्बद्धम्; षष्ट्या तु दिवसैर्मास इत्यनेनाहोरात्रपरो वा दिवसशब्दस्तिथिपरो वेत्युभयथापि न षष्टिसंख्यतानियमः। चान्द्रस्य नियतत्रिंशत्तिथिसंख्यत्वेऽपि सौरस्य तदूनाधिकाहोरात्रसंख्यस्य सम्भवात्। वैशाखादिषु द्वात्रिंशत्तिथिभिरहोरात्रैर्वा प्रायशः सौरमासदर्शनात्। तस्माज्जितेन्द्रियोक्तोऽपि द्विराषाढ़ोऽसुन्दरतया मन्दैरिवाभिनन्दनीयः। विद्वद्भिस्तु यथोक्तसकलपर्य्यालोचनेनास्मदुपदर्शितद्विराषाढ़कल्पो निर्विकल्पमादरणीयः। अयमेवार्थो दीक्षितधवलैरप्युक्त इति *।

---

इत्येतद्विषयत्वादिति। तथा चायमाशयः—रात्रौ प्रतिपदि कर्कटसंक्रान्तिरित्यनेन, 'आसुरी रात्रिरत्यच' इत्यादिवचनेन विशेषविहितेतरकर्म्मणि रात्रेः पर्य्युदस्ततया रात्रिवृत्तिप्रतिपदः कर्म्मयोग्यता नास्तीति प्रतिपादितम्। तथाच—

'मासि संवत्सरे चैव तिथिद्वैधं यदा भवेत्।

तत्रोत्तरोत्तमा ग्रेया' इति वचने यत्तिथिद्वैधमुक्तं तद्विविधं, शुद्धाशुद्धभेदेनैकविधं, खण्डद्वयेनापरविधञ्च। खण्डद्वयमभिप्रेत्य निषेधयति एतद्विषयत्वाभावादिति। रात्रिवृत्तिप्रतिपदः कर्म्मायोग्यतया द्वैधानुदयात्। मिथुन एवाशुचौ मिथुनमलमास एवेत्यर्थः, शुचिमासेज्या आषाढ़मासेज्या, 'ज्यैष्ठ शुक्लः शुचिस्त्वयमाषाढ़े' इति कोषात्। द्विराषाढ़त्वाभावादिति। तथाच कार्य्यत एव जितेन्द्रियेण द्विराषाढ़त्वाङ्गीकारात् सौरमासेज्यायाः मलमासे निषेधाभावेन उत्तरमासि कर्त्तव्यत्वाभावात् मलमासे सत्यपि तत्कर्म्मणि द्विराषाढ़त्वाभावः सुतरामेवेति भावः।

* द्विराषाढ़त्वाभावे चापरमपि दोषं दर्शयति 'स्नापावर्त्तप्रबोधादीनाञ्चेत्यादि'। सदृत्यरूपत्वेन वैधरूपत्वेन। देवशयनं लुप्येत इति, द्विराषाढ़त्वाभावादिति, प्रागुक्त-